ISSN : 2583-2271

Vol.-3 No.-1
Year-2023

# मनीषा

(संस्कृतविषयिणी शोधपत्रिका)

# MANĪṢĀ

(A Research Journal of Sanskrit)

DOUBLE-BLINDED PEER REVIEWED JOURNAL

स्नातकोत्तरसंस्कृतविभागः
सबं-सजनीकान्तमहाविद्यालयः
लुटुनिया, पश्चिममेदिनीपुरम्-৭২১১৬৬, पश्चिमबङ्गः

# मनीषा

## (संस्कृतविषयिणी शोधपत्रिका)

# MANĪṢĀ

## (A Research Journal of Sanskrit)

DOUBLE-BLINDED PEER REVIEWED JOURNAL

**ISSN: 2583-2271**

**Vol -3 No. 1**

**2023**

स्नातकोत्तरसंस्कृतविभागः
सबं-सजनीकान्तमहाविद्यालयः
लुटुनिया, पश्चिममेदिनीपुरम्, ७२११६६, पश्चिमबङ्गः

# मनीषा

## (संस्कृतविषयिणी शोधपत्रिका)


### मुख्यसम्पादकः

**अध्यापकः (डॉ.) तपनकुमारदत्तः** — अध्यक्षः, सबं-सजनीकान्तमहाविद्यालयः, विद्यासागरविश्वविद्यालयः

### सम्पादकः

**डॉ. भवशङ्करमुखार्जी** — सहाचार्यः, संयोजकः, स्नातकोत्तरसंस्कृतविभागः, सबं-सजनीकान्तमहाविद्यालयः, विद्यासागर-विश्वविद्यालयः

### सहसम्पादकौ

**डॉ. गगनचन्द्रदे** — सहाचार्यः, विभागाध्यक्षः (स्नातकोत्तरीयस्तरः), स्नातकोत्तरसंस्कृतविभागः, सबं-सजनीकान्त-महाविद्यालयः, विद्यासागरविश्वविद्यालयः

**डॉ. सुमन्तचौधुरी** — सहायकाध्यापकः, विभागाध्यक्षः (स्नातकस्तरः), स्नातकोत्तरसंस्कृतविभागः, सबं-सजनीकान्त-महाविद्यालयः, विद्यासागरविश्वविद्यालयः

### सम्पादकमण्डली

**अध्यापकः (डॉ.) बिष्णुपदमहापात्रः** — आचार्यः, न्यायविभागः, श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविश्वविद्यालयः, निउ-दिल्ली

**डॉ. केशवचन्द्रमहापात्रः** — अध्यक्षः, नरेन्द्रनाथसंस्कृतमहाविद्यालयः, प्रियबागः, ओडिशा

**डॉ. चन्दनभट्टाचार्यः** — आचार्यः, संस्कृतविभागः, गौरबङ्गविश्वविद्यालयः, मालदा, पश्चिमबङ्गः

**डॉ. सुशान्तकुमारराजः** — सहाचार्यः, केन्द्रियसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः, पुरी, ओडिशा

**डॉ. बुद्धेश्वरषडङ्गी** — सहाचार्यः, श्रीसीतारामवेदिक-आदर्शसंस्कृतमहाविद्यालयः, कलिकाता, पश्चिमबङ्गः

**डॉ. गोपीकृष्णन-रघुः** — सहायकाध्यापकः, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्, बेलुडमठम्, हाओडा, पश्चिमबङ्गः

# उपदेष्टृमण्डली

| | |
|---|---|
| **अध्यापकः (डॉ.) गोपबन्धुमिश्रः** | प्राक्तन उपाचार्यः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, गुजरातः |
| **अध्यापकः (डॉ.) गोपालमिश्रः** | भूतपूर्व उपाचार्यः, गौडबङ्गविश्वविद्यालयः अध्यापकचरः, संस्कृतविभागः, रवीन्द्रभारतीविश्व-विद्यालयः, कलिकाता, पश्चिमबङ्गः |
| **अध्यापकः (डॉ.) गोपालकृष्णदाशः** | अध्यापकचरः, उत्कलविश्वविद्यालयः, भुवनेश्वरः, ओडिशा |
| **अध्यापिका (डॉ.) सर्वाणी गाङ्गुली** | वरिष्ठा फेलो, ICSSR, संस्कृतविभागः, विद्यासागरविश्वविद्यालयः, मेदिनीपुरम्, पश्चिमबङ्गः |
| **अध्यापकः (डॉ.) गोविन्दचन्द्रकरः** | अध्यापकचरः, व्याकरणविभागः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी, ओडिशा |

# MANĪṢĀ

## (*A Research Journal of Sanskrit)*


## CHIEF EDITOR

**Professor (Dr.) Tapan Kr. Dutta** — Principal, Sabang Sajanikanta Mahavidyalaya, Vidyasagar University

## EDITOR

**Dr. Bhaba Shankar Mukherjee** — Associate Professor, Co-ordinator, P.G. Department of Sanskrit, Sabang Sajanikanta Mahavidyalaya, Vidyasagar University

## ASSOCIATE EDITORS

**Dr. Gagan Chandra Dey** — Associate Professor and H.O.D. (PG Section), P.G. Department of Sanskrit, Sabang Sajanikanta Mahavidyalaya, VU

**Dr. Sumanta Chowdhury** — Assistant Professor and H.O.D. (UG Section), P.G. Department of Sanskrit, Sabang Sajanikanta Mahavidyalaya, VU

## EDITORIAL BOARD

**Dr. Bishnupada Mahapatra** — Professor in Nyaya, Shri Lal Bahadur Shastri National Sanskrit University, New Delhi

**Dr. Keshab Chandra Mahapatra** — Principal, Narendranath Sanskrit College, Priyabag, Odisha

**Dr. Chandan Bhattacharyya** — Professor, Department of Sanskrit, Gour Banga University, Malda, W.B.

**Dr. Susanta Kumar Raj** — Associate Professor in Sahitya, Central Sanskrit University, Shri Sadashiv Campus, Puri, Orisha

**Dr. Buddheswar Sarangi** — Associate Professor, Sri Sitaram Vedic Adarsha Sanskrit Mahavidyalaya, Kolkata, W.B.

**Dr. Gopikrishnan Reghu** — Assistant Professor, Ramakrishna Mission Vivekananda Educational and Research Institution, Belur Math, Howrah, W.B.

# ADVISORY BOARD


| | |
|---|---|
| **Prof. (Dr.) Gopabandhu Mishra** | Formar Vice-Chancellor, Somnath Sanskrit University, Gujarat |
| **Prof. (Dr.) Gopal Mishra** | Former Vice-Chancellor, Gour Banga University, Professor, Department of Sanskrit, Rabindra Bharati University, Kolkata, W.B. |
| **Prof. (Dr.) Gopal Krishna Dash** | Ex Professor, Utkal University, Bhubaneswar, Odisha |
| **Prof. (Dr.) Sarbani Ganguly** | Senior Fellow, ICSSR, Department of Sanskrit, Vidyasagar University, Midnapore, W.B. |
| **Prof. (Dr.) Govinda Chandra Kar** | Ex. Professor in Vyakarana, Shri Jagannath Sanskrit University, Puri, Odisha |

# From the Desk of Chief Editor

Sanskrit language is considered as the mother of all languages. P.G. Department of Sanskrit of this institution is much more diligent to uphold the sanctity of the language

It's a fact that faculties of the Department are committed to publish the journal **MANĪṢĀ - A Research Journal of Sanskrit** uninterruptedly for the 3rd time with the 3rd volume for the session 2023. Scholars particularly neophytes, professors with highest repute and academicians contributed their enriched papers in it. It's our prime motto to encourage the neophytes to contribute their papers for future success in their academic achievement.

The journal **MANĪṢĀ -A Research Journal of Sanskrit** has already achieved wide publicity as well as popularity in the academic world. Faculties of the department devoted their time in collecting, proof reading, writing, editing of papers etc for the publication of the journal beyond their class teachings.

I am very much proud of this journal and expect the prosperity of the same. Moreover, I express my sincere thanks to the faculties of the Department for their pioneering work.

It is to be noted that subscribed papers are authenticated by the peer review team. Hence, I do wish the grand success of the journal through its acceptability.

Prof. (Dr.) Tapan Kr. Dutta
The Chief Editor
Manīṣā - A Research Journal of Sanskrit

# सम्पादकीयम्

गीर्वाणवाणी जगति प्रसिद्धा दिव्या सुबोधा सरलातिरम्या।
महाकविनामखिलोत्तमा सा सरस्वती भारतभूसुराणाम्॥

इत्थंभूतायाः सुरभारत्या माहात्म्यं तिरस्कृत्य वैदेशिकविज्ञानसभ्यतयोश्चाकचक्ये वयं दिग्भ्रान्ताः स्म, यस्येवफलमास्ते यदधुना वैदेशिकी शिक्षा- अविनयम् अधनताम् अयोग्यताम् अधार्मिकताम् असुखानि च प्रादुर्भाव्य तेषां स्वबुद्धि स्वसंस्कृतिञ्च तिरोभावयति, येन सम्पूर्णे भारतवर्षे अनाचार- भ्रष्टाचार- दुराचाराणामेव साम्राज्यमेधते। साम्प्रतिके काले विज्ञानक्षेत्रे महता विकासेन सह आचारव्यवहारस्य ह्रासोऽप्यभवत्। आध्यात्मिकभावनाशून्योऽद्यतनीयो मनुजः ईदृशः स्वार्थपरायणः संजातो यत् सः अनेकेषु पापकर्मसु प्रवृत्तः। स्वाधिकारप्राप्त्यर्थमन्याधिकारस्य हननमपि करोति। आधुनिकसमाजे तु भक्ष्याभक्ष्य-पापपूण्य-कर्तव्याकर्तव्यस्य विवेकं परित्यज्य मानवाः सर्वमनिष्टमाचरन्ति। अतः राष्ट्रस्य अखण्डता चरित्रमन्तरेण न रक्षितुं पार्यते। अस्य एकमेव कारणमस्ति संस्कृतशिक्षायाः अभावः।

वसुधैव कुटुम्बकमियं भावना भारतीयेषु पुनः प्रादुर्भवेत् एतदर्थं भारतीयप्राचीनग्रन्थानामध्ययनमध्यापनमावश्यकम्। यतोहि स्वकुटुम्बे समाजे राष्ट्रे च नागरिकः कथं व्यवहरेत् कथं स्वव्यक्तित्वं विकासयेत् कथं राष्ट्रनिर्माणाय तस्यापि योगदानं स्यात् इमे उच्चादर्शाः अस्माकं संस्कृतवाङ्मयेषु निर्देशिताः। तेषां पालनं तदैव संभवति यदास्माकं जीवने संस्कृतस्य अध्ययनं भवेत्। संस्कृतभाषायाः प्रचारप्रसारमाध्यमेन आधुनिकभारतस्य नागरिकाः संस्कारसम्पन्ना भविष्यन्ति।

मनीषाख्येयं शोधपत्रिका भवतां विद्वद्वरेण्यानां सहयोगेन स्वाविर्भावस्य तृतीये वर्षे प्रविश्य संस्कृतसरस्वत्याः प्रचारे प्रसारे स्वकीयं सहयोगं ददाति दास्यति अपि। पत्रिकायां वेदोपनिषद्व्याकरणज्योतिषन्यायमीमांसावेदान्तायुर्वेदकाव्यशास्त्रादिविषयकाः प्रथितविदुषां गवेषणात्मिकालेखाः समाविष्टाः।

ये विशेषज्ञा महता श्रमेण शोधपत्राणि समीक्ष्य लेखानां चयने साहाय्यमाचरन् तान् प्रति सम्पादकमण्डली धन्यवादं ज्ञापयति। एतस्याः पत्रिकाया वर्तमानस्वरूपप्रदाने परामर्शदातृसमितेः सदस्यैः बहुमूल्यपरामर्शादिभिः यद् योगदानं प्रदत्तं, तदर्थं वयं हार्दिकं कार्तज्ञं ज्ञापयामः। यैः शोधपत्रिकायै स्वकीयाः शोधनिबन्धाः प्रेषिताः तान् सर्वान् लेखकान् प्रति कृतज्ञतां प्रकटयामः। सबं-सजनीकान्तमहाविद्यालयस्याध्यक्षैः माननीयैः डॉ. तपनकुमारदत्तमहाभागैः शुभाशंसया वयं प्रोत्साहिता अनुगृहीताश्च , एतदर्थं ते धन्यवादार्हाः ।

संस्कृतानुसन्धानस्य सीम्नो विस्तारं विदधती शोधपत्रिकेयं संस्कृतशोधार्थिभ्यो नूतनानि क्षेत्राणि प्रत्यग्रशोधगवाक्षाँश्चोद्भावयेदित्यनुभविनां दोषज्ञानां सत्परामर्शास्सदैवास्माकं स्वागतार्हाः स्युः ।

विदुषां वशंवदः
सम्पादकः

# सूचीपत्रम्


| क्रमः | प्रबन्धाः | लेखकनाम | पत्रसंख्या |
|---|---|---|---|
| १ | श्रीगौडीयवैष्णवदर्शनदिशा प्रमेयतत्त्वविचारः | प्रो. बिष्णुपद-महापात्रः | १-८ |
| २ | नागेशाभिमतकरणतृतीयार्थविमर्शः | डॉ. नीरजकुमारभार्गवः | ९-१५ |
| ३ | ऋधातोः वैदिकरूपाणि | डॉ. सुबोधकुमारनन्दः | १६-१९ |
| ४ | पाणिनीयव्याकरणे विद्या | डॉ.गिरिधारी-पण्डा | २०-२५ |
| ५ | मीमांसादृष्ट्या अङ्गस्वरूपविमर्शः | डॉ. गोपीकृष्णन्-रघुः | २६-२८ |
| ६ | नैषधीयचरिते मानवीयचरितम् | डॉ. लक्ष्मीकान्त-षडङ्गी | २९-३३ |
| ७ | पाणिनीयव्याकरणे णत्वविधानसमीक्षायां निषेधविकल्पस्थलम् | डॉ. सुदीपमण्डलः | ३४-३८ |
| ८ | लोकोपकाराय श्रीमद्भगवद्गीता | शान्ति-घोषः | ३९-४५ |
| ९ | केनोपनिषदन्तर्गतयक्षोपाख्यानस्य माहात्म्यवर्णनपुरःसरं सामाजिकप्रेक्षणनिरूपणम् | सदानन्द-दासः | ४६-५० |
| १० | वर्तमानसमये औपनिषदीयशिक्षायाः प्रासङ्गिकता | पापिया-गँडाइ | ५१-५६ |
| ११ | उपनिषदीयसद्भावनायां मानविकतावादः | सत्येन्द्रनाथ-आदकः | ५७-६० |
| १२ | कौण्डभट्टदिशा शक्तिस्वरूपविचारः | डॉ. स्वर्णलता-पण्डा | ६१-६८ |
| १३ | शाब्दिकानां नामार्थः | उत्तम-घोषः | ६९-७५ |
| १४ | उपसर्गार्थचन्द्रिकायां संकलितानां किरातार्जुनीयस्थ-अनूपसृष्टप्रयोगाणां विश्लेषणम् | सुखदेव-साउः | ७६-८१ |
| १५ | श्रीभावबोधिनीदिशा "यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्" इति सूत्रे विध्यादिपदोपादानप्रयोजनम् | शुभङ्कर-वर्मणः | ८२-८५ |
| १६ | स्वतन्त्रा ऋषयः | कृष्णपद-रुइदासः | ८६-८९ |
| १७ | "भाव्यमानोऽण् सवर्णान्न गृह्णाति" "अर्थवद्ग्रहणे नानर्थकस्य" इत्यनयोः परिभाषयोः समीक्षात्मकमध्ययनम् | अमितकुमार-साउः | ९०-९४ |
| १८ | कारकाह्निके ध्रुवमपायेऽपादानम् | पिण्टु-दे | ९५-९७ |
| १९ | न्यायवैशेषिकदर्शनदिशा कारणतावादविमर्शः | विप्लव-सरकारः | ९८-१०३ |
| २० | न्यायनये मुक्तिवादस्य स्थानम् | दीपक-मण्डलः | १०४-१०७ |
| २१ | सादृश्यपदार्थविमर्शः | अलोक-सेनः | १०८-११४ |
| २२ | न्यायदर्शने आत्मतत्त्वमीमांसा | मिन्टु-दे | ११५-११७ |
| २३ | न्यायाभिमतानुमानप्रमाणस्वरूपविमर्शः | सुमनकल्यानसामन्तः | ११८-१२२ |
| २४ | न्यायमते हेत्वाभासविचारः | विश्वभूषण-मिश्रः | १२३-१२९ |
| २५ | न्याय-वैशेषिकयोः द्रव्यचिन्तनकौशलम् | शान्तनु-दासः | १३०-१३३ |
| २६ | प्रत्यक्षं ज्योतिषं शास्त्रम् | सत्यव्रत-वेहेरा | १३४-१३८ |
| २७ | आयुर्वेददृष्ट्या जीवनस्य संक्षिप्तवर्णनम् | सुशान्त-मण्डलः | १३९-१४२ |
| २८ | महाकविभासरूपकेषु आश्रमवर्णनम् | विनयकुमार-वरः | १४३-१४७ |

| क्रमः | प्रबन्धाः | लेखकनाम | पत्रसंख्या |
|---|---|---|---|
| २९ | पर्यावरण-रक्षणाय संस्कृत-महाकवीनां भावना | गौर-बेरा | **१४८-१५२** |
| ३० | प्राचीनसंस्कृतालङ्कारशास्त्रे शब्दप्राधान्यवादिनां मते काव्यशरीरविचारः | सत्येन-शीटः | **१५३-१६०** |
| ३१ | मनुसंहितायां मानववादः | नवकुमार-पण्डा | **१६१-१६३** |
| ३२ | संस्कृतोपलब्धौ बुद्धेः प्रभावः | चन्दन-पालः | **१६४-१६८** |

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# श्रीगौडीयवैष्णवदर्शनदिशा प्रमेयतत्त्वविचारः

**प्रो. बिष्णुपद-महापात्रः**
**आचार्यः, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**बी-४, कुतुबसांस्थानिकक्षेत्रम् ,नवदेहली – ११००१६**

**प्रबन्धसारः**

*वेदान्तपरम्परायाम् अचिन्त्यभेदाभेदस्य सिद्धान्तः अतीवरमणीयः। यतोहि एतेषां नये ब्रह्मशब्देन श्रीकृष्णस्य एव बोधो भवति। कृष्णस्तु अद्वयानन्दः, चिदानन्दः, सर्वेश्वरः, आत्मा, ब्रह्म, आत्मनः आत्मा, परमात्मा, सर्वाश्रयः, शक्तित्रयविशिष्टः, अनन्तस्वरूपविशिष्टश्च भवति। कृष्णे यदि भक्तिः स्यात् तर्हि कदापि अज्ञानस्य प्रसक्तिरेव नैव सम्भवति। अर्थात् कृष्णस्तु कर्तुमकर्तुमन्यथाकर्तुं समर्थो भवति। अतः एव- 'सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज'। तत्र चिच्छक्ति-स्वरूपशक्ति-अन्तरंगाशक्तिभेदेन शक्तिस्त्रिविधा भवति। तत्र बहिरंगा मायाशक्तिः जगतः कारणं भवति। तस्याः शक्तेः वैभवं तु अनन्तं भवति। जीवशक्तिस्तु तटस्थाख्या भवति, तस्याः शक्तेः अनन्तत्वं नास्ति। मुख्यतः शक्तेः त्रिविधत्वेऽपि भेदवशात् अनन्तत्वं स्वीक्रियते। अस्याः समग्रशक्तेः आश्रयः भगवान् कृष्ण एव। सच्चिदानन्दस्वरूपः भगवान् श्रीकृष्णचन्द्रः। आनन्दांशे ह्लादिनीशक्तिः। ह्लादिनीशक्तेः सारस्तु प्रेमभावः, महाभावस्तु सर्वेषु भावेषु श्रेयस्करः। सदंशे सन्धिनीशक्तिः। सा शुद्धसत्त्वप्रधानभूता। भगवति सत्तायां तस्याः शक्तेः विश्रामः। माता-पिता-गृहादिकं तु कृष्णवृत्तिशुद्धसत्त्वस्य विकारभूतं भवति। चिदंशे संविच्छक्तिः। कृष्ण-भगवत्-तत्त्वज्ञानादिकं तस्याः शक्तेः सारभूतं भवति। ब्रह्मज्ञानादिकं तु तस्याः परिवारो भवतीति। ह्लादिनीशक्तेः चरमोत्कर्षभूतः यो हि महाभावः स तु श्रीराधाकृष्णकान्ता एव । तथाहि-*

*"महाभाव स्वरूप श्रीराधाठाकुराणी ।*
*सर्वगुणखानि कृष्ण कान्ता शिरोमणि"*

*अस्य दर्शनस्य मुख्यं भाष्यं भवति गोविन्दभाष्यम्। तत्र भाष्ये सिद्धान्ते च यानि यानि तत्त्वानि विद्यन्ते तेषां स्वरूपमत्र समुपस्थापितं विद्यते।*

**कुञ्चीशब्दाः** -जीवस्तु कृष्णस्य दासः, विशिष्टपुरुषः ईश्वरः अवतारपदवाच्यः, आनन्दांशे ह्लादिनीशक्तिः, सदंशे सन्धिनीशक्तिः, चिदंशे संविच्छक्तिः चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

भारतीयदार्शनिकपरम्परायां बहूनि दार्शनिकप्रस्थानानि तत्तदाचार्यैः प्रस्थापितानि। तेषु दार्शनिकप्रस्थानेषु बहवः वादाः परिलक्ष्यन्ते। तथाहि- वैदिकदार्शनिकेषु सांख्यैः पञ्चविशतितत्त्वमाधारीकृत्य तत्र प्रकृतेः जगत्कारणत्वमभ्युपेत्य सत्कार्यवादः व्यवस्थापितः। योगदार्शनिकैः सांख्याभिमततत्त्वेषु ईश्वरतत्त्वं संयुज्य सत्कार्यवादः परिणामवादश्च संस्थापितः। नैयायिकैः षोडशपदार्थतत्त्वमङ्गीकृत्य वैशेषिकैश्च सप्तपदार्थवादं स्वीकृत्य आरम्भवादः असत्कार्यवादः जीवेश्वरयोश्च द्वैतवादः व्यवस्थापितः। वेदान्तप्रस्थानेषु आचार्याणां लक्ष्यैकत्वेऽपि प्रस्थानभेदेन बहवः वादाः दरीदृश्यन्ते। आचार्यशंकरमते अद्वैतवादः, श्रीरामानुजाचार्यमते विशिष्टाद्वैतवादः, मध्वाचार्यमते द्वैतवादः, बल्लभमते शुद्धाद्वैतवादः, निम्बार्कमते द्वैताद्वैतवादः, श्रीचैतन्यमते अचिन्त्यभेदाभेदवादश्च प्रसिद्ध इति इह जगतितले अवलोक्यते।

तत्र अचिन्त्यभेदाभेदवादस्य प्रतिष्ठापकाचार्यस्य श्रीचैतन्यमहाप्रभोः जन्म- ढाकान्तर्गतश्रीहट्टमण्डले फाल्गुनमासस्य दोलपूर्णिमायां शुभमुहूर्ते १४८५-ख्रीष्टाब्दे अभवत्। श्रीचैतन्यमहाप्रभोः पितुर्नाम जगन्नाथमिश्रः मातुः नाम शचीदेवी च आसीत्। बाल्यकाले शिक्षार्जनाय नवद्वीपं प्राप्तवान्निति प्रवादः श्रूयते। यद्वा भवतु तेषां कृष्णभक्तिः कृष्णनामसङ्कीर्तनमेव मुख्यं लक्ष्यमासीत्। काश्यां स्वीयशिष्यं श्रीमन्तं सनातनं प्रति तत्त्वोपदेशवेलायां जीव-जगद्-ईश्वर-तत्त्वादिविषयकं भक्ति-उपासनाप्रणाली-

विषयकञ्च उपदेशं प्रदत्तवान्। आदौ शिष्यस्य जिज्ञासा आसीत् विश्वस्य मूलकारणं किम् इति, तस्य जिज्ञासाया उपशमनार्थं श्रीचैतन्यमहाप्रभुपादैरुक्तं यत्-

**“ब्रह्म हइते जन्मे विश्व ब्रह्मेते जीवय।**
**पुनरपि सेइ ब्रह्मे हये याय लय॥”**

(चैतन्यचरितामृतम्)

अर्थाद् ब्रह्मणः विश्वस्योत्पत्तिः जीवस्योत्पत्तिः लयश्च भवति। पुनश्च जिज्ञासा उदेति- यदि परब्रह्म-परमात्मा-भगवान् इति एतानि त्रीणि तत्त्वानि अभेदतया वस्तुमात्रस्य बोधकं भवति तर्हि पृथक्-संज्ञाकरणे को हेतुः। अस्याः शंकायाः समाधानार्थं निगदति-

**“ज्ञान योग भक्ति तिन साधनेर वशे।**
**ब्रह्म आत्मा भगवान् त्रिविध प्रकाशे॥”**

(चैतन्यचरितामृतम्)

अर्थात् साधनवैकल्यवशात् साध्यस्य तत्त्वत्रयस्य वैकल्यमस्माभिः परिलक्ष्यते। यदि एतादृशी स्थितिः तर्हि जीवस्य कि स्वरूपमिति जिज्ञासायामुच्यते श्रीचैतन्यमहोदयैः-

**“जीवेर स्वरूप कृष्णेर नित्यदास।**
**कृष्णेर तटस्था शक्ति भेदाभेद प्रकाश।**
**सूर्यांश किरण येन अग्निज्वालाचय।”**

(चैतन्यचरितामृतम्)

अर्थात् जीवस्तु कृष्णस्य दासः। कृष्णवृत्तिर्या तटस्था शक्तिर्भवति तद्बलात् भेदाभेदस्य प्रकाशो भवति। सूर्यस्य अंशविशेषः किरणः अग्नेः ज्वालादिकञ्च यथा भेदाभेदरूपेण गृह्यते तथैव तटस्थशक्तिबलात् जीव-कृष्णयोः भेदाभेदत्वं प्रतीयते। यदि च जीवः परब्रह्मणः परमात्मनः भगवतः कृष्णस्य नित्यदासांशो भवति चेत्तर्हि जीवानां त्रितापहेतुः कः? मुक्तिलाभश्च कथं भवति इति जिज्ञासायाः समाधानं प्रस्तौति-

**“कृष्ण भुलि सेइ जीव अनादि बहिर्मुख।**
**अतएव माया तारे देय संसार दुःख॥**
**कभु स्वर्गे उठाय कभु नरके डुवाय।**
**दण्ड्य जने राजा येन नदीते चुबाय।**
**साधु-शास्त्र कृपाय यदि कृष्णोन्मुख हय।**
**सेइ जीव निस्तारे माया ताहारे छाडय॥**

(चैतन्यचरितामृतम्)

यदा जीवः कृष्णतत्त्वं परित्यज्य बाह्यवासनासम्पृक्तो भवति तदा माया तं सांसारिकदुःखं प्रयच्छति। स्वस्वकर्मवशात् जीवः स्वर्गं नरकं वा प्राप्नोति, यथा राजा अपराधविशिष्टं जनं दण्डयति ताडयति च। यदि शास्त्रानुमतं साधुसंगतञ्च अङ्गीकृत्य जीवः कृष्णोन्मुखी भवति तर्हि तं माया परित्यजति। प्रमाणं तु भगवद्गीतायां स्वयं श्रीकृष्णचन्द्रः वक्ति-

**“दैवी ह्येषा गुणमयी मम माया दुरत्यया।**
**मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते॥”**

(गीता. ७/१४)

**“ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।**
**मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥”**

(गीता. ४/११)

**“सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज।**
**अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥”**

(गीता.१८/६६)

एतेन ज्ञायते यदि कृष्णे भक्ति-प्रपत्ति-शरणागति-मतयश्च भवेयुः तर्हि मायातः विमुक्तिः, विमुक्त्या च परमधाम्नः स्वर्गस्य प्राप्तिर्भवति। येन न पुनरपि जननं न पुनरपि मरणं सम्भवति। तादृशं सुखं स्वर्गं कृष्णभक्त्या कृष्णनामसङ्कीर्तनेन च प्राप्तुं शक्यते। स्वर्गस्तु-

**“यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्।**
**अभिलाषोपनीतं च तत् सुखं स्वःपदास्पदम्॥”**

अस्तु तर्हि जगतः उत्पत्तिः कथं भवतीति शंकायामुच्यते-

**“मायाद्वारे सृजे तिहो ब्रह्माण्डेर गण।**
**जडरूपा प्रकृति नहे ब्रह्माण्डकारण।**
**जड हैते सृष्टि नहे ईश्वर शक्तिविने॥**

(चैतन्यचरितामृतम्)

अर्थात् ब्रह्माण्डगणाः ब्रह्ममायाबलेन इदं जगत् सृजति, ब्रह्म जगतः कारणम्। जडरूपा प्रकृतिः जगतः कारणं नास्ति। ईश्वरशक्तिमन्तरा जडात् कदापि सर्गः नैव सम्भवति। यदि न्यायशास्त्रं पश्यामः तर्हि इत्थमपि प्रकटितं भवति परमाणुतः जगतः सृष्टिः, परमाणुश्च जडो भवति। ईश्वरज्ञानेच्छाकृतिवशात् परमाणौ कर्म, तेन द्व्यणुकादिक्रमेण जगदुत्पत्तिरिति मन्ये न्यायशास्त्रस्य दृष्टिः परिलक्ष्यते।

अवतारतत्त्वं किमिति जिज्ञासायामुच्यते-

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

**"सृष्टि हेतु येइ मूर्त्ति प्रपञ्चे अवतरे।**
**सेइ ईश्वरमूर्त्ति अवतार नाम धरे॥**
**मायातीत परव्योमे सवार अवस्थान।**
**विश्वे अवतरि धरे अवतार नाम॥**
**लीलावतार कृष्णेर ना याय गगन।**
**प्रधान करिया करि दिग्-दरशन॥**
**मत्स्य, कुर्म, रघुनाथ, नृसिंह, वामन।**
**बराहादि लेखा याय पुराण गणन॥"**

(चैतन्यचरितामृतम्)

अर्थात् जगतः सर्जनाय कल्याणाय धर्मसंरक्षणाय धर्मसंस्थापनाय यां मूर्त्तिम् अवधार्यः य ईश्वरः संसारे अवतरति स एव विशिष्टपुरुषः ईश्वरः अवतारपदवाच्य इति उच्यते। उक्तं गीतायां-

**"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।**
**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥**
**परित्राणाय साधूनां विनाशाय च दुष्कृताम्**
**धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥**

(गीता. ४/७-८)

पुनश्च शंका उदेति कृष्णस्य स्वरूपतत्त्वं किमिति, तदा उच्यते-

**"कृष्णेर स्वरूप विचार शुन सनातन।**
**अद्वय ज्ञानतत्त्व ब्रह्मे व्रजेन्द्र नन्दन॥**
**सर्व आदि सर्व अंशी किशोर शेखर।**
**चिदानन्द देह सर्वाश्रय सर्वेश्वर॥**
**स्वयं भगवान् कृष्ण गोविन्द पर नाम।**
**सर्वैश्वर्य पूर्ण यॉँर गोलक नित्यधामे॥**
**ज्ञान-योग-भक्ति तिन साधनेर वशे।**
**ब्रह्म आत्मा भगवान् त्रिविध प्रकाशे॥**
**ब्रह्म अंगकान्ति ताँर निर्विशेष प्रकाशे।**
**सूर्य येन चर्मचक्षे ज्योतिर्मय भासे॥**
**परमात्मा यिहो तिहो कृष्णेर एक अंश।**
**आत्मार आत्मा हन कृष्ण सर्व अवतंश॥**
**भक्ते भगवानेर अनुभव पूर्णरूप।**
**एकइ विग्रहे ताँर अनन्त स्वरूप॥**
**कृष्ण एक सर्वाश्रय, कृष्ण सर्वधाम।**
**कृष्णेर शरीरे सर्व विश्वेर विश्राम॥**
**कृष्णेर स्वरूप आर शक्तित्रय ज्ञान।**
**यार हय तार नाहि कृष्णेते अज्ञान॥"**

(चैतन्यचरितामृतम्)

अर्थात् कृष्णस्तु अद्वयानन्दः, चिदानन्दः, सर्वेश्वरः, आत्मा, ब्रह्म, आत्मनः आत्मा, परमात्मा, सर्वाश्रयः, शक्तित्रयविशिष्टः, अनन्तस्वरूपविशिष्टश्च भवति। कृष्णे यदि भक्तिः स्यात् तर्हि कदापि अज्ञानस्य प्रसक्तिरेव नैव सम्भवति। अर्थात् कृष्णस्तु कर्तुमकर्तुमन्यथाकर्तुं समर्थो भवति। अतः एव- 'सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज।'

सर्वशक्तिसम्पन्नः यदि कृष्णो भवति तर्हि शक्तित्रयं किमिति जिज्ञासायामुच्यते-

**"चिच्छक्ति स्वरूपशक्ति अन्तरंगा नाम।**
**ताहार वैभवानन्त वैकुण्ठादिधाम॥**
**मायाशक्ति वहिरंगा जगत्कारण।**
**ताहार वैभवानन्त ब्रह्माण्डेर गण॥**
**जीवशक्ति तटस्थाख्य नाहि यार अन्त।**
**मुख्य तिन शक्ति तार विभेद अनन्त॥**
**एइ त स्वरूपगण आर तिन शक्ति।**
**सवार आश्रय कृष्ण कृष्णे सव स्थिति॥"**

(चैतन्यचरितामृतम्)

अर्थात् चिच्छक्ति-स्वरूपशक्ति-अन्तरंगाशक्तिभेदेन शक्तिस्त्रिविधा भवति। तत्र बहिरंगा मायाशक्तिः जगतः कारणं भवति। तस्याः शक्तेः वैभवं तु अनन्तं भवति। जीवशक्तिस्तु तटस्थाख्या भवति, तस्याः शक्तेः अनन्तत्वं नास्ति। मुख्यतः शक्तेः त्रिविधत्वेऽपि भेदवशात् अनन्तत्वं स्वीक्रियते। अस्याः समग्रशक्तेः आश्रयः भगवान् कृष्ण एव।

स्वरूपशक्तिविषये इत्थं प्रवदन्ति-

**"सच्चिदानन्द पूर्ण कृष्णेर स्वरूप।**
**एकइ चिच्छक्ति ताँर धरे तिनरूप॥**
**आनन्दांशे ह्लादिनी सदंशे सन्धिनी।**
**चिदंशे संवित् यारे ज्ञान करि मानि॥**
**सन्धिनीर सार अंश शुद्धसत्त्वनाम।**
**भगवानेर सत्ता हय याहाते विश्राम॥**
**मातापिता स्थान-गृह शय्यासन आर।**
**एसव कृष्णेर शुद्ध सत्त्वेर विकार॥**
**कृष्ण-भगवत्-तत्त्वज्ञान संवितेर सार।**

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

**ब्रह्मज्ञानादिक सव तार परिवार॥
ह्लादिनीर सार प्रेम प्रेम सार भाव।
भावेर पराकाष्ठा महाभाव नाम॥"**

(चैतन्यचरितामृतम्)

अभिप्रायस्तु सच्चिदानन्दस्वरूपः भगवान् श्रीकृष्णचन्द्रः। आनन्दांशे ह्लादिनीशक्तिः। ह्लादिनीशक्तेः सारस्तु प्रेमभावः, महाभावस्तु सर्वेषु भावेषु श्रेयस्करः। सदंशे सन्धिनीशक्तिः। सा शुद्धसत्त्वप्रधानभूता। भगवति सत्तायां तस्याः शक्तेः विश्रामः। मातृ-पितृ-गृहादिकं तु कृष्णवृत्तिशुद्धसत्त्वस्य विकारभूतं भवति। चिदंशे संविच्छक्तिः। कृष्ण-भगवत्-तत्त्वज्ञानादिकं तस्याः शक्तेः सारभूतं भवति। ब्रह्मज्ञानादिकं तु तस्याः परिवारो भवतीति। ह्लादिनीशक्तेः चरमोत्कर्षभूतः यो हि महाभावः स तु श्रीराधाकृष्णकान्ता एव। तथाहि-

**"महाभाव स्वरूप श्रीराधाठाकुराणी।
सर्वगुणखानि कृष्ण कान्ता शिरोमणि।"**

(चैतन्यचरितामृतम्)

श्रीराधा-श्रीकृष्णयोः भेदोऽस्ति न वेति जिज्ञासायामुच्यते नास्ति कोऽपि भेदः। यतः श्रीराधा पूर्णशक्तिरूपा, कृष्णस्तु पूर्णशक्तिमान् भवति। अनयोः भेदाभावे शास्त्रमेव प्रमाणम्। यथा मृगमदगन्धादिवत् अग्नि-ज्वालयोरभेदवच्च। लीलारसवशाद् द्वैतत्वमुपजायते। वास्तविकस्तु अभेद एव। तथाहि-

**"राधा पूर्णशक्ति कृष्ण पूर्ण शक्तिमान्।
दुइ वस्तु भेद नाहि शास्त्र परमान्॥
मृगमद ताँर गन्ध यैछे अविच्छेद।
अग्निज्वालाते यैछे नाहि कभु भेद॥
राधाकृष्ण ऐछे सदा एकइ स्वरूप।
लीलारस आस्वादित धरे दुइरूप॥"**

(चैतन्यचरितामृतम्)

वस्तुतः एतावत् पर्यन्तं श्रीकृष्ण-श्रीराधातत्त्वयोः साम्यमुपपादितं चेत्तर्हि वस्तुनः ज्ञानं कथं सम्भवति। यतः लक्षणप्रमाणाभ्यां हि वस्तुनिर्णयो भवति। तदर्थमित्थं वक्तुं शक्यते यत् स्वरूपलक्षणं तटस्थलक्षणं चेति लक्षणस्य द्वैविध्यं शास्त्रेषु श्रुयते। आकृति-प्रकृतिस्वरूपं तु स्वरूपलक्षणं भवति। कार्येण यद् ज्ञानं भवति तत्तु तटस्थलक्षणं भवति। तथा च **"सत्यं ज्ञानमनन्तं ब्रह्मः"** इति माण्डूक्योपनिषदि। **"यतो वा इमानि भूतानि जायन्ते"** इति श्रुतिः तैत्तिरीयोपनिषदि (३/१)। **"जन्माद्यस्य यतः"** इति ब्रह्मसूत्रे (१/१/२)। तथाहि-

**"स्वरूप लक्षण आर तटस्थ लक्षण।
एइ दुइ लक्षणे वस्तु ज्ञाने मुनिगण॥
आकृति प्रकृति स्वरूप स्वरूप लक्षण।
कार्यद्वारा ज्ञान हय तटस्थ लक्षण॥"**

(चैतन्यचरितामृतम्)

यदि च लक्षणस्य एतादृशी स्थितिर्विद्यते तर्हि भगवद्भक्तेः स्वरूपं किमिति जिज्ञासायामुच्यते-

**"श्रवणादि क्रिया तार स्वरूप लक्षण।
तटस्थ लक्षण उपजाय प्रेमधन॥
नित्यसिद्ध कृष्णप्रेम साध्य कभु नय।
श्रवणादि शुद्धचित्ते करये उदय॥"**

(चैतन्यचरितामृतम्)

एतेन ज्ञायते यत् श्रवणादिभक्तिक्रिया स्वरूपलक्षणं भवति। शास्त्रेषु श्रवणं कीर्तनं स्मरणं पादसेवनम् अर्चनं वन्दनं दास्यं सख्यम् आत्मनिवेदनञ्चेति नवधा भक्तयः सन्ति। तत्र श्रवणं कीर्तनं स्मरणञ्चेति वाचनिकं भवति। पादसेवनमर्चनं वन्दनञ्चेति कायिकं भवति। दास्यं सख्यम् आत्मनिवेदनञ्चेति मानसिकं भवति। नित्यसिद्धं कृष्णप्रेम कदापि साध्यं न भवतीति उक्तम्। एतद्विषये इत्थमवधेयं यत्- चेष्टाप्रयत्नादिक्रियाविशेषेण अभीष्टतत्त्वस्य प्राप्तेः साधनमेव साधना। नित्यसिद्धवस्तुनः आन्तरिकोपलब्धिरेव तस्य साधनासिद्धः। तथाहि-

**"कृतिसाध्या भवेत् साध्य-भावा सा साध्यनाभिधा।
नित्यसिद्धस्य भावस्य प्राकट्यं हृदि साध्यता॥"**

(भक्तिरसामृतसिन्धुः)

प्रायशः उपर्युक्तविषयं मनसि निधाय जीवगोस्वामिपादः तत्त्वसन्दर्भग्रन्थस्य मङ्गलाचरणमित्थं प्रस्तौति-

**"यस्य ब्रह्मेति संज्ञां क्वचिदपि निगमे याति चिन्मात्रसत्ताप्यंशो
यस्यांशकैः स्वैर्विभवति वशयन्नेव मायां पुमांश्च।
एकं यस्यैव रूपं विलसति परमव्योम्नि नारायणाख्यं
स श्रीकृष्णो विधत्तां स्वयमिह भगवान् प्रेम तत्पादभाजाम्॥"** (तत्त्वसन्दर्भः- ८)

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

यस्य चिन्मात्रसत्ता ब्रह्मेति संज्ञां याति नियतमाश्रयमिति। चित् ज्ञानं, तन्मात्रं तन्मयं स्वस्वरूपभूतज्ञानवद्वस्तुसत्ता, स्वस्वरूपभूतसत्पदप्रवृत्तिनिमित्तवदिति। सत्यं ज्ञानमनन्तं ब्रह्म इति श्रुतेः। तथा च श्रीकृष्णः स्वस्वरूपभूतश्रीविग्रहधारि ब्रह्मेति भावः। अत्र ब्रह्मपदं ज्ञानपरं ज्ञानिपरञ्च। धर्म-धर्मिणोरभेदात् प्रत्येकं तयोर्भेदाच्च। एवं तच्छरीरावशिष्टस्यापि ब्रह्मत्वं विशिष्टस्य विशेष्यानतिरेकात्।

एवञ्च श्रीकृष्णाख्यपरब्रह्मणः सत्तायाः सद्भावे प्रत्यक्षानुमानोपमान-शब्दार्षार्थापत्त्यनुपलब्धि-सम्भवैतिह्यचेष्टेति दशप्रमाणानां भ्रम-प्रमाद-विप्रलिप्सा (वञ्चनविषयकेच्छा) करणापाटवेति (इन्द्रियाणामपटुता) चतुष्टयदोषदुष्टत्वाद् अलौकिकाचिन्त्यवस्तुस्पार्शने उपर्युक्तदशप्रमाणानि अयोग्यमावहन्ति। तथाहि- **“तत्र पुरुषस्य भ्रमादिदोष-चतुष्टयदुष्टत्वात् सुतरामलौकिकाचिन्त्यस्वभाववस्तुस्पर्शा-योग्यत्वाच्च तत्प्रत्यक्षादीन्यपि सदोषाणि”** इति (तत्त्वसन्दर्भः पृ. ९)। अतः अचिन्त्यभूतस्य अलौकिकपदार्थतत्त्वस्य ज्ञानार्थं वेदस्यैव प्रामाण्यं स्वीक्रियते। सर्वातीत-सर्वाश्रय-सर्वाचिन्त्य-आश्चर्यस्वभाववस्तुतत्त्वज्ञानार्थम् अप्राकृतवाङ्मये वेदस्यैव प्रमाणत्वमिति अस्माकमभिमतम्। तथा च वक्ति जीवगोस्वामिपादः- **“ततस्तानि न प्रमाणानीत्यनादिसिद्ध-सर्वपुरुषपरम्परासु सर्वलौकिकालौकिकज्ञान-निदानत्वादप्राकृतवचनलक्षणो वेद एवास्माकं सर्वातीत-सर्वाश्रय-सर्वाचिन्त्याश्चर्यस्वभावं वस्तु विविदिषतां प्रमाणम्”** इति (तत्त्वसन्दर्भः १०)। तत्र श्रुतिः प्रमाणं भवति- **“तर्काप्रतिष्ठानात्”** (ब्र.सू. २/१/११), **“अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्”** (म. भा. भी. प. ५/२२), **“शास्त्रयोनित्वात्”** (ब्र.सू. १/१/३), **“श्रुतेस्तु शब्दमूलत्वात्”** (ब्र.सू. २/१/१७)।

**“पितृ-देव-मनुष्याणां वेदश्चक्षुस्तवेश्वरः।**
**श्रेयस्त्वनुपलब्धेऽर्थे साध्य-साधनयोरपि॥”**
(श्रीमद्भाग. ११/१०/४)

उपर्युक्तप्रमाणं प्रदर्श्य वेदप्रमाणस्य अनुमतत्वं स्वीकृतं विद्यते।

जीवगोस्वामिपादस्याभिमतं मनसि निधाय श्रीमद्बलदेवविद्याभूषणपादैरपि स्वीयवेदान्तस्यमन्तक-ग्रन्थे उच्यते- **“तदेवं सर्वतः श्रेष्ठैः शब्दस्य स्थिते तत्त्वनिर्णायकस्तु श्रुतिलक्षण एव न त्वार्षलक्षणोऽपि नावेदविन्मनुते तं बृहन्तमौपनिषदं पुरुषं पृच्छामीत्यादि”** श्रुतिभ्यः ऋषीणां मिथो विवाददर्शनेन तद्वाक्यानां तन्निर्णायकत्वासम्भवात्, नित्यश्रुतिशब्दः **“वाचा विरूप नित्ययेति श्रवणात्, अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा। आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।” इत्यादिस्मरणाच्च भ्रमादिदोषविशिष्टजीवकर्तृकत्व-विरहान्निर्दोषश्च स एव भवतीति”** (वेदान्तस्यमन्तक-१५)। श्रुतेः यदि प्रमाणत्वमेव स्वीक्रियते तर्हि मानाधीना मेयसिद्धिर्भवतीति नियमेन एतेषां नये कानि प्रमेयाणि इति जिज्ञासायामुच्यते- ईश्वरजीवप्रकृतिकालकर्मभेदात् पञ्च प्रमेयाणि भवन्ति। **“अथ प्रमेयाणि निर्णीयन्ते। तानि च पञ्चधा, ईश्वरजीवप्रकृतिकालकर्मभेदात्”** इति (वेदान्तस्यमन्तक- २/१)।

वस्तुतः प्रमाविषयः प्रमेयः। यथार्थज्ञानं प्रमा भवति। याथार्थ्यं च वास्तववस्तुविशेषः। वस्तुशब्देन वस्त्वद्वितीयं “तन्निष्ठमि”त्यादिश्रुतिबलात् तत्त्वं यज्ज्ञानमद्वयमित्यादिश्रुतिबलात् **“एकमेवाद्वितीयम्”** इत्यादिश्रुतिप्रमाणबलात् परब्रह्म एव वस्तु भवति। आदिमध्यावसाने यः स्थिरो भवति सः वस्तुशब्देन प्रतिपाद्यो भवति। तथा च श्रुतिः- **“सदेव सौम्य इदमग्रमासीद्”** (छा. ६/२/१) **“अहमेवासमवाग्रे”** इति। वस्तुनः अंशविशेषः वास्तवाभिधेयो भवति। जीवः, वस्तुनः शक्तिः माया, वस्तुनः कार्यं जगत्। एतानि वास्तविकानि भवन्ति। एतादृशं वास्तववस्तुविषयकं ज्ञानं प्रमेयं भवति।

बलदेवविद्याभूषणैः प्रमेयस्य पञ्चविधत्वं यत् स्वीकृतं तत् तथा श्रीधरस्वामिवर्यैः नाङ्गीकृतम्। तेषां मते ईश्वर-जीव-माया-जगदिति चत्वारि तत्त्वानि भवन्ति। अनयोः संख्याविरोधे सामञ्जस्यम् इत्थं भवति- जगत्सृष्टिस्थितिप्रलयकारिणी श्रीभगवद्बहिरंगशक्तिः

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

माया भवति। मायाशक्तेरंशद्वयम्। गुणात्मकः निमित्तांशः अपरञ्च द्रव्यरूपः उपदानांशः। मायायाः निमित्तांशः कालः कर्म च। उपादानांशस्तु प्रकृतिरेव। अतः अनयोः मतैक्यम्। श्रीधराचार्यनये वस्तुनः वास्तविकं कार्यं जगद् भवति। जगतः प्रमेयत्वेनाङ्गीकारे आवश्यकता नास्ति। यतः ईश्वरस्य कार्यं जगद् भवति। जीव-प्रकृति-काल-कर्माणि आहत्य जगत्कार्याणि भवन्ति। जीव-प्रकृति-कालादिभिन्नस्वतन्त्रजगत्कार्याभावात्। **"यद्विज्ञानेनाखिलं विज्ञातं भवतीति"** श्रौतबलात् **"कारणज्ञानात् कार्यज्ञानम्"** न्यायाच्च जगदन्तर्गतत्वेन जीवादीनां ग्रहणसम्भवात् जगतः प्रमेयान्तरत्वं नास्तीति। तथा चोक्तं- **"धर्मः प्रोज्झित कैतव"** इति भागवतीयपद्यटीकायां **"वास्तवं परमार्थभूतं वस्तु यद्वा वास्तवशब्दे वस्तुनोऽशो जीवः वस्तुनः शक्तिमाया च वस्तुनः कार्यं जगच्च तत्सर्वं वस्त्वेव"**।

तत्रेदमवधेयं यत् प्रमेयस्य पञ्चविधत्वनिर्णयेऽपि ईश्वरस्य सर्वथा स्वातन्त्र्यं जीवादेश्च सर्वथा ईश्वराधीनत्वम्। अतः सर्वप्रथमतया ईश्वरतत्त्वस्य निरूपणं करोति बलदेवः- **"विभुः विज्ञानानन्दः सर्वज्ञादि गुणवान् पुरुषोत्तम ईश्वरः"** (वेदान्तस्यमन्तक-२)। तत्र श्रुतिवाक्यं प्रदर्शयति- **"विज्ञानमानन्दं ब्रह्म"**, **"सत्यं ज्ञानमनन्तं ब्रह्म"**, **"यः सर्वज्ञः स सर्ववित्"**, सत्यकामः सत्यसङ्कल्पः स उत्तम पुरुष इति श्रवणात्।

(स्मृतिश्च) **"स च सर्वेषां स्वामी, जनिविनाशशून्यः"**। **"तमीश्वराणां परमं महेश्वरं तं दैवतानां परमञ्च दैवतम्। पति पतीनां परमं परस्ताद विदाम देव भुवनेशमीड्यमि"**ति। सकारणानां कारणाधिपाधिपो, न चास्य कश्चिज्जनिता न चाधिप इति च श्रवणात्।

अभिप्रायस्तु- **"विभुः विज्ञानानन्दः सर्वज्ञादिगुणवान् पुरुषोत्तम ईश्वरः"** इति ईश्वरलक्षणे विभुत्वादिकं विशेषणं किमर्थमिति जिज्ञासायामुच्यते विभुत्वमात्रस्य ईश्वरलक्षणत्वे न्यायाभिमताकाशादेः सांख्याभिमतप्रकृतेश्च विभुत्वात् तत्रेश्वरलक्षणस्यातिव्याप्तिः। अतः तदतिव्याप्तिवारणाय विज्ञानानन्दः इति पदमुपात्तम्। जीवानां विज्ञानानन्दत्वेऽपि तेषामणुत्वात् तत्रातिव्याप्तिवारणाय विभुपदमुपात्तम्। विभुत्वे सति विज्ञानानन्दत्वमिति ईश्वरलक्षणस्वीकारे अद्वैताभिमतनिर्विशेष-ब्रह्मणि अतिव्याप्तिरित्यतः सार्वज्ञ्यादिगुणवान् इत्युक्तम्। विभुत्वे सति विज्ञानानन्दत्वे सति सार्वज्ञ्यादिगुणवान् इति ईश्वरलक्षणस्वीकारे न्यायवैशेषिकाभिमत-ईश्वरेऽतिव्याप्तिः, तद्वारणाय पुरुषोत्तम इति पदमुपात्तम्। यतः न्यायवैशेषिकमते नित्यविग्रहस्यास्वीकारात्। पुरुषोत्तमपदेन तु सर्वोत्तमपुरुषविग्रहस्य ग्रहणं भवतीति। पुरुषोत्तममात्रस्योल्लेखे पुण्यकर्मणः जीवस्य ग्रहणं भवति, एवञ्च सार्वज्ञ्यादिगुणवान् पुरुषोत्तमः, विज्ञानानन्दः सार्वज्ञ्यादिगुणवान् पुरुषोत्तम इत्युच्यते चेत्तर्हि प्राप्तमुक्तजीवे नित्यमुक्तजीवेऽतिव्याप्तिः तद्वारणाय विभुपदमिति।

पुनश्च **"वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्। ब्रह्मेति परमात्मेति भगवान्निति शब्द्यते॥"** इति श्रीमद्भागवतीयसिद्धान्तानुसारेण अद्वयज्ञानलक्षणपरतत्त्वं तु ब्रह्मणि परमात्मनि भगवति लक्षितं भवति। एतेन पञ्चतत्त्वेषु परतत्त्वस्य एकमात्रेश्वरस्य लक्षणदर्शनात् न्यूनतादोषः। परतत्त्वस्य ईश्वरस्य स्वीकारात् ब्रह्मणि परमात्मनि परतत्त्वे अव्याप्तिः। वस्तुतः विचार्यते कर्त्तुमकर्त्तुमन्यथाकर्त्तुं समर्थः स्वतन्त्रः ईश्वरो भवति। ईश्+वर ईश्वरः। शक्तिमत्तत्त्वमेव ईश्वरः। लक्षणे सार्वज्ञ्यादिगुणवान् पुरुषोत्तम इति वाक्येन शक्तिमत्तत्त्वमेव लक्षितं भवति।

यतः ब्रह्मशब्दस्यार्थः **"बृंहनत्वाद्बृहत्त्वाच्च"**, **"परमश्चासावात्मा"**, परमात्मशब्दस्यार्थेऽपि मुख्यरूपेण शक्तिमत्त्वार्थे पर्यवसितत्वेऽपि **"कुरुपाण्डव"** शब्दन्यायेन पृथग्भावेन ब्रह्मशब्देन निर्विशेषत्वं परमात्मशब्देन जीवप्रकृतेः अन्तर्यामित्वं स्वरूपं बोधयतु एतदर्थमुक्तलक्षणलक्षिते-श्वरान्तर्भूतत्वं न तु स्वरूपतः पृथगिति।

वस्तुतः अभिव्यक्तिपूर्णसर्वगुणविशिष्टपुरुषोत्तमः ईश्वरः। अभिव्यक्तसर्वगुणविशिष्टपुरुषः परमात्मा, अनभिव्यक्ततत्तद्गुण-विशेषः ब्रह्म इति यल्लक्षणं भवति तत्र सामान्याकारस्फूर्तिलक्षणं धर्मात्मकविशेषणमात्रस्य बोधकम्।

एवञ्च विभुः विज्ञानानन्दः सार्वज्ञ्यादिगुणवान् पुरुषोत्तम ईश्वर इति यदीश्वरस्य लक्षणं भवति तत्र ब्रह्म-परमात्म-भगवतामिति त्रयाणां पृथक् पृथक् लक्षणं सम्भवति। तथाहि - विभुः विज्ञानानन्दः इति निर्विशेषब्रह्मणः, विभुः विज्ञानानन्दः सार्वज्ञ्यादिगुणवान् पुरुषः इति परमात्मनः, विभुः विज्ञानानन्दः सार्वज्ञ्यादिगुणवान् इति ईश्वरस्य च लक्षणं कर्तुं शक्यते इति ईश्वरलक्षणान्तर्गतत्वेन ब्रह्मणः परमात्मनः परतत्त्वस्य च ग्रहणं भवतीति न कुत्राप्याव्याप्तिः। तथा चोच्यते भगवत्सन्दर्भे जीवगोस्वामिपादैः - **"विशिष्टतयाविर्भावाच्छ्री भगवतो धर्मिरूपत्वं, अविशिष्टतयाविर्भावाद् ब्रह्मणो धर्मरूपत्वञ्च"** इत्येकादेशस्कन्धीयपृथिवीवायुराकाशमित्यस्य टीकायां श्रीजीवः। **"तस्मादखण्डतत्त्वरूपो भगवान् सामान्याकारस्फूर्त्तिलक्षणत्वेन स्वप्रभाकारस्य ब्रह्मणोऽप्याश्रयः"** इति (भगवत्सन्दर्भः)। **"स्वाभाविकशक्त्यानन्तविशेषमेव मन्यमानैः श्रीभागवतैस्तु परमात्मेति भगवानिति च। तत्रान्तर्यामित्वमात्रस्वशक्त्या भगवानेव परमात्मेति"** इति वेदस्तुतिटीकायां श्रीजीवः (वेदस्तुतिः)।

स च ईश्वरः अजन्मा भवति। जन्म इत्युक्ते अपूर्वदेहसंयोगः। स च कर्माधीनवशात् भवति। ईश्वरस्य देहसम्बन्धः कर्माधीनं न भवति। ईश्वरस्तु नित्यस्वरूपविग्रहस्वरूपो भवतीति। उक्तञ्च- तस्यैवम्भूतस्य क्वचित् जन्महीनस्वरूपस्वभावस्य आविर्भावमात्रं बोध्यम् (वेदान्तस्यमन्तकः)। अजायमानो बहुधा विजायते इति श्रुतेः।

**"अजोऽपि सन्नव्यायात्मा भूतानामीश्वरोऽपि सन्।**
**प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया॥"**

(श्री.भ.गीता-४/६)

**"जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः।**
**त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुनः॥"**

(श्रीमद्भगवद्गीता- ४/९)

(जीवः) ईश्वरतत्त्वस्वरूपनिरूपणानन्तरं जीवतत्त्वस्य स्वरूपं निरूपयति बलदेवः- **"अणुचैतन्यमाहुः"** इति (वेदान्तस्यमन्तकः)। अर्थात् अणुचैतन्यमेव जीवो भवति। अभिप्रायस्तु **"योऽयं विज्ञानमयं प्राणेषु स वा एषो महानज आत्मा"** इत्यादिश्रुत्यनुसारेण जीवात्मा विभुर्भवतीति ये वदन्ति तेषां मतं तु भ्रमात्मकम्। यतः श्रुतौ आत्मशब्देन परमात्मनः निर्देशः। जीवस्याणुत्वे श्रुतिप्रमाणं प्रदर्शयति- "एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश। वालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेयः स चानन्ताय कल्प्यते। नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्। तं पीठस्थं यो तु यजन्ति विप्रास्तेषां शान्तिः शाश्वती नेतरेषामि"ति श्रवणात्।

(प्रकृतिः) सत्त्व-रजस्तम इति गुणत्रयविशिष्टा प्रकृतिर्भवति। सा च द्रव्यरूपा नित्या भवति। तथा चोच्यते- **"सत्त्वादिगुणत्रयाश्रयो द्रव्यं प्रकृतिर्नित्या च सा"** (वेदान्तस्यमन्तकः)। तत्र श्रुतिप्रमाणं यथा- **"गौरनाद्यन्तवती सा जनित्री भूतभाविनी। सितासिता च रक्ता च सर्वकामदुधा विभोरित्यादिश्रुतेः"** (चुलिकोपनिषद्)। वस्तुतः प्रकृतिः द्रव्यरूपा भवत्यत्युक्तं, तेषामयमाशयः - मायाशक्तेः अवस्थाद्वयं भवति, गुणप्रधानावस्था द्रव्यप्रधानावस्था च। एवञ्च निमित्तांशप्रधानात्मिका उपादानांशप्रधानात्मिका च। निमित्तांशप्रधानभूता जीवमाया भवति। द्वितीया च गुणमाया। मूले प्रकृतिशब्देन सत्त्वरजस्तमगुणविशिष्टमहदादि पृथिव्यन्तद्रव्याणाम् उपादानरूपिणी द्वितीया द्रव्यप्रधानावस्था। गुणप्रधानरूपा तु कालकर्मरूपा। तथा च स्मृतिः -

**"त्रिगुणं तज्जगद् योनिरनादि प्रभवाप्ययम्।**
**अचेतना परार्था च नित्या सततविक्रिया।**
**त्रिगुणं कर्मिणां क्षेत्रं प्रकृते रूपमुच्यते॥"**

(श्रीमद्भागवतम्)

(कालः) गुणत्रयशून्यः जडद्रव्यविशेषः कालः। उक्तञ्च - **"त्रैगुण्यशून्यो जडो द्रव्यविशेषः कालः। स हि भूतभविष्यद्वर्तमानयुगपच्चिरक्षिप्रादिव्यवहारस्य सर्गप्रलययोश्च हेतुः क्षणादिपरार्धान्तश्चक्रवत् परिवर्तमानो वर्ण्यते"** (वेदान्तस्यमन्तकः)। त्रैगुण्यशून्य इत्यनुक्ते सति प्रकृतौ अतिव्याप्तिः। द्रव्यविशेषानुपादाने कर्मणि अतिव्याप्तिरिति। श्रुतिप्रमाणं तु - "तत्सिद्धिस्तु ज्ञः कालः कालो गुणी सर्वविधः। योऽयं कालस्तस्य तेऽव्यक्तबन्धश्चेष्टमाहुश्चेष्टते येन विश्वम्।

निमेषादिवत्सरान्तो महीयास्तन्त्वेशानं क्षेमधाम प्रपद्ये। कालचक्रं जगच्चक्रमित्यादिश्रुतेः।

(कर्म) एतेषां नये कर्म क्रियारूपं भवति। पुरुषप्रयत्नसाध्यत्वेऽपि बीजाङ्कुरवदनादिसिद्धम्। तथाहि- **"तच्च क्रियारूप कृतिसाध्यमप्रकृतिमदनादि-सिद्धबीजाङ्कुरवदनादिसिद्धमुक्तम्"** (वेदान्तस्यमन्तकः)। वेदान्तसूत्रस्य व्याख्यानपरिहाराय उच्यते- **"न कर्माविभागादिति चेन्न अनादित्वादिति"** (वेदान्तस्यमन्तकः)। तच्च कर्म शुभाशुभभेदेन द्विविधं भवति। वेदनिषिद्धं नराकाद्यनिष्टसाधनं ब्राह्मणहननादि कर्म अशुभं भवति। वेदविहितं काम्यादि कर्म शुभं भवतीति। अनेन प्रकारेण गौडीयवैष्णवदर्शनाभिमतानि पञ्चतत्त्वानि विवेचितानि सन्ति इत्यलम्।

### सहायकग्रन्थसूची


- श्रीश्रीचैतन्यचरितामृतम् । सम्पा । श्रीजगदीश्वर गुप्तः । कोलकाता : भिक्टोरिया प्रेस् । १२९६ ।
- श्रीश्रीचैतन्यदेवः । स्वामी सारदेशानन्दः । शिलं : रामकृष्ण मिशन आश्रम् ।प्रथमप्रकाश-१३६६ ।
- श्रीमद्बलदेवविद्याभूषण । वेदान्तस्यमन्तकः । सम्पा । श्रीमताहरिदासगोस्वामि । कोलिकाता : रुद्रप्रिन्टि ओयार्कस् । प्रथमसंस्करणम्-१३३७ ।
- श्रीतत्त्वसन्दर्भः । सम्पा । हरिदासशास्त्रि । उत्तरप्रदेश : श्रीगदाधरगौरहरि प्रेस । ४९७ ।
- श्रीभगवत्सन्दर्भः । सम्पा । हरिदासशास्त्रि । उत्तरप्रदेश : श्रीगदाधरगौरहरि प्रेस । ४९७ ।
- श्रीब्रह्मसूत्रगोविन्दभाष्यम् । अनु । कृष्णदास । मथुरा : पुष्पराज प्रेस् २०११ ।
- श्रीमद्भगवद्गीता । सम्पा । स्वामी रामसुखदास । गोरखपुरः गीताप्रेस ।
- श्रीमद्भागवतम् । प्रकाशकः कोलकाता : श्रीश्रीसीतारामदास । ओङ्कारनाथ संस्कृत शिक्षा संसद्। प्रथमप्रकाश-१४०३ ।
- वेदव्यास । महाभारतम् । गीताप्रेस ।
- शब्दशक्तिप्रकाशिका । सम्पा । डॉ.बिष्णुपदमहापात्रः । नई दिल्ली : मान्यता प्रकाशन । प्रथमसंस्करणम् -२००६

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# नागेशाभिमतकरणतृतीयार्थविमर्शः


## डॉ. नीरजकुमारभार्गवः

**सहायकाध्यापकः, संस्कृतदर्शनविभागः, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्**
**वेलुडमठः, पश्चिमबङ्गराज्यम् – ७११२०२**



**प्रबन्धसारः**

*प्रथमादिषु सप्तविभक्तिषु मध्ये तृतीयाविभक्तिः अन्यतमा वर्तते। सापि द्विविधा कारकतृतीया उपपदतृतीया च। तत्र कारकतृतीयापि द्विविधा कर्तृतृतीया करणतृतीया च। अत्र प्रबन्धे करणतृतीयार्थः कः इति नागेशभट्टानुसारं विमृश्यते। श्रीमता नागेशभट्टेन परमलघुमञ्जूषा वैयाकरणसिद्धान्तलघुमञ्जूषा वैयाकरणसिद्धान्तमञ्जूषा लघुशब्देन्दुशेखरः, बृहच्छब्देन्दुशेखरः इत्येतेषु ग्रन्थेषु विभक्त्यर्थो विचारितोऽस्ति, अतोऽत्र तत्तद्ग्रन्थानुसारं तृतीयार्थो निरूप्यते।*


**कुञ्चीशब्दाः** – तृतीयाविभक्तिः, करणम्, कारकम्, शक्तिः, मञ्जूषा, सम्बन्धः चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

नागेशभट्टः वैयाकरणसिद्धान्तलघुमञ्जूषायां करणतृतीयार्थ-निरूपणप्रसङ्गे वदति- “तृतीयायाः कर्तृकरणे अर्थः। कर्तृकरणयोस्तृतीयेति सूत्रात्”[1]। एवं स्थलान्तरेऽपि वैयाकरणसिद्धान्तलघुमञ्जूषायां वदति- “करणं तृतीयार्थः”[2]। वैयाकरणसिद्धान्तमञ्जूषायां वदति- “कारकतृतीयायाः कर्ता, करणञ्च वाच्यम्, कर्त्तृकरणयोस्तृतीया इति सूत्रस्वरसात्”[3]। एवं करणतृतीयार्थविचारप्रसंङ्गे लघुशब्देन्दुशेखरे वदति - “करणतृतीयायाः करणत्वशक्तिमान्, क्रियाकारकभावसम्बन्धश्चार्थः”[4]। बृहच्छब्देन्दुशेखरे वदति- “बाणेन हतः इत्यादौ करणतृतीयाया आश्रयोऽर्थः। तस्य स्वनिष्ठव्यापारजन्यत्वसम्बन्धेन क्रियान्वयः। यद्वा करणत्वशक्तिमानेव तृतीयार्थः। तच्छक्तिमत्त्वं च व्यापारवत्येवेति न दोषः”[5]। एवं च शेखरे करणतृतीयार्थः करणत्वशक्तिमान्, क्रियाकारकभावसम्बन्धश्चेति वदति, मञ्जूषायां तु केवलं करणतृतीयार्थः करणमित्येव वदति। एवं बृहच्छब्देन्दुशेखरे करणतृतीयायाः आश्रयोऽर्थः, यद्वा करणत्वशक्तिमानेवार्थः इति वदति। तथा च त्रिषु ग्रन्थेषु परस्परं मतभेदो वर्तते इति तु नैव वक्तव्यम्। तथाहि यद्यपि त्रिषु ग्रन्थेषु मतभेदः प्रतिभाति परन्तु नागेशनये करणतृतीयार्थः करणशक्तिमान् क्रियाकारकभावसम्बन्धश्चार्थः इत्येव पक्षः सिद्धान्तो वर्तते अन्यत्र तैः तथैव विभक्त्यर्थनिरूपणात्। अत एव वैयाकरणसिद्धान्तलघुमञ्जूषायां टीकाकारो वदति- “तथा च कर्तृत्वशक्तिमान् कर्तृक्रियाभावः सम्बन्धश्च यथा कर्तृतृतीयाया अर्थस्तथा करणतृतीयाया अपि करणत्वशक्तिमान् क्रियाकरणभावः सम्बन्धश्चार्थ इति बोध्यम्”[6]। तत्र किं नाम करणत्वमिति चेदुच्यते तत्तद्ग्रन्थानुसारं करणस्वरूपम्। तथाहि-

---

1. वैयाकरणसिद्धान्तलघुमञ्जूषापत्रसंख्या = १२४२, पुनर्मुद्रितसंस्करणम् = २००६, प्रकाशकः = राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली।
2. वैयाकरणसिद्धान्तलघुमञ्जूषापत्रसंख्या = १२५२, पुनर्मुद्रितसंस्करणम् = २००६, प्रकाशकः = राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली।
3. वैयाकरणसिद्धान्तमञ्जूषापत्रसंख्या = १६८, प्रथमसंस्करणम् = १९७७, प्रकाशकः = सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, उत्तरप्रदेशः।
4. दीपिकाटीकायुतलघुशब्देन्दुशेखरपत्रसंख्या = ४८० दशमसंस्करणम् = २००७, प्रकाशकः = चौखम्बाप्रकाशनम्, वाराणसी, उत्तरप्रदेशः।
5. बृहच्छब्देन्दुशब्देन्दुशेखरद्वितीयभागपत्रसंख्या ८६९, द्वितीयसंस्करणम् -१९९८, प्रकाशकः = सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, उत्तरप्रदेशः।
6. वैयाकरणसिद्धान्तलघुमञ्जूषाकलाटीकापत्रसंख्या = १२५२, पुनर्मुद्रित-संस्करणम् = २००६, प्रकाशकः = राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली।

**अत्र परमलघुमञ्जूषा-**

परमलघुमञ्जूषायां “स्वनिष्ठव्यापाराव्यवधानेन फलनिष्पादकत्वं करणत्वम्”[7] इति लक्षणं वर्तते करणस्य। अर्थात् यः स्वनिष्ठव्यापाराव्यवधानेन फलनिष्पादको भवति तत्करणमुच्यते। यथा रामो बाणेन वालिनं हन्ति इत्यत्र बाणनिष्ठो व्यापारः प्राणवियोगानुकूलव्यापारः तदव्यवधानेनैव प्राणवियोगरूपफलस्य निष्पत्तिः भवति अतस्तत्करणमिति भावः। अत्र फलनिष्पादकत्वं करणत्वमिति प्रोच्यमाने कर्त्रादिषु अतिव्याप्तिः, सर्वेषामेव कारकाणां फलनिष्पादकत्वात्। अतस्तद्वारणाय स्वनिष्ठव्यापाराव्यवधानेन इति विशेषणदलं प्रदत्तम्। एवं च नातिव्याप्तिः। यतोहि सर्वेषु कारकेषु फलनिष्पादकत्वस्य सत्त्वेऽपि तेषां स्वनिष्ठव्यापाराव्यवधानेन फलनिष्पादकत्वं नास्तीति भावः। अत एव प्रोक्तं नागेशभट्टेन परमलघुमञ्जूषायां “रामेण बाणेन हतो वाली इत्यादौ धनुराकर्षणादेर्व्यापारस्य बाणव्यापारात्पूर्वमपि कर्तरि सत्त्वात्। एवमग्रेऽपि कर्त्रादिपञ्चकारकाणां करणत्ववारणाय व्यापाराव्यवधानेनेति दिक्”[8]।

**अत्र वैयाकरणसिद्धान्तलघुमञ्जूषा-**

तत्र वैयाकरणसिद्धान्तलघुमञ्जूषायामपि इत्थमेव प्रोक्तं नागेशेन- “करणत्वं च करणताशक्तिमत्त्वं सा च शक्तिः यद्व्यापाराव्यवधानेन क्रियानिष्पत्तिर्विवक्ष्यते तन्निष्ठा”[9] इति। एवञ्चानेन वचनेनापि इदमेव समागतं यत् यद्व्यापाराव्यवधानेन क्रियानिष्पत्तिर्विवक्ष्यते तत् करणताशक्तिमत् भवति करणताशक्तिमदेव च करणं भवतीति कृत्वा द्वयोरपि ग्रन्थयोः साम्यं वर्तते।

**अत्र वैयाकरणसिद्धान्तमञ्जूषा-**

तत्र वैयाकरणसिद्धान्तमञ्जूषायां करणलक्षणं प्रतिपादयितुं प्राह नागेशभट्टः- “करणत्वबोधकञ्च सूत्रं साधकतमं करणम् [पा० सू० १-४-४२] इति। कर्तृव्यापाराधीन-यद्व्यापाराव्यवधानेन क्रियानिष्पत्तिर्विवक्ष्यते तत्र क्रियाकरणमिति तदर्थः”[10]। एवं चानेन वचनेन लक्षणं सिध्यति- कर्तृव्यापाराधीनयद्व्यापाराव्यवधानेन क्रियानिष्पत्तिर्विवक्ष्यते तत्करणमिति। यथा चैत्रः काष्ठेन तण्डुलं पचतीत्यादौ कर्ता चैत्रः तदीयव्यापारः अग्निप्रज्वालनादिव्यापारः, तदधीनव्यापारः काष्ठस्य व्यापारः, तदव्यवधानेनैव पाकक्रियायाः निष्पत्तिः विवक्ष्यते, अतस्तत्तत्र करणमिति भावः।

अत्र केवलं यद्व्यापाराव्यवधानेन क्रियानिष्पत्तिर्विवक्ष्यते तत्करणमिति प्रोच्यमाने सति चैत्रेण पचति, काष्ठं चैत्रेण पचतीत्यादिप्रयोगापत्तिः स्यात् तच्च नेष्टम्, अतस्तद्वारणाय कर्तृव्यापाराधीनेति विशेषणं प्रदत्तं लक्षणे तथा च न दोषः, स्वस्य स्वव्यापारानधीनत्वात्। तथा चाह नागेशभट्टः- “चैत्रश्चैत्रेण पचति, काष्ठं चैत्रेण पचतीत्यादिव्यावृत्त्यर्थं कर्तृव्यापाराधीनेति”[11]।

**अत्रायं विशेषः-**

परमलघुमञ्जूषायां यल्लक्षणं वर्तते तद्विवक्षापदघटितं नास्ति किन्तु वैयाकरणसिद्धान्तलघुमञ्जूषायां वैयाकरणसिद्धान्तमञ्जूषायां च यल्लक्षणं तद्विवक्षाघटितं वर्तते। एवञ्चोभयोः लक्षणयोः भेदो वर्तते इति नैव शङ्कनीयम्, उभयत्रापि विवक्षाघटितलक्षणे एव नागेशस्याभिप्रायो वर्तते। स्थाल्यां पचति, स्थाल्या पच्यते,

---

7 वंशीटीकायुतापरमलघुमञ्जूषापत्रसंख्या = १३५, प्रथमसंस्करणम् = २००६, प्रकाशकः = चौखम्बाविद्याभवनम्, वाराणसी, उत्तरप्रदेशः।

8 वंशीटीकायुतापरमलघुमञ्जूषापत्रसंख्या = १३५, प्रथमसंस्करणम् = २००६, प्रकाशकः = चौखम्बाविद्याभवनम्, वाराणसी, उत्तरप्रदेशः।

9 वैयाकरणसिद्धान्तलघुमञ्जूषापत्रसंख्या = १२५१, पुनर्मुद्रितसंस्करणम् = २००६, प्रकाशकः = राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली।

10 वैयाकरणसिद्धान्तमञ्जूषापत्रसंख्या = १६८, प्रथमसंस्करणम् = १९७७, प्रकाशकः-सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, उत्तरप्रदेशः।

11 वैयाकरणसिद्धान्तमञ्जूषापत्रसंख्या = १६८, प्रथमसंस्करणम् = १९७७, प्रकाशकः-सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, उत्तरप्रदेशः।

इत्यादिप्रयोगदर्शनेन विवक्षायाः परमावश्यकत्वात्। एवं च यदा अधिकरणादिव्यापाराव्यवधानेनापि फलनिष्पत्तिर्विवक्ष्यते तदा तेषामपि करणत्वं भवत्येव। तथा च स्थाल्यां पचति, स्थाल्या पचति, इत्युभयोरपि प्रयोगयोः विवक्षया सिद्धिः भवति। विवक्षाघटितलक्षणे च भर्तृहरिरपि प्रमाणम्। अत एव भर्तृहरिरप्याह -

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्।
विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम्॥[12]

**अयमर्थः**- यस्य कारकस्य व्यापारादनन्तरमव्यवधानेन क्रियायाः परिनिष्पत्तिः संसिद्धिर्यदा यत्र विवक्ष्यते तदा तत्र तस्य करणत्वं स्मृतमिति योजना। तथा चाव्यवधानेन क्रियासंसाधकत्वप्रकारकेच्छीयमुख्यविशेषतावत्त्वं करणस्य लक्षणं तदेव च तस्यातिशय इति प्रकृतशङ्कायाः समाधानं बोध्यम्।

**अयं भावः**- खले कपोतन्यायेन एककाले सम्मिल्य क्रियायाः सिद्धौ उपकुर्वत्सु सर्वेष्वपि कारकेषु मध्ये यद् विवक्षया प्राप्तातिशयं साधकतमं तदेव करणं भवति। तथाहि- दात्ररूपं करणं छेद्यं भावमनुप्रविश्यावयवविभागं संसाधयत् छिदिधातुवाच्यछेदनरूपक्रियायामधिकरणादिकारकान्तरेभ्यः प्रकृष्टोपकारकतामासादयति। एवं चक्षुः प्रणिधीयमानम् - अवधानपूर्वकं दृश्ये संयोज्यमानम् इतरकारकापेक्षया प्रकृष्टोपकारकत्वमासादयति इत्यादिकं करणमुदाहर्तव्यम्। साधनव्यवहारस्य च बुद्ध्यवस्थाविशेषरूपविवक्षाधीनत्वात् विवक्षाविषयत्वम् आपन्न एव ह्यर्थो व्याकरणे तत्तत्कारकरूपतया प्रयोगाङ्गं, न बाह्यवस्तुसत्तयेत्य-भिप्रायः। तथा च बलेन लुनाति आलोकेन पश्यति इत्यादौ दात्रादिकं साधकतमत्वाविवक्षया अनादृत्य साधकतमत्वेन विवक्षितं वलादिकरणम्।

वस्तुतस्तदनिर्देश्यं नहि वस्तु व्यवस्थितम्।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः॥[13]

**अयमर्थः**- तत्करणम्, वस्तुतः यत्किञ्चिद् वस्तु आश्रित्य, अनिर्देश्यम्, इदमेव करणम्, इदं करणमेव इति निरूपयितुं न शक्यते। आद्ये असिदात्रादिकमेव करणम्, न तु स्थाल्यादिकमिति वक्तुं न शक्यते। स्थाल्या पच्यते इति स्थाल्यादेरपि करणत्वस्य विवक्षाधीनस्य दृष्टत्वात्। द्वितीये असिदात्रादिकं करणमेव इत्यपि निर्देष्टुं न शक्यते। असिश्छिनत्ति इत्यादौ तत्र कर्तृत्वस्यापि दर्शनात्।

**अयं भावः**- इदमेव नियतजातीयं वस्तु असिदात्रादिकं कारणं नान्यदित्येवं निरूपयितुं न शक्यते। यस्मान्न किमपि वस्तु व्यवस्थितं करणतया नियतमस्ति। अधिकरणत्वेन प्रमितापि स्थाली सूक्ष्मतरकपालत्वात् शीघ्रतरं पाककार्ये समर्थतया अनुभवत्येव विवक्षाकृतं करणत्वम्। तथा हि लोके स्थाल्या पच्यते इति करणतृतीयान्तः प्रयोगः प्रसिद्धः। क्रियासिद्ध्यनुकूलावयवसन्निवेशा हि स्थाली आर्द्रेन्धनरूपकरणापेक्षया पाकक्रियासिद्धौ प्रत्यासीदति। अतः करणापेक्षयात्राधिकरणस्य साधकतमत्वेन करणत्वविवक्षया स्थाल्या पच्यते इति प्रयोग इति।

एवं च सिद्धान्तलघुमञ्जूषोक्तलक्षणे विवक्ष्यते इति पदप्रयोगेन भर्तृहरिवचने विवक्षा इति पदप्रयोगेन चेदं सूचितं भवति करणत्वं विवक्षाधीनमेव विवक्षानिमित्तकमेव न तु बाह्यवस्तुनिमित्तकमिति भावः। अर्थात् इदमेव वस्तु करणमिति न नियमः, अपितु विवक्षयैव करणस्य निर्धारणं भवति। तथा च यदा दात्रस्य करणत्वेन रूपेण विवक्षा क्रियते तदा दात्रेण लुनाति इति प्रयोगो भवति, यदा च दात्रस्यानादरेण बलस्यैव करणत्वरूपेण विवक्षा क्रियते तदा बलेन लुनाति इत्येषः प्रयोगो भवति। अत एव अधिकरणत्वेन निश्चिता स्थाली विवक्षाया करणरूपमपि धारयति। अत एव वदति नागेशः- "विवक्ष्यते इत्यनेन विवक्षैव व्याकरणेऽङ्गं न बाह्यवस्तु सत्तेत्युक्तम्। अत एव दात्राद्यनादरेण बलस्य तत्त्वविवक्षायां बलेन लुनातीत्यादि भवति, तदाह वस्तुतः इति। इदमेव वस्तु करणमिति न नियमः। निश्चिताधिकरणत्वा**द**पि स्थाली तनुतरकपालत्वात् शीघ्रतरपाकसाधनत्वेनानुभवति वैवक्षिकं

[12] अम्बाकर्त्रीयुतवाक्यपदीयतृतीयकाण्डद्वितीयभागपत्रसंख्या = ४२६ प्रकाशकः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी, उत्तरप्रदेशः।

[13] अम्बाकर्त्रीयुतवाक्यपदीयतृतीयकाण्डद्वितीयभागपत्रसंख्या = ४२६ प्रकाशकः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी,उत्तरप्रदेशः।

करणत्वमित्यर्थः”[14]। अत्र भर्तृहरिवचने विवक्ष्यते इति कथनेन विवक्षैव व्याकरणेऽङ्गं न बाह्यवस्तु इत्युक्तं भवति।

अथ यथा चैत्रः स्थाल्यां गृहे अग्निना तण्डुलं पचतीत्यादौ अनेककारकाणां यथा कर्तृसमवाये स्वातन्त्र्येण विवक्षा नैव भवति तर्हि अश्वेन दीपिकया पथा याति इत्यादौ कथं युगपदनेकेषां करणत्वेन विवक्षा भवतीति तु नैव वक्तव्यम्, यतोहि विषयेऽस्मिन् आचार्यो भर्तृहरिः वदति-

स्वकक्ष्यासु प्रकर्षश्च करणानां न विद्यते।
आश्रितातिशयत्वं तु परतस्तत्र लक्षणम्॥[15]

**अस्यार्थः**- स्वकक्ष्यासु यत्र बहूनां करणत्वं तत्र स्वासु स्वासु करणभावावस्थासु करणत्वेन सजातीयापेक्षया साधकतममित्यत्र तमप्प्रत्ययवाच्यः करणानां प्रकर्षश्च न विद्यते, सर्वेषां करणानां तत्र समानत्वात्। तत्र तु यत्र बहूनां करणत्वं तत्रापि अश्वेन दीपिकया पथा याति इत्यादौ परतः साधनान्तरेभ्यः कर्त्रादिभ्यः, आश्रितातिशयत्वम्- आश्रितोऽतिशयो यत्र स तथा तत्वं करणलक्षणम्। तथा च क्रियासिद्धौ इतरकारकापेक्षया प्रकृष्टोपकारकत्वं करणत्वमिति यत्र बहूनां करणत्वं तत्र सर्वेषां करणत्वोपपत्तिरिति।

**अयं भावः**- स्वस्यां स्वस्यां कक्ष्यायां करणभावावस्थायां करणत्वेन सजातीयापेक्षः क्रियासिद्धौ प्रकर्षोऽत्र, साधकतममित्यत्र तमप्प्रत्ययवाच्यो नाश्रीयते, अपि तु इतरकारकवत् करणेऽपि अनुगतस्य साधनसामान्यस्य साधनत्वरूपस्य धर्मस्य इतरकारकापेक्ष एव प्रकर्षः, साधकतममित्यत्र तमप्प्रत्ययवाच्यस्तत्र बहुकरणस्थले सर्वेषां करणत्वमावेदयते। साधकतममित्यत्र हि कारकसामान्यवाचकात् साधकशब्दात् तमबुत्पन्नस्तत एव साधकादेव प्रकर्षं गमयति, नतु साधकतमात्। कारिकायां परत इत्यस्य करणव्यतिरिक्तेभ्यः कर्त्रादिभ्यः इत्यर्थस्यैव विवक्षणात्। एवं करणत्वजातीयापेक्षस्य प्रकर्षस्यानाश्रयणादश्वादीनां सर्वेषामपि इतरकारकापेक्षया प्राप्तप्रकर्षाणां करणत्वमविरुद्धम्। तथाहि- अश्वो देशान्तरप्राप्तिरूपे गमनक्रियाफले कर्त्राद्यपेक्षया प्रकृष्टोपकारकः, स्वव्यापारद्वाराऽव्यवधानेन फलजनकत्वात्। पन्था अपि साधुश्चोराद्युपद्रवरहितः प्रतिबन्धकविरोधिराजपुरुषादि-धारणेन प्रतिबन्धकाभावसम्पादनद्वारा इतरकारकापेक्षया प्रकृष्टोपकारकः, दीपिका अपि तमः अपसारयन्ती प्राप्नोति प्रागुक्तरीत्या प्रतिबन्धकाभावसम्पादनेन साधनान्तरापेक्षया प्रकर्षमिति।

**अत्रायं विशेषः**-

अत्र च लक्षणे करणसंज्ञाविधायकं “साधकतमं करणम्” इति सूत्रमेव मानम्। तथाहि- साधकतमं कारकं सत् करणसंज्ञं भवति इति सूत्रार्थः। तत्र सूत्रस्थतमप्रत्ययस्यार्थः प्रकर्षः। स च कारकान्तरापेक्षया एव गृह्यते, कारकपर्यायसाधकशब्दादुत्पन्नेन तमपा प्रकृत्यर्थापेक्षस्यैव प्रकर्षस्य बोधनात्, नत्वत्र करणान्तरापेक्षया प्रकर्षः। अत एव देवदत्तः अश्वेन दीपिकया पथा गच्छति इत्यादिप्रयोगाणां सिद्धिः। करणान्तरापेक्षया प्रकर्षस्य ग्रहणे तु कस्यचिदेकस्यैव करणत्वं स्यान्नतु समेषाम् एकस्मिन् काले कस्यचिदेकस्यैव प्रकृष्टत्वात्। अतः कारकान्तरापेक्षया प्रकर्षो न तु करणान्तरापेक्षया। प्रकृष्टत्वं च अव्यवधानेन फलजनको यो व्यापारस्तद्वत्त्वम्। एवञ्च यद्व्यापाराव्यवधानेन फलनिष्पत्तिः तत्करणम् इति सूत्रार्थो भवति। तथा चोक्तं नागेशभट्टेन महाभाष्ये “साधकतमं करणम्” इति सूत्रव्याख्यानावसरे “अत्र कारकाधिकारात् क्रियानिरूपितातिशयितकारकत्ववत्करणम् इत्यर्थः। अतिशयश्च यद्व्यापारानन्तरमव्यवधानेन फलोत्पत्ति-स्तत्त्वम्” इति। लघुशब्देन्दुशेखरेऽपि एवमेवोक्तं

[14] वैयाकरणसिद्धान्तलघुमञ्जूषापत्रसंख्या = १२४२, पुनर्मुद्रितसंस्करणम् = २००६, प्रकाशकः = राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली।

[15] अम्बाकर्त्रीयुतवाक्यपदीयतृतीयकाण्डद्वितीयभागपत्रसंख्या = ४२६ प्रकाशकः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी, उत्तरप्रदेशः।

"यद्व्यापाराव्यवधानेन क्रियानिष्पत्तिस्तत्प्रकृष्टम्"[16]। तस्मात् सूत्रप्रामाण्येनापि स्वनिष्ठव्यापाराव्यवधानेन फलनिष्पादकत्वं करणत्वम् लक्षणमिदं सुसम्पन्नम्।

अथ यथा गंगायां घोषः, गंगायां गावः इत्यादौ गौणस्यापि अधिकरणसंज्ञा भवति तथैव व्यवधानेन फलोत्पादकस्य गौणस्यापि करणत्वापत्तिः इति त्वत्र नाशंकनीयम्, यतोहि करणसंज्ञाविधायके "साधकतमं करणम्" इति सूत्रे तमप्ग्रहणेन व्यवधानेन फलोत्पादके करणकत्वोपचारेण तृतीयान्तप्रयोगस्यासाधुत्वं प्रतिपाद्यते, एतत्सूत्रातिरिक्तस्थले च गौणस्यापि अधिकरणत्वादिकं भवतीति तमपा बोध्यते।

अयं भावः- करणसंज्ञाविधायके "साधकतमं करणम्" इति सूत्रे तमब्ग्रहणं व्यर्थम्। यतोहि- साधकं करणम् इत्येतावन्मात्रोक्तौ क्रियतेऽनेनेति करणम् इति महासंज्ञया साधकस्यैव करणसंज्ञा भविष्यति, लघ्वर्थं हि संज्ञाकरणं तत्र महासंज्ञाकरणे एतत्प्रयोजनम् अन्वर्थस्यैव संज्ञा यथा स्यादिति। एवञ्च महासंज्ञाकरणसामर्थ्यात् कारकाधिकाराच्च साधकस्य करणत्वसिद्धौ तत्र साधकपदं व्यर्थं सत् साधकतमार्थं भविष्यति, एवं च तमबर्थस्य स्वयमेव लाभसिद्धौ सूत्रे तमब्ग्रहणं व्यर्थम्। तथा चोक्तं लघुशब्देन्दुशेखरे नागेशभट्टेन "कारकाधिकारात्करण-ल्युडन्तकरणेति महासंज्ञया च साधकत्वे लब्धे साधकग्रहणमेव साधकतमार्थं भविष्यतीति प्रश्नः"[17]। एवं च सति प्रकृतसूत्रे तमप् ग्रहणं व्यर्थं सज्ज्ञापयति अस्मिन् कारकप्रकरणे शब्दसामर्थ्यगम्यः प्रकर्षो नाश्रीयते इति। तथा चोक्तं कैयटेन सूत्रस्यास्य व्याख्यानप्रसङ्गे महाभाष्यप्रदीपे तत्र तमप्श्रुतिरेतज्ज्ञापयति प्रकर्षप्रत्ययग्रहणमन्तरेणेह प्रकरणे सामर्थ्यगम्यः प्रकर्षो नाश्रीयते इति। एवञ्चेह सूत्रे तमप्ग्रहणाभावे साधकतमार्थस्य लाभो न स्यात्, अतस्तदर्थं सूत्रे तमब्ग्रहणमावश्यकमिति भावः। एवञ्चात्र सूत्रे तमब्ग्रहणेन गौणस्य करणसंज्ञा नैव भवति। एतज्ज्ञापनस्य फलं तु "आधारोऽधिकरणम्" इति सूत्रेण गौणस्याप्यधिकरणत्व-सिद्धिरूपम्। अन्यथा तत्रापि अधिक्रियतेऽस्मिन् इत्यधिकरणमिति महासंज्ञया आधारलाभे सिद्धे सूत्रे आधारपदं सत् आधारतमार्थं भविष्यतीति सर्वावयवव्याप्त्याधारस्यैव अधिकरणसंज्ञा स्यात्। यथा तिलेषु तैलम्, सर्वस्मिन्नात्माऽस्ति इत्यादौ। तथा चोक्तं लघुशब्देन्दुशेखरे नागेशभट्टेन "अधिकरणमित्यधिकरणल्युडन्त-महासंज्ञयैव सिद्धे आधारग्रहणसामर्थ्यात् सर्वावयवव्याप्त्या य आधारः सोऽधिकरणमित्यर्थः स्यात्। एवञ्चेदं सूत्रं तिलेषु तैलमित्यादौ एव प्रवर्तेत। न हि गंगा तीरं वा सर्वावयवै**र्व्याप्**तम्"[18]। इति। एवं चात्र गौणस्याधिकरणसंज्ञा न स्यात्। तमब्ग्रहणेन अस्मिन् कारकप्रकरणे शब्दसामर्थ्यगम्यः प्रकर्षो नाश्रीयते इति ज्ञापने जाते, अत्र सूत्रे व्यर्थम् आधारपदम् आधारतमार्थस्य बोधकं नैव भवति। तस्मात् गौणस्यापि अधिकरणत्वसिद्धिः। करणसंज्ञाविधायके "साधकतमं करणम्" इति सूत्रे तु तमब्ग्रहणेन प्रकर्षस्य प्रतीतिः। तथा चोक्तं नागेशभट्टेन लघुशब्देन्दुशेखरे "एवञ्च व्यवधानेन फलोत्पादके करणकत्वोपचारेण तृतीयान्तप्रयोगस्या-साधुत्वबोधनं तमप्फलम्। एतत्तमब्वशादेवान्यत्र स्वरितत्वमिति ज्ञायते"[19]। इति दिक्।

**अत्र शाब्दबोधः-**

**रामः बाणेन वालिनं हन्ति**- इत्यत्र कर्तृप्रत्ययस्थले तिबर्थः कर्ता, तत्र प्रथमान्तार्थस्य रामपदार्थस्य अभेदसम्बन्धेनान्वयः, तिबर्थकर्तुश्च धात्वर्थव्यापारे कर्तृक्रियाभावसम्बन्धेनान्वयः। तृतीयार्थः करणं तत्र प्रकृत्यर्थस्य बाणस्य अभेदसम्बन्धेनान्वयः, करणस्य च क्रियाकरणभावसम्बन्धेन धात्वर्थफले अन्वयः। द्वितीयार्थः कर्म तत्र प्रकृत्यर्थस्य वालिनः अभेदसम्बन्धेनान्वयः, तस्य

[16] दीपिकाटीकायुतलघुशब्देन्दुशेखरपत्रसंख्या = ४७८ दशमसंस्करणम् = २००७, प्रकाशकः = चौखम्बाप्रकाशनम्, वाराणसी, उत्तरप्रदेशः।

[17] दीपिकाटीकायुतलघुशब्देन्दुशेखरपत्रसंख्या = ४७८, दशमसंस्करणम् = २००७, प्रकाशकः = चौखम्बाप्रकाशनम्, वाराणसी, उत्तरप्रदेशः।

[18] दीपिकाटीकायुतलघुशब्देन्दुशेखरपत्रसंख्या = ४७९, दशमसंस्करणम् = २००७, प्रकाशकः = चौखम्बाप्रकाशनम्, वाराणसी, उत्तरप्रदेशः।

[19] दीपिकाटीकायुतलघुशब्देन्दुशेखरपत्रसंख्या= ४८०, दशमसंस्करणम् = २००७, प्रकाशकः = चौखम्बाप्रकाशनम्, वाराणसी, उत्तरप्रदेशः।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

च कर्मक्रियाभावसम्बन्धेन धात्वर्थफले अन्वयः। धात्वर्थस्य फलस्य च जन्यजनकभावसम्बन्धेन धात्वर्थव्यापारे अन्वयः। तथा चोक्तवाक्यात् बाणाभिन्नैककरणकः वाल्यभिन्नैककर्मकः, यः प्राणवियोगः, तदनुकूलः रामाभिन्नैककर्तृकः धनुराकर्षणादिव्यापारः इति बोधो भवति।

**रामेण बाणेन वाली हन्यते**- इत्यत्र तेप्रत्ययार्थः कर्म तत्र वालिनः अभेदसम्बन्धेन अन्वयः, कर्मणश्च निष्ठत्वसम्बन्धेन धात्वर्थफले अन्वयः। बाणपदोत्तरतृतीयार्थः करणं तत्र प्रकृत्यर्थस्य बाणस्य अभेदसम्बन्धेन अन्वयः, करणस्य च स्वनिष्ठव्यापारजन्यसम्बन्धेन धात्वर्थफले अन्वयः। रामपदोत्तरतृतीयार्थः कर्ता तत्र प्रकृत्यर्थस्य रामस्य अभेदसम्बन्धेन अन्वयः, कर्तुश्च निष्ठत्वसम्बन्धेन धात्वर्थव्यापारे अन्वयः, व्यापारस्य च जन्यत्वसम्बन्धेन धात्वर्थफले अन्वयः। तथा चोक्तवाक्यात् रामाभिन्नकर्तृजन्यव्यापारजन्यः बाणाभिन्नकरणनिष्ठव्यापारजन्यः वाल्यभिन्नकर्मनिष्ठः प्राणवियोगः।

**रामः बाणेन वालिनं हतवान्**- बाणेन इत्यत्र तृतीयार्थः करणमर्थः, तत्र प्रकृत्यर्थस्य बाणस्य अभेदसम्बन्धेनान्वयः, करणस्य च स्वनिष्ठव्यापारजन्यत्वसम्बन्धेन हन्धात्वर्थे प्राणवियोगे अन्वयः, वालिनम् इत्यत्र द्वितीयार्थः कर्म तत्र वालिनः अभेदसम्बन्धेन अन्वयः, कर्मणः धात्वर्थे प्राणवियोगरूपे क्रियाकर्मभावसम्बन्धेनान्वयः, प्राणवियोगरूपस्य फलस्य व्यापारे अनुकूलत्वसम्बन्धेनान्वयः, व्यापारस्य च प्रथमान्तार्थे रामे आश्रयत्वसम्बन्धेनान्वयः। तथा चोक्तवाक्यात् बाणाभिन्नकरणव्यापारजन्यः वाल्यभिन्नकर्मविशिष्टः यो हि प्राणवियोगः तदनुकूलव्यापाराश्रयः रामः इति बोधः। बाणकरणकः वालिकर्मकः यः प्राणवियोगः तदनुकूलव्यापारवान् रामः।

**रामेण बाणेन वाली हतः**- रामेण इत्यत्र तृतीयार्थः कर्ता तत्र प्रकृत्यर्थस्य रामस्य अभेदसम्बन्धेनान्वयः, कर्तुः धात्वर्थव्यापारे जन्यत्वसम्बन्धेनान्वयः, व्यापारस्य च धात्वर्थफले जन्यत्वसम्बन्धेनान्वयः, बाणेन इत्यत्र तृतीयार्थः करणमर्थः, तत्र प्रकृत्यर्थस्य बाणस्य अभेदसम्बन्धेनान्वयः, करणस्य च स्वनिष्ठव्यापारजन्यत्वसम्बन्धेन हन्धात्वर्थे प्राणवियोगे अन्वयः, धात्वर्थस्य प्राणवियोगरूपस्य फलस्य च प्रथमान्तार्थे वालिनि आश्रयत्वसम्बन्धेनान्वयः। तथा चोक्तवाक्यात् रामाभिन्नकर्तृजन्यव्यापारजन्यः बाणाभिन्नकरणनिष्ठव्यापारजन्यः यो हि प्राणवियोगः तदाश्रयो वाली इति बोधः। रामाभिन्नकर्तृकव्यापारजन्यः बाणाभिन्नकरणकः यः प्राणवियोगः तद्वान् वाली।

**अत्र निष्कर्षः-**

परमलघुमञ्जूषा, वैयाकरणसिद्धान्तलघुमञ्जूषा, वैयाकरण-सिद्धान्तमञ्जूषा, लघुशब्देन्दुशेखरः, बृहच्छब्देन्दुशेखरः, महाभाष्यप्रदीपोद्योतः इति समेषां ग्रन्थानां पठनेनेदं वक्तुं शक्यते यन्नागेशमते करणतृतीयार्थः करणत्वशक्तिमान् क्रियाकरणभावसम्बन्धश्च। एवं करणत्वं च तन्नये स्वनिष्ठव्यापाराव्यवधानेन फलनिष्पादकत्वम् इति। अत्रैव लक्षणे अन्यवैयाकरणानामपि सम्मतिः। अत एव कौण्डभट्टोऽपि वैयाकरणभूषणसारे वदति "साधकतमं करणम् [पा. सू. १/४/४९]। तमबर्थः प्रकर्षः। स चाव्यवधानेन फलजनकव्यापारवत्ता। तादृशव्यापारवत्कारणं च करणम्"[20]। एवं बृहद्वैयाकरणभूषणेऽपि वदति "साधकतमं करणम्, तमबर्थः प्रकर्षः, प्रकृष्टं कारणम् इत्यर्थः। प्रकर्षश्च यद्व्यापारानन्तरमव्यवधानेन फलोत्पत्तिः, तत्त्वम्"[21]। एवं चात्रेदं वक्तुं शक्यते यन्नागेशोक्तं करणलक्षणं सर्वसम्मतं वर्तते।

[20] प्रभादर्पणयुतवैयाकरणभूषणसारपत्रसंख्या =१९७, तृतीयसंस्करणम् = वि. सं. २००६, प्रकाशकः = चौखम्बासंस्कृतसंस्थानम्, वाराणसी, उत्तरप्रदेशः

[21] बृहद्वैयाकरणभूषणपत्रसंख्या = १०९, प्रथमसंस्करणम् = १९८५, प्रकाशकः = चौखम्बामरभारतीप्रकाशनम्, वाराणसी, उत्तरप्रदेशः।

## सहायकग्रन्थसूची


- वैयाकरणसिद्धान्तलघुमञ्जूषा (कलाकुञ्चिका-टीकाद्वयोपेता)। माधवशास्त्रिभण्डारिः (सम्पादकः)। नई-देहली : राष्ट्रियसंस्कृतसंस्थानम्। 2006।
- वैयाकरणसिद्धान्तमञ्जूषा। कालिकाप्रसादशुक्लः (सम्पादकः)। वाराणसी : सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः। 1977।
- लघुशब्देन्दुशेखरः (दीपिकायुतः)। गोपालशास्त्री-नेने (सम्पादकः)। वाराणसी : चौखम्बासंस्कृत-संस्थानम्। 2002।
- बृहच्छब्देन्दुशेखरः। द्वितीयभागः। सीताशास्त्री (सम्पादकः)। वाराणसी : सम्पूर्णसंस्कृतविश्व-विद्यालयः। 1998।
- परमलघुमञ्जूषा (वंशीटीकायुता)। वंशीधरमिश्रः (टीकाकर्ता)। श्रीनिवासशर्मा (सम्पादकः)। वाराणसी : चौखम्बाविद्याभवन। 2006।
- वाक्यपदीयम् (अम्बाकर्त्रीव्याख्यासहितम्)। तृतीयखण्डम्। द्वितीयभागः। रघुनाथशर्मा (सम्पादकः)। वाराणसी : सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः। 1997।

# ऋधातोः वैदिकरूपाणि

**डॉ. सुबोधकुमारनन्दः**
**स्नातकोत्तरसंस्कृतविभागः, घाटाल्-रवीन्द्रशतवार्षिकीमहाविद्यालयः**
**पश्चिममेदिनीपुरम्, पश्चिमबङ्गः**

**प्रबन्धसारः**

*विश्वस्य प्राचीना संस्कृतभाषा वैदिक-लौकिकभाषाभेदेन द्विधा भवति। तयोर्मध्ये वैदिकसंस्कृतं प्राचीनतमम्। अस्मिन् साहित्ये विशेषतया ऋग्वेदे प्रयुक्ताः शब्दाः अस्याः प्राचीनतायाः प्रमाणस्वरूपाः सन्ति। अत्र पुनः क्रियापदानां स्थानमत्यन्तमहत्त्वपूर्णं वर्तते। तेषां निर्वचनाय रीतिद्वयं स्वीक्रियते। एका भारतीयपद्धतिः। द्वितीया पाश्चात्त्यरीतिः इति। यास्क-उवट-महीधर-सायणादयः विद्वांसः भारतीयसिद्धान्तप्रतिपादकाः सन्ति। अवेरी-म्याक्डोनल्-ह्विट्न्प्रभृतायः नवीनमतवादस्य व्यवस्थापकाः सन्ति। सायणादयः भारतीयभाष्यकाराः भगवतः पाणिनेः अष्टध्यायीमाश्रित्य गमत्, वक्षत्यादीनां क्रियापदानां साधनं प्रदर्शितवन्तः यत्र बाहुल्येन व्यत्ययसिद्धान्तस्य प्रयोगः दरीदृश्यते। आधुनिकाः तथा न कुर्वन्ति। ते तु भाषाविज्ञानदृष्ट्या वैदिकक्रियापदानां साधनं प्रदर्शितवन्तः। इयर्ति, ऋण्वत्यादीनां पदानां को धातुः? किमस्ति प्राच्य-पाश्चात्त्यविदुषामभिप्रायः? इति शंका मनसि निधाय अस्य लघुशोधप्रबन्धस्य परिकल्पना।*

**कुञ्चीशब्दाः** – पाणिनिः, सायणः, सूत्रम्, धातुः, निर्वचनं चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

वेदेषु ऋधातोः बहुलतया प्रयोगः दृश्यते। तस्य प्रथमपुरुषैकवचने इयर्ति इति रूपम्। **इयर्ति** इत्यस्य अर्थः प्रेरयति। पदमिदं ऋग्वेदस्य "जातो जायते सुदिनत्वे अह्नां समर्य आ विदथे वर्धमानः। पुनन्ति धीरा अपसो मनीषा देवया विप्र **उदियर्ति** वाचम्"[1]॥ सायणमते पदमिदं जुहोत्यादेः √ऋ गतौ (३.१०९८.प) इत्यस्य धातोः लट्लकारस्य प्रथमपुरुषैकवचनस्य रूपम्। ऋ + लट् > तिप् - ति, ऋ श्लु + ति, ऋ ऋ + ति, "अर्तिपिपर्त्योश्च" (पा.७.४.५१) इत्यनेनाभ्यासस्य इत्वे, रपरत्वे, "हलादिः शेषः" (पा.७.४.६०) इत्यनेन रेफस्य लोपे, "अभ्यासस्यासवर्णे" (पा.६.४.७८) इत्यनेनाभ्यासस्यैकारस्य स्थाने इयङादेशे इय् + ऋति पित्वात् गुणे इयर्ति इति। एवमुत्तमैकवचनस्य इयर्मि (पा.३-१९-२[2]) इत्यस्य गठनम्। अत्र सममतं पोषयन्ति आधुनिकाः।

**आ-अरन्**[3] अर्थात् मा गमन्। सायणविचारे इदमपि पूर्वोक्तस्य √ऋ धातोः लुङ्-लकारस्य प्रथमपुरुषबहुवचनस्य रूपम्। अत्रेयं प्रक्रिया- ऋ + लुङ् > झि – अन्ति, "च्लि लुङि" (पा.३.१.४३) इत्यनेन च्लि-प्रत्यये ऋ + च्लि + अन्ति इति जाते "सर्तिशास्त्यर्तिभ्यश्च" (पा.३.१.५६) इत्यनेन च्लेः इत्यस्मिन् स्थाने **अङ्** इत्यादेशे ऋ+अङ्-अ+अन्ति इति जाते "इतश्च" (पा.३.४.१००) इति स्थिते इकारस्य लोपे (ऋ + अ + अन्त् ) संयोगान्तस्य च लोपे गुणे च कृते अरन् इत्यस्य सिद्धिः। मा योगान्नात्र अडागमः। एवम् अरन्त (आ) ४.१९.९ समगच्छन्त, अरम् ४-१५-७ प्रभृतीनां पदानां साधनं भवति।

म्याक्डोनल् (१९१०, ५१०) ग्रैसमैन (१००, १०१) आवेरी (२५०) प्रभृतयः एतान् अ-लुङः विधिमूलकस्य (a-ao.inj.) रूपत्वेन स्वीकुर्वन्ति। वस्तुतयात्रोभयोर्मध्ये मतवैविध्यं नावलोक्यते।

---

[1] ऋ.३.८.५

[2] सा.भा. > ३-१९-२ ऋ गतौ जौहत्यादि। अर्तिपि.... 'इत्यभ्यासस्येत्वम्। अभ्यासस्यासवर्णे इतीयङ् आदेशः मिपः पित्त्वाद् गुणः।,

[3] ये चाकनन्त चाकनन्त नू ते मर्ता अमृत मो ते अंह आरन्......॥ ऋ.५.३१.१३

**अर्लर्ति**[4] अर्थात् गच्छति। भगवता पाणिनिना "दाधर्ति-दधर्ति-दधर्षि...... च" (पा.७.४.६५) इति सूत्रं प्रणितम्। अस्य व्याख्यानं कृत्वा दीक्षितेनोक्तम्- "एतेऽष्टादश निपात्यन्ते। आद्यस्त्रयो धृङो धारयतेर्वा। भवतेर्यङ्लुगन्तस्य गुणाभावः। इयर्तेर्लटि हलादिः शेषापवादो रेफस्य लत्वमित्वाभावश्च निपात्यते" इति। उल्लिखितस्य √ऋ धातोः लटः रूपमिति दीक्षिताशयः। ऋ + लट् > तिप् - ति, ऋ + श्लु + ति (जुहोत्यादिभ्यः श्लुः पा.२.४.७५), ऋ ऋ + ति (श्लौ पा.६.१.१०), अर् ऋ + ति (उरत् पा.७.४.६६, "उरण् रपरः" (पा. १.१.५१), अर् अर् + ति (सार्वधातुकार्धधातुकयोः पा. ७.३.८४) इति दशायां "हलादिःशेषः" (पा. ७.४.६०) इत्यभ्यासस्य लोपे प्राप्ते तदपवादरूपेण अभ्यासस्य रस्य लत्वे अल् अर् + ति इति जाते "अर्तिपिपर्त्योश्च" (पा.७.४.७७) इत्यभ्यासस्य प्राप्तस्येत्वस्य निपातनाभावे "आदेशप्रत्यययोः" (पा ८.३.५९) इत्यनेन शस्य षत्वे संयोगे अलर्तीति।

ग्रैसमैन् (१०१) आवेरी (२७०), ह्विट्नी (१८८५, पृ १४) म्याक्डोनलादयः (१९१६, पृ३७४) पाणिनिविचारमस्वीकृत्य अस्य निर्वचनं √ऋ धातोः यङ्लुकि दर्शयन्ति। तथा स्वीकारे अस्य स्वरूपं भवेत्- ऋ + यङ् (धातोरेकाच... पा. ३.१.२२), " यङोऽचि च" (पा.२.४.७४) इत्यनेन यङः लोपे "सन्यङोः" इति सूत्रेण धातोः द्वित्वे (ऋ ऋ) "गुणो यङ्लुकोः" (पा.२.४.७४) सूत्रे अभ्यासस्य गुणे अर् ऋ इति। ततः लटि तिपि कृते अर् ऋ + ति इति स्थितेऽभ्यासस्य हलः लोपे अ ऋ + ति इति स्थिते "ऋतश्च" (पा.७.४.९२) रुगागमे अ रुक् - र् ऋ + तीति जाते पूर्ववत् गुणे संयोगे अलर्तीति। अत्र रस्य लत्वं निपातनेन क्रियते। श्लुविकरणे तु अभ्यासेन सह लत्वकार्यमपि निपातने करणीयम्।

भारतीयाः पाणिनेः रीतिमाश्रित्य अलर्तिना सह दाधर्ति-दधर्ति-दधर्षि-तितेक्ति-पनीफणत् – बोभूतु - कनिक्रदत् (ऋ.२.४२.१) - भरिभ्रत् (ऋ.२.४.४) - दविध्वत् (ऋ.४.१३.४) – दविद्युतत् (ऋ.७.१०.१), सनिष्यदत्, तरित्रतः (ऋ.४.४०.३), वरीवृजदादीनां साधनं यङ्लुकि, चङ्लुङि अथवा शतृप्रत्यसंयोगे कुर्वन्ति। परन्तु म्याक्डोनलस्य मते इमानि यङ्लुगः शत्रन्तरूपाणीति[5]। एषु पुनः √भृञ् (३.१०८७) भरणपोषणयोः धातोः यङ्लुगन्तस्य शत्रन्तरूपमिति भरिभ्रदिति मन्यते दीक्षितः। तथा विचिन्त्य काशिकाकारेणाप्युक्तम्- 'बभ्रतेर्यङ्लुगन्तस्य शतरि भृञामिति इत्वाभावो जश्त्वाभावोभ्यासस्य रिगागमो निपात्यते' इति। परन्तु सायणः √हृ धातोः यङ्लुगन्तस्य शत्रन्तरूपमिति विचार्य स्वभाष्ये अवदत्- 'हरतेर्यङ्लुगन्तत्वेन दाधर्त्यादिषु ।पा.७.४.६५। निपातिताल्लेट्यडागमः' इति। हृ धातुग्रहणेन हस्य स्थाने "हृग्रहोर्भश्छन्दसि" इति वार्तिकेन भादेशः। म्याक्डोनलनेन (१९१६, पृ.४०३) दीक्षितविचारं सैद्धान्तिकेन अङ्गीकृतः।

**ऋणवः**[6] अर्थात् प्राप्नुयाः। सायणेन 'उषोयदध भानुना विद्वारांकृणवो दिवः' (ऋ.१.४८.१५) इति मन्त्रे इदमृण् गतौ **(तनादि.१४६७. सेट्. उ.)** धातोः **लङ्ल**कारस्य रूपमिति दर्शतम्। तथा च 'प्र हि त्वां पूषन्नजिरं.... वाजेषु द्युम्निंस्कृध' (ऋ.१.१३८) इति मन्त्रे प्रयुक्तमिदं **लेटः** रूपमिति भणति। तत्र **लङ्यस्य** प्रक्रिया यथा- ऋण् + लङ् छान्दसः प्रथमपुरुषैकवचनस्य स्थाने मध्यमपुरुषैकवचने सिप्प्रत्यये ऋण् + सिप् – सि - स्, ऋण् + उ + स् (तनादित्वात् 'तनादिकृञ्भ्य उः' पा.३.१.७८), ततो व्यत्ययेन 'कर्तरि शप्' इत्यनेन शपि कृते अनुबन्धे कार्ये ऋण् + उ + शप् - अ + स् इति दशायां 'सार्वधातुकार्धधातुकयोः' (पा.७.३.८४) इत्यनेन गुणे ऋणो + अ + सीति जाते 'इतश्च'( पा.३.४.१००) इत्यनेन इकारस्य लोपे, ओकारस्य अवादेशे, सस्य विसर्गे कृते ऋणवः इति। 'बहुलं छन्दस्यमाङ्योगे' इत्यनेन अडागमस्य अभावः। तत्र **लेटि** प्रक्रिया यथा- ऋण् + लेट् तत्स्थाने उत्तमद्विवचने वस्प्रत्ययः। ऋण् + वस्, ऋण् + उ

---

[4] अलर्ति दक्ष उत मन्युरिन्दो मा नो अर्यो अनुकामं परा दाः ॥ ऋ. ८-४८-८

[5] म्याक्.१९१६, पृ.३७७, ३७९, ३८७, ४२०।

[6] कया नो अग्ने वि वसः सुवृक्ति कामु स्वधामृणवः शस्यमानः ॥ ऋ. ७.८.३

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

+ वस्, ऋण् + उ + अट् > अ (लेटोऽडाटौ पा.३.४.९४), ऋण् + उ + अ + वस् इति स्थिते अट् पित्त्वात् पूर्ववत् गुणे ऋणो + अ + वस् इति स्थिते 'एचोऽयवायावः' (पा.६.१.७८) इत्यनेनावादेशे, सस्य रुत्वे, विसर्गे च कृते ऋणवः इत्यस्य सिद्धिरिति। सायणस्यानेन विचारेण सह म्याक्डोनलादयः सममतं प्रकटयन्तीति। अर्थात् पदमिदं तनादेः √ऋ धातोः लड्वर्गस्य लेटः रूपमिति। परन्तु लङ्यस्य रूपं न स्वीकुर्वन्तीति। नोचितमपि।

सायणाचार्यः लङि यदास्य साधनमदर्शयत् तदा व्यत्ययेन वैदिकविशेषतया वा शपा सह उविकरणस्यापि स्वीकरोति। अतः स विकरणद्वयेन सहास्य साधनं कर्तुमयतत। लेटि सारल्येनास्य निर्वचनं स्यादिति। पदस्यास्य साधनाय आधुनिकाः लङ्लकारं येन प्रकारेण न स्वीकुर्वन्ति तया रीत्या ते धातोरपि प्रत्याख्यानं कुर्वन्ति। ते तु तानादेः ऋण् धातुं नाङ्गीकृत्य स्वादेः ऋधातुतः रूपमिदं निष्पन्नमिति वदन्ति। √ऋ-√ऋणयोस्त्वर्थः एको गतिरिति। धातुपाठे उल्लिखिताः √ऋण्, √तृन्, √घृण्,√क्षिण्चेत्यादयः धातवः वस्तुतः स्वादिगणीयाः भवन्ति। तेषां विचारे एषां णस्य लोपः क्रियते चेत् तदा √ऋ-√तृ-√घृ-√क्षीत्यवशिष्यते। ततः श्नु विकरणे ऋणोत्यादीनां गठनं सम्भवेत्। तद्यथा ऋ + श्नु > नु = ऋणु। अस्माद् अनकारान्तादङ्गात् लडादिप्रत्यये योगे ऋणोत्यादीनां सिद्धिर्भवति। यद्यप्यत्र विचारे यौक्तिकता प्रतिभाति तथापि कृ(करोति) धातोः स्वरूपं दृष्ट्वा ऋण् धातुः तनादौ स्वीकर्तव्यः इति मे मतिः।

**सम्-ऋ॒ण्व॒ति॒**[7] अर्थात् संगच्छते। रिवि गतौ (१.५९५ प.) ऋणु गतौ (८.१४६७.उ) इति धातुद्वयात् पदस्यास्य निर्वचनं भवितुमर्हतीति भाष्यकारस्याशयः[8]। अतः भाष्यकारानुसारमस्य सिद्धिः भ्वादौ तुदादौ वा सम्भवेत्। रिविति स्वीकारे धातोः रेफस्य व्यत्ययेन सम्प्रसारणं करणीयम्। ततः ऋवि + लट् > तिप् > त्, ऋवि + शप् > अ + ति इति स्थिते 'इदितो नुम्धातोः' (पा.७.१.५८) इत्यनेन नुमागमे नस्य णत्वे संयोगे ऋण्वति इति।

ऋणु धातुः तनादिः। अतः "तनादिकृञ्भ्य उः" (पा.३.१.७९) इति शपोऽपवादविकरणम्। ऋण् + उ + लट् > तिप् > ति इति दशायां "लेटोऽडाटौ" (पा.३.४.९४) इत्यनेन अडागमे (ऋण् + उ + अट् – अ + ति) यणि कार्ये ऋण्वति इति लेट्लकारस्य प्रथमपुरुषैकवचनस्य रूपम्। एवं ऋ॒ण्व॒थः १.१३९.४, ऋ॒ण्व॒न् ७.१.२, ऋ॒ण्वन्ति॑ ९.७.५, ऋ॒ण्वे॒ ५.७४.५ ऋ॒ण्वि॒रे॒ १०.२५.५ प्रभृतीनां साधनं रिवितः अथवा ऋणुतः भाष्यकारेण प्रदर्शितम्।

म्याक्डोनल् (१९१०, ४३०, ४७०) एषु ऋण्वति, ऋण्वथः इति पदद्वयं विहाय शिष्टाः स्वादिगणस्य ऋधातोः रूपाणीति विचारं प्रस्तुवन्ति। तन्मते ऋण्वति, ऋण्वथः द्वे पदे तुदादेः√ऋ धातोः परिवर्तिते रूपे स्तः[9]। धातुरयं √ऋतः √ऋण्व् इति रूपेण परिवर्तितोऽभूत्। तत्रादौ स्वादिगणस्य √ऋ धातोः परं श्नु विकरणं करणीयम्। तदनन्तरं तुदादेः शव्विकरणस्य संयोगं कृत्वा ऋण्वित्यङ्गः कर्तव्यः। तस्मात् पदद्वयस्य निष्पत्तिः। गुणनिषेधार्थमुदात्तस्वराच्च म्याक्डोनलस्य कल्पनेयमिति मन्ये। ह्विट्नी (१८८५, पृ. १४) स्वादिगणस्य रूपाणीति वदति।

√ऋ धातोः पाठः धातुपाठे नास्ति। ऋण् इत्यस्य पाठः तनादौ दृश्यते। यस्मात् ऋणोति, ऋणुते प्रभृतीनां गठनं कल्प्यते। पणिनिव्याकरणे अनकारान्तात् (athemetic) अकारान्ताङ्गस्य (themetic) परिवर्तनस्य तादृशो नियमो नास्ति। अत्र यदि लेटि अकारस्य योगः क्रियते तर्हि ऋण्वति/ऋण्वाति इति रूपं स्यात्। ह्विट्नेः सिद्धान्तः निर्दोष इति वक्तुं न पारयामः। तथा कृते अर्थात् स्वादिस्वीकारे लटि ऋणोम्यादीनि रूपाणि भवष्यन्ति। लेटं मत्वा अडागमे ऋणवति, ऋणवदिति भविष्यन्ति। सायणः ऋण्वति पदार्थं लेट्

---

[7] स ह॑व्य॒वाळम॑र्त्य उ॒शिग्दू॒तश्चनो॑हितः। अ॒ग्निर्धि॒या समृ॑ण्वति ॥ ऋ. ३-११-२

[8] सा.भा. > ऋ. १.५८.३ रिवि गतौ। व्यत्ययेन संप्रसारणम्। इदित्वात् नुम्। कर्तरि शप्।, ३-११-२ लेटि <u>तनादि</u>त्वादुप्रत्ययः। लेटोऽडाटावित्यडागमः, ३/१, pr. ind.

[9] म्याक्.१९१०,४२९ख।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

लकारं स्वीकरोति। सा चिन्ता म्याक्डोनलस्यापि। अतः म्याक्डोनलस्य विचारं स्वीकर्तव्यम्।

ઉෂ્ઠ෴ઉෂ්ඨ෴ઉෂ්ඨ෴

## सहायकग्रन्थसूची


- ऋग्वेदः (स्कन्दस्वाम्युद्गीथीये, वेङ्कटमाधवीया, मुद्गलीया व्याख्या सम्बलिता, १-८ भागात्मकः), विश्वबन्धुः, VVRI, होशियारपुरम्, पञ्जावः, १९६५-१९६६,
- ऋग्वेदसंहिता (सा.भा.१-५भागः), सं. श्रीनारायण शर्मा सानेटक्के, वैदिक-संशोधन मण्डल, पूना, १९३३-५१
- Avery John, Contributions to the History of Verb-inflection in Sanskrit, J.A.O.S V-10, 1880
- Grassmann Hermann, W∘terbuck zum Rig-veda, MLBD Delhi, rp. 1964
- Bhattacharya Bhabani Prashad, Vedic Grammar, Sanskrit Pustak Bandar, Kolkata, 1986
- Cardona George, Panini a survey of Research, Motilal Benarasi das, Delhi, rp. 1980
- MacDonnell A. A., Vedic Grammar, Munshiram Manoharlal pub. pvt. Ltd, Delhi, 1910, reprint 2007
- Whitney William Dwight, Sanskrit Grammar, MLBD, Delhi, rp- 1983

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# पाणिनीयव्याकरणे विद्या

**डॉ. गिरिधारी पण्डा**

**विभागाध्यक्षः, संस्कृतविभागः (स्नातकः स्नातकोत्तरश्च), मेदिनीपुरमहाविद्यालयः(स्वयंशासितः)**

**मेदिनीपुरम्, पश्चिमबङ्गः,भारतम्**

---

**प्रबन्धसारः**

*पाणिनिव्याकरणं सूत्र-वार्त्तिक-भाष्यसंरचनेन त्रिमुनिव्याकरणमित्युच्यते। यद्यपि शास्त्रेणाऽनेन शब्दानां साधुत्वासाधुत्वविवेचनं विधीयते, येन शब्दानुशासननाम्ना ख्यातमिदं, तथापि तत्रोपपादितेषु बहुषु सूत्रेषु बहूनां विद्याग्रन्थादिविषयकतत्त्वानां, कला-क्रीडा-वाणिज्यादि-विषयीभूतानां तथ्यानां च परिचयः प्राप्यते, तत्र प्रतिपादितेषु विभिन्नेषूदाहरणेष्वपि तद्विषयकतात्कालिकस्थितिः निरूप्यते, यत् खलु सर्वथा गवेषणायाः विषयः। यथा-अष्टाध्याय्यां पाणिनिना विद्याविषयकं, ग्रन्थविषयकञ्च तथ्यमधिकृत्य बहूनि सूत्राणि रचितानि। तत्तत्सूत्रगततथ्यानि पुरस्कृत्य तेषां तथ्यानामाकलनपुरस्सरं सूत्रकार-वार्त्तिककार-भाष्यकारादीनां मतावलम्बनपूर्वकं तात्कालिकावस्थायां विद्या-ग्रन्थादितथ्यनिरूपणमाध्यमेन तात्कालिकशिक्षाव्यवस्थाविषयकस्य गोपायितस्य तथ्यस्योन्मोचनपूर्वकञ्च तस्य संक्षिप्तावलोकनमस्मिन् शोधप्रबन्धे साधितम्।*

**कुञ्चीशब्दाः** – सूत्रम्, विद्या, ग्रन्थः, पाणिनिः, पतञ्जलिः चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

सुविशालेऽस्मिन् संस्कृतसाहित्ये वैदिकसाहित्यं लौकिकसाहित्यञ्च स्वकीयया सुबाधप्रतिभया अबाधरचनया गूढानुचिन्तया विविधज्ञान-विज्ञानोपादानेन च साहित्यस्यास्य कलेवरं विश्वे प्रतिष्ठापयति। तत्र शिक्षा-व्याकरण-छन्दः-निरुक्त-ज्योतिष-कल्पादिभिः षडङ्गैः परिपूर्णं वैदिकसाहित्यं समुद्रवदपारमखिलं धर्ममूलं[1] ज्ञानमूलञ्च।

तत्रापि 'मुखं व्याकरणं स्मृतम्'[2] इत्युक्त्यनुसारेण वेदशरीरस्य मुखं व्याकरणशास्त्रं स्वकीयेनापूर्वशब्दतत्त्वेन सूत्रात्मकेन मार्गेण स्वल्पीयसा कालेन अल्पीयसा साधनेन च विविधतत्त्वं प्रतिपाद्य शास्त्रान्तरेषु स्वकीयां तनुं वितनोति।येन शास्त्रमिदं षडङ्गेषु प्राधान्यं भजते।यदुक्तं भाष्यकारेण-

'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च इति। प्रधानञ्च षड्ष्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति'[3]।

सूत्र-वार्त्तिक-भाष्यसंरचनेन तद्व्याकरणं त्रिमुनिव्याकरण-भावेन ख्यातम्। 'त्रयः मुनयः अस्मिन् वंश्ये'[4] इति तात्पर्यात् तत् त्रिमुनिव्याकरणं विशेषतः पाणिनिना प्रोक्तमित्याशयेन तत् पाणिनीयमिति कालगरिम्णा पाणिनीयपरिधि प्रवृत्ति वाऽऽधारीकृत्य प्रवर्त्तते। व्याक्रियन्ते व्युत्पाद्यन्ते असाधुशब्देभ्यः साधुशब्दाः पृथक्कृत्य विविच्यन्ते इति व्युत्पत्त्या यद्यपि साधुशब्दसम्पादकं शास्त्रमिदम्, यद्यपि शास्त्रेणाऽनेन शब्दानां साधुत्वासाधुत्वविवेचनं विधीयते, येन शब्दानुशासननाम्ना ख्यातमिदं, तथापि तत्रोपपादितेषु बहुषु सूत्रेषु बहूनां विद्याग्रन्थादिविषयकतत्त्वानां, कला-क्रीडा-वाणिज्यादि-विषयीभूतानां तथ्यानां च परिचयः प्राप्यते, तत्र प्रतिपादितेषु विभिन्नेषूदाहरणेष्वपि तद्विषयकतात्कालिकस्थितिः निरूप्यते, यत् खलु सर्वथा गवेषणायाः विषयः। यथा-अष्टाध्याय्यां पाणिनिना विद्याविषयकं तथ्यं प्रतिपाद्य षट्सूत्राणि (६), ग्रन्थविषयकमधिकृत्य पञ्चदशसूत्राणि-(१५)

---

[1]. वेदोऽखिलं धर्ममूलम्-म.सं.

[2]. शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्'-पा.शि.

[3]. म.भा.पष्पशा.

[4]. पा.सू.

प्रतिपादितानि। तत्र सूत्रात्मकेन मार्गेण यत्तथ्यमुपपादितं, तत्सर्वं शिक्षाव्यवस्थायाः समुन्नत्यर्थं समुपदिष्टं वर्त्तते, विद्याविषयकनियमाश्च प्रतिपादिताः विद्यन्ते। अतः पाणिनीयव्याकरणे उपपादितानामेतेषां सूत्राणां व्याख्यानमाश्रित्य तत्तत्सूत्रगततथ्यानि पुरस्कृत्य तेषां तथ्यानामाकलनपुरस्सरं सूत्रकार-वार्त्तिककार-भाष्यकारादीनां मतावलम्बनपूर्वकं तात्कालिकावस्थायां विद्या-ग्रन्थादितथ्यनिरूपणमाध्यमेन तात्कालिकशिक्षाव्यवस्थाविषयकस्य गोपायितस्य तथ्यस्योन्मोचनपूर्वकञ्च तस्य संक्षिप्तावलोकनमस्मिन् शोधप्रबन्धे साधितम्।

विद्यायाः प्राचीनत्वं स्वरूपञ्च, विद्यायाः प्रयोजनम्, पाणिनिना प्रोक्तानि विद्याविषयकसूत्राणि, तत्तत्सूत्राणां रहस्यम्, वर्त्तमानशिक्षाव्यवस्थासु तस्योपयोगित्वम्, तद्विरचितानि ग्रन्थविषयकसूत्राणि, तेषां सूत्राणां तात्पर्यविवेचनम्, तत्समीक्षणञ्चेत्यादयः बिन्दवः समुपस्थाप्यन्ते शोधप्रबन्धेऽस्मिन्।

प्रथमतः विद्याविषये संक्षेपतः अत्रालोचना विहिता।

सांसारिकवसति निर्वोढुं मधुरेऽस्मिन् सामाजिकसंघटने सर्वान् सोढुं स्वाभिरुचेः अनुसारं स्वकर्म साधयितुं च केनचित् स्वस्याज्ञानस्य परिहारपुरःसरं किमपि ज्ञातुमवधातुं च प्रयतते। एतस्मिन्नवसरे सर्वविधस्य साफल्यस्य सञ्चयनं यः कर्त्तुं प्रभवति, तद्विषयीकरोति च, सोऽयमुपायः जगति शिक्षापदेन व्यपदिश्यते। शिक्षते अनयेति शिक्षा। शिक्षा एकाधारेण जनयित्री, धात्री, पालनकर्त्री, नियन्त्रणकर्त्री च। विद्या हि केवलमस्याः शिक्षायाः मूलाधारीभूता। विद्या शिक्षा च परस्परं परिपूरकाः। अतः केषाञ्चिन्मते विद्या शिक्षा च पर्यायवाचिनावेतौ शब्दौ। सर्वधनप्रधानमेतद्विद्याधनं[5] सर्वविधामुन्नतिं साधयति। जीवननिर्वहणे, जीवनस्य प्रतिष्ठासाधने, कीर्त्तिसंसाधने, यशःसंस्थापने, राज्यशासने, प्रजापालने, नीतिनिर्धारणे, कर्त्तव्यसाधने च शिक्षायाः विद्यायाः वा भूमिका अनस्वीकार्य्या। किञ्च, विद्याविनीतो हि सर्वमेतदनायासेन सम्पादयतीति तात्पर्यम्। अत एवोक्तं कौटिलीयार्थशास्त्रे-

विद्याविनीतो राजा हि प्रजानां विनये रतः।
अनन्यां पृथिवीं भुङ्क्ते सर्वभूतहिते रतः॥[6]

विद्यया एव विनयगुणः प्राप्यते, विनयात् योग्यता, योग्यतायाः धनम्, धनाद्धर्मः, धर्मेण वास्तविकञ्च सुखं प्राप्यते इति रहस्येणोक्तञ्च नीतिशास्त्रे-

विद्या ददाति विनयं विनयाद्याति पात्रताम्।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मः ततः सुखम्॥

वेदेषूपनिषत्सु चास्मिन् विद्याविषये सुमहती चर्चा विद्यते। अनया विद्यया अमृतम्, आत्मज्ञानम्, तत्त्वज्ञानमित्यादीनि प्राप्यन्ते। यथोक्तम् ईशोपनिषदि - विद्ययाऽमृतमश्नुते-तथ्यमेतत् स्वीकृत्य श्रीशंकराचार्येणोक्तं यत्-आत्मसाक्षात्कार एव विद्या। श्रीमद्भगवद्गीतायाम्-

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति॥[7]

शास्त्रेषु शब्दस्यास्य प्रयोगः बहुलभावेन दृश्यते। विषयेऽस्मिन् शास्त्रान्तरेषु बहुविधा चर्च्चापि विहिता। कौटिलीयार्थशास्त्रस्य विद्यासमुद्देशप्रकरणे आन्वीक्षिकी-त्रयी-वार्त्ता-दण्डनीतिश्चेति चतस्रः विद्याः[8] कौटिल्येनोपस्थापिताः। तथ्यमिदं स्वीकृत्य याज्ञवल्क्यस्मृतौ उक्तं यत्-

स्वरन्ध्र-गोप्तान्वीक्षिक्यां दण्डनीत्यां तथैव च।
विनीतस्त्वथ वार्त्तायां त्रय्याञ्चैव नराधिपः॥[9]

(आचाराध्यायः)

महाभारतेऽप्युक्तम्-

त्रयी चान्वीक्षिकी चैव वार्त्ता च भरतर्षभ।
दण्डनीतिश्च विपुला विद्यास्तत्र निदर्शिताः॥[10]

(म.भा.-५९.३३)

एवं भावेन विद्याविषयमधिकृत्य शास्त्राकाराः स्व-स्वमतं परिपोषयन्ति। यदस्तु अस्माकं निहितायाः समस्यायाः

5 . न चौरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारी।
व्ययकृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्॥

6 . कौटिलीयार्थशास्त्र-वृद्धसंयोगे

7 . श्रीमद्भगवद्गीता- ४.

8 . कौ. अ. विद्यासमुद्देशप्रकरणम्

9 . या.स्मृ. - आचाराध्यायः

10 . म.भा.-५९.३३

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

विनाशपुरःसरं समीचिनं मार्गमुपदिशति, पुरस्तात् सर्वथा सार्वजनीनं सत्यं मथ्नाति च स शिक्षापदमुपलभते चेति तथ्यम्।

पतञ्जलिः चतुर्भिः प्रकारैः विद्या पुष्टि लभते[11] इति संसाध्य तदीये महाभाष्ये विद्याविषयकं तथ्यमुपस्थापितवान्। आचार्येण पाणिनिनाऽपि स्वकीयायामष्टाध्याय्यां शब्दानां साधुत्वविवेचनार्थं यानि सूत्राणि विरचितानि, तत्र प्रसङ्गक्रमेण तत्तत्सूत्रनिर्दिष्टेषु विभिन्नेषूदाहरणेषु तात्कालिकव्यावहारिकविषयाणां विविधवैषयिकतथ्यानाञ्च वैशिष्ट्यं साधितम्। यदाधारीकृत्य 'पाणिनीयं काणादञ्च सर्वशास्त्रोपकारकम्' इत्युक्तेः सार्थक्यमुपजायते। तेषु विद्याविषयकं ग्रन्थविषयकञ्चेति तथ्यमुपपाद्य तत्र शिक्षाव्यवस्था निरूपिता विद्यते। यद्यपि पाणिनिना प्रत्यक्षभावेन विद्यायाः शिक्षायाः वा न किमपि लक्षणमुक्तम्, नापि प्रत्यक्षविधिना तत्र तथ्यमिदमुपस्थापितम्, तथापि तत्र सूत्रोपक्रमसंरचितस्य प्रयोगविधिमाध्यमेन तदानीन्तनसमाजे प्रचलितायाः शिक्षायाः प्रकृतं स्वरूपमुद्घाटितम्। तत्र शिक्षाग्रहणाय पृथक्-व्यवस्था, भिन्नभावेन विशेषशास्त्राध्ययनविषयः, शिक्षक-क्रमकादिव्यवस्था, शिक्षकस्य योग्यताविषयः, शालाव्यवस्था, प्रश्नोपस्थापनम्, प्रश्नानामुत्तरे शुभाशुभविचार इत्यादीनि विद्याविषयकव्यावहारिकतथ्यानि प्रायगिकतत्त्वानि च प्रतिपादितानि जायन्ते। यत् खलु अधुनातनयुगेऽपि प्रयोगविधौ संगच्छते। पाणिनिना शिक्षाविषयकं तथ्यं प्रतिपाद्य विद्याविषयकाणि षट् सूत्राणि (६), ग्रन्थविषयकाणि पञ्चदशसूत्राणि च प्रतिपादितानि। तद्यथा-

**विद्याविषयकसूत्राणि –**

१. तदधीते तद्वेद (पा.सू. - ४/२/५९),
२. क्रमादिभ्यो वुन् (पा.सू. - ४/२/६१),
३. दिवा-विभा-निशा-प्रभा .........लिपि-लिबि-वलि-भक्ति...ररुष्षु (पा.सू.३/२/२१) (लिपिकर, लिविकर),
४. राधीक्ष्योर्यस्य विप्रश्नः (पा.सू. - १/४/३९),
५. छात्र्यादयः शालायाम् (पा.सू. - ६/२/८६),
६. विद्यायोनिसंबन्धेभ्यो वुञ् (पा.सू. - ४/३/७७),

**ग्रन्थविषयकसूत्राणि –**

१. अधिकृत्य कृते ग्रन्थे (पा.सू. - ४/३/८७),
२. कृते ग्रन्थे (पा.सू. - ४/३/११६),
३. अनुब्राह्मणाद् इनिः (पा.सू. - ४/२/६२),
४. छन्दोब्राह्मणानि च तद्विषयाणि (पा.सू. - ४/२/६६),
५. जीविकोपनिषदावौपम्ये (पा.सू. - १/४/७९),
६. तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः (पा.सू. - ४/३/६६),
७. शिशुक्रन्दयमसभ- (पा.सू. - ४/३/८८),
८. आथर्वणिकस्येक (पा.सू. - ४/३/१३३),
९. छन्दोगौक्थिक (पा.सू. - ४/३/१२९),
१०. तित्तिरिवरतन्तु.(सू. - ४/३/१०२),
११. काश्यपकौशिकाभ्याम् ऋषिभ्याम् (पा.सू. - ४/३/१०३),
१२. कलापि-वैशम्पायना (पा.सू. - ४/३/१०४),
१३. पुराणप्रोक्तेषु ब्राह्मणकल्पेषु (पा.सू. - ४/३/१०५),
१४. शौनकादिभ्यश्छन्दसि (पा.सू. - ४/३/१०६),
१५. कठचरकाल्लुक् (पा.सू. - ४/३/१०७)

क. **तदधीते तद्वेद**[12]-– सूत्रस्यास्य व्याख्याने भट्टोजिदीक्षितेनोक्तं यत्- व्याकरणमधीते वेद वा वैयाकरणः। अर्थात् अत्र द्वितीयान्त-समर्थप्रातिपदिकात् परं 'तद् अधीते' –'तद् वेद' इत्यर्थे तद्धितसंज्ञकः अण् प्रत्ययः भवति। ('प्राग्दीव्यतोऽण्')। व्याकरणमधीते वेत्ति वा वैयाकरणः। तत्रापि 'क्रतूक्थ्यादिसूत्रान्तात् ठक्' इति सूत्रेण क्रतु-उक्थ्-प्रभृतिशब्देषु सूत्रान्तशब्देषु च तदधीते तद्वेद अर्थे ठक्-प्रत्ययः स्यात्। अग्निष्टोमम् अधीते वेत्ति वा आग्निष्टोमिकः। यज्ञमधीते वेत्ति वा याज्ञिकः। शब्दमधीते वेत्ति वा शाब्दिकः। वार्त्तिकः। न्यायमधीते वेत्ति वा नैयायिकः। अलङ्कारमधीते वेत्ति वा आलङ्कारिकः।

[11] . म.भा.पष्पशा.

[12] . पा.सू. ४.२.५९

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

तार्किकः। सूत्रान्तेषु कल्पशब्दं विहाय अन्यत्र भवति।

यस्यां विद्यायां ये पारदर्शिनः दक्षाश्च , ते एव तस्याः विद्याया अधिकारिणः भवितुमर्हन्ति। यः विषयः येनाधीतः, स एव तद् वेद इति तात्पर्येण 'तदधीते तद्वेद' (पा.सू. - ४/२/५९) सूत्रमेतदुपपादितं विद्यते।

अत्र रहस्यं तु तात्कालिकसमाजे विशेषभावेन भिन्नां भिन्नां विद्यामधीत्य भिन्नभावेन विशेषविद्याग्रहणस्योपक्रम आसीत्। अधुनातनसमाजे यथा specialization-माध्यमेन विशेषशास्त्रमधीत्य तद्विषये M.Phil., Ph.D., D.Litt. इत्यादिकं गवेषणाकार्यं कुर्वन्ति, तस्य शास्त्रस्याधिकारिणश्च भवन्ति, तथैव तदानीन्तनसमयेऽपि एतादृशी व्यवस्था प्रचलीताऽऽसीत्। व्याकरणशास्त्रमधीत्य वैयाकरणः, न्यायशास्त्रमधीत्य नैयायिकः, अलङ्कारमधीत्य आलङ्कारिकः इति भावेन।

अस्मिन् प्रसङ्गे वार्तिककारेणाऽपि उक्तं यत् - 'विद्या-लक्षण-कल्पान्ताच्चेति वक्तव्यम्'- वायसविद्यिका,गौलक्षणिकः। 'अङ्ग-क्षेत्र-धर्मत्रिपूर्वात् विद्यान्तान्नेति वक्तव्यम्' त्रिविधा विद्या त्रिविद्या, तामधीते वेद वेति त्रैविद्यः। आङ्गविद्यः, क्षात्रविद्यः

ख. **क्रमादिभ्यो वुन्**[13]-४/२/६१ -क्रम, पद, शिक्षा, मीमांसा, क्रमादिः। शिक्षामधीते वेद वा शिक्षकः। द्वितीयान्तेभ्यः समर्थ-क्रमादिप्रातिपदिकेभ्यः अधीते वेद इत्यर्थे तद्धितसंज्ञकः वुन् प्रत्ययः स्यात्। युवोरनाकौ-इत्यनेन(वु-अक) अकादेशे क्रमक-शिक्षक-मीमांसक-इत्यादीनि पदानि सिद्धानि।

अत्र शिक्षादानव्यवस्थायां शिक्षकस्यावश्यकता-शिक्षकस्य योग्यताविषयकं तथ्यमुपपादितं विद्यते। सूत्रे क्रमादिभ्यः - इत्यस्य व्याख्याने उच्यते- क्रम, पद, शिक्षा, मीमांसा, क्रमादिः। पुनः शिक्षादानार्थं शिक्षकस्य शिक्षादानविषयकं ज्ञानमवश्यमेव ज्ञातव्यमिति तथ्यं प्रतिपाद्योक्तम् - शिक्षामधीते वेद वा शिक्षकः। अत एव अधीते वेद इत्यर्थे समर्थ-क्रमादिप्रातिपदिकेभ्यः तद्धितसंज्ञकः वुन् प्रत्ययः साधितः। अत्र केवलम् अधीते वेद इत्यर्थे वुन् प्रत्यये अकादेशे क्रमक-शिक्षक-मीमांसक-इत्यादीनां पदानां सिद्धिर्जायते। नान्यार्थे। रहस्यं तु शिक्षादानार्थं नियुक्तैः शिक्षकादिभिः नूनमेव शिक्षाविषयकं ज्ञानमध्येतव्यम्। किञ्च स्वस्वविषयेषु निपुणाः सम्यक् ज्ञानप्रदाने समर्थाः भवन्तीति तात्पर्यम्।

यतोहि सर्वेभ्यः स एव हिताय विचार्योपदिशति। जन्मन आरभ्य मृत्युं यावत् प्रत्येकं कृते प्रतिमुहूर्त्ते स आविर्भवति। केवलं विद्यायतने कस्मिंश्चित् प्रकरणे स एव शिक्षक इति नोचितम्। जीवनस्य सर्वस्मिन् समये तस्योपदेशः अपरिहार्यः। शिक्षकस्यास्य स्वरूपविषये विश्वकविना कालिदासेनोक्तम्-

श्लिष्टाक्रिया कस्यचिदात्मसंस्था संक्रान्तिरन्यस्य विशेषयुक्ता।

यस्योभयं साधु स शिक्षकाणां धुरिप्रतिष्ठापयितव्य एव वा॥ [14]

तैत्तिरीयोपनिषदि अपि एतदेव तत्त्वं प्रतिपादितं यत् – आचार्यः पूर्वरूपम्, अन्तेवासी उत्तररूपम्। विद्या सन्धिः, प्रवचनं संन्धानम्। पाश्चात्त्यदार्शनिकाः तथ्यमिदं स्वीकृत्य एतदेव रहस्यं प्रतिपादयन्ति। पाणिनिमुनिः एतत्सर्वं विचार्य चतुर्धा विभाजनं शिक्षकस्य कृते उपदिष्टवान्। यथा -आचार्यः, श्रोत्रियः, उपाध्यायोऽध्यापकश्चेति।

ग. **राधीक्ष्योर्यस्य विप्रश्नः- १/४/३९** – एतयोः कारकं सम्प्रदानं स्यात्, यदीयो विविधः प्रश्नः क्रियते। कृष्णाय राध्यति, ईक्षते वा। पृष्टो गर्गः शुभाशुभं पर्यालोचयतीत्यर्थः।

अत्र समीचीनविद्याग्रहणस्य प्रकृतं स्वरूपं समुद्घाटितं विद्यते। शिक्षाग्रहणकाले प्रश्नोपस्थापनपूर्वकालोचनेन विविधविषयस्य ज्ञानमुपजायते। बहुविधस्य सन्देहस्य दूरीकरणमपि भवति। प्रश्नेनानेन शुभाशुभपर्यालोचनं स्यादिति रहस्यं स्पष्टीकृत्य सूत्रमिदं समुपदिष्टम्। तथाचोक्तं- राध् धातुः – शुभाशुभपर्यालोचनम्। अत्रापि सम्प्रदानसंज्ञां निरूप्य अस्य दानार्थ उपपादितो जायते। यदुक्तं दीक्षितेन- एतयोः कारकं सम्प्रदानं स्यात्,यदीयो विविधः प्रश्नः क्रियते।

---

13 . पा.सू.- ४/२/६१

14. मालविकाग्निमित्रम्

घ. **विद्यायोनिसंबन्धेभ्यो वुञ्**[15]-४/३/७७- विद्यायोनिसम्बन्धे पञ्चम्यन्तप्रातिपदिके आगतार्थे तद्धितसंज्ञकः वुञ् प्रत्ययः स्यात्। उपाध्यायात् आगतः औपध्यायकः। पैतामहकः। अत्र विद्याकूलस्य योनिकूलस्य च पृथकीकरणं विधाय विद्यायाः विशेषत्वं प्रतिपादितम्।

एवमेव दिवा-भिवा-निशा-प्रभा.......-लिपि-लिबि-वलि-भक्ति.....ररुष्षु-पा.सू.३/२/२१ (लिपिकर, लिविकर), छात्र्यादयः शालायाम् -पा.सू. - ६/२/८६- इत्यादिषु सूत्रेष्वपि शिक्षाविषयकाणि तथ्यान्यपपादितानि जायन्ते।

एतद्व्यतिरिच्य पञ्चदशग्रन्थविषयकसूत्रेष्वपि सूत्रकारेण यत्तथ्यं परीक्ष्योपस्थापितम्, तत्सर्वं शिक्षाव्यवस्थायाः समुन्नतये समुपदिष्टमिति सूत्रोपात्तपदात् तत्तद्व्याख्यानाच्च स्पष्टतः प्रतीयते। तद्यथा-

१. अधिकृत्य कृते ग्रन्थे- ४/३/८७- 'तत्' इत्येव। शारीरकमधीकृत्य कृतो ग्रन्थः शारीरकीयः 'शारीरकं भाष्यम्' इति त्वभेदोपचारात्।
२. कृते ग्रन्थे ४/३/११६-वररुचिना कृतो वाररुचो ग्रन्थः।
३. अनुब्राह्मणाद् इनि[16] (ब्राह्मणसदृशः ग्रन्थः, तमधीते।)- ४/२/६२- तदधीते तद्वेद[17]-(४/२/५९) – इत्यर्थे। ब्राह्मणसदृशः ग्रन्थोऽनुब्राह्मणम्, तदधीते अनुब्राह्मणी। मत्वर्थीयेनैव सिद्धेऽण्बाधनार्थमिदम्।
४. छन्दोब्राह्मणानि च तद्विषयाणि-४/२/६६- छन्दांसि ब्राह्मणानि च प्रोक्तप्रत्ययान्तानि तद्विषयाणि स्युः। अध्येतृवेदितृप्रत्ययं विना न प्रयोज्यानीत्यर्थः। कठेन प्रोक्तमधीयते कठाः, वैशम्पायनान्तेवासित्वाण्णिनिः, तस्य 'कठ्चरकात्-' (सू-१४८९) इति लुक्, ततोऽण्, तस्य 'प्रोक्ताल्लुक्'- (सू.१२७६)। रक्ताद्यर्थप्रकरणम्।
५. जीविकोपनिषदावौपम्ये[18] - पा.सू. - १/४/७९- जीविकामिव कृत्वा जीविकाकृत्य। उपनिषदमिव कृत्वा उपनिषत्कृत्य। औपम्ये किम्? जीविकां कृत्वा। प्रादिग्रहणमगत्यर्थम्। सुपुरुषः।
६. तस्य व्याख्यान इति च व्याख्यातव्यनाम्नः-४/३/६६- सुपां व्याख्यानः सौपो ग्रन्थः। तैङः। कार्तः। सप्सु भवं सौपम्।
७. शिशुक्रन्दयमसभ- पा.सू. - ४/३/८८- शिशूनां क्रन्दनं शिशुक्रन्दः। तमधिकृत्य कृतो ग्रन्थः शिशुक्रन्दीयः। यमस्य सभा यमसभम्, क्लीबत्वं निपातनात्, यमसभीयः। किरातार्जुनीयम्। इन्द्रियजननादिराकृतिगणः। इन्द्रजननीयम्।
८. आथर्वणिकस्येकलोपश्च-४/३/१३३- आथर्वणिकस्यायम् आथर्वणः धर्म आम्नायो वा। चरणाद् वुञः अपवादः।
९. छन्दोगौक्थिक्-४/३/१२९-छन्दोगानां धर्मः आम्नायो वा छान्दोग्यम्। औक्थिक्यम्। याज्ञिक्यम्। बाह्वृच्यम्। नाट्यम्। चरणाद्धर्माम्नाययोः[19] (वा.-२७८) इत्युक्यम्। तत्साहचर्यान्नटशब्दादपि तयोरेव।
१०. तित्तिरिवरतन्तु-४/३/१०२-'छन्दोब्राह्मणानि-'(सू.-१२८०) इति तद्विषयता। तित्तिरिणा प्रोक्तमधीयते तैत्तिरीयाः।
११. काश्यपकौशिकाभ्याम् ऋषिभ्याम्[20]-४/३/१०३-काश्यपेन प्रोक्तमधीयते कश्यपिनः।
१२. कलापि-वैशम्पायना-४/३/१०४- कलाप्यन्तेवासिभ्यः - हरिद्रुणा प्रोक्तमधीयते हारिद्रविणः। वैशम्पायनान्तेवासिभ्यः -आलम्बिनः।
१३. पुराणप्रोक्तेषु ब्राह्मणकल्पेषु-४/३/१०५- तृतीयान्तात् प्रोक्तार्थे णिनिः स्यात्, यत्प्रोक्तं पुराणप्रोक्ताश्चेद् ब्राह्मणकल्पास्ते भवन्ति। पुराणेन चिरन्तनेन मुनिना प्रोक्ताः। भल्लु-भाल्लविनः। शाट्यायन-शाट्यायनिनः। कल्पे पिङ्गेन प्रोक्तः पैङ्गी कल्पः। 'पुराण-' इति किम्? याज्ञवल्क्यानि

[15]. पा.सू. - ४/३/७७
[16]. पा.सू. - ४/२/६२
[17]. पा.सू. - ४/२/५९
[18]. पा.सू. - १/४/७९
[19]. म.भा. - ४/३/१२९- वा.-२७८
[20]. पा.सू. - ४/३/१०३

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

ब्राह्मणानि। आश्मरथः कल्पः। अणि 'आपत्यस्य-' (सू.-१०८४) इति यलोपः।

१४. शौनकादिभ्यश्छन्दसि[21]-४/३/१०६- छन्दस्यभिधेये एभ्यो णिनिः। शोनकेन प्रोक्तमधीयते शोनकिनः।

१५. कठचरकाल्लुक्- ४/३/१०७-आभ्यां प्रोक्तप्रत्ययस्य लुक् स्यात्। कठेन प्रोक्तमधीयते कठाः। चरकाः।

एवं भावेन पदसाधुत्वसम्पादनार्थं समुद्दिष्टे पाणिनीयव्याकरणेऽपि सूत्रात्मकेन मार्गेण यत् यत् तथ्यं प्रतिपादितं, तत्र सर्वत्र विद्यायाः महत्त्वमैतिह्यानि च, विद्याविषयकनियमाः, तत्र सामाजिकं रहस्यं प्रयोजनञ्च, शास्त्रीयमुपपादनं, शिक्षाविषयकं सर्वविधं तथ्यमुपस्थापितं विद्यते। केवलं सूत्राणामेतेषां विश्लेषणेन गवेषणात्मकेन मार्गेण विचारेण च तथ्यमिदं परिस्फुटितं जायते इति तद्भावः।

## सहायकग्रन्थसूची


- अष्टाध्यायीसूत्रपाठः, दीक्षितपुष्पा, संस्कृतभारती, नवदेहली, २०१०।
- अष्टाध्यायीसूत्रपाठः मिश्रनारायणः, चौखम्बा ओरियन्टालिया, वाराणसी,१९७७।
- लघुशब्देन्दुशेखरः, मिश्रविश्वनाथः, पञ्चसन्ध्यन्तः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली,१९९८।
- लघुशब्देन्दुशेखरः, शास्त्रीवैकुण्ठनाथः, अव्ययीभावान्तः, चौखम्बा सुरभारती प्रकाशन, १९९४।
- वैयाकरणसिद्धान्तकौमुदी, प्रथमभागः, बालमनोरमा-तत्त्वबोधिनीटीका, मोतीलाल बनारसीदास, दिल्ली, २००५।
- व्याकरणमहाभाष्यम्, मीमांसकयुधिष्ठिरः, रामलाल कपूर ट्रष्ट, रेवली, सोनीपत, २००८।
- व्याकरणमहाभाष्यम्, डॉ. आचार्यसुद्युम्नः, रामलाल कपूर ट्रष्ट,रेवली,सोनीपत, २००९
- परिभाषेन्दुशेखरः, मिश्रविश्वनाथः, चौखम्बा सुरभारती, वाराणसी, २००५
- अष्टाध्यायी–सूत्रपाठः, प्रह्लादटिप्पणीसहितः, सम्पादकः-आचार्य पं. सत्यनारायणशास्त्री खण्डूडी, कृष्णदास संस्कृत सीरीज ६५, कृष्णदास संस्कृत अकादमी, वाराणसी-२२१००१,१९८५
- महाभाष्यम्, (नवाह्निकम्), सम्पादकः-चारुदेव शास्त्री, मोतिलाल वनारस दास,१९६८
- महाभाष्यम्, सम्पादकः- श्रीगुरुप्रसादशास्त्री, राष्ट्रियसंस्कृतसंस्थानम्, नई देहली-११००५८,२००६
- वाक्यपदीयम्, ब्रह्मकाण्डम्-श्रीवामदेव आचार्यः, चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणसी-२२१००१, १९८७
- तैत्तिरीयसंहिता, चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणसी-२२१००१
- वैयाकरणसिद्धान्तकौमुदी, व्याख्याकारः-पं. रामचन्द्र झा, चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणसी – २२१००१, २००९
- व्याकरणशास्त्रेतिहासः, सम्पादकः-लोकमणिदहालः, भारतीयविद्याप्रकाशन, जवाहरनगर, दिल्ली- २००७
- काशिकावृत्तिः, चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणसी-२२१००१
- संस्कृतसाहित्येतिहासः, सम्पादकः-कपिलदेवद्विवेदी, रामनारायणलालविजयकुमार, २ कटरारोड, इलाहावाद, १९८९
- परमलघुमञ्जुषा, व्याख्याकारः सम्पादकश्च – डा.जयशङ्करलाल त्रिपाठी, चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणसी-२२१००१
- वैयाकरणसिद्धान्तकौमुदी, व्याख्याकारः-गोपालदत्तपाण्डेय, चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणसी – २२१००१, २००९


[21] पा.सू. - ४/३/१०६

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# मीमांसादृष्ट्या अङ्गस्वरूपविमर्शः

**डॉ. गोपीकृष्णन्-रघुः**
**सहायकाध्यापकः, संस्कृतदर्शनविभागः, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानम्**
**वेलुडमठः, पश्चिमबङ्गराज्यम् – ७११२०२**

**प्रबन्धसारः**

*भारतीयदर्शनेषु मीमांसादर्शनस्य महत्त्वपूर्णं स्थानं वर्तते । वैदिककर्मकाण्डरूपेण, वाक्यशास्त्ररूपेण च नैकासां समस्यानां समाधानाय प्रवृत्तमिदं शास्त्रं न केवलं दार्शनिकसाहित्याय अपितु व्याकरणधर्मशास्त्रादीनां अध्ययनाय अपि अत्यन्तमेवोपादेयं वर्तते। अस्य शास्त्रस्य मुख्यः प्रतिपाद्यविषयः वर्तते धर्मविचारः। विधिविहितत्वात् धर्मस्य मूलं वेद एव। तत्र विधि-मन्त्र-नामधेय अर्थवाद-निषेध-भेदेन वेदः चतुर्विधः। तेषु विधेः प्राधान्यात् विधिविचारः मीमांसाशास्त्रस्य मुख्यो विषयः। मीमांसाशास्त्रे प्रतिपादितेषु चतुर्विधविधिषु विनियोगविधिः मुख्यः वर्तते। तेनैव यागाङ्गानां विधानं भवति। स च विधिः स्वकार्यस्य अङ्गाङ्गिबोधकत्वस्य साधनार्थं श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्याभिधानां षण्णां प्रमाणानां साहाय्यं स्वीकरोति। श्रुतिलिङ्गादिभिः षड्भिः प्रमाणैः सहकृतो विनियोगविधिः वेदविहितानां द्रव्यगुणक्रियादीनां अङ्गप्रधानभावं बोधयति। ततः ज्ञातानामङ्गानां स्वरूपमस्मिन् पत्रे विशेषेण निरूप्यते।*

**कुञ्चीशब्दाः**- मीमांसा, अङ्गानि, साध्यरूपम्, सिद्धरूपम्, सन्निपत्योपकारकम्, आश्रयिकर्म, आरादुपकारकम् चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

**प्रस्तावना**

भारतीयदर्शनेषु मीमांसादर्शनस्य महत्त्वपूर्णं स्थानं वर्तते। विषयबाहुल्यदृष्ट्या विषयगाम्भीर्यदृष्ट्या च अस्य दर्शनस्य प्रशस्तिः नितरां विद्यते। वैदिककर्मकाण्डरूपेण, वाक्यशास्त्ररूपेण च नैकासां समस्यानां समाधानाय इदं शास्त्रं न केवलं दार्शनिकसाहित्याय अपितु व्याकरणधर्मशास्त्रादीनाम् अध्ययनाय अपि अत्यन्तमेवोपादेयं वर्तते। कुमारिलवचनानुरोधेन मीमांसाख्या तु विधेयं बहुविद्यान्तराश्रिता इति। विचारप्रधानस्यास्य शास्त्रस्य विचारशास्त्रमित्यभिधानं सर्वत्रैव शास्त्रे कृतं वर्तते। विचारोपायभूतं न्यायनिबन्धनं मीमांसाशास्त्रम्। पद-वाक्य-प्रणाणशास्त्रेषु च इदं शास्त्रं वाक्यशास्त्रस्य रूपेणापि विदुषां शोभते। यतो हि वाक्यनिर्णयाय यावन्ति साधनानि इदं शास्त्रं प्रस्तुवति नान्यत्शास्त्रम्। शास्त्रे प्रकरणादिभिः वाक्यार्थानां नियमनम्, अथ च उपक्रमोपसंहारादिभिः लिङ्गज्ञानस्यानिवार्यता साधितं वर्तते। अत एव इदं शास्त्रं वाक्यशास्त्ररूपेण अत्यन्तमेव महत्त्वपूर्णं वर्तते।

अस्य शास्त्रस्य मुख्यः प्रतिपाद्यविषयः वर्तते धर्मविचारः। विधिविहितत्वात् धर्मस्य मूलं वेद एव। तत्र विधि-मन्त्र-नामधेय-अर्थवाद-निषेध-भेदेन वेदः पञ्चविधः। तेषु विधेः प्राधान्यात् विधिविचारः मीमांसाशास्त्रस्य मुख्यो विषयः।

मीमांसाशास्त्रे प्रतिपादितेषु चतुर्विधविधिषु विनियोगविधिः मुख्यः वर्तते। तेनैव यागाङ्गानां विधानं भवति। स च विधिः स्वकार्यस्य अङ्गाङ्गिबोधकत्वस्य साधनार्थं श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्याभिधानां षण्णां प्रमाणानां साहाय्यं स्वीकरोति। श्रुतिलिङ्गादिभिः षड्भिः प्रमाणैः सहकृतो विनियोगविधिः वेदविहितानां द्रव्यगुणक्रियादीनाम् अङ्गप्रधानभावं बोधयति। ततः ज्ञातानामङ्गानां स्वरूपमस्मिन् पत्रे विशेषेण निरूप्यते।

**विनियोगविधिना बोधिताङ्गानि**

श्रुत्यादिप्रमाणसहकृतेन विनियोगविधिना बोधितानि अङ्गानि द्विविधानि सिद्धरूपाणि, क्रियारूपाणि (साध्यरूपाणि) चेति।[1] तत्र सिद्धरूपाणि अङ्गानि जातिद्रव्यसंख्यादीनि भवन्ति। आदिपदेन गुणलिङ्गयोः

[1] अर्थसंग्रहः, राष्ट्रियसंस्कृतसंस्थानम्, पुटसंख्या- ६२

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

सिद्धरूपाङ्गत्वेन परिग्रहः। तथाहि जातिः पर्णत्वपशुत्वरूपा, द्रव्यं ब्रीह्यादिकं, संख्या एकत्वादिः, अरुणादिः गुणः, पुंस्त्वादिकं लिङ्गम् इति यावत्। एतानि सिद्धरूपाणि अङ्गानि यागादिनिष्पादकरूपेण दृष्टफलकानि (दृष्टार्थानि) भवन्ति। एते पूर्वतः एव सिद्धानि नाम विधानात् पूर्वमेव विद्यमानानि इत्यतः सिद्धरूपाणीत्युच्यते।

क्रियारूपाणि अङ्गानि पुनः द्विविधानि गुणकर्माणि प्रधानकर्माणि चेति। तत्र गुणकर्माणि एव सन्निपत्योपकारककर्माणि, प्रधानकर्माणि तु आरादुपकारककर्माणि चेति उच्यन्ते।

**सन्निपत्योपकारकम्**

गुणकर्मणाम् एव नामान्तरं सन्निपत्योपकारकाणि इति। यानि सन्निपत्य अर्थात् द्रव्यादिषु सम्बध्य उपकुर्वन्ति तानि सन्निपत्योपकारकाणि भवन्ति।

"कर्माङ्गद्रव्याद्युद्देशेन विधीयमानं कर्म सन्निपत्योपकारकम्"[2] इत्युच्यते। यागादिकर्मणां व्रीह्यादिद्रव्यमुद्दिश्य विधीयमानं कर्म एव सन्निपत्यकारकमिति भावः। यथा "व्रीहीन् अवहन्ति" इति विधीयमानम् अवघातकर्म, "व्रीहीन् प्रोक्षति" इति विहितं प्रोक्षणं च।

**सन्निपत्योपकारकस्य भेदाः**

सन्निपत्योपकारकं कर्म (गुणकर्म) त्रिविधं दृष्टार्थम्, अदृष्टार्थं, दृष्टादृष्टार्थं चेति।[3] तत्र दृष्टार्थरूपं सन्निपत्योपकारकम् अवघातादिः। अवघातरूपकर्मणा व्रीहेः तुषविमोकरूपं दृष्टफलसिद्धेः "व्रीहीन् अवहन्ति" इति विहितं अवघातकर्म दृष्टार्थरूपं सन्निपत्योपकारकं भवति। अदृष्टार्थरूपस्य सन्निपत्योपकारकस्य उदाहरणं व्रीहिप्रोक्षणादिकम्। "व्रीहीन् प्रोक्षति" इति विहितकर्मणा जलप्रोक्षणेन व्रीहिषु किञ्चित् दृष्टफलं न उपलभ्यते। तस्मात् जलप्रोक्षणरूपकर्मणा व्रीहिषु किञ्चिदपूर्वम् उत्पद्यते इति कल्पयित्वा, इदं प्रोक्षणरूपं सन्निपत्योपकारकम् अदृष्टार्थम् इति निश्चीयते। दृष्टादृष्टरूपस्य सन्निपत्योपकारकस्य उदाहरणं यथा पशुपुरोडाशादियागः। द्रव्यत्यागस्य अदृष्टमेव फलं, द्रव्यत्यागकाले च उद्देश्यभूतायाः देवतायाः स्मरणरूपं दृष्टं फलमिति पशुपुरोडाशस्य दृष्टादृष्टार्थत्वम्।

**आश्रयिकर्म**

दृष्टादृष्टरूपस्य सन्निपत्योपकारकस्यैव अपरं नाम आश्रयिकर्म इति। द्रव्यदेवतादिसंस्कारपुरस्सरं यागस्वरूपं प्रति उपकारकं भवति सन्निपत्योपकारकम्। द्रव्यं देवता चेति यागस्य रूपद्वयम्। द्रव्यस्य देवतायाः वा संस्काररूपाणि सन्निपत्योपकारकाणि भवन्ति। तस्मात् सन्निपत्योपकारकाणां यागस्वरूपसम्पादकत्वम् इति यावत्। तथाहि सन्निपत्योपकारकं कर्म द्रव्यदेवतासंस्कारमुखेन यागस्वरूपस्य निष्पादने अपि उपयुज्यते। व्रीह्यादेः द्रव्यस्य प्रोक्षणावहननादिरूपः द्रव्यसंस्कारः। देवतास्मरणरूपः देवतासंस्कारो भवति। द्रव्यदेवतासंस्कारद्वारा यागस्वरूपसम्पादनेन सन्निपत्योपकारकाणि उपयुक्तानि। द्रव्यदेवतासंस्कारेण यागस्वरूपसम्पादकेषु यानि दृष्टादृष्टार्थानि सन्निपत्योपकारकाणि कर्माणि तानि एव "आश्रयिकर्माणि" इत्यपि उच्यन्ते। दृष्टादृष्टार्थानामेव सन्निपत्योपकारकारकाणाम् "आश्रयिकर्म" इति व्यवहारः न तु सर्वेषामेव सन्निपत्योपकारकाणाम् इति बोध्यम्।

**आरादुपकारकम्**

द्रव्याद्यनुद्दिश्य केवलं विधीयमानं कर्म आरादुपकारकम्।[4] यानि द्रव्यदेवतादिसम्बन्धं विना एव साक्षात् यागम् उपकुर्वन्तीति तानि आरादुपकारकाणि उच्यन्ते। अत्र "आरात्" इत्यस्य अर्थः साक्षादिति भावः। यथा प्रयाजादि कर्म। **समिधो यजति** इत्यादिना विधीयमानं समिधादिकर्म (प्रयाजादि कर्म) द्रव्यं देवताविशेषं वा उद्दिश्य न प्रवर्तते, किन्तु दर्शपूर्णमासापूर्वमात्रम् उद्दिश्य भावयति। अतः समिधादिभिः प्रयाजैः दर्शपूर्णमासस्य अपूर्वं भावयेत्। इदम् आरादुपकारकं कर्म यागस्य परमापूर्वोत्पत्तौ एव विनियुज्यते। सर्वाङ्गसहितस्य दर्शपूर्णमासादियागानुष्ठानानन्तरं यागानुष्ठातरि यजमानात्मनि उत्पद्यमानम् अदृष्टं परमापूर्वम् इति कथ्यते। परमापूर्वं च

[2] अर्थसंग्रहः, चौखम्बासुरभारतीप्रकाशनम्, पुटसंख्या- १७३

[3] अर्थसंग्रहः, चौखम्बासुरभारतीप्रकाशनम्, पुटसंख्या- १७३

[4] तत्रैव

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

स्वर्गादिफलप्रापकम् अस्ति।इत्थम् आरादुपकारकं परमापूर्वोत्पत्तौ एव विनियुज्यते।

अनया रीत्या विनियोगविधिना बोधितानामङ्गानां स्वरूपमत्र संक्षेपेण किञ्चिन्निरूपितम्।

ৎৎৎ

## सहायकग्रन्थसूची


- लौगाक्षिभास्करः, अर्थसंग्रहः (मीमांसार्थसंग्रहकौमुदी-व्याख्यायुता), सं. नारायणरामाचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१२
- लौगाक्षिभास्करः, अर्थसंग्रहः, सं.ए.बि. गजेन्द्रगडकरः, आर्.डि. कर्माकरः, मोत्तीलालबनारसीदासपब्लिषेर्स्, नवदेहली, १९९८
- लौगाक्षिभास्करः, अर्थसंग्रहः (मीमांसार्थसंग्रहकौमुदी-व्याख्यायुता), सं. कामेश्वरनाथमिश्रः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, २०१७
- आपदेवः, मीमांसान्यायप्रकाशः, डॉ. राधेश्याम चतुर्वेदी (व्याख्याकारः सम्पादकश्च), चौखम्बासंस्कृतसीरीस्-आफीस्, वाराणसी, २०१६.
- आपदेवः, मीमांसान्यायप्रकाशः ('सारविवेचिनी' संस्कृतटीकासहितः) ऐ.चिन्नास्वामीशास्त्री (व्याख्याकारः सम्पादकश्च), चौखम्बासंस्कृतसंस्थानम्, वाराणसी, २०१६.

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# नैषधीयचरिते मानवीयचरितम्

**डॉ. लक्ष्मीकान्त-षडङ्गी**

**संस्कृतविभागाध्यक्षः, योगदा-सत्सङ्ग-पालपाडा-महाविद्यालयः**

**पालपाडा, पूर्वमेदिनीपुरम्, पश्चिमबङ्गः**

---

***प्रबन्धसारः***

*इह मानवसेवा माधवसेवा इत्युच्यते। अत्र स्वहानिलाभयोः चिन्तां परित्यज्य परेषां प्राणिनां हितकरणाय ये विहितानि कार्य्याणि कुर्वन्ति ते जनाः प्रकृतमानवपदवाच्याः। तैः क्रियमाणानि कार्य्याणि मानवतावादस्योदाहरणानि। किञ्च, तेषामपि चरितानि मानवीयचरितस्य दृष्टान्तानि। पुरा शिविनृपः कपोतस्य जीवनाय स्वशरीरस्य मांसमपि यथा विच्छिद्य तुलिकायां न्यक्षिपत् अन्ते स्वयमेव तस्यां तूलिकायाम् आरोहत्। एवमेव महर्षिः दधिचिः मानवानाम् उपकाराय देवैः प्रार्थितः सन् स्वस्य अस्थीनि अपि अददात्। वस्तुतः तेषां जीवनं धन्यं ये अन्येभ्यः जनेभ्यः जीवन्ति। साधूच्यते 'तस्यैव जीवितं श्लाघ्यं यः परार्थं हि जीवति'। अतः प्रस्तुतेऽस्मिन् शोधप्रबन्धे नैषधीयचरिते सामान्यपक्षिविशेषस्य हंसस्य स्वपरिवारं प्रति सेवा-दया-श्रद्धादयः अपि सद्भावाः मानवीयचरितस्य पथप्रदर्शकाः भवन्ति। तद्यथा –"विलोकयन्त्या रुदतोऽथ पक्षिणः प्रिये स कीदृक् भविता तव क्षणः"।*

**कुञ्चीशब्दाः** – मानवता, हंसः, चरितम्, नीतिः, समाजः चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

**भूमिका** – मनुष्यतायाः अपरं नाम मानवता। मानवता नाम मनुष्यमनसि दयाभावः। यस्य जनमानसे मानवताया भावना समुदेति असौ सर्वदा एव अपरस्य हितं साधयति। दयादिभावसम्पन्नः मानवः समानवम् अपरेषां जीवानां कृतेऽपि आत्मानं नियोजयति। ते एवं चिन्तयन्ति यत् –

"प्राणाः यथाऽऽत्मनोऽमीष्टा भूतानामपि च तथा।
आत्मौपम्येन भूतानां दयां कुर्वन्ति साधवः॥[1]"

संसारे मनुष्यः एक एव जीवः यः समस्तप्राणिनां मनोभावं बोद्धुं सक्षमः। अतः प्रत्येकमनुष्यस्य मानवताभावना स्वहृदये संस्थापनीया। अन्यथा पशुमनुष्ययोर्मध्ये नास्ति कोऽपि विशेषोऽधिकः इति शास्त्रकाराणां मतमस्ति। 'धर्मो हि तेषामधिकः विशेषः[2]' इति मनुष्यस्य विशेषत्वम्। दया परोपकारः उत्तममानसिकता च साधारणमानवान् मानवतायाः स्थानं प्रापयन् ईश्वरसामीप्यमपि प्रापयति। अतः 'ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः'[3] इति भगवतः उक्तिरस्ति। भगवता व्यासेनापि पुराणस्य सारसंक्षिप्तरूपेण 'परोपकारः पुण्याय पापाय परपीडनम्[4]' इति मन्त्रं मानवसमाजस्य कृते समुपदिष्टम्। एवं सत्यपि प्राचीनकाले, वास्तवेऽस्मिन् जगति कुत्र अद्य मानवेषु मानविकता। अधुना तु कुपथगामिनि उद्भ्रान्त-जनसमाजे मानवतायाः एवम् अधोगतिः जायते यत् जनाः जनानामपि क्षतिं संसाधयितुं नैव पश्चात्पदाः भवन्ति। स्वार्थान्वेषी मानवः अद्य स्वार्थसाधनाय यत् किमपि मार्गमाश्रयते। अद्य विश्वस्य कोणानुकोणे भयस्य सन्त्रासस्य वा वातावरणम्। दूरदर्शन-संवादपत्र-सामाजिकगणमाध्यमादीनां प्रत्यहम् अवलोकनमात्रेण सहसैव दृष्टिपथमायाति यत् समग्रेऽस्मिन् विश्वे कुत्र कुत्र उग्रपन्थीनाम् आक्रमणम् माओवादिनाम् अपहरणं, शक्तिशालिभिः दुर्बलानां निपीडनं, नार्याः प्रति असदाचरणं, गवादिनिरीहपशूनां हननं, सर्वत्रैव कोलाहलस्य वातावरणं, युद्धं, कलहः, हिंसा, रक्तपातश्च। अद्य सन्त्राससहस्रैः सङ्कटसङ्कुलं हि मानवजीवनम्। एवं सङ्कटपरम्परा संघटत्येव प्रतिवर्षं प्रतिदिनं प्रतिमुहूर्तञ्च।

---

[1]हितोपदेशः -१-१०.

[2]हितोपदेशः -२-१८.

[3]भगवद्गीता -१२-४.

[4]पुराणम् -१३५.

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

निरवच्छिन्नमुद्वेगरहितं जीवनं न लक्ष्यते कर्हिचित्। तथापि वयं जिजीविषामः। इयमेव जीवनधारा प्रचलतितरां सर्वत्र सर्वदैव। एवंविधस्य सङ्कटसङ्कुलस्य वातावरणस्य कारणानि तु जनानां खाद्याभावः, वासस्थानाभावः, शिक्षाभावः, स्वास्थ्याभावः, जीविकाभावादयश्चेत्येवं बहवः अभावाः। अद्य प्राप्तव्यस्यापि अप्राप्तिः मानवं क्षुब्धं करोति। अभावो वञ्चना वा मानवम् उन्मत्तं कारयति। अभावादीनां दूरीकरणाय प्रतिवादः तु कर्तव्यः न खलु सन्त्रासः। बहु उपायान्तरं विद्यते येन उपायेन विना सन्त्रासेन धनजीवनव्ययेन वा जनानां मङ्गलास्पदं भविष्यति।

**प्राचीनशास्त्रेषु मानवीयचरित्रम्** – प्राचीन-संस्कृतशास्त्रेषु भारतीयाः कवयः नीतिकाराश्च मनोरमया सरसया गिरा नीतिवाक्यानि व्यरचयन्। इत्थं नीतिशास्त्राणि व्यवहारविदे कान्तासम्मिततयोपदेशयुजे बभूवुः। सम्प्रति चाणक्यनीतिः, शुक्रनीतिः, नीतिसारः, नीतिशतकं, भल्लाटशतकं, वल्लालशतकं, दृष्टान्तशतकं, नीतिद्विषष्ठिका, विदुलोपाख्यानं, पञ्चतन्त्रम् इत्यादीनि बहूनि नीतिपुस्तकानि संस्कृतवाङ्मये समुपलभ्यन्ते। यत्र नीतिकाराणां मते नैतिकतायाः मानवतायाः वा मार्गाः प्रदर्शिताः सन्ति। तेषु दिङ्मात्रस्योदाहरणं यथा–

(क) जीवहिंसाविरक्तेः –

“स्वच्छन्दवनजातेन शाकेनापि प्रपूर्यते।
अस्य दग्धोदरस्यार्थे कः कुर्य्यात् पातकं महत्॥”[5]
इत्यादि

(ख) परधनापहरणात् निवृत्तेः –

“मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्’[6]।
‘आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः।”[7] इति।

(ग) सत्यभाषणस्य यथा –

“सत्येन ब्रह्मचर्य्येण व्यायामेनाथ विद्यया।
देशभक्त्याऽऽत्मत्यागेन सम्मानार्हः सदा भव॥”[8] इति।

(घ) सत्पात्रेभ्यः दानम्, दीनेभ्यः दानं यथा –

“मरुस्थल्यां यथा वृष्टिः क्षुधार्ते भोजनं यथा।
दरिद्रे दीयते दानं सफलं पाण्डुनन्दन”[9]॥

(ङ) अतिलोभात् पापस्य यथा –

“लोभात् क्रोधः प्रभवति लोभात् कामः प्रजायते।
लोभात् मोहश्च नाशश्च लोभः पापस्य कारणम्॥”[10]

(च) दयायाः यथा –

“न च विद्यासमो बन्धुः न च व्याधिसमो रिपुः।
न चापत्यसमो स्नेहः न च धर्मो दयापरः॥”[11]

(छ) परोपकारस्य यथा –“परोपकारः पुण्याय पापाय परपीडनम्”।

(ज) श्रद्धायाः यथा –

“श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।”
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥”[12]

(झ) आतिथ्यस्य यथा –

“गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः।
पतिरेको गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः॥”[13] इति।

(ञ) न्याय्यवृत्तेः यथा

“निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु वा गच्छतु यथेष्टम्।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्यायात् पथः प्रविचलन्ति पदं न धीराः॥”[14]

(ट) सत्सङ्गानुरक्तेः यथा –

“क्षणमिह सज्जनसङ्गतिरेका भवति भवार्णवतरणे नौका॥” [15] इति।

(ठ) दुष्टसङ्गनिवृत्तेः यथा –

“त्यज दुर्जन-संसर्गं भज साधुसमागमम्” [16]। इत्यादि।

**नैषधीयचरिते मानवीयचरितम्** – एवञ्च संस्कृतशास्त्रेषु विशेषतः श्रीहर्षरचिते नैषधीयचरिते मानववादस्य दिग्दर्शनानि विदुषां मनांसि रञ्जयन्ति। साम्प्रतिककाले प्रतिदिनं पृथिव्याम् उदारता, मानविकता, ऐक्यता,

---

[5]हितोपदेशः -१-६८.
[6]हितोपदेशः -१-१२.
[7]ईशोपनिषद् -१.
[8]नीतिशास्त्रम्।
[9]हितोपदेशः -१-८.
[10]हितोपदेशः -१-२५.
[11]नीतिशास्त्रम् -१-१३.
[12]भगवद्गीता -४-३९.
[13]हितोपदेशः -१-६२.
[14]नीतिशतकम् -१-८४.
[15]सत्सङ्गतिसूक्तयः -३.
[16]चाणक्यनीतिः -१४-२०.

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

सद्भावश्च दूरीभवन्ति, किञ्च हिंसा – अहंकारादीनां भृशं प्रादुर्भावः जायते, अस्यामेव परिस्थितौ नैषधीयचरिते हंसविलापप्रसङ्गे वर्णितं मानवतावादं यदि सर्वे वयम् अवलोकयामः समनुसरामश्च तर्हि वास्तवदृष्ट्या अधुनातनसमाजस्य महानुपकारः स्यात् इति मे आशा। स्वाधीनता कस्मै वा न रोचते, प्राप्तबन्धनं जीवनं को वा इच्छति। इह स्वेच्छासञ्चरणशीलेषु प्राणिषु हंसादयः पक्षिणः अन्यतमाः। ये जन्मनः समारभ्य स्वेच्छासञ्चरणशीलाः सन्ति। अतः तेषां कृते बन्धनं मृतमिव दुःखदायकमस्ति। तत्रापि नैषधीयचरिते दमयन्तीविरहक्लिष्टः निषधाधिपतिः प्रमोदोद्याने भ्रमणकाले एकदा सुवर्णपक्षयुक्तं हंसमेकं धृतवान्। तदा राज्ञः हस्ताभ्यामाबद्धः हंसोऽसौ आत्मानं विपदापन्नमिति मन्यमानः आत्मीयस्वजनान् मुहुर्मुहुः स्मृत्वा बहुशो विललाप। सुवर्णपक्षयुक्तोऽसौ हंसः विहितेऽपि बहुप्रयासे आत्मानं विमोचयितुम् अक्षमः सन् राजानं नलं बहु निनिन्द। हंसः सकरुणं स्वपरिवारं सविलापं संस्मृत्य नलं प्रत्युवाच - हे राजन् ! मम मातुः अहम् एकपुत्रोऽस्मि। माताऽपि मे जरातुराऽस्ति। वनिताऽपि मे नवप्रसूतिः विद्यते। शोचनीयमिदं यत् एतयोः द्वयोः एवाहम् एकमात्रं रक्षकोऽस्मि। अतः मां प्रति हिंसाचरणे भवन्तं करुणाभावः न कथं प्रतिबध्नाति। संसारेऽस्मिन् पितुः मातुश्च कृते पुत्रवियोगः अविस्मरणीयः। मम मित्राणि दयासखाः सखायश्च भवनिन्दया मुहूर्तमात्रं स्रवदश्रुनयनाः सन्तः मुहूर्तमात्रेण शोकनिवृत्तिं गमिष्यन्ति। परन्तु हे मातः! पुत्रशोकः तव कृते तु दुस्तरः भवेत्। तद्यथा –

"मदेकपुत्रा जननी जराऽऽतुरा, नवप्रसूतिर्वरटा तपस्विनी।
गतिस्तयोरेष जनस्तमर्दयन्नहो! विधे! त्वां करुणा रुणद्धि नो॥ [17]"

"मुहूर्तमात्रं भवनिन्दया दयासखाः सखायः स्रवदश्रवो मम।
निवृत्तिमेष्यन्ति परं दुस्तरस्त्वयैव मातः! सुतशोकसागरः॥"[18]

इह सर्वेषां कृते माता, मित्रं, पिता च स्वभावात् हितकरं भवन्ति। मातुर्पितुश्च परं गृहस्थस्य भार्य्या एव मित्रमस्ति। अतः 'भार्य्या मित्रं गृहे सतः[19]' इति महाभारतोक्त्या शोकसन्तप्तोऽसौ हंसः स्वमातुः परं पत्नीमुद्दिश्य विलपति। हे प्रिये! "मदर्थं सन्देशमृणालप्रेषणे विलम्बे प्रियः कियद् दूरे" इति त्वया उदिते अथ रुदतः पक्षिणः विलोकयन्तः तव स क्षणः कीदृक् भविता?[20] सर्वोपरि विधातरमुद्दिश्य हंसस्य विलापः यथा –

"कथं विधातर्मयि पाणिपङ्कजात्तव प्रियाशैत्यमृदुत्वशिल्पिनः।
विमोक्ष्यसे वल्लभयेति निर्गता लिपिर्ललाटन्तप निष्ठुराऽक्षरा" ॥[21]

पुनश्च –

"अपि स्वयूथ्यैरशनिक्षतोपमं ममाद्य वृत्तान्तमिमं वतोदिता।
मुखानि लोलाऽक्षि! दिशामसंशयं दशाऽपि शून्यानि विलोकयिष्यसि" ॥[22]

पृथिव्यां पुत्रकन्यादयः शैशवे पितरं मातरं चाश्रित्य जीवन्ति, पितरौ अपि आत्मवत् परमश्रद्धया स्वसन्तानान् पालयतः। संसारेऽस्मिन् पितुः मातुश्च पक्षे दुःसहानि खल्वपत्यविच्छेदानि। अतोऽसौ अपत्यस्नेहपरायणः हंसः स्वापत्यानि संस्मृत्य स्वप्रियां प्रत्युवाच हे चित्राङ्गि! ममैव शोकेन विदीर्णवक्षसा त्वया अपि यदि म्रियते, तर्हि दैववशात् हतोऽहं भूयोऽपि हतोऽस्मि। यतः ते शिशवः आवाभ्यां विनैव मृत्युपथं गमिष्यन्ति[23]। बहुभिः मनोरथैः चिरेण लब्धाः अस्फुटितेक्षणाः मम ते सन्तानाः अपि विरहात् क्षुधाकुलाः नीडान्तिकेषु प्रत्यावृत्त्य स्वल्पकालेनैव पञ्चत्वं प्राप्स्यन्ति[24]। हे सुताः! चूङ्कारैः चिरकालपर्यन्तं कम् आहूय कं प्रति आननानि कम्पनशीलानि विधाय

---

[17]नैषधीयचरितम् -१-१३५.
[18]नैषधीयचरितम् -१-१३६.
[19]यक्षप्रश्नाः -६४.
[20]नैषधीयचरितम् -१-१३७.
[21]नैषधीयचरितम् -१-१३८.
[22] नैषधीयचरितम् -१-१३९.
[23] नैषधीयचरितम् -१-१४०.
[24] नैषधीयचरितम् -१-१४१.

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

वचनमात्रेषु शिष्यध्वम्[25]। संसारेऽस्मिन् अखण्डप्रभुत्वस्य सम्पदश्चाधिकारिणः राजानः। अतः राज्ञः एवाश्रित्य सचराचरप्राणिनः सन्ति। राजान एव सचराचरप्राणिनां धनजीवनादिनां रक्षाकर्तारः। परन्तु अत्र हंसं प्रति राज्ञः लोलुपदृष्टिः हंसहृदयं दहति। अतः सशोकं तेनोच्यते - हे राजन्! हेमजन्मनः मम पक्षान् समीक्ष्य तृष्णातरलं भवन्मनः धिक् अस्तु। तुषारशीकरैः अर्णवस्य इव तव अमीभिः कियान् कमलोदयः भवेदिति[26]। भवन्मूर्तिदर्शनात् विश्वसिताऽन्तरात्मनः मम निधनं न केवलं प्राणिवधमात्रं, किञ्च विश्वासजुषां शत्रूणाम् अपि निधनं धर्मवृद्धैः विनिन्दनीयमस्ति[27]। युद्धप्रचण्डाः योद्धारः प्रतिपदं वर्तन्ते। एषः हिसारसः तेषु न पूर्यते, यः कुविक्रमः कृपाऽऽश्रये कृपणे पक्षिणि क्रियते। एतावता नृपतेरीदृशं कुविक्रमं धिक् इति निगदन् राजानं नलं भृशम् उपालभते। 'यथा दुर्वृत्ते भर्तरि वधूर्लज्जते तथैव मुनितुल्येऽनपराधेऽपि मयि दण्डधारिणा भवता राज्ञा धरित्रीरियं कथं न त्रपते' इत्येवं निगदन् हिरण्मयहंसो नरपति नलमत्र अत्यन्तमाक्षिपति यथा –

"पदे पदे सन्ति भटा रणोद्भटा न तेषु हिसारस एष पूर्यते?
धिगीदृशं ते नृपतेः कुविक्रमं कृपाश्रये यः कृपणे पतत्रिणि"[28] ॥

पुनश्च –"फलेन मूलेन च वारिभूरुहां मुनेरिवेत्थं मम यस्य वृत्तयः।
त्वयाऽद्य तस्मिन्नपि दण्डधारिणा कथं न पत्या धरणी हृणीयते"[29] ॥

स्वभावसरलाः दोषशून्याः हंसादयः पक्षिणः प्रकृतेरुपरि निर्भरशीलाः, प्रकृतेरङ्गभूताश्च। इमे पक्षिणः मुनीनामिव वन्यफलादिभक्षणेन कालं यापयन्ति। अतः न तेषां के अपि शत्रवः सन्ति। परन्तु निर्दोषोऽपि राज्ञः हस्ताबद्धस्य हंसस्य राजानं प्रति उक्तिः यत् – वयं पक्षिगणाः मुनयः इव फलादिभिः वृत्त्या जीवामः। अतः ऋषितुल्येऽस्मिन् निर्दोषे पक्षिकुले अदण्डयदण्डकेन स्वामिना अद्य कथं नहि त्रपते। 'इयं वसुधा न वासयोग्या'। हे राजन्! त्यक्तमर्यादः त्वं पालकोऽसि। एवम् उक्त्वा सर्वेऽपि पक्षिणः वसुधां परित्यज्य अन्तरीक्षं समाश्रयन्ति। एवं निषेधाधिपं बहुशो विनिन्द्य एभिः वचनैः साश्चार्यलज्जाकरुणाभिः करूणासागरे राज्ञः हृदयं प्रवेशयामास असौ हंसः तद्यथा –

"इतीदृशैस्तं विरचय्य वाङ्मयैः सचित्रवैलक्ष्यकृपं नृपं खगः।
दयासमुद्रे स तदाशयेऽतिथीचकार कारुण्यरसापगा गिरः" ॥[30]

इति। अत्र सामान्यपक्षिविशेषोऽपि हंसः मानवीयचरितेन राज्ञः हृदयं दयार्द्रं चकार। स्वमानवीयमहिम्ना मनुष्यस्यापि सर्वत्र विजयः जायते इति हंसेन प्रमाणितम्। उपर्युक्तश्लोकानामन्वेषणेन हंसविलापेन वा प्रतीयते यत्, असौ हंसः न कथमपि स्वार्थाय विलपति अपि तु स्वात्मीयानां कृते एव राजानं नलमुद्दिश्य प्रार्थयति। वस्तुतः तेषां जीवनं धन्यं ये अन्येभ्यः जनेभ्यः जीवन्ति।

**निष्कर्षः** – साहित्यं समाजस्य दर्पणः। सत्साहित्येनैव समाजे शान्ति-सद्भाव-मानवातावादादीनां प्रतिष्ठा सम्भवेत्। पक्षियोनिसम्भवोऽपि हंसः स्वमानवतावादनीत्या आदर्शपूर्णवचोभिः निषेधाधिपस्य नलस्य मनः करुणासागरे यथा निमग्नं कृतवान्, साम्प्रतिके कालेऽपि एतादृशस्य साहित्यस्य दिग्दर्शनं गुरुत्वपूर्णम्। कथाच्छलेन बालानां नीतिस्तदिह कथ्यते – इत्युक्त्यनुसारेण साहित्ये पशुपक्षिणां विविधसुरम्य – कथामाध्यमेन एवं नीतिशिक्षा प्रदीयते। यया सरण्या कार्य्यकरणेन मनुष्यजीवनं सुचारु सफलञ्च भवति सा नीतिः। नीतिरियम् न केवलं जनस्य समाजस्य वा कृते अपि तु जनानां नृपाणां सर्वेषां च व्यवहाराय कल्पते। मानवतावादेन मानवीयनीत्या चलनेन वा समस्तलोकस्य कल्याणं भवति। मानवतावादस्य मुख्यमुद्देश्यं स्वस्य अन्यस्य च कल्याणकरं भवति। कदाचित् एवमपि दृश्यते

---

[25] नैषधीयचरितम् -१-१४२.

[26] नैषधीयचरितम् -१-१३१.

[27] नैषधीयचरितम् -१-१३२.

[28] नैषधीयचरितम् -१-१३३.

[29] नैषधीयचरितम् -१-१२८.

[30] नैषधीयचरितम् -१-१४३.

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

यत् परेषां कल्याणं कुर्वन् मनुष्यः स्वीयां हानिमपि कुरुते। एवंविधं मानवतावादं विशिष्टं महत्त्वपूर्णं च मन्यते। परेषां हितं मानवतावादस्य प्राणभूतं तत्त्वमस्ति। मानवतावादेन नैव व्यक्तेः, अपि तु समाजस्य, राष्ट्रस्य जगतश्च सर्वथा कल्याणं भवति इति शम्।

## सहायकग्रन्थसूची


- नैषधीयचरितम् – श्रीहर्षविरचितम्, हिन्दी-अनुवादः, चौखाम्बा-विद्याभवन, प्रो. बा. नं-१०६९, वाराणसी।
- श्रीमद्भगवद्गीता –(५०२) (हिन्दी) साधारण-भाषा-टीका-सहित, गीता-प्रेस, गोरखपुरम्।
- भर्तृहरिः शतकत्रयम् –भर्तृहरिविरचितम्-आंलो-हिन्दी-अनुवादकः-पं, गोपीनाथः, राष्टियसंस्कृतसंस्थानम्, ५६-५७, इन्स्टिट्युट्श्युनाल-एरिया, जनकपुरी, नईदिल्ली-११००५८.
- यक्षप्रश्नाः – ओडआ-अनुवादकः, प्रशान्तकुमारपण्डा, नालन्दा, विनोदविहारी, कटक, ओडिशा।
- हितोपदेशः – नारायणशर्माविरचितः, (बांला) बङ्गानुवादकः-नरणारायणदाशः, जि. आर. पाब्लिकेशन्, संस्कृतबुक्डिपो, २८/१. विधानसरणी, कोलकाता-६


.

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# पाणिनीयव्याकरणे णत्वविधानसमीक्षायां निषेधविकल्पस्थलम्

**डॉ. सुदीप-मण्डलः**
**सहायकाध्यापकः, संस्कृतविभागः, उत्तरवङ्गविश्वविद्यालयः**
**जलपाइगुडिपरिसरः**

**प्रबन्धसारः**

*उदात्तादिस्वरात् अकारादिवर्णात् वा मिथ्याप्रयुक्तः शब्दः दुष्टः इत्युच्यते। स च वज्ररूपः दुष्टशब्दः यजमानमपि हिनस्ति यथा इन्द्रशत्रुः इत्यत्र स्वरतः अपराधात् वृत्रासुरं हतवान्। तथाह्युक्तं महाभाष्ये "दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥" इति। एतादृशं स्वरजनितं वर्णजनितं वा मिथ्याप्रयोगं दूरीकर्तुं पुण्योत्पादकान् साधुशब्दान् ज्ञापयितुं च व्याकरणस्योत्पत्तिः। संस्कृतजगति प्रसिद्धतमेषु अष्टसु नवसु वा ऐन्द्रादिव्याकरणेषु पाणिनीयव्याकरणमन्यतमम्। तस्य आधारीभूतः ग्रन्थः भवति अष्टाध्यायी इति। तस्याः अष्टमाध्याये चतुर्थपादे णत्वविधायकानि ३९ सूत्राणि द्वे वार्तिके च सन्ति। तेषां सूत्राणां वार्तिकानाञ्च निमित्तनिमित्तिनोः अवस्थानभेदात्, निषेधविकल्पादिभेदात् वा पञ्च विभागाः कल्पिताः। तथाहि समानपदस्थान्निमित्तात् णत्वम्, पूर्वपदस्थान्निमित्तात् णत्वम्, उपसर्गस्थान्निमित्तात् णत्वम्, विकल्पेन णत्वम्, निषेधस्थलं चेति। एतेषु कल्पितविभागेषु विकल्पेन णत्वविधायकानि सूत्राणि, निषेधात्मकानि सूत्रवार्तिकानि च प्रबन्धेऽस्मिन् सरलतया आलोचितानि। व्याख्यानावसरे आगतानां विशेषानां विवरणमपि तत्र तत्रैव प्रतिपादितम्। एतेन वर्णगतदोषाः दूरीभूताः भवेयुः इति मन्यते।*

**कुञ्चीशब्दाः** -णत्वम्, णत्वविधिः, णत्वनियमाः, णत्वविकल्पः, णत्वनिषेधः चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

**०. उपोद्घातः**

शब्दः उदात्तादिस्वरात् अकारादिवर्णात् वा मिथ्याप्रयुक्तः चेत् दुष्टः भवति। स च वज्ररूपः दुष्टशब्दः यजमानमपि हिनस्ति यथा इन्द्रशत्रुः इत्यत्र स्वरतः अपराधात् वृत्रासुरं हिंसितवान्। यथा उक्तं महाभाष्ये –

"दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥"[1] इति।

एतादृशं स्वरजनितं वर्णजनितं वा मिथ्याप्रयोगं दूरीकर्तुं पुण्योत्पादकान् साधुशब्दान् ज्ञापयितुं च व्याकरणस्योत्पत्तिः। स च व्याकरणशब्दः व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन इत्यर्थे विपूर्वकात् आङ्पूर्वकात् कृधातोः "करणाधिकरणयोश्च" (अष्टाध्यायी – ३/३/११७) इति सूत्रेण ल्युटि निष्पद्यते। अथवा व्याक्रियन्ते प्रकृतिप्रत्ययविभागपूर्वकं विविच्य असाधुशब्देभ्यः साधुशब्दाः पृथक्क्रियन्ते अनेन इत्यर्थे व्याकरणशब्दः निष्पद्यते। संस्कृतजगति प्रसिद्धतमेषु अष्टसु नवसु वा ऐन्द्रादिव्याकरणेषु पाणिनीयव्याकरणमन्यतमम्। तस्य आधारीभूतः ग्रन्थः भवति अष्टाध्यायी इति। तस्याः अष्टमाध्याये चतुर्थपादे णत्वविधायकानि ३९ सूत्राणि द्वे वार्तिके च सन्ति। तेषां सूत्राणां वार्तिकानाञ्च निमित्तनिमित्तिनोः अवस्थानभेदात्, निषेधविकल्पादिभेदात् वा पञ्च विभागाः कल्पिताः। तथाहि समानपदस्थान्निमित्तात् णत्वम्, पूर्वपदस्थान्निमित्तात् णत्वम्, उपसर्गस्थान्निमित्तात् णत्वम्, विकल्पेन णत्वम्, निषेधस्थलं चेति। एतेषु कल्पितविभागेषु केवलं विकल्पेन णत्वविधायकानि सूत्राणि, निषेधात्मकानि सूत्राणि वार्तिकमेकं च प्रबन्धेऽस्मिन् सरलतया आलोच्यन्ते। अन्येषां तु सामान्येन दिग्दर्शनं क्रियते। एतेन णत्वविषयकः संशयः, वर्णगतदोषः वा दूरीभूतः स्यादिति मन्यते।

---

[1] शतपथब्राह्मणे [१/५/२/१] एतादृशमाख्यानं प्राप्यते।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

**१. समानपदस्थान्निमित्तात् णत्वम्**

प्रसङ्गपतितानि समानपदस्थान्निमित्तात् णत्वविधायकानि सूत्राणि वार्तिकमेकं च सामान्यतया आलोच्यन्ते। समानपदं नाम एकपदम्। अर्थात् निमित्तनिमित्तिनौ एकस्मिन् एव पदे विद्येते। एवं निमित्तनिमित्तिनौ एकपदस्थौ चेत् रेफादिनिमित्तात् परस्य नकारस्य णत्वं स्यात्। तत्र समानपदस्थात् निमित्तात् परस्य निमित्तिनः नकारस्य णकारविधायकानि द्वे सूत्रे, वार्तिकमेकं च विद्यन्ते। तत्र "रषाभ्यां नो णः समानपदे" (अष्टाध्यायी – ८/४/१) इत्यनेन रेफषकाराभ्यां साक्षात्परस्य नकारस्य णत्वं विधीयते। यथा कृष्णः इत्यत्र षकारात् अव्यवहितपरस्य नस्य णत्वमनेन सूत्रेण साध्यते। मातृणाम् इत्यादौ नकारस्य रेफषकाराभ्यां परत्वाभावात् णत्वाप्राप्तौ "ऋवर्णाच्चेति वक्तव्यम्"[2] इति वार्तिकेन णत्वं विधीयते। "अट्कुप्वाङ्नुम्व्यवायेऽपि" (अष्टाध्यायी – ८/४/२) इति सूत्रेण ऋकारात् रेफषकाराभ्याञ्च परस्य नकारस्य अडादिभिः तन्नाम अट्, कवर्गः, पवर्गः, आङ्, नुम् इत्येतैः व्यस्तैः यथासम्भवं मिलितैः वा व्यवायेऽपि णत्वं विधीयते। यथा करणम्, हरणमित्यत्र रेफनिमित्तात् परस्य नकारस्य अड्व्यवाये णत्वविधानम्।

**२. पूर्वपदस्थान्निमित्तात् णत्वम्**

प्रसङ्गपतितं पूर्वपदस्थान्निमित्तात् णत्वविधानमपि सामान्यतया विचार्यते। समानपदस्थान्निमित्तात् परस्य नकारस्य णत्वविधानार्थं निमित्तनिमित्तिनोः एकपदस्थत्वमपेक्षते। परन्तु केषुचित् स्थलेषु पूर्वपदस्थात् निमित्तात् परस्य उत्तरपदस्थस्य नकारस्यापि णत्वं भवति। तत्र निमित्तनिमित्तिनोः भिन्नपदस्थत्वेऽपि नकारस्य णत्वं विधीयते। "पूर्वपदात्संज्ञायामगः" (अष्टाध्यायी – ८/४/३) इति सूत्रेण पूर्वपदस्थं रेफादिनिमित्तमाश्रित्य उत्तरपदस्थस्य नकारस्य गकारवर्जितैः अडादिभिः व्यवायेऽपि णत्वं विधीयते। तच्च संज्ञायामेव भवति। यथा द्रुरिव नासिका यस्य स द्रुणसः इत्यत्र पूर्वपदस्थात् रेफनिमित्तात् परस्य उत्तरपदस्थस्य नकारस्य गकारव्यवधानाभावे उकारव्यवधाने णत्वं सिद्ध्यति। ऋगयनमित्यत्र तु निमित्तादीनां विद्यमानत्वेऽपि गकारव्यवधानात् णत्वं न भवति। एवं "वनं पुरगामिश्रकासिध्रकाशारिकाकोटराऽग्रेभ्यः" (अष्टाध्यायी – ८/४/४), "प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽ-संज्ञायामपि" (अष्टाध्यायी – ८/४/५), "अह्नोऽदन्तात्" (अष्टाध्यायी – ८/४/७), "वाहनमाहितात्" (अष्टाध्यायी – ८/४/८), "पानं देशे" (अष्टाध्यायी –८/४/९), "एकाजुत्तरपदे णः" (अष्टाध्यायी – ८/४/१२), "कुमति च" (अष्टाध्यायी – ८/४/१३) इत्येतेष्वपि ऊह्यम्।

**३. उपसर्गस्थान्निमित्तात् णत्वम्**

एतन्निमित्तात् परस्य नकारस्य णत्वविधानमपि सामान्यतया प्रतिपाद्यते। पूर्वस्मिन् पदे उपसर्गः तिष्ठति चेत् तत्स्थात् निमित्तात् परस्य उत्तरपदस्थस्य नकारस्य समासे असमासे वा क्वचित् णत्वं भवति। तत्र उपसर्गस्थात् निमित्तात् साक्षात्परस्य अडादिव्यवहितपरस्य वा उत्तरपदस्थस्य नकारस्य णत्वमिति बोध्यम्। यथा "उपसर्गादसमासेऽपि णोपदेशस्य" (अष्टाध्यायी – ८/४/१४) इति सूत्रेण णकारः उपदेशे यस्य, तस्य णोपदेशस्य धातोः नकारस्य उपसर्गस्थात् निमित्तात्परस्य णकारादेशः प्राप्नोति। एतादृशं णत्वं समासे असमासे चेति उभयत्र सम्भवति। यथा णम प्रह्वत्वे शब्दे च इति णोपदेशस्य धातोः नकारस्य उपसर्गस्थात् रेफनिमित्तात् परस्य णत्वं प्राप्नोति। तेन प्रणमति इति रूपं सिद्ध्यति। अत्र पूर्वपदाधिकारात् लब्धस्य समासे इति अधिकारस्य निवृत्तिद्योतनार्थमेव असमासे इत्यस्य ग्रहणम्। एवं "हिनुमीना" (अष्टाध्यायी – ८/४/१५), "आनि लोट्" (अष्टाध्यायी – ८/४/१६), "नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च" (अष्टाध्यायी – ८/४/१७), "अनितेः" (अष्टाध्यायी – ८/४/१९), "अन्तः" (अष्टाध्यायी – ८/४/२०), "उभौ साभ्यासस्य" (अष्टाध्यायी – ८/४/२१), "हन्तेरत्पूर्वस्य" (अष्टाध्यायी – ८/४/२२), "अन्तरदेशे" (अष्टाध्यायी – ८/४/२४), "अयनं च" (अष्टाध्यायी – ८/४/२५), "छन्दस्यृदवग्रहात्"

[2] "रषाभ्यां नो णः समानपदे" इति सूत्रे पठितं वार्तिकमिदम्।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

(अष्टाध्यायी – ८/४/२६), "नश्च धातुस्थोरुषुभ्यः" (अष्टाध्यायी – ८/४/२७), "उपसर्गाद् बहुलम्" (अष्टाध्यायी – ८/४/२८), "कृत्यचः" (अष्टाध्यायी – ८/४/२९), "इजादेः सनुमः" (अष्टाध्यायी – ८/४/३२) इत्येतेष्वपि ऊह्यम्।

**४. विकल्पेन णत्वम्**

क्वचित् पूर्वपदस्थात् उपसर्गस्थात् वा निमित्तात्परस्य नकारस्य णत्वविधानं विकल्पेन सिद्ध्यति। तत्र णत्वपक्षे एकम्, णत्वाभावपक्षे चापरमिति रूपद्वयं स्यात्। एतादृशानि वैकल्पिकणत्वविधयकानि सूत्राणि अधः विचार्यन्ते। तथाहि–

**४.१. विभाषौषधिवनस्पतिभ्यः (अष्टाध्यायी – ८/४/६)** – ओषधिवाचकेभ्यः वनस्पतिवाचकेभ्यः च पूर्वपदेभ्यः परस्य उत्तरपदस्थस्य वनशब्दगतनकारस्य विकल्पेन णत्वं सूत्रेणानेन विधीयते। फलपाकानन्तरं याः नश्यन्ति ताः ओषध्यः भवन्ति। अपुष्पात् ये फलवन्तः भवन्ति ते वनस्पतयः इत्युच्यन्ते। यथा चोक्तममरकोशे - "वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिः। ओषधिः फलपाकान्ता स्याद्"[3] इति। यथा फलपाकानन्तरं धान्यस्य अन्तः भवति। अतः धान्यवणमित्यत्र ओषधिवाचकात् धान्यशब्दात् परस्य उत्तरपदस्य वनशब्दगतनकारस्य प्रकृतसूत्रेण णत्वं भवति। णत्वाभावपक्षे तु धान्यवनमिति। यद्यपि पुष्पैः विना यः फलति स एव वनस्पतिः इत्युच्यते तथापि वनस्पतिशब्देन अत्र वृक्षसामान्यं गृह्यते। तेन शिरीषवणम्, शिरीषवनम् इत्यादिष्वपि विकल्पेन णत्वं सिद्ध्यति।

**४.२. वा भावकरणयोः (अष्टाध्यायी – ८/४/१०)** – अदेशार्थमयमारम्भः। पीतिः पानमित्यत्र "ल्युट् च" (अष्टाध्यायी – ३/३/११५) इति सूत्रेण नपुंसकलिङ्गे भावे ल्युट्-प्रत्ययः। पीयते अनेन इति पानः इत्यत्र "करणाधिकरणयोश्च" (अष्टाध्यायी – ३/३/११७) इति सूत्रेण करणे ल्युट्-प्रत्ययः। एतयोः अदेशार्थकयोः पानशब्दयोः नकारस्य विकल्पेन णत्वविधानार्थं वचनमिदम्। एवञ्च भावे करणे च यः पानशब्दः विद्यते, तस्य पूर्वपदस्थात् निमित्तात् विकल्पेन णत्वं सूत्रेणानेन विधीयते। यथा क्षीरस्य पानमिति विग्रहे भावार्थकेन ल्युटा क्षीरपानमिति जाते प्रकृतसूत्रेण विकल्पेन णत्वे क्षीरपाणमिति रूपम्। पुनश्च क्षीरं पीयते अनेन इति विग्रहे करणार्थकेन ल्युटा क्षीरपानः इति जाते प्रकृतसूत्रेण विकल्पेन णत्वे क्षीरपाणः इति रूपम्। णत्वाभावपक्षे तु क्षीरपानम्, क्षीरपानः इति रूपद्वयं सिद्ध्यति। अत्र वाप्रकरणे गिरिनद्यादीनाम् उपसंख्यानं वक्तव्यम्। उपसंख्यानशब्दस्य प्रतिपादनमित्यर्थः। तेन गिरिणदी, गिरिनदी इत्यादौ अपि णत्वविकल्पः इति बोध्यः।

**४.३. प्रातिपदिकान्तनुंविभक्तिषु च (अष्टाध्यायी – ८/४/११)** – इदं सूत्रमपि विकल्पार्थम्। अत्र "पूर्वपदात्संज्ञायामगः" इत्यतः पूर्वपदात् इति अनुवर्तते। पूर्वसूत्रात् वेत्यपि अनुवर्तते। प्रातिपदिकान्ते नुमि विभक्तौ च विद्यमानस्य नकारस्य पूर्वपदस्थात् निमित्तात् विकल्पेन णत्वं भवतीति सूत्रार्थः। यथा माषान् वपेते इत्यर्थे "बहुलमाभीक्ष्ण्ये" (अष्टाध्यायी – ३/२/८१) इत्यनेन णिनिप्रत्यये माषवापिनौ इति जाते प्रकृतसूत्रेण प्रातिपदिकान्तस्य नकारस्य पूर्वपदस्थात् षकारनिमित्तात् विकल्पेन णत्वे माषवापिणौ इति सिद्ध्यति। णत्वाभावपक्षे तु माषवापिनौ इति रूपं सिद्ध्यति। एवं माषवापाणि, माषवापानि, माषवापेण, माषवापेन इत्यादौ अपि नुमः विभक्तिस्थस्य च नकारस्य पूर्वपदस्थात् षकारनिमित्तात्परस्य विकल्पेन णत्वमिति द्रष्टव्यम्।

**४.४. शेषे विभाषाऽकखादावषान्त उपदेशे (अष्टाध्यायी – ८/४/१८)** – नेर्गदनदेति सूत्रोक्तधातुभ्यः अन्यः शेषः। तेषु उपदेशे अककारादिः अखकारादिः अषकारान्तश्च यः धातुः तस्मिन् परतः उपसर्गस्थात् निमित्तादुत्तरस्य ने-इत्यस्य नकारस्य विकल्पेन णकारादेशः भवति। तेन प्रणिपचति इत्यादौ पच्-धातोः उपदेशे ककारादिखकारादिषकारान्तत्वाभावात् गदादिभ्यः उक्तधातुभ्यः अन्यत्वाच्च उपसर्गस्थान्निमित्तात् उत्तरस्य नि-इत्यस्य नकारस्य विकल्पेन णत्वं सिद्ध्यति। णत्वाभावपक्षे तु प्रनिपचति इति रूपं सिद्ध्यति।

[3] अमरकोषस्य द्वितीये काण्डे वनौषधिवर्गे श्लोकसंख्या - ६

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

**४.५. वमोर्वा (अष्टाध्यायी – [८/४/२३])** – वकारमकारयोः परतः हन्तिनकारस्य उपसर्गस्थान्निमित्तात् उत्तरस्य वा णकारादेशः स्यात्। यथा प्रहण्वः, प्रहण्मः इत्यादिषु वकारमकारयोः परस्मिन् विद्यमानत्वे सति हन्-धातोः नकारस्य उपसर्गस्थात् निमित्तात्परस्य णकारादेशः भवति। णत्वाभावपक्षे तु प्रहन्वः, प्रहन्मः इति रूपमपि सिद्ध्यति।

**४.६. णेर्विभाषा (अष्टाध्यायी – ८/४/३०)** – ण्यन्तात् विहितः यः कृत्प्रत्ययः तत्स्थस्य नकारस्य उपसर्गस्थान्निमित्तात् विकल्पेन णकारादेशः भवति। यथा प्रयापणम्, प्रयापनम् इत्यादौ ण्यन्तात् विहितस्य कृत्प्रत्ययस्थस्य ल्युडादेशस्य नकारस्य उपसर्गस्थान्निमित्तात् विकल्पेन णत्वं भवति। विहितविशेषणात् यका व्यवधानेऽपि प्रयाप्यमाणमित्यादौ अपि णत्वं सिद्ध्यति।

**४.७. हलश्चेजुपधात् (अष्टाध्यायी – ८/४/३१)** – 'कृत्यचः' इति अनुवर्तते। हल् इति धातोः विशेषणम्। तेन तदन्तविधिना हलन्तमिति स्यात्। परन्तु सर्वे इजुपधाः धातवः हलन्ताः एव विद्यन्ते। अतः इजुपधत्वादेव हलन्तत्वे लब्धे पुनः हल्ग्रहणं किमर्थमिति जिज्ञासायामुच्यते हल् आदेः विशेषणम्। तेन अत्र हलादिः इत्यर्थः लभ्यते। एवञ्च अस्यार्थः भवति हलादिः यः धातुः इजुपधः, तस्मात् परं विद्यमानस्य अचः उत्तरस्य कृत्स्थस्य नकारस्य उपसर्गस्थान्निमित्तात् विकल्पेन णकारादेशः भवतीति। यथा प्रकोपणम्, प्रकोपनम् इत्यत्र कुप्-धातुः हलादिः इजुपधश्च वर्तते। अतः उपसर्गस्थात् रेफनिमित्तात् कृत्स्थस्य अचः उत्तरस्य ल्युडादेशनकारस्य विकल्पेन णत्वं भवति।

**४.८. वा निसनिक्षनिन्दाम् (अष्टाध्यायी – ८/४/३३)** – 'उपसर्गात्' इति अनुवर्तते। तेनार्थः भवति एतेषां निसादीनां नकाराणामुपसर्गस्थात् निमित्तात् विकल्पेन णत्वं स्यादिति। यथा प्रणिसनम्, प्रनिसनम् इत्यादौ निस्-धातोः नकारस्य उपसर्गस्थात् रेफनिमित्तादुत्तरस्य नकारस्य णकारादेशः सूत्रेणानेन सिद्ध्यति। एवं प्रणिक्षणम्, प्रनिक्षणमित्यादौ अपि ऊह्यम्।

**५. निषेधस्थलम्**

क्वचित् नियमेन प्राप्तं णत्वं सूत्रान्तरेण निषिध्यते। तत्र णत्वविधायकनिमित्तनिमित्तिनोः विद्यमानत्वेऽपि णत्वं न भवति। एतादृशानि णत्वनिषेधस्थलानि अधः प्रदर्श्यन्ते। तथाहि–

**५.१. न भाभूपूकमिगमिप्यायीवेपाम् (अष्टाध्यायी – ८/४/३४)** – "कृत्यचः" (अष्टाध्यायी – ८/४/२९) इत्यनेन प्राप्तस्य णत्वस्य निषेधार्थमिदं सूत्रम्। भा, भू, पू, कमि, गमि, प्यायी, वेप इत्येतेषाम् उपसर्गस्थात् निमित्तात् परत्वेऽपि अचः उत्तरस्य कृत्प्रत्ययावयवस्य नस्य णत्वं न भवतीत्यर्थः। यथा प्रभानम् इत्यत्र उपसर्गस्थात् निमित्तात् परस्य अचः उत्तरस्य नकारस्य "कृत्यचः" इत्यनेन णत्वे प्राप्ते प्रकृतसूत्रेण भाधातुपरत्वात् णत्वं निषिध्यते। एवं प्रभवनम् इत्यादौ अपि निमित्तनिमित्तिनोः विद्यमानत्वेऽपि भूधात्वादिपरत्वात् णत्वं न भवति।

**५.२. षात्पदान्तात् (अष्टाध्यायी – ८/४/३५)** – अनेन पदान्तात् षकारात् उत्तरस्य नकारस्य णत्वं निषिध्यते। यथा निष्पानम् इत्यत्र षकारात् उत्तरस्य नकारस्य अडादिभिः व्यवायेऽपि षकारस्य पदान्तत्वात् णत्वं न सिद्ध्यति। अत्र पदस्यान्तः इति विग्रह नैव स्वीक्रियते, अपि तु पदे अन्तः पदान्तः इति सप्तमीसमासः स्वीक्रियते। तेन सुसर्पिष्केण इत्यत्र कान्तत्वात् णत्वं सिद्ध्यति।

**५.३. नशेः षान्तस्य (अष्टाध्यायी – ८/४/३६)** – "उपसर्गादसमासे" (अष्टाध्यायी – ८/४/१४) इत्यनेन प्राप्तस्य णत्वस्य निषेधार्थमिदं सूत्रम्। नशेः षकारान्तस्य नकारस्य उपसर्गस्थात् निमित्तात् परत्वेऽपि णत्वं न भवतीति सूत्रार्थः। यथा प्रनंष्टा इत्यत्र नकारस्य उपसर्गस्थात् रेफनिमित्तात् परत्वेऽपि नशेः षान्तत्वात् णत्वाभावः। षान्तग्रहणात् नशेः षान्तत्वाभावस्थले णत्वं प्राप्नोति। तेन प्रणश्यति इत्यत्र णत्वं सिद्ध्यति। अन्तग्रहणं तु षान्तभूतपूर्वमात्रस्यापि निषेधार्थम्।

**५.४. पदान्तस्य (अष्टाध्यायी – ८/४/३७)** – "अट्कुप्वाङ्नुम्व्यवायेऽपि" (अष्टाध्यायी – ८/४/२) इत्यनेन प्राप्रस्य णत्वस्य निषेधार्थमिदं सूत्रम्। रेफषकाराभ्यां परस्य पदान्तस्य नकारस्य अडादिभिः व्यवायेऽपि णत्वं न भवतीति सूत्रार्थः। यथा रामान् इत्यत्र रेफात्परस्य नकारस्य अडादिभिः व्यवाये

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

"अट्कुप्वाङ्नुम्व्यवायेऽपि" इति सूत्रेण णत्वे प्राप्ते प्रकृतसूत्रेण तस्य नकारस्य पदान्तत्वात् णत्वं न भवति।

**५.५. पदव्यवायेऽपि (अष्टाध्यायी – ८/४/३८)** – णत्वसाधकयोः निमित्तनिमित्तिनोः विद्यमानत्वेऽपि पदव्यवाये सति सूत्रेणानेन णत्वं निषिध्यते। यथा माषाणां कुम्भः माषकुम्भः, तस्य वापः माषकुम्भवापः,तेन माषकुम्भवापेन इत्यत्र निमित्तनिमित्तिनोः षकारनकारयोः कुम्भपदेन व्यवधानात् णत्वाभावः इति बोध्यम्।

**५.६. क्षुभ्नादिषु च (अष्टाध्यायी – ८/४/३९)** – क्षुभ्नादिः आकृतिगणः। तत्र विद्यमानेषु क्षुभ्ना नन्दिन् नन्दन नगर इत्येवमादिषु शब्देषु विद्यमानस्य नकारस्य निमित्तनिमित्तिनोः सत्त्वेऽपि णत्वं न भवतीति सूत्रार्थः। यथा क्षुभ्नाति इत्यत्र षकारात् परस्य नकारस्य अडादिभिः व्यवायेऽपि णत्वं न भवति। हरिनन्दी, हरिनन्दनः, हरिनगरम् इत्यादौ अपि णत्वाभावः दृश्यते।

**५.७. आचार्यादणत्वञ्च**[4] - आचार्यात् णत्वं न इति वक्तव्यम्। चकारात् आनुक् ङीष् च समुच्चीयते। आचार्यस्य स्त्री इत्यर्थे "इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणा-मानुक्" (अष्टाध्यायी – ४/१/४९) इति सूत्रेण आनुकि ङीषि च आचार्यानी इति जाते "अट्कुप्वाङ्नुम्व्यवायेऽपि" (अष्टाध्यायी – ८/४/२) इत्यनेन सूत्रेण रेफात् परस्य नकारस्य अडादिभिः व्यवाये प्राप्तस्य णत्वस्य प्रकृतवार्तिकेन एव निषेधः इति बोध्यः।

**६. उपसंहारः**

प्रबन्धेऽस्मिन् निमित्तनिमित्तिनोः अवस्थानभेदात्, निषेधविकल्पादिभेदात् वा णत्वविधायकानां सूत्राणां पञ्च विभागाः कल्पिताः। ते तावत् समानपदस्थान्निमित्तात् णत्वम्, पूर्वपदस्थान्निमित्तात् णत्वम्, उपसर्गस्थान्निमित्तात् णत्वम्, विकल्पेन णत्वम्, निषेधस्थलं चेति। एतेषु आद्यं विभागत्रयं तन्नाम समानपदस्थान्निमित्तात्, पूर्वपदस्थान्निमित्तात्, उपसर्गस्थान्निमित्तात् च णत्वविधानं दिङ्मात्रं प्रदर्शितम्। ततश्च विकल्पेन णत्वविधायकानि सूत्राणि, निषेधात्मके सूत्रवार्तिके च विस्तारेण आलोचितानि। तत्र वैकल्पिकणत्वविधायकानां सूत्राणां विवरणं प्रतिपाद्य नियमेन प्राप्तस्य णत्वस्य निषेधात्मकानि सूत्राणि वार्तिकञ्च आलोचितानि। व्याख्यानावसरे आगतानां विशेषानां विवरणमपि तत्र तत्रैव प्रस्तुतम् इति शम्।

ଓଃଓଃଓଃ

## सहायकग्रन्थसूची


- अमरसिहः। अमरकोषः (सुधाव्याख्यया सहितः)। वाराणसी : चौखम्बा कृष्णदास अकादेमी, २०१३।
- पतञ्जलिः। व्याकरणमहाभाष्यम् (प्रदीपभावबोधिनी-सहितम्)। जयशंकरलालत्रिपाठी (सम्पादकः)। वाराणसी– चौखम्बा कृष्णदास अकादमी, २०१३।
- पतञ्जलिः। व्याकरणमहाभाष्यम् (प्रदीपोद्योत-तत्त्वालोक-टीकासहितम्)। रुद्रधरझाशर्मा (सम्पादकः)। वाराणसी– चौखम्भा संस्कृत संस्थान, २००४।
- पाणिनिः। अष्टाध्यायी। गोपालदत्तपाण्डेयः (सम्पा.)। वाराणसी: चौखम्बा सुरभारती प्रकाशन, २००९।
- पाणिनिः। अष्टाध्यायीसूत्रपाठः। दीक्षितपुष्पा (सम्पा.)। नवदेहली : संस्कृतभारती, २०१०।
- भट्टोजिदीक्षितः। वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनीटीकाद्वयोपेता)। गिरिधरशर्मा, परमेश्वरानन्दशर्मा च (सम्पा.)। वाराणसी : मोतीलाल बनारसीदास, २०१०।
- भट्टोजिदीक्षितः। वैयाकरणसिद्धान्तकौमुदी (लक्ष्मीव्याख्योपेता)। श्रीबालकृष्णशर्मा पञ्चोलिः (सम्पा.)। वाराणसी : मोतिलाल बनारसी दास, १९६६।
- भीमसेनशास्त्री। लघुसिद्धान्तकौमुदी (भैमीव्याख्या-सहिता)। दिल्ली : भैमी प्रकाशन, २०२१।
- वामनजयादित्यः। काशिका (न्यास-पदमञ्जरी-भावबोधिनीसहिता)। जयशङ्करलालत्रिपाठी (सम्पा.)। वाराणसी : तारा बुक एजेन्सी, २०१५।


[4] 'क्षुभ्नादिषु च' इत्यत्र पठितं वार्तिकमिदम्।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# लोकोपकाराय श्रीमद्भगवद्गीतोपदेशाः

**शान्ति-घोषः**
**सहायकाचार्यः(अतिथिः), अद्वैतवेदान्तविद्याशाखा**
**श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयः, कोलकाता-३५**

**प्रबन्धसारः**

*परिदृश्यमानप्रपञ्चः अतिविचित्रः प्रतिक्षणं परिवर्तनस्वभावश्च। तदर्थं शास्त्रेष्वपि संसारः महीरुहादिभिः विशिष्टशब्दैः उपमितः। सुखं दुःखं चेति द्वाभ्यां रचितः अयं प्रपञ्चः। सुखं तत्र प्राणिभिः अत्यल्पशः अनुभूयमानम्। दुःखं तु सर्वदा सर्वैः अनुभूयमानमेव वर्तते। तथा च कालिदासीयं वचः* ***नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण*** *इति। अन्यच्च वचः* ***चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च*** *इति। प्राणिनः स्वभावतः आनन्दमेव शाश्वतिकरूपेण वाञ्छन्ति दुःखं च अत्यल्पमपि नेच्छन्ति। परन्तु गुणत्रयवैचित्र्यात् दुःखं संसारे ध्रुवम् एव। तर्हि ततः उद्धारोपायः कः इति प्रश्नस्य समाधानरूपेणैव शास्त्राणि एव अस्मत्पुरत उपतिष्ठन्ते। सनातनहिन्दुधर्मस्य शिरोभूषणेषु वेदादिशास्त्रेषु दुःखात् निस्तारोपायः उपवर्णितः। वेदोक्तोपाय एव सहजबोध्यैः रुचिरशब्दैः गीतच्छलेन वा श्रीमद्भगवद्गीतायाम् उपदिष्टः। श्रीमद्भगवद्गीता हि वेदार्थसारसंग्रहभूता अर्जुनाय भगवता श्रीकृष्णेन उपदिष्टा महाभारते भीष्मपर्वणि त्रिकालदर्शिना वेदव्यासेन ग्रथिता च। सनातनधर्मस्य रत्नभूतः अयं ग्रन्थः। संसारमार्गे कथं वर्तितव्यं, के च मोक्षमार्गे अधिकारिणः, मानवधर्मः कः, सुखस्य दुःखस्य च निदानं किम्, किं कर्त्तव्यं किं च न कर्त्तव्यम् इत्याद्यनेकविषयेषु गीतोक्तं वचनं प्रत्यहं मनुजैः अनुसर्त्तव्यम्। एवं शास्त्रीयव्यवहारे लौकिकव्यवहारे च कथं नैपुण्यम् अर्जनीयम् इत्यस्मिन् विषये भगवद्गीता हि प्रमाणभूता। एवं गीतोपदेशः मानवजीवने प्रतिक्षणम् अन्वेति जनेभ्यः परमसुखस्य मार्गं च दर्शयति। अतः गीतोक्तानि तत्त्वानि आलोचितव्यानि एव। तदर्थम् अयं लघुशोधप्रबन्धः लिखितो वर्तते।*

**कुञ्चीशब्दाः**- शास्त्रम्, मोक्षः, बन्धः, श्रद्धा, ज्ञानम्, कर्मयोगः, भक्तिः चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

## भूमिका

सनातनवैदिकधर्मस्य आधारभूतो हि वेदः। **"वेदोऽखिलधर्ममूलम्"**[1] इति मनुमहर्षेः वचनम्। वेदो हि धर्मविषयकजिज्ञासायां परमतत्त्वानुसन्धाने च परमप्रमाणम्। कर्मकाण्डज्ञानकाण्डभेदेन वेदस्य द्विधा प्रकाशः। तत्र यज्ञादिमीमांसापरकः कर्मरहस्यप्रतिपादनपरः भागः कर्मकाण्डः। आत्मतत्त्वमीमांसाबोधनपरः वेदभागः उपनिषदिति नाम्ना प्रथते। उपनिषदि आत्मयाथात्म्यमेव प्राधान्येन प्रतिपाद्यते। इयम् उपनिषद् रहस्यविद्येति अपरनामधेया। श्रीकृष्णेन सर्वज्ञेन भगवता यथोपदिष्टं सर्वोपनिषद्रहस्यं सारवद्वचोभिः श्लोकशः ग्रथितं व्यासावतारेण गीतायाम्। समस्तवेदार्थसारसंग्रहभूता श्रीभगवन्मुखनिःसृतेयं गीता। **"गीता मे हृदयं पार्थ"** इति भगवद्वचनं गीताविषये। अद्वैतवेदान्तस्य प्रस्थानत्रय्याम् इदं स्मृतिप्रस्थानम्। यः धर्मः अर्जुनाय शोकमोहमहोदधौ निमग्नाय भगवता उपदिष्टः, तं धर्मं वेदव्यासः सर्वज्ञः भगवान् सप्तभिः श्लोकशतैः उपनिबबन्ध इत्युक्तं गीतोपद्घातशांकरभाष्ये।[2] आत्ममीमांसादिगभीरतत्त्वानां सरलश्लोकैः उपदेशः गीतायाः महदेकं वैशिष्ट्यम्। धर्मीयसंकीर्णतायाः परित्यागेन आध्यात्मिकतायाः स्रोत एव प्रवहति सम्पूर्णगीतायाम्। अतः अस्योपादेयत्वं वैशिष्ट्यमावहति।

## गीतोक्तं तत्त्वम्

शोकमोहौ संसारस्य कारणभूतौ। उभावपि अज्ञानप्रभवौ। अनयोः दाहः ज्ञानेनैव भवति। ज्ञानं च

[1] मनुस्मृतिः २/६/१३

[2] "तं धर्मं भगवता यथोपदिष्टं वेदव्यासः सर्वज्ञो भगवान् गीताख्यैः सप्तभिः श्लोकशतैरुपनिबबन्ध" इति। (गीतोपद्घातशाङ्करभाष्यम्)

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

तत्त्वमस्यादिवाक्योत्थं जीवब्रह्मैक्यरूपम्।[3] सांसारिकदुःखदहनमेव गीतायाः परमं साध्यम्। गीतोदेशस्य प्रारम्भे सांसारिकजनस्य दुर्दशैव वर्ण्यते। पार्थः पाशबद्धः पक्षी इव किंकर्तव्यविमूढः भगवन्तं प्रार्थयति कर्तव्यम् उपदिशत्विति। ईशोऽपि शरणागतमर्जुनम् आदौ लौकिकमेव उद्धारोपायं निर्दिश्य अन्ते संसारोपद्रवदाहकम् आध्यात्मिकमार्गं प्रदर्शयति। अर्जुनोऽत्र जीवात्मस्थानीयः श्रीकृष्णश्च परमात्मा। अनयोः जीवब्रह्मणोः ऐक्यं "**तत्त्वमसीति**"[4] यदुपनिषदि आम्नातं तदेव तत्त्वमत्रापि उपदिश्यते।

आध्यात्मिकं ज्ञानं, फलाभिसन्धिं विना कर्मानुष्ठानं, शास्त्रोक्तकर्माचरणं, सत्यानुसन्धानम्, ईश्वरप्रेम, निःस्वार्थपरता, दानम्, श्रद्धा, सुखदुःखयोः अवशीभाव इत्यादीनां शास्त्रप्रतिपादिततत्त्वानाम् उपदेशः, तेषां च स्वजीवने पालनोपायः गीतायां प्रतिपादितः।

**गीतायाः उपमा**

यस्य तुल्यं किञ्चन वस्तु उपलभ्यते तस्यैव उपमा दीयते। गीता केनापि उपमातुं न शक्यते यतो हि गीतातुल्यो ग्रन्थो न जगतीतले अस्ति। परमोपेयस्य अमृतत्वस्य सन्धानं गीतायां प्राप्यते। सर्वाः उपनिषदः गोसदृशाः, तासां दोग्धा गोपनन्दनः त्रिलोकसुन्दरः भगवान् श्रीकृष्णः, पार्थोऽत्र वत्सस्थानीयः, दुग्धं च गीतामृतम्। "अपाम सोमम् अमृता अभूम"[5] इति सोमरसं पीत्वा यथा देवा अमराः सञ्जाताः तथैव गीतामृतम् आस्वाद्य संसारार्णवं तितीर्षवो मुमुक्षवः चिराय उत्तीर्णा भवन्ति। तथा च उपनिषदुक्ततत्त्वान्येव अत्र विषयः। तेषां च उपदेष्टा साक्षादीश्वरः श्रीकृष्णाख्यं परं ब्रह्म। मुमुक्षुः अर्जुनः अत्र अधिकारी। अर्जुनम् उपलक्षीकृत्य सर्वप्राणिभ्यः जननमरणलक्षणात् संसारात् उद्धारोपायम् उपदिशति भगवान्।

**अनुबन्धचतुष्टयम्**

अनु स्वज्ञानादनन्तरं बध्नन्ति शास्त्रे ग्रन्थे वा आसज्जयन्ति ये तेऽनुबन्धाः। अधिकारी, विषयः, सम्बन्धः, प्रयोजनं चेति चत्वारः अनुबन्धाः सर्वत्रैव शास्त्रे। साधनचतुष्टयसम्पन्नः प्रमाता मुमुक्षु एव गीताशास्त्रे अधिकारी। विषयः जीवब्रह्मणोः ऐक्यम्। सम्बन्धः प्रतिपाद्यप्रतिपादकलक्षणः। प्रयोजनम् अनाद्यज्ञाननिवृत्तिः स्वस्वरूपानन्दावाप्तिश्च। इत्थं गीतायामपि शास्त्रारम्भप्रतिपत्तिहेतवः चत्वारः अनुबन्धा उन्नेयाः।

**माहात्म्यकथनम्**

परमकृपालुः भगवान् भक्तान् उद्धर्तुमेव युगे युगे धराम् अवतीर्णः। शरणागतार्तिच्छेदः तदीयकृपा। तस्य निदर्शनं तु साक्षाद् गीतैव। "**धर्मेण हीनाः पशुभिः समानाः**" इति शास्त्रोक्तसिद्धान्तानुकूलं वक्तुं शक्यते धर्म एव मानवानां विशेषः। सदाचाराद‍ृते धर्मस्य अन्यल्लक्षणं नास्ति।[6] शास्त्रोपदिष्टः आचारः प्राणिनां साक्षादभ्युदयकारणम्। धर्मः मोक्षश्चेति द्विविधः मार्गः गीतायामेव सरलतया उपदिष्टः। गीतोक्तधर्मस्य अनुष्ठानेन सर्वप्राणिनां भूतिः ध्रुवा।

**गीता समाजनिर्माणकुञ्चिका**

जनानां समूहेनैव समाजः न निर्मीयते। **प्राकृत**[7]जनानां यत्र समाजे वासः सः समाजः स्वस्थः समाजः न भवति। यत्र व्यवहारनिपुणानां धार्मिकाणां वेदविदां च मनुष्याणां वासः, सः समाजः स्वस्थः व्यवस्थितश्च भवति। आध्यात्मिकं ज्ञानं तत्रोपकारकम्। शास्त्रज्ञानं तस्य च व्यवहारोपयोगः एतद्द्वयमेव पर्याप्तं समाजनिर्माणाय। धर्मोऽस्माकं जीवने ओतप्रोतभावेन अनुस्यूतः। धर्मशब्दः न केवलं शास्त्रीयव्यवहारे प्रयुक्तः अपि तु अस्माकं प्रात्यहिकव्यवहारे बहुलम् उपयुक्तः। धर्मस्य यथार्थं तत्त्वं गीतायां निहितम्। सम्पूर्णोऽपि गीताग्रन्थः मानवोन्नतेः सोपानभूतं धर्मम् अवलम्ब्यैव उपदिष्टः। गीताग्रन्थः सर्वेषां कृते उपादेयः। स्वधर्मः इत्यंशः गीतायाम् उपदिष्टः। स्वधर्माचरणं सर्वैः कर्तव्यं भवति। स्वकर्तव्यं न कोऽपि हेयत्वेन गृह्णीयात्। यथा

---

[3] "यस्मिन् सर्वाणि भूतानि..." इति। (ईशावास्योपनिषत् ७)

[4] छान्दोग्योपनिषत् ६/८/७

[5] ऋग्वेदः ८/४८/३

[6] "श्रुतिः स्मृतिः सदाचारः..." इति। (मनुस्मृतिः २/१३२)

[7] प्राकृताः अविद्वांसः शास्त्रज्ञानविरहिता जना उच्यन्ते।

क्षात्त्रः धर्मः युद्धं विजयश्च। विद्यार्थिनां स्वाध्यायो धर्मः। स्वधर्माचरणस्य त्यागे सति समाजस्य अवनतिः भवति।

फलानुसन्धानं विहाय निष्कामकर्मानुष्ठानस्य उपदेशः गीतायां द्वितीये तृतीये च अध्याये प्राप्यते। कर्मफलम् उद्दिश्य कर्म कुर्वतां जनानां फलस्य अप्राप्तौ सत्यां दुःखं जायते। तदेव अनन्तरं मानसिकशान्तौ व्याघातं जनयति। अतः यावच्छक्यं कर्मणि एव निष्ठा स्थापनीया, न तु तत्फले इत्ययं शाश्वतः उपदेशः समाजस्य कृते।

शास्त्रेषु उपदिष्टः श्रद्धाशब्दः गीतायामपि आगतः। श्रद्धावान् लभते ज्ञानम् इत्युपदिष्टं गीतायाम्। गुरूपदिष्टवेदान्तवाक्येषु विश्वासः श्रद्धा इत्युक्तं वेदान्तसारे। शरणागतिः इत्ययं शब्दः बौद्धदर्शनेषु अपि आगतः। शरणागतिः अपि श्रद्धायाः फलम्। व्यवहारे अपि पश्यामः चेत् श्रद्धा सर्वत्र ओतप्रोतभावेन अनुस्यूततया वर्तते। सर्वेषु कर्मसु यथा अध्ययनम् इत्यादौ श्रद्धा एव प्रवृत्तेः कारणं भवति।

"नूतनस्वच्छसमाजनिर्माणाय धर्मीयग्लानिसकलानि दूरीकर्तव्यानि तदर्थं धर्मस्य प्रकृतं लक्षणं ज्ञेयं पालनीयञ्चास्ति। स्वधर्मविषयेऽपि यथावत् प्रवर्तितव्यं भवति। तदर्थं च गीतायाः अध्ययनस्य आवश्यकता वर्तते" इति श्री-अरविन्दघोषमहाभागैरुक्तम्। निःस्वार्थाः धर्मपरायणा जनाः यत्र वसन्ति सः आदर्शसमाजः। तस्माद् गीताध्ययनं तदुपदिष्टमार्गानुसरणं समाजनिवासिभिरवश्यं करणीयम्। गीतायाः प्रचारः प्रसारश्च करणीय एव।

**कर्त्तव्याकर्त्तव्यविचारः**

कर्मणा अयं लोकः बद्धः।[8] कर्म अकृत्वा न कश्चन जनः क्षणमपि स्थातुं शक्नोति।[9] परन्तु किं कर्म करणीयं किं न करणीयम् इत्यत्रैव प्राकृतबुद्धीनां जनानां विचिकित्सा।[10] कर्त्तव्याकर्त्तव्यविषये बोधनाय विधिप्रतिषेधपरकं शास्त्रं प्रवर्तते। शास्त्रोक्तं कर्म नाचर्यते चेत् बद्धो भवति सर्वः लोकः।[11] तस्मात् शास्त्रानुसारं कर्म आचरणीयम्। गीतायामपि उच्यते कर्त्तव्याकर्त्तव्यविषये शास्त्रमेव प्रमाणभूतम्।[12]

**स्वधर्मपालनोपदेशः**

स्वधर्मपालनविषये गीतायाम् उपदिष्टः मार्गः जगति कस्यचिदपि भिन्नधर्ममतावलम्बिनः जनस्य संशयं न जनयति। स्वस्य यः धर्मः यत् कर्म तत्र निष्ठा करणीया। कोऽपि धर्मः अहितं न अनुशास्ति हितमेव सदा अनुशास्ति। हितशासनात् शास्त्रम् इत्यपि उच्यते। तस्मात् स्वधर्मपालनेन जनः रक्षितः भवति। "धर्मो रक्षति रक्षितः" इति ऋषिवचनाद् अवगम्यते धर्मस्य रक्षणम् आदौ अस्माभिः विधेयम्।

**द्विविधगतिः**

अधिकारिभेदेन उपदेशे वैचित्र्यं शास्त्रस्यैकं वैशिष्ट्यम्। अस्मदुपकाराय शास्त्रं सर्वदा हितं करोति हितं च अनुशास्ति। **'शास्त्रं हितशासनात्'** इति शास्त्रेषु निगदितम्। वेदादिषु द्विविधः पन्थाः निर्दिष्टः। कर्ममार्गः ज्ञानमार्गश्चेति मार्गद्वयम्।[13] कर्मफलम् उद्दिश्य कर्म कुर्वतां मार्गः कर्ममार्गः। एषणात्रयसन्न्यासिनां विरक्तानां मार्गः ज्ञानमार्गः। स्वानुष्ठितसुकृतेन उत्तरोत्तरलोकं जिगमिषूणां कर्मनिष्ठा। ज्ञाननिष्ठानां कृते शास्त्रोपदेशः **"किं प्रजया करिष्यामः येषां नोऽयमात्मा अयं लोकः"** [14] इति। एषणात्रयसन्न्यास एव सन्न्यासशब्दार्थः। निष्ठाद्वयमपि गीतायाम् उपवर्णितम् अस्ति।

**कर्मयोगः**

कर्म-ज्ञान-राज-भक्ति-योगाख्याः चत्वारः साधनमार्गा मोक्षाख्यपरमपुमर्थप्राप्तये साधकैः स्वस्वरुचिभेदानुसारेण समाश्रीयन्ते। एषु योगेषु कर्मयोगः अनायाससाध्यो मार्गः। प्रत्येकं मनुष्यैः जगत्यस्मिन् सर्वदैव कर्म क्रियते। तत्कर्म कौशलं समाश्रित्य क्रियते चेद् योगरूपेण परिणमते।[15] कर्म सामान्यतो बन्धनं जनयति कर्तुः। तदुक्तं **"कर्मणा बध्यते जन्तुर्विद्यया च**

---

[8] "कर्मणा बध्यते जन्तुः" इति। (महाभारतम् १२/२४१/७)

[9] "न हि कश्चित् क्षणमपि…" इति। (श्रीमद्भगवद्गीता ३/५)

[10] "किं कर्म किमकर्मेति…" इति। (श्रीमद्भगवद्गीता ४/१६)

[11] "लोकेस्मिन् द्विविधा निष्ठा…" इति। (श्रीमद्भगवद्गीता ३/३)

[12] "तस्माच्छास्त्रं प्रमाणं…" इति। (श्रीमद्भगवद्गीता १६/२४)

[13] "इमौ द्वावेव पन्थानौ अनुनिष्क्रान्तारौ क्रियापथः पुरस्तात् सन्न्यासश्च उत्तरेण" इति। (ईशावास्योपनिषत्, शाङ्करभाष्यम्, मन्त्रसंख्या २)

[14] बृहदारण्यकोपनिषत् ४/४/२२

[15] "योगः कर्मसु कौशलमिति" इति। (श्रीमद्भगवद्गीता २/५०)

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

**विमुच्यते"**[16] इति। परन्तु ईश्वरार्पणबुद्ध्या क्रियते चेत्तदेव कर्म मोक्षाय कल्पते। विवेकानन्दस्वामिचरणैः गीतोपदिष्टस्य कर्मयोगस्य प्रसङ्गं समाकलय्य उक्तं यद् योगारूढैः अस्माभिः कर्म सम्पादनीयम्। परमात्मना सह सम्बन्ध एव योगः। योगयुक्तः सन् कर्म क्रियते चेत् तत्कर्म अहन्ताबुद्धिविरहितं भवति। अहन्ताबुद्धिविरहितो मनुष्य एव उत्कृष्टकर्मसम्पादने समर्थः। स्वामिपादैः चित्रकरदृष्टान्तसमुपस्थापनेन उक्तं यत् कश्चन चित्रकरः अहन्तृबोधम् अशेषतो विस्मृत्य चित्राङ्कने निमग्नो भवति चेद् रम्यमनवद्यं चित्रं निर्माय सर्वेषां विस्मयं जनयति।

विवेकानन्दस्वामिचरणैः असकृदवोचि यत्सर्वम् अस्माकं कर्मजातं लोककल्याणायैव विधातव्यम्। भगवता कंसजरासन्धादयः अत्याचारिणो नृपा निहताः। तद्घोरं कर्म भगवता लोककल्याणायैव सम्पादितम्। अनासक्तः सन् कर्म सम्पाद्य सर्वोत्तमं सुखं मोक्षञ्च विन्दते मनुष्यः। कर्मार्थमेव कर्म सम्पाद्यं न तु यशोलाभेप्सया।

कर्मयोगसम्पादनेन चित्तशुद्धिर्लभ्यते मनुष्यैः।[17] स्वार्थबुद्धिसमाक्रान्ता एव कर्म कुर्वन्ति मनुष्याः। परन्तु महता अध्यवसायेन ईश्वरार्पणबुद्धिः समाश्रीयते चेत् स्वार्थबुद्धिरपैति, निःस्वार्थं कर्म च कुरुते मनुष्यः। तस्माद् ईश्वरोपासनाबुद्ध्या कर्म सम्पाद्यम्। स्वामिचरणैरुक्तं यत् शुद्धचित्तः सन् एतादृशीं बुद्धिं समास्थाय कर्म कुर्वाणो मनुष्यो सर्वबन्धनविरहितां मुक्तिं लभते। मुक्तिलाभादनन्तरमपि जीवकल्याणाय कर्म कर्तव्यमेव, न तु त्याज्यम्। यतो हि-

**"यद्यदाचरति श्रेष्टस्तत्तद्येवेतरो जनः।**
**स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते"॥**[18] इति।

**भक्तियोगः**

**भगवति परानुरक्तिरेव भक्तिः।**[19] विष्णुपुराणे प्रह्लादस्य भक्तिः समुपलभ्यते।[20] मानसप्रवृत्तीनाम् अभिमुखपरिवर्तनमेव भक्तिः। यथास्माकं चित्तगतस्नेहः स्वाभाविकतया आत्मीयान् प्रति वहति तस्य प्रेममयपरमेशं प्रति अभिस्यन्दनं हि भक्तिः। जगतो जन्मस्थितिलयकारणं हि परमेश्वरः।[21] **"जन्माद्यस्य यतः"**[22] इति शारीरकसूत्रमपि अत्रार्थे मानम्। स ईश्वरोऽनिर्वचनीयप्रेमस्वरूपः। स सगुणस्तथा निर्गुणः। मायायां ये त्रयो गुणाः परमात्मनि ते आरोपिताश्चेत् ईश्वरः सगुण इति व्यवह्रियते। स्वरूपतस्तु परमात्मा निर्गुणः निर्विशेषश्च। ज्ञानिभिः समुपलब्धं सच्चिदानन्दं ब्रह्म, भक्तजनानां प्रेमास्पदपरमेश्वरान्न वैलक्षण्यं भजते। एतादृशपरमेश्वरस्य प्रत्यक्षानुभूतिर्हि धर्मः। विचारात्मकस्तर्कः तदनुभवं प्रापयितुं नालम्।

पराऽपरा चेति द्विधा भक्तिः। अपरायाः भक्त्याः नामान्तरं हि वैधी भक्तिः, गौणी भक्तिर्वा। भगवत्तत्त्वसाक्षात्कारो हि परा भक्तिः। तादृशः साक्षात्कारस्तु सहसा न घटते, घटते तु क्रमेण। शास्त्रोक्तविधिमनुसृत्य पूजाविधानं, जपोपवास-स्तोत्रादिसमुच्चारणं वैधभक्तित्वेन परिगण्यते। अत्र प्रतिमापूजनं प्रतीकोपासनं वा पदं कुरुते। एतैः सर्वै भगवदनुरागः क्रमेण वर्धते दाढ्यं च लभते।

परा भक्तिर्हि भगवति परमानुरागः। वैधभक्तेरभ्यासेन क्रमेण भगवद्दर्शनाय अत्यन्तम् अभिलाषः सञ्जायते। सोऽभिलाषः प्रेमरूपेण पर्यवस्यति यद्धि सर्वथा निष्कामम् आपणिकभावविवर्जितञ्च। प्रेम्णि समुपजाते परमेश्वरे तत्तो न कदापि बिभेति भक्तः, तस्मिन्नेव आत्मलयम् उपैति।

**ज्ञानयोगः**

आत्मतत्त्वज्ञानरूपमोक्षप्राप्त्युपायो हि ज्ञानयोगः। ज्ञानयोगी आत्मतत्त्वज्ञानं विहाय नान्यत्किञ्चिद् वाञ्छति। अद्वितीयं ब्रह्मात्मतत्त्वमेव तत्सविधे सत्यभूतम्, इतरत्तु अनृतम्। तुच्छान् लौकिकविषयान् सोऽवजानाति, केवलं परमात्मचिन्तापरायणः सन् तिष्ठति। एतेन यथाकालमेकं सर्वव्यापकम् आत्मतत्त्वं साक्षात्कृत्य स शान्तिं परमां समश्नुते। सर्वैः सह आत्मनो निरुपचरितमभिन्नत्वं

---

[16] महाभारतम्, शान्तिपर्व- २४१/७

[17] "चित्तस्य शुद्धये कर्म..." इति। (विवेकचूडामणिः ११)

[18] श्रीमद्भगवद्गीता ३/२१

[19] "सा त्वस्मिन् परमप्रेमरूपा" इति। (नारदभक्तिसूत्रम् ५)

[20] "या प्रीतिरविवेकानां विषयेष्वनपायिनी। त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु" ॥ इति। (विष्णुपुराणम्)

[21] "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति..." इति। तैत्तिरीयोपनिषत् ३/१

[22] ब्रह्मसूत्रम् १/१/२

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

साक्षादनुभूय सर्वकल्याणाय अनारतं यतते स्वार्थदृष्टिं सर्वथा परित्यज्य फलाभिसन्धानञ्च विहाय।

आत्मज्ञानरूपमोक्षोपायो विचारमार्ग इत्यपि कथ्यते यतः श्रुत्यनुगृहीतविचारद्वारा एव तत्त्वज्ञानार्थं यतते ज्ञानयोगी। ब्रह्मात्मन एव नित्यत्वं निरतिशयसत्यत्वं च ज्ञानयोगे प्रतिपादितम्।[23] **"अविकार्योऽयमुच्यते"** इति भागवती गीता। द्वैतं विचित्रं वा जगदिदं यदस्माभिरनुक्षणं प्रत्यक्षीक्रियते तन्मिथ्याभूतम्। माया अज्ञानं वा द्वैतप्रपञ्चप्रतीतौ कारणम्।

यद्यपि मायानिगडनिगडिता वयं तथापि मायातः परित्राणोपायोऽपि वैदिकसाहित्ये ऋषिणा उद्घोषितः। स उपायो हि आत्मस्वरूपविचारः। स्वकीये ज्ञानयोगे स्वामिचरणा मनुष्याणां किं यथार्थं स्वरूपमिति विषये आलोचितवन्तः। प्रपञ्चमिथ्यात्वं प्रतिपादयितुं तस्य दृश्यत्वं, परिच्छिन्नत्वम्, अनित्यत्वञ्च तेन प्रतिष्ठापितम्। अपरोक्षानुभूत्या तदात्मतत्त्वं ज्ञातुं शक्यते। तादृशो ज्ञानी स्थितप्रज्ञत्वेन निर्दिष्टः गीतायाम्। तदानीं मनुष्योऽनुभवति यत् मुक्तिरेवात्मनः स्वरूपभूता। न स कदापि बद्ध आसीत्। विवेकानन्दनये आत्मन एतादृशस्वरूपचिन्तनेन लोकव्यवहारे समुन्नतिरपि घटते। अयमेव प्रायोगिकवेदान्तः भगवद्गीतादिशास्त्राणां सारं निगीर्य स्वामिपादैः प्रतिपादितः।

**यज्ञस्वरूपवर्णनम्**

यजति देवान् अनेन इति यज्ञः। त्याग एव यज्ञशब्दार्थः। अस्माकं कर्मैव यज्ञवद्भवति यदा वयं परस्परोपकारबुद्ध्या कर्म आचरामः। परस्परोपकारबुद्धिरेव यज्ञः। यज्ञः इष्टफलदाता भवत्यस्माकं यतो हि ब्रह्मा अस्माकम् इष्टफलबुद्ध्या यज्ञमादौ इष्टवान्। परस्परम् उपकारविधानमेव यज्ञेन क्रियते। यज्ञः नाम देवतोद्देशेन द्रव्यत्यागः अर्थात् त्याग इति पूर्वमेव उक्तम्। यः यज्ञमकृत्वा आत्मनः कृते यजते स्वयं च तत्फलं भुङ्क्ते सः पापभाग् भवति। तस्मात्सर्वेषाम् उपकाराय कर्म कर्त्तव्यं भवतीति बोधोऽपि गीताध्ययनेन प्राप्यते।[24]

**दानम्**

दानं ज्ञानोपायत्वेन शास्त्रेषु कथितम्। गोसहस्रदानं ज्ञानोपायत्वेन उपनिषत्सु आम्नातम्। कठोपनिषदि, बृहदारण्यकोपनिषदि दानविषयिणी आख्यायिका उपलभ्यते। दानेन हि उपनमन्ते प्राणिनः। दानेन ज्ञानप्राप्तिरपि सम्प्रदाये प्रसिद्ध्यति। अन्यमदत्वा यः भुङ्क्ते तस्य कृते तद्भोजनं भुक्तं यत्किमपि वस्तु वा पापाय कल्पते। वयं परस्परमाश्रित्य भवामः। तस्मात्कस्माच्चित् किमपि स्वीकृतं चेत्तस्मै अपि किमपि प्रत्यर्पणीयं भवति। लोकः इत्थं चलति। य एनं चक्रं न आवर्तयति सः पापभाग् भवति।[25] अन्या स्मृतिः **"यज्ञो दानं तपश्चैव पावनानि मनीषीणाम्"**[26] इति।

**श्रद्धा**

ज्ञानप्राप्त्युपायत्वेन श्रद्धा निगदिता। इयं श्रद्धा न केवलं ज्ञानोपायभूता अपि त्वस्माकं व्यवहारिकजीवनेऽपि विस्तृता। विश्वासस्य कार्यतापत्तिः श्रद्धा। श्रद्धास्तिक्यबुद्धि इत्युक्तं शास्त्रेषु।[27] श्रद्धावत एव अभीष्टप्राप्तिः दृश्यते। शास्त्रेष्वपि इयं श्रद्धा शिष्यस्य ज्ञानप्राप्तिसाधनत्वेन उपदिष्टा। **"गुरूपदिष्टवेदान्तवाक्येषु विश्वासः श्रद्धा"**[28] इति उच्यते। **"श्रद्धावान् लभते ज्ञानम्"**[29] इत्युक्तं गीतायाम्। **"यो यच्छ्रद्धः स एव सः"**[30] इति च स्मृतिः। श्रद्धा पापात् निवर्तयति इत्युक्तं शास्त्रे।[31]

**चातुर्वर्ण्यविभागः**

शास्त्रस्य रक्षार्थं समाजस्य सुष्ठु परिचालनार्थं च गीतायां प्रतिपादितः चातुर्वर्ण्यविभागोऽपि आद्रियते। परन्तु शास्त्रे इदमपि उच्यते यत्कर्मणैव ब्राह्मणत्वम् आपद्यते, कर्मणैव शुद्रत्वमिति। स्वस्वकर्मानुसारं देहप्राप्तिः लोकप्राप्तिश्च भवतीति श्रुतावुच्यते।[32]

---

[23] "सत्यं ज्ञानमनन्तं ब्रह्म" इति। (तैत्तिरीयोपनिषत् २/१/१)

[24] देवान्भावयतानेनेन ते देवा... इति। (श्रीमद्भगवद्गीता ३/११)

[25] "एवं प्रवर्तितं चक्रं..." इति। (श्रीमद्भगवद्गीता ३/१६)

[26] श्रीमद्भगवद्गीता १८/५

[27] काठकोपनिषच्छाङ्करभाष्यम्, मन्त्रसंख्या १/१/२

[28] वेदान्तसारः

[29] श्रीमद्भगवद्गीता ४/३९

[30] श्रीमद्भगवद्गीता १७/३

[31] "अश्रद्धा परमं पापं श्रद्धा पापप्रमोचिनी..." इति। (महाभारतम्, शान्तिपर्व २६४/१५)

[32] "पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन" इति। (बृहदारण्यकोपनिषत् ३/२/१३)

गीतायामपि श्रीभगवानुवाच मयैवायं वर्णविभागः कृतः। तस्माद्वर्णाश्रमविभागविषये कलहो न करणीयः।[33] समेषां वर्णानाम् आश्रमाणाञ्च प्रयोजनं वर्तते देहेषु अङ्गानाम् इव।[34]

**समन्वयपुस्तकम्**

जगति विद्यमानाः धर्मीयग्रन्थाः प्रायेण स्वधर्मस्यैव प्रचारे पटवः। भगवद्गीता आचारधर्ममेव प्रचारयति अतस्तस्य ग्राह्यता सर्वापेक्षयाधिका। गीतेति ग्रन्थः साम्प्रदायिकपुस्तकत्वेन परिचाययितुं न शक्यते। गीतायाः महान् विस्तारः महच्च क्षेत्रम्। सर्वधर्ममतावलम्बिनोऽत्र आश्रिताः। अत्र समन्वय एव मूलम्। महर्षिभिः श्रीअरविन्दघोषमहाभागैः अभाणि "भाविनि काले या समन्वयवार्ता, यः च व्यापकः समन्वय इष्यते सः गीतामवलम्ब्यैव भविता, तदर्थं गीतायाः अध्ययनस्य आरम्भः करणीय" इति। साहित्यकारः बङ्किमचन्द्रचट्टोपाध्यायः गीतां कर्तव्यपालनपुस्तकनाम्ना आहूतवान्। तदुक्तिः गीताविषये "Gita Gospel of Duty" इति।

**गीताग्रन्थे महावाक्यम्**

जीवब्रह्मैक्यबोधकं वाक्यं महावाक्यमित्युच्यते। भगवदुक्तं सर्वमपि वाक्यं कल्याणकरं परमपवित्रञ्च। अतः व्यापकं महच्च वर्तते। तस्मात् महावाक्यत्वमेषां स्वतः सिद्ध्यति। तथापि गीतायाः सारभूतं वच एव महावाक्यं भवेत्। गीतायां यन्महावाक्यं पठितं तत् किञ्चिद्विशिष्टमिव प्रतिभाति। यद्वाक्यं गीतायाः सर्वजनग्राह्यत्वं वदति गीतां सर्वधर्मस्य ऊर्ध्वं नयति तदेवात्र महावाक्यत्वेन परिगण्यते। अशेषकामनाः परित्यज्य केवलं मुक्तये ईश्वरमेव यः अनन्यचित्ततया भजते स मुच्यते इत्यभयं प्रददाति भगवान्। तथा च गीतायां महावाक्यं -

**"सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।**
**अहं त्वा सर्वधर्मेभ्यो मोक्षयिष्यामि मा शुचः"**॥[35]

इति।

**उपसंहृतिः**

भारतीयसंस्कृतौ आध्यात्मिकतायाः महान् प्रभावः अस्ति। विश्वस्य विश्वे मानवाः भारतीयसंस्कृतेः गुणान् ग्रहितुम् आकृष्टा भवन्ति। अतः आबह्वोः कालाद् अद्यापि देशान्तरेभ्यो धार्मिकाः अत्र समागत्य सनातनसंस्कृतौ स्थिति लभन्ते। अस्मद्देशस्य रत्नानि हि वेदादिशास्त्राणि यत्र धर्मस्य रहस्यं निहितमस्ति। शास्त्रोक्तधर्मं लोकोपकाराय उपदेष्टुं प्रतियुगम् आविर्भूता महर्षयः अवतारपुरुषाश्च। गुरुशिष्यपरम्परया पुराणः धर्मः अद्यावधि आचर्यते। धर्म एव जनान् हिते नियुङ्क्ते। श्रीमद्भगवद्गीता हि तादृशः कश्चिद् ग्रन्थः यः जनान् सर्वदा कर्तव्यं बोधयित्वा धर्ममार्गे प्रेरयति। सर्वजनग्राह्यः सर्वधर्मीयैश्च उपादेयः अयम्। समेऽपि दार्शनिकाः गीतायां स्वकीयाभिमतस्य अन्वयं परिपश्यन्तः गीतायाः भाष्यादिविरचने रमन्ते। गीता यथा सरला तथैव गभीरा अपि। भारताद् बहिः देशान्तरेषु विदेशेष्वपि अस्य समधिकः समादरः। अस्माकं देशस्य सनातनसंस्कृतेः प्रचारे प्रसारे गीतायाः महती भूमिका अस्ति। उपनिषदुक्तगभीरतत्त्वानां सरलगिरा प्रतिपादनं तेषाम् आचरणप्रकारः अत्र प्रतिपाद्यते। मोक्षशास्त्रत्वेन अस्य नामापि कीर्त्यते। गीतायाः संरक्षणापेक्षया अद्यतनसमये तस्य प्रचारः आधिक्येन करणीयः। तेन प्रकृततया गीतायाः रक्षा भविष्यति। अत इदं वक्तव्यं यत् सर्वैरपि प्रत्यहं गीता पठनीया गीतोक्तश्च धर्मः यथाशक्ति अनुसर्त्तव्य एवेति शिवम्॥

**सहायकग्रन्थसूची**


- श्रीशंकरभगवत्पादः। २०१८। उपनिषद्भाष्यम् (खण्डः १,२,३)। शास्त्री, एस्, सुब्रह्मण्यः (सम्पा.)। वाराणसी : श्रीदक्षिणामूर्ति मठ प्रकाशन।


[33] "चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः" इति। (श्रीमद्भगवद्गीता ४/१३)
[34] श्रीमद्भगवद्गीता ४/१३
[35] श्रीमद्भगवद्गीता १८/६६

ISSN : 2583-2271
Vol. - 3, No. 1: 2023


- श्रीसदानन्दयोगीन्द्रः। २०१३। वेदान्तसारः। चौखम्बा कृष्णदास अकादमी, वाराणसी।
- मन्त्रपूष्पम्। २००७। स्वामी, देवरूपानन्दः (सम्पा.)। मुम्बाई : रामकृष्णमठः।
- श्रीशंकरभगवत्पादः। २०१५। श्रीमद्भगवद्गीताष्यम् (खण्डः १,२,३)। शास्त्री, श्रीमणिद्राविडः (सम्पा.)। वाराणसी : श्रीदक्षिणामूर्ति मठ प्रकाशन।
- श्रीशंकरभगवत्पादः। २०२१। श्रीमद्भगवद्गीता (शाङ्करभाष्य-हिन्दी-अनुवादसहित)। गोरखपुर : गीताप्रेस।
- श्री अरविन्द। २०१७। गीताप्रबन्ध। पाँण्डिचेरी : श्रीअरविन्द आश्रम।
- श्रीनारायणपण्डितः। २०१२। हितोपदेशः (अभिनवराजलक्ष्मी-संस्कृतटीकालङ्कृतः विस्तृतभाषाटीकाविभूषितश्च)। प्रो., बालशास्त्री (सम्पा.)। वाराणसी : चौखम्बा सुरभारती प्रकाशन।
- महर्षिः मनुः। २०१९। मनुस्मृतिः (हिन्दीव्याख्यासहितः)। डॉ., गजाननशास्त्री, मुसलगाँवकरः (सम्पा.)। वाराणसी : चौखम्बा सुरभारती प्रकाशन।
- श्रीशङ्करभगवत्पादः। २०१७। विवेकचूडामणिः (हिन्दी-अनुवादसहितः)। गोरखपुर : गीताप्रेस।
- স্বামী রঙ্গনাথানন্দ। ২০২০। ভগবদ্গীতা ও বিশ্বজনীন বার্তা (আধুনিক চিন্তাধারা ও চাহিদার আলোকে গীতাভাষ্য)। কলকাতা : উদ্বোধন কার্যালয়।
- স্বামী বিবেকানন্দ। ২০১৪। কর্মযোগ। কলকাতা : উদ্বোধন কার্যালয়।
- স্বামী বিবেকানন্দ। ২০১২। জ্ঞানযোগ। কলকাতা : উদ্বোধন কার্যালয়।
- স্বামী বিবেকানন্দ। ২০১৩। ভক্তিযোগ। কলকাতা : উদ্বোধন কার্যালয়।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# केनोपनिषदन्तर्गतयक्षोपाख्यानस्य माहात्म्यवर्णनपुरःसरं सामाजिकप्रेक्षणनिरूपणम्

**सदानन्द-दासः**

**शोधच्छात्रः, अद्वैतवेदान्तविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः,**

**तिरुपतिः- ५१७५०७**

---

**प्रबन्धसारः**

*केनोपनिषदन्तर्गते यक्षोपाख्याने इन्द्रादिदेवानां स्वाभिमानं दूरीकृतं यक्षरूपपरब्रह्मणा। यथा मेघे सति सूर्यस्य भानं न जायते परन्तु अभ्रस्यापसारणे सूर्यः स्वयं प्रकाशते तथैव परब्रह्मणैव प्राप्तविजयानाम् इन्द्रादिदेवानां मायावशात् अहंकारः जातः। कदाचित् देवानामसुराणाञ्च युद्धं सम्बभूव। तस्मिन् युद्धे देवाः दानवान् पराजितवन्तः। यद्यपि देवाः ब्रह्मणः शक्त्या एव विजयं प्राप्तवन्तः तथापि ते देवाः स्वाहङ्कारं कृतवन्तः "अस्माकमेवायं विजयोऽस्माकमेवायं महिमा"[1] इति केनोपनिषदः मन्त्रात् ज्ञायते। ततःपरं परब्रह्म यक्षरूपं गृह्णत् देवानाम् अज्ञानम् अहङ्कारञ्च नाशितवत्। अत्र यक्षो नाम पूज्यः महद्भूतश्च। अन्तिमे स्वर्णमय्या उमादेव्याः कृपावशात् इन्द्रः ज्ञातवान् यत् यक्ष एव साक्षात् परब्रह्म इति। अस्मिन् प्रबन्धे अस्य यक्षोपाख्यानस्य मायातत्त्वप्रतिपादकत्वनिरूपणानन्तरं वर्तमानसामाजिकप्रयोजनमपि वर्णितमस्ति।*

**कुञ्चीशब्दाः** - माया, ब्रह्म, अज्ञानं, जीवब्रह्मैक्यम्, अहंकारः, सत्यानुसन्धानं चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

**उपोद्घातः**

केनोपनिषदः चतुर्खण्डेषु तृतीयखण्डे द्वादशमन्त्रैः यक्षोपाख्यानं वर्णितम् अस्ति। इदम् उपाख्यानम् "उमायाः कथा" इति नाम्ना अपि प्रसिद्धमस्ति। अस्मिन् उपाख्याने वस्तुतः इन्द्रादिदेवानां स्वाभिमानं दूरीकृतं यक्षरूपपरब्रह्मणा। असुरैः साकं यत् युद्धम् अभूत् तस्मिन् युद्धे स्वशक्त्या एव विजयं प्राप्तवन्तः इति विचिन्त्य स्वाभिमानं कृतवन्तः ते देवाः। अविद्याकारणात् एव ते देवाः एवं चिन्तितवन्तः। परमार्थतः सः विजयः परब्रह्मणा एव प्राप्तः। अतः तेषाम् अहंकारस्य निवृत्त्यर्थं यक्षरूपपरब्रह्मणः आविर्भावः सञ्जातः। एतदेव उपाख्यानम् आलोच्यते अत्र।

**उपाख्यानसारः**

केनोपनिषदि आदौ खण्डद्वये गुरुशिष्ययोः मध्ये ब्रह्मस्वरूपादिविषये काचित् चर्चा प्रारब्धा आसीत्। तत्र मुनिः शिष्येभ्यः ब्रह्मणः यथार्थस्वरूपं वर्णितवान्। परन्तु तेषां मुखं दृष्ट्वा सः ज्ञातवान् यत् केचन शिष्याः तस्य उत्तरस्य अन्तर्निहितं तत्त्वं न अवगच्छन्ति। अतः सः स्वशिक्षायाः सारं प्रसारयितुं नैतिककथामेकां कथितवान्। तद्यथा—

कदाचित् केनचित् कारणेन देवासुरयोः मध्ये महायुद्धम् अभवत्। तस्मिन् युद्धे देवाः कथञ्चित् विजयं प्राप्तवन्तः। वस्तुतः परब्रह्मकारणादेव ते देवाः तत् विजयम् अलभन्त। तथापि ते देवाः स्वाहङ्कारेण उन्मत्ताः सञ्जाताः, तद्यथा "अस्माकमेवायं विजयोऽस्माकमेवायं महिमा"[1] इति केनोपनिषदो मन्त्रात् स्पष्टं ज्ञातुं शक्यते।

तदा सर्वज्ञानि परब्रह्म देवानामज्ञानमहंकारञ्च विनाशयितुं ज्ञानमुत्पादयितुञ्च सङ्कल्पं चकार। ततःपरं परब्रह्म यक्षरूपं गृहीत्वा तेषां देवानां समक्षम् आविर्बभूव। परन्तु देवाः अहङ्कारवशात् अन्धाः आसन्। तस्मात् ते यक्षरूपब्रह्मदेवम् अभिज्ञातुं न शक्तवन्तः। ते देवाः एतदेव ज्ञातवन्तः यत् तेषां समक्षं काचन आश्चर्यात्मिका सत्ता उपस्थिता अभवत्। ते आश्चर्यचकिताः संजाताः। ते ज्ञातुम् उद्युक्ताः अभवन् यत् का सा सत्ता इति ? सर्वे देवाः अग्निदेवम् अवदन् यत् भवान् तस्याः रहस्यमयसत्तायाः विषये जानातु इति।

---

[1]केनोपनिषत् ३.२

[1]केनोपनिषत् ३.२

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

देवैः अनुरुद्धः अग्निदेवः तस्याः रहस्यमयसत्तायाः समीपम् अगच्छत्। सा सत्ता अग्निदेवम् अपृच्छत्—त्वं कः? अग्निदेवः अवदत्—अहम् अग्नेः देवता अस्मि। जातवेदाः इत्यपि मम प्रसिद्धं नाम विद्यते। सत्ता पुनः अपृच्छत्—तव शक्तिः का? अग्निदेवः अवदत्—पृथिव्याः समस्तवस्तूनि अहं दग्धुं शक्नोमि। तदा सा सत्ता तस्य पुरतः एकं तृणं संस्थाप्य अवदत्— इदं तृणं दग्धुं भवतः सामर्थ्यमस्ति वा ? अग्निदेवः स्वसम्पूर्णशक्त्या तत् तृणं दग्धुं प्रयत्नं कृतावान् परन्तु सः तत् तृणं दग्धुं न समर्थः। अतः अग्निदेवः देवानां समीपं गत्वा स्वविफलतां सूचितवान् सविस्तरेण।

तदा सर्वे देवाः तस्याः रहस्यमयसत्तायाः विषये ज्ञानाय वायुदेवं न्यवेदयन्। देवैः निवेदितः सन् वायुदेवः तस्याः रहस्यमयसत्तायाः समीपम् अगच्छत्। सा सत्ता वायुदेवम् अपि अपृच्छत् — कस्त्वम्? वायुदेवः अवदत् — अहं वायुः, मातरिश्वेति मे प्रख्यातं नाम। सत्ता पुनः अपृच्छत्—तव शक्तिः का? वायुदेवः अवदत्—जगति स्थितं सर्वं वस्तु चालयेयम्। मम शक्तिः अप्रतिहता विद्यते। तदा पूर्ववत् सा सत्ता तस्य पुरतः अपि एकं तृणं स्थापयित्वा अवदत्—चालयेदम् इति। परन्तु वायुदेवः अपि तस्याः सत्तायाः समक्षं स्वसामर्थ्यं प्रमाणयितुम् अशक्तः भूत्वा निराशया प्रत्यागतवान्।

ततः पश्चात् देवाः देवेषु सर्वशक्तिशालिनं देवराजम् इन्द्रं रहस्यमय्याः सत्तायाः विषये ज्ञानाय न्यवेदयन्। परन्तु इन्द्रस्य आगमने स यक्षः तिरोबभूव। तदा आकाशे एका स्वर्णमयी सुन्दरी देवी हिमराजस्य पुत्री उमा प्रकटिता। इन्द्रस्तां दृष्ट्वा प्रणम्य सविनयम् अपृच्छत्—किमेतत् यक्षम् इति ?

सा स्वर्णमयी देवी प्रत्यवदत्—तदेव साक्षात् ब्रह्म इति। तन्महिम्नैव यूयं सर्वे शक्तिं महिमानञ्च अलभध्वम्। तत् ब्रह्म एव युष्मभ्यं दानवेषु विजयं प्रदत्तवत्। युष्माकम् अभिमानः दर्पः अहङ्कारश्च सर्वथा व्यर्थः मिथ्याभूतश्च इत्युक्त्वा सा देवी अदृश्या जाता।

एवमिन्द्रः उमायाः सकाशात् ब्रह्मज्ञानं लब्ध्वा अन्यदेवानां समीपं गत्वा इदं वृत्तान्तम् अकथयत्। तदा देवाः स्वदोषं ज्ञातवन्तः।

एवंरूपेण ऋषिः ब्रह्मणः महिममण्डितकथां श्रावयित्वा शिष्याणां समक्षं स्वशिक्षायाः सारम् अवदत्—ब्रह्मणः प्रकाशः एव अस्माकं नेत्रेषु दृष्टिरूपेण वर्तते। ब्रह्मणः शक्त्या एव मनः चिन्तयति, कामयते, संकल्पं च करोति। इदं च ब्रह्म सर्वव्यापि सत्यं ज्ञानमयं चास्ति। सर्वाणि ज्ञानानि अस्य अङ्गप्रत्यङ्गस्वरूपाणि भवन्ति। ध्यानम् इन्द्रियाणां कामनानां च निग्रहं करोति। सर्वेषां निःस्वार्थसेवा अस्य आधारभूता। ब्रह्मणः सिद्धिं प्राप्य कश्चन जीवः सर्वेभ्यः दोषेभ्यः विमुच्य परमं पदं प्राप्नोति। एवंरूपेण शिष्याः स्वगुरोः शिक्षणपद्धत्या प्रसन्नाः भूत्वा आनन्देन स्व-स्वावासं प्रति तस्मिन् विषये चिन्तनं मननं च कर्तुं प्रतिगताः।

**उपाख्यानवैशिष्ट्यम्**

चतुर्वेदेषु सामवेदः अन्यतमः वर्तते। सामवेदस्य बह्व्यः शाखाः विद्यन्ते। तासु सामवेदीयतलवकारशाखान्तर्गत-केनोपनिषदि चतुर्खण्डेषु तृतीयखण्डे द्वादशमन्त्रात्मकमिदम् उपाख्यानं विलसति। इदम् उपाख्यानं मायातत्त्वप्रतिपादकम्। अस्मिन् उपाख्याने वस्तुतः इन्द्रादिदेवानां स्वाभिमानं दूरीकृतं यक्षरूपपरब्रह्मणा। अस्य उपाख्यानस्य महद्वैशिष्ट्यमिदमस्ति यत् अहंकारः कदापि नैव कर्तव्यः इति यक्षरूपपरब्रह्म समुचितशिक्षया तत् प्रादर्शयत्। अपि च, परब्रह्मकारणादेव देवादीनां मनसि अविद्या सञ्जाता पुनः परब्रह्मकृपावशादेव सा अविद्या अपगता। अतः ब्रह्मैव नित्यं वस्तु किञ्च अन्यत्सर्वम् अनित्यम् इत्येव सारभागः अस्य उपाख्यानस्य इति वक्तुं शक्यते।

**उपाख्यानस्य मायातत्त्वप्रतिपादकत्वनिरूपणम्**

इदम् उपाख्यानं मायातत्त्वप्रतिपादकमिति किमर्थमिति चेदुच्यते — अस्याः उपनिषदः प्रथमखण्डद्वये गुरुशिष्ययोः मध्ये ब्रह्मस्वरूपादिविषये काचित् चर्चा प्रारब्धा आसीत् तत्र मुनिः शिष्येभ्यः ब्रह्मणः यथार्थस्वरूपं वर्णितवान्। परन्तु तेषां मुखं दृष्ट्वा सः ज्ञातवान् यत् केचन शिष्याः तस्य उत्तरस्य पूर्णार्थं न अवगतवन्तः। अतः सः स्वशिक्षायाः सारं प्रसारयितुं नैतिककथामेकां कथितवान्। तस्यां कथायां मायामाधारीकृत्य ब्रह्मणः यथार्थस्वरूपं निरूपितम् अस्ति। असुरैः साकं युद्धे ब्रह्मणा प्राप्तविजयाः स्वेषां

विजयः इति मन्यमानाः देवाः यदा अहङ्कारसागरे निमग्नाः, तदा ब्रह्म स्वयमेव आत्मस्वरूपं गोप्य मायया काचित् यक्षरूपविशिष्टसत्तारूपग्रहणेन तेषां देवानां समक्षम् आविर्भूतम् अभवत्। तां यक्षरूपसत्तां केऽपि न अवगतवन्तः मायावशात्। अग्निदेवः स्वाहङ्कारं प्रदर्श्य यक्षसमीपं गत्वा स्वासामर्थ्यं प्रकटितवान्। अग्निदेववत् वायुना अपि तथैव कृतमिति। ते सर्वेऽपि मायाकारणात् तत् यक्षरूपपरब्रह्म न विज्ञातवन्तः। यदा देवराजेन्द्रः गतवान् तत् यक्षस्वरूपं ज्ञातुं तदा सा सत्ता अन्तर्हिता जाता। एवंरूपेण मायया तेषां देवानां स्वाभिमानं निराकृतं ब्रह्मणा। एतेन ज्ञायते यत् इदम् उपाख्यानं मायातत्त्वप्रतिपादकमिति।

**उपाख्यानस्य अद्वैतवेदान्तमूलतत्त्वप्रतिपादने योगदानं सामाजिकप्रेक्षणञ्च**

अद्वैतवेदान्तमूलतत्त्वप्रतिपादने अस्य उपाख्यानस्य योगदानं सामाजिकप्रेक्षणञ्च यथाशक्ति प्रतिपाद्यते —

**अद्वैतवेदान्तमूलतत्त्वप्रतिपादने योगदानम्**

अस्य उपाख्यानस्य अद्वैतवेदान्तमूलतत्त्वप्रतिपादने महत् योगदानं वर्तते। तद्यथा—अद्वैतवेदान्ते ब्रह्म हि निर्गुणं निर्विशेषं नित्यशुद्धबुद्धमुक्तस्वभावम् एकमेवाद्वितीयं चेति। जगतो जडत्वाद् ब्रह्मव्यतिरिक्तस्य द्वितीयस्य अभावात् कथं निर्गुणात् निर्विशेषाद् ब्रह्मणः जगदुत्पत्तिः इति प्रश्नः सुतरामुद्वेलयति दर्शनजिज्ञासूनां मानसम्। अतो जगदुपादानरूपेण माया स्वीक्रियते अद्वैतवेदान्ते। माया च श्रुतिस्मृतिप्रसिद्धा। "मायां तु प्रकतिं विद्यान्मायिनं तु महेश्वरम्"[2], "इन्द्रो मायाभिः पुरुरूप ईयते"[3] इत्यादिश्रुतिषु किञ्च "मम माया दुरत्यया"[4], "नाहं प्रकाशः सर्वस्य योगमायासमावृतः"[5], "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव"[6] इत्यादिश्रीमद्भगवद्गीतावचनेषु च मायायाः सत्त्वं मायायुक्तस्यैव ईश्वरस्य च जगत्कर्तृत्वं वर्ण्यते। सा च माया त्रिगुणात्मिका। अद्वैतवेदान्ते मायायाः व्याख्यानं बहुधा कृतमस्ति। तथैव अत्रापि केनोपनिषदि तृतीयखण्डे "ब्रह्म ह देवेभ्यो विजिग्ये तस्य ह ब्रह्मणो विजये देवा अमहीयन्त"[7] इति यक्षोपाख्याने इदं मन्त्रं सूचयति यत् देवानां कृते ब्रह्मणा एव विजयः प्राप्तः परन्तु अविद्यावशात् मायाकारणात् अहङ्कारवशात् सः विजयः स्वेषां गौरवः इति तैः देवैः चिन्तितम्। वस्तुतः तस्मिन् विजये तेषां किमपि अवदानं नास्ति। तथापि ते अहङ्कारं कुर्वन्ति। साक्षात्परब्रह्म एव मायामाश्रित्य तेषां देवानाम् अहङ्कारनिवारणाय यक्षरूपं स्वीकृतवत्। अतः अद्वैतवेदान्तमूलतत्त्वप्रतिपादने अस्य उपाख्यानस्य योगदानं दृश्यते एव।

**सामाजिकप्रेक्षणनिरूपणम्**

इदानीम् अस्य उपाख्यानस्य सामाजिकप्रेक्षणविषये उच्यते। आदौ एव उच्यते यत्—

"जरा रूपं हरति हि धैर्यमाशा मृत्युः प्राणान् धर्मचर्यामसूया।
कामो ह्रियं शीलमनार्यसेवा क्रोधः श्रियं सर्वमेवाभिमानः॥"[8]

अर्थात् वार्धक्यं जरा वा सौन्दर्यं नाशयति। आशा धीरत्वं तथा मृत्युः जीवनं हरति। एवमेव असूयाभावः धर्मबुद्धि, कामभावः लज्जां, दुर्जनसङ्गतिः सेवनं शीलं वा, क्रोधः सम्पत्ति, मिथ्योपकर्षभावः दर्पभावः समस्तं च नाशयति।

तथैव अस्मिन् उपाख्यानेऽपि अग्न्यादिदेवाः स्वाहङ्कारप्रदर्शनेन स्वासामर्थ्यं प्रकटितवन्तः। अतः अस्माभिरपि सर्वैः मनसि एतत् अवधारणीयं यत् कदापि अहङ्कारस्य प्रदर्शनं नैव कर्तव्यम्। यतोहि अहङ्कारप्रदर्शनेन कदाचित् मित्रवियोगः पदच्युतिः मानहानिश्च भवितुमर्हति। अपि च, अहङ्कारकारणवशादेव सर्वं विनश्यते। चाणक्यसूत्रेऽपि उच्यते "नास्त्यहंकारसमः शत्रु"[9] अर्थात् अहङ्कारसदृशः शत्रुः नास्ति। अभिमानात् दशाननोऽपि नष्टः जातः। दुर्योधनोऽपि विनष्टोऽभिमानात्। अहङ्कारात् सदा नश्यते सर्वसाधितमिति। अतः सर्वदा अहङ्कारः त्याज्यः। यतोहि सः अहङ्कारः साक्षात् नरकस्य कारणं भवति। श्रीमद्भगवद्गीतायामपि उच्यते—

---

[2]श्वेताश्वतरोपनिषत् ४.१०

[3]बृहदारण्यकोपनिषत् २.५.१९

[4]श्रीमद्भगवद्गीता ७.१४

[5]श्रीमद्भगवद्गीता ७.२५

[6]श्रीमद्भगवद्गीता ५.१५

[7]केनोपनिषत् ३.१

[8]महाभारतम् उद्योगः ३५.४३

[9]चाणक्यसूत्रम् २८७

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते ॥[10]
अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ॥[11]
दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ॥[12]

सुभाषिते अपि दृश्यते—

मूर्खस्य पञ्च चिह्नानि गर्वो दुर्वचनं तथा।
क्रोधश्च दृढवादश्च परवाक्येष्वनादरः॥
यः स्तब्धो गुरुणा साकमन्यस्य नमनं कुतः।
न छायायै न लाभाय मानी कन्थेरवन्नृणाम्॥

अपरिपक्वचित्ते अविकसितचित्ते च लभ्यते अयमहंकारः। अहंभावः आत्मगौरवश्च न दुष्टगुणः, अपि तु एषा भावना आत्मतृप्तेः कारिका अस्ति। परन्तु यदा एतादृशः अहंभावः अहङ्कारः वा कस्यचित् अवमाननाय वा कस्यचित् अपमानार्थं वा प्रयुक्तः तदा आत्मनः समाजस्य च कृते अतीव दुःखदः हानिकारकश्च भवति। पुरुषस्य शालीनतां च नाशयति अयमहंकारः।

अपि च, अस्मात् उपाख्यानात् एतदपि शिक्षणीयं यत् ब्रह्म एव सर्वज्ञः सर्वकर्ता नियन्ता च। तेन एव सम्पूर्णः जगत्प्रपञ्चः निर्मितः अस्ति। ब्रह्मणः एव सर्वेषामुत्पत्तिः जायते, पुनः प्रलयकाले तस्मिन् एव लयं प्राप्नुवन्ति जीवाः। बद्धो जीवः मायानिर्मिते अस्मिन् प्रपञ्चे अन्तःकरणदेहेन्द्रियादिभिः ऐक्यं समनुभवन् कर्ता भोक्ता च भवति, सुखदुःखानि च अनुभवति। जीवः स्वरूपतो ब्रह्म एव, मायाकारणात् एव तस्य स्वस्वरूपापरोक्षज्ञानं न भवति। श्रवणमनननिदिध्यासनैः अखण्डाकारचित्तवृत्तेः उदयात् मायानिवृत्तेः जीवः स्वस्वरूपं पुनः साक्षात्करोति, मुच्यते च स्वस्मिन् आरोपितेभ्यः सकलदुःखेभ्यः। परन्तु यावन्न मायायाः स्वरूपं विज्ञायते तावन्न हि तस्या निवृत्तेरुपायानामपि ज्ञानं सम्भवति। अतः सर्वदैव मनसि अवधारणीयं यत् ब्रह्म एव सर्वकर्ता सर्वभोक्ता सर्वज्ञाता चेति। अहमिदं ममेदम् इत्यादिभावं सर्वदा वर्जनीयम्। एवं निष्कामस्वभावपोषणं क्रियते चेत् सर्वदा सुखं लभ्यते। उच्यते च—

अयं निजः परो वेति गणना लघु चेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥ इति॥

**उपसंहारः**

उपसंहारत्वेन एतदेव वक्तुमिच्छामि यत्—अस्मिन् उपाख्यानेऽपि अग्न्यादिदेवाः स्वाभिमानाहङ्कारप्रदर्शनेन स्वासामर्थ्यं प्रकटितवन्तः। अतः अस्माभिरपि सर्वैः मनसि एतत् अवधारणीयं यत् कदापि अहङ्कारस्य प्रदर्शनं नैव कर्तव्यम् इति। यतोहि अहङ्कारप्रदर्शनेन कदाचित् मित्रवियोगः पदच्युतिः मानहानिश्च भवितुमर्हति। अपि च, अहङ्कारकारणवशादेव सर्वं विनश्यते। चाणक्यसूत्रेऽपि उच्यते "नास्त्यहंकार समः शत्रु"[13] अर्थात् अहङ्कारसदृशः शत्रुः नास्ति। अभिमानात् दशाननोऽपि नष्टः जातः। दुर्योधनोऽपि विनष्टोऽभिमानात्। अहङ्कारात् सदा नश्यते सर्वसाधितमिति। अतः सर्वदा अहङ्कारः त्याज्यः यतोहि सः अहङ्कारः साक्षात् नरकस्य कारणम् भवति। अपि च, यावत् पर्यन्तम् अविद्यानिवृत्तिः न भवति तावत्पर्यन्तम् अस्मात् अनित्यसंसारसागरात् अस्माकं मुक्तिरपि नैव सम्भवति इति निश्चप्रचम्।

## सहायकग्रन्थसूची


- स्वामी, जुष्ठानन्दः। कठोपनिषद्। प्रथमप्रकाशः २००२, कलकाता
- शास्त्री, एस.सुब्रह्मण्य। उपनिषद्भाष्यम् (खण्डः १)। महेश अनुसन्धान संस्थानम्, वाराणसी
- योगीन्द्रः, श्रीसदानन्दः। वेदान्तसारः। कालीवरवेदान्तवागीशः–संस्कृतपुस्तकभाण्डारः, कलकाता, १९९५
- भट्टाचार्यः, रघुनन्दन। स्मृतितत्त्वम्। जीवानन्दविद्यासागरः, कलिकता, १८९५


[10]श्रीमद्भगवद्गीता ३.२७
[11]श्रीमद्भगवद्गीता १७.५
[12]श्रीमद्भगवद्गीता १६.४
[13]चाणक्यसूत्रम् २८७

ISSN : 2583-2271
Vol. - 3, No. 1: 2023


- आचार्यः, श्रीधरः। स्मृत्यर्थसारः। आनन्दाश्रम मुद्रणालयः, पुना, १९९२
- मिश्रः, प्रो. जयकृष्णः। धर्मशास्त्रस्येतिहासः (१म भागः)। चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
- व्यासदेवः। श्रीमद्भगवद्गीता शाङ्करभाष्यम्। गीताप्रेस, गोरखपुर- १९८२
- गोयन्दका, हरिकृष्णदास। ईशादि नौ उपनिषद्। गीताप्रेस, गोरखपुर, २०१०
- दशोपनिषद्। शाङ्करभाष्यम्। मोतिलालवनार्जीदासः, दिल्ली, १९६४
- व्यासदेवः। श्रीमद्भगवद्गीता शाङ्करभाष्यम्। गीताप्रेस, गोरखपुर- १९८२
- आचार्य, बालकृष्णः। चाणक्यसूत्र-व्याख्याकारः
- केनोपनिषद्। गीताप्रेस, गोरखपुर

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# वर्तमानसमये औपनिषदीयशिक्षायाः प्रासङ्गिकता

**पापिया-गँडाइ**
**शोधछात्रा, महात्मागाँधीकेन्द्रीयविश्वविद्यालयः**
**मोतिहारी, बिहारः**

**प्रबन्धसारः**

*मानवविकाशः शिक्षामालम्बते। अतः शिक्षा तादृशी भवेत् यया मानवानामात्मोद्धारः परमज्ञानप्राप्तिः च सम्भवेत्। औपनिषदीयशिक्षाव्यवस्था श्रेष्ठादर्शेन नियन्त्रितासीत्। उपनिषदि तादृशमुदाहरणं विद्यते यत्र शिक्षां प्रति कुतूहलता आग्रहश्च उल्लिखितोऽस्ति। छात्रजीवनं तु समग्रजीवनस्य प्रस्तुतिपर्व। एवञ्च समाजोन्नतिः एव तस्य मुख्योद्देश्यम्। वैदिककालादारभ्य आदर्शनागरिकनिर्माणे बलं दीयते स्म। यतोहि एकः आदर्शवान् नागरिकः एव समाजस्य पथप्रदर्शको भवितुमर्हति। अतः प्राचीनकालादेव शिष्येषु सदाचारः, शिष्टाचारः, धर्मपरायणता, न्यायपरायणता, कर्तव्यपरायणता चेत्यादिनैतिकगुणानां विकाशाय विशेषगुरुत्वं प्रदीयते स्म। किन्तु वर्तमानसमाजे यादृशी शिक्षा परिलक्ष्यते सा अत्यन्तं वैचित्र्यपूर्णा विकृता चेति। वर्तमानसमये सर्वाणि विद्याप्रतिष्ठानानि तु उपाधिप्रदानस्य यन्त्रागारत्वेन तथा ज्ञानमर्थोपार्जनस्य माध्यमरूपेण परिवर्तितम्। अर्थप्रधानेऽस्मिन् वर्तमानकाले विद्यालय-महाविद्यालय-विश्वविद्यालयेषु अर्थमाध्यमेनैव पाठ्यक्रमस्य महत्त्वं निर्धार्यते, न तु ज्ञानेन। समाजे मानवाः अनृतभाषण-हिंसा-द्वेष-संघर्षेषु लिप्ताः आसन्। अधुना तु आत्मीयसम्बन्धः अन्तिमप्रायः। प्रयुक्तिविद्यायाः अपव्यवहारः एव दृश्यते। शिक्षायाः इदं विकृतरूपमस्माकं समाजं नाशयति। मानवाः स्वदायित्वं कर्तव्यं च विस्मरन्ति। अद्य अयं प्रश्नः उदेति यत् एतेभ्यः कथं मुक्तिर्भविष्यति? एतस्माद् मुक्त्यर्थमादौ किं किं करणीयं तद्विषये अत्र आलोच्यते।*

**कुञ्चीशब्दाः** – शिक्षा, गुरुशिष्यसम्बन्धः, निःशुल्कशिक्षा, नैतिकगुणाः, विकाशः चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

**भूमिका :**

शिक्षा इति शब्दः शिक्ष् इति धातोः टाप्प्रत्यययोगे निष्पन्नः। ज्ञानार्जनमेव शिक्षा इति साधारणार्थः। पद्धत्युनुसारेण ज्ञानलाभप्रक्रियैव शिक्षा इति व्यापकार्थः। आजन्मनः मृत्युपर्यन्तं मनुष्याः यत्किमपि शिक्षन्ते। अस्माकं भारतीयपरम्परायां ज्ञानमेव सर्वश्रेष्ठमिति अभिमन्यते। ज्ञानेनैव इह-पारलौकिकयोः निधिः लभ्यते। वर्तमानकाले तु शिक्षाशब्दः अध्ययनरूपोपाधौ सीमितोऽस्ति। प्राचीनकाले तु शिक्षाशब्देन स्वरवर्णाद्युच्चारणपुरस्सरं वेद-वेदाङ्गानां शिक्षा इति अवबुबुधुः महर्षयः। उच्चारणदोषः तस्मिन्काले अनङ्गीकृतः। तैत्तिरीयोपनिषदः शिक्षावल्यामस्ति –

"स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षा।"[1]

अर्थात् यत्र स्वरवर्णाद्युच्चारणशिक्षा प्रदीयते स्म सैव शिक्षा। किन्तु आधुनिकशिक्षाव्यवस्थायाम् आदर्शवाद-प्रकृतिवाद-यथार्थवाद-आधुनिकीकरणविचारधाराः इत्येतेषां क्रमवर्धनेन औपनिषदीयशिक्षपद्धत्याः दृष्टिः गौरवञ्च समाप्तिमाप्यते। अतः आधुनिकशिक्षाव्यवस्थया सह औपनिषदीयशिक्षापद्धतिं संयुज्य वर्तमानसमाजे तदुपयोगिता द्रष्टव्या।

**शिक्षायाः उद्देश्यं माध्यमञ्च :**

**शस्त्रं शास्त्रं समाचरेत्** इत्येव उपनिषत्कालीनशिक्षायाः मुख्यमुद्देश्यमासीत्। अर्थात् शस्त्रशिक्षा शास्त्रपाठश्चेति युगपत् स्वीकर्तव्यम्। वर्तमानकाले यथा विद्यालय-महाविद्यालय-विश्वविद्यालयाः सन्ति तथा शिक्षाप्रतिष्ठानानि तदा नासन्। तस्मिन्काले एकैक ऋषिपरिवारः एकैकविद्यालयरूपेण परिगण्यते स्म, एतादृशः विद्यालयः गुरुकुल-

---

[1] तैत्तिरीयोपनिषद्, शिक्षावल्ली

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

आचार्यकुल-मठरूपेण परिचितोऽसीत्। वैदिककाले पूर्णायुष्काणां मानवानां कृते चतुराश्रमः आचरणीयः एव आसीत्। चतुराश्रमेषु ब्रह्मचर्याश्रमः शिक्षायै सुनिर्दिष्टः। शिष्याः स्वगृहं परित्यज्य गुरुगृहे निर्दिष्टसमयपर्यन्तम् उषित्वा संस्कृतभाषया श्रुतिपरम्परया च शिक्षालाभं कुर्वन्ति स्म। गुरोः मुखनिःसृतायाः वाण्याः श्रवणादिभिः शिष्याः आत्मस्थम् अकुर्वन्। गुरुः पारलौकिकज्ञानपुरस्सरं दर्शन-पुराण-इतिहास-राशिविज्ञान-कल्पविज्ञान-ध्वनिविज्ञान-शब्दविज्ञान-व्याकरणशास्त्र-कलाशास्त्र-कृषिविद्या-शस्त्रविद्या-नीतिशास्त्र-आयुर्वेदादिविषयाणामुत्कृष्टं ज्ञानं शिष्येभ्यः प्रददुः। गद्यपद्यैः, गीतसङ्गीतैः, कथाभिः, आख्यानव्याख्यानैः तथा श्रवणमननरूपपरीक्षया शिष्येभ्यः ज्ञानप्रदानं कुर्वन्ति स्म। शिष्याणां श्रेष्ठत्वं निर्णेतुं सभा-महासभा-युक्ति-तर्क-वाद-विवादरूपप्रतियोगितायाः व्यवस्था क्रियते स्म।

**गुरुशिष्यसम्बन्धः :**

औपनिषदीयकाले गुरुशिष्ययोः सम्बन्धः पितापुत्रवदासीत्। आचार्याः शिष्यं पुत्रवत् स्निह्यन्ति स्म। शिष्याः आचार्यपरिवारे अन्तर्भूताः सन्तः छात्रजीवनं यापयामासुः। येषां विद्याप्रतिष्ठानानाम् आचार्याः प्रायः दशसहस्राधिकानां छात्राणां भारकत्वेन शिक्षादानं कुर्वन्ति स्म ते कुलपतयः इत्युच्यन्ते। यथा –

"मुनीनां दशसाहस्रं योऽन्नपानादिपोषणात्।
अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः॥"[2]

शिष्याः दरिद्राः ब्राह्मणाः राजपुत्राः वा भवन्तु, तान् प्रति गुरुभिः सदा समभावः समदृष्टिश्चेति प्रदर्शनीयः। सर्वे शिष्याः ब्रह्मचारिणः आसन्, गुरोः वचांसि तेषां पालनीयानि एव। गुरवः शिष्यैः सह आश्रमे वसन्ति स्म। गुरवः स्वयमेव अनुशासनेन सुचारुनीत्या शुद्धाचारसदाचारपालनपूर्वकं जीवनं यापयन्ति स्म तथा शिष्येषु तद्गुणान् विकसयितुं कृतयत्नाः आसन्। गुरूणां सकाशे स्थित्वा ते शिष्याः चतुर्दशविद्याः चतुष्षष्टिकलाः च अध्यैयत। गुरौ एव शिष्याणां शारीरिक-मानसिकभावौ च समर्पितौ आस्ताम्। गुरुषु तेषाम् अमितविश्वासः आसीत्। छान्दोग्ये एव प्रमाणमुपलभ्यते, यदा देवतायाः ज्ञानं प्राप्य सत्यकामः असन्तुष्टः सन् आचार्यसन्निकटं ज्ञानं याचते - "अन्ये मनुषेभ्य इति ह प्रतिजज्ञे, भगवाँस्त्वेव मे कामे ब्रूयात्। श्रुतं ह्येव मे भगवद्दृशेभ्य आचार्याद्धैव विद्या विदिता साधिष्टं प्रापयतीति।"[3]

आध्यात्मिक-मानसिक-शारीरिकविकाशाय अध्ययेन सह इमे शिष्याः यज्ञकाष्ठारोहणं, यज्ञकर्म, शस्त्रपाठः, गुरुसेवा, भोजनाय भिक्षाचर्येण अन्नसंग्रहः, गोसेवा इत्यादीनि कर्माणि अकुर्वन्। शिष्याः अतिनिद्रा-आलस्य-लोभ-क्रोध-हिसा-अहंकार-आकाङ्क्षा-सौन्दर्यचर्चा-इन्द्रियपरायणतारूपेभ्यः कर्मभ्यः स्वात्मानं निवर्तयन्ति स्म। आचार्यसम्मुखे ते सर्वदैव विनयिनः निरहङ्काराः आसन्। उपनिषत्सु ब्राह्मणेषु बहूनां शिष्याणां नामोल्लेखः प्राप्यते, यथा – आरुणिः, श्वेतकेतुः, नचिकेताः, सत्यकामः, शौनकः, भृगुः प्रभृतयः। प्रोल्लिखिताः शिष्याः आत्मत्याग-परज्ञानप्राप्ति-सेवापरायणतासु विषयेषु प्रसिद्धाः आसन्। तस्मिन्काले गुरवः शिष्याश्च पारस्परिकं मङ्गलं ययाचुः, यथा - "सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु मा विद्विषावहै। ओं शान्तिः शान्तिः शान्तिः।"[4]

अतःपरम् औपनिषत्कालिको गुरुशिष्यसम्बन्धः अत्यन्तो मधुरः मैत्रीमयः श्रद्धाशीलः नम्रः चासीत्। तस्मिन्नेव काले भारतीयसभ्यता-संस्कृति-चिन्ताधाराणां दार्शनिक-आध्यात्मिकविकाशौ जातौ।

**सार्वजनिकी निःशुल्कशिक्षा –**

तत्कालिकसमये गुरुकुलशिक्षाव्यवस्थायाम् अध्यापनार्थमर्थः न स्वीक्रियते स्म। शास्त्रजिज्ञासवः ज्ञानपिपासवः शिष्याः समिधं स्वीकृत्य गुरमेव अभिगच्छेयुः। यतो हि अग्न्युपासकानां शास्त्रनिष्णातृणाम् ऋषीणां सकाशे समिधापेक्षया अन्यत् प्रयोजनं नास्त्येव। प्रश्नोपनिषदि दृष्टं यत् अपरब्रह्मोपासकाः षड् ऋषयः परब्रह्मविषये जिज्ञासवः भगवतः पिप्पलादस्य सम्मुखे समित्पाणयः भूत्वा उपस्थिताः आसन्, यथा - "**सुकेशा** च भारद्वाजः ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः

[2] अथर्ववेदः – १७/५/१७

[3] छान्दोग्योपनिषद् – ४/९

[4] कठोपनिषद्, शान्तिमन्त्रः

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

परब्रह्मान्वेषमाणाः। एष ह वै तत्सर्वं वक्ष्यते इति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः।"[5]

छान्दोग्योपनिषदि अपि दृष्टं यत् पौत्रायणः जानश्रुतिः पौत्रायणः षट्शतानि गवां कण्ठहारम् अश्वतरीभ्यां युक्तमेकमश्वतरीरथमादाय रैक्वं प्रति गतवान्। तदा ऋषिः रैक्वः अप्रसन्नः सन् तं शूद्रः इति नाम्ना अभिहितवान्। यथा - "तमु ह परः प्रत्युवाचाह हारेत्वा शूद्र ! तवैव सह गोभिरस्त्विति।"[6]

बृहदारण्यकोपनिषदि दृश्यते यदा राजा जनकः याज्ञवल्क्याय हस्तिवत् निर्व्याधि गां दातुमिष्टवान्, तदा याज्ञवल्क्येन प्रोक्तं - "हस्त्यृषभँ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति।"[7] अर्थात् मे पितुः अभिमतानुसारेण यावन्न कश्चिद् शिष्यः गुरूपदेशेन तुष्यते तावत् गुरुदक्षिणा न स्वीकरणीया।

अत एव जनक-जानश्रुतिभ्यां राजभ्यां प्रदत्तगुरुदक्षिणया इदं प्रतीयते यत् तस्मिन्कालेऽपि गुरून् तोषयितुं राजानः कृतयत्नाः आसन्। किन्तु साधारणशिष्येभ्यः अर्थः न स्वीक्रियते स्म। केवलं समित्पाणिः सन् गुरूपासनयैव ज्ञानं लभेत।

**शिक्षायामभिरुचिः**

मानवविकाशः शिक्षामालम्बते। अतः शिक्षा तादृशी भवेत् यया मानवानामात्मोद्धारः परमज्ञानप्राप्तिः च सम्भवेत्। उपनिषदि तादृशमुदाहरणं विद्यते यत्र शिक्षां प्रति कुतूहलता आग्रहश्च उल्लिखितोऽस्ति। बृहदाराण्यकोपनिषदः याज्ञवल्क्य-मैत्रेयीसंवादे वर्तते यत् मैत्रेयी अमृतरूपपरमज्ञानलाभाय अखिलपार्थिवसम्पदधिकारे अनीहां प्रदर्शितवती, यथा - "येनाहं नामृता स्यां किमहं तेन कुर्यां, यदेव भगवान् वेद तदेव मे ब्रूहीति॥"[8] अर्थात् येन अहं नामृता भवेयं तेन वित्तेनाहं कि कुर्याम् ? मैत्रेय्याः इयं वाणी प्राचीनकालादेव भारतीयपरम्परायां शाश्वतवाणीत्वेन प्रदीप्तास्ति। प्राचीनकालादेव अज्ञानस्य जिज्ञासा परिदृश्यते।

तत्कालीनसमये शिक्षा गुरुकार्यत्वेन स्वीकृतासीत्, तत्र कश्चित् प्रमादः किमपि आलस्यं वेति स्थानं नाप्नोति। अतः तैत्तिरीयोपनिषदि उक्तम् - "स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्।"[9]

आचार्यानुपस्थितौ गृहस्य द्वारभागे ज्ञानपिपासवः शिष्याः ज्ञानलाभार्थम् अपेक्षमाणाः आसन् इत्यपि परिदृष्टम्। कठोपनिषदि दृष्टं नचिकेता यमराजस्य अनुपस्थितौ तद्गृहस्य द्वारप्रदेशे अभुक्तः सन् दिनत्रयमुषित्वा कालान्तरे यमराजसकाशात् ज्ञानलाभं चकार। यथा - "तिस्रो रात्रीर्यदवात्सीर्गृहे मे अनश्नन् ब्रह्मन्नतिथिर्नमस्यः"[10]।

**नैतिकगुणानां विकाशः –**

नैतिकगुणाः नाम सत्यपरायणता, कर्तव्यपरायणता, नियमनिष्ठा, सदाचारः, मनः-शरीर-मस्तिष्कशुद्धता, दया, करुणा इत्यादयः अवगम्यन्ते। उपनिषत्कालिकायां शिक्षापद्धतौ एतादृशानां गुणानां शिष्येषु विकाशाय अधिकं बलं प्रदत्तम्। यथा–

"सत्यमेव जयते नानृतम्।"[11]

"सत्यं वद। धर्मं चर। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव।"[12]

"तेन त्यक्तेन भुञ्जीथा, मा गृधः कस्यस्विद् धनम्।"[13]

अर्थात् सत्येनैव जयः सम्भवति, न तु अनृतेन। सदैव सत्यं भाषस्व। धर्मं परिपालय। त्यागेन भोगः करणीयः। अन्यसम्पत्ति मा लुभ्य। उपनिषदुक्ताः इमाः वाण्यः चिरन्तन्यः शाश्वताः उत्साहवर्धयित्र्यः च सन्ति। वैदिकर्षीणां मते देवताः मनुष्याणां प्रात्यहिकं कर्म चरित्रं च निरीक्षन्ते स्म तथा पापकर्मणि लिप्तेभ्यः दुश्चरित्रेभ्यः जनेभ्यः दण्डं प्रयच्छन्ति स्म। अतः देवतानां दण्डभयात् ते जनाः शुद्धं सदाचारसम्पन्नं जीवनमयापयन्। ब्रह्मचर्यधर्मपालनेन आश्रमस्थविद्यार्थिनां शारीरिक-

[5] प्रश्नोपनिषद् – १/१
[6] छान्दोग्योपनिषद्
[7] बृहदारण्यकोपनिषद् – ४/१/६
[8] बृहदारण्यकोपनिषद् – ४/५/४
[9] तैत्तिरीयोपनिषद्, शिक्षावल्ली
[10] कठोपनिषद् - १/१/९
[11] मुण्डकोपनिषद्
[12] तैत्तिरीयोपनिषद्, शिक्षावल्ली
[13] ईशावास्योपनिषद्

 ISSN : 2583-2271
Vol. - 3, No. 1: 2023

मानसिकविषययोः शुद्धत्वं समपद्यत। तथैव वेदैः सह सामाजिक-वैयक्तिकानुशासन-कर्तव्यपालन-सत्यपरायणता-न्यायपरायणता-दया-दाक्षिण्य-कारुण्यानि इति एते नैतिकगुणाः अपि अपाठ्यन्त। नैतिकगुणाभावशिष्याय परमज्ञानं न प्रदीयत। आदौ शिष्यस्य नैतिकगुणानां परिशीलनं कृत्वानन्तरं शिक्षादानम् अक्रियत। कठोपनिषदि तु यमराजः आत्मज्ञानाभिलाषिणं नचिकेतसं परीक्षितुं विविधपार्थिवविषयैः आदौ प्रलोभितवान्। नचिकेतसा तत् प्रलोभनं प्रत्याख्यायता उक्तं –

“श्वोभावा मर्त्यस्य यदन्तकैतत् सर्वेन्द्रियाणां जरयन्ति तेजः।
अपि सर्वं जीवितमल्पमेव तवैव वाहास्तव नृत्यगीते॥
न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वा।
जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एव॥”[14]

अर्थात् भवता प्रदत्तं सर्वं भोग्योपकरणं तु क्षणात्मकमस्ति। न तु एतत् मङ्गलदायकमपि तु मानवानामिन्द्रियशक्तिं धर्मं च नाशयति। भवता प्रदातुमिष्टमिदं जीवनं तु स्वल्पकालिकम्। रथः, अश्वः, सुन्दर्य्यः रमण्यः, तासां नृत्यमिति एतत् सर्वं भवतां सन्निकटे स्थापयन्तु इति। धनैः मानवाः संतृप्ताः न भवन्ति। अग्नौ घृतोपसेचनेन यथा तेजःप्रभावेण प्रज्ज्वलति अग्निः तथैव भोगप्राप्तौ भोगवासना वर्त्स्यति। मम जीवनरक्षणाय यावत् धनमपेक्ष्यते तावत्तु भवद्दर्शनेन आप्तुं शक्यते, दीर्घजीवनस्य कृते किं वा ब्रूयात् ? आत्मतत्त्वातिरिक्तमन्यत् किमपि नाहं कामये। तदनन्तरं नचिकेतसं विद्यालाभाधिकारिणमिति अभिमत्य यमराजः प्रसन्नः सन् आत्मज्ञानं प्रददौ।

छान्दोग्योपनिषदि अपि सत्यपरायणतायाः उदाहरणं परिदृष्टम्। सत्यकामः जाबालः यदा शिक्षालाभार्थं गौतमर्षिं समुपस्थितः तदा तेन महर्षिणा जाबालस्य पितृपरिचयः पृष्टः। सत्यकामः जाबालः प्रत्युत्तरितवान् यत् - “स होवाच, नाहमेतद्वेद भो यद्गोत्रोऽहमस्मि, अपृच्छं मातरं, सा मा प्रत्यब्रवीत्, बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे, साऽलभे, साऽहमेतन्न वेद, यद्गोत्रस्त्वमसि, जबाला तु नामाऽहमस्मि, सत्यकामो नाम त्वमसीति, सोऽहं सत्यकामो जाबालोऽस्मि भो इति।”[15] अर्थात् गौतममहर्षिः सत्यकामस्य असंशयं सत्यवचनं श्रुत्वा आनन्दितः बभूव तथैव शिष्यत्वमङ्गीचकार।

**वर्तमानसमये औपनिषदीयशिक्षायाः तात्पर्यम् :**

वैदिककालादारभ्य आदर्शनागरिकनिर्माणे बलं दीयते स्म। यतोहि एकः आदर्शवान् नागरिकः एव समाजस्य काण्डारी भवितुमर्हति। अतः प्राचीनकालादेव शिष्येषु सदाचारः, शिष्टाचारः, धर्मपरायणता, न्यायपरायणता, कर्तव्यपरायणता इति नैतिकगुणानां विकाशाय विशेषबलं प्रदीयते स्म। किन्तु वर्तमानसमाजे यादृशी शिक्षा परिलक्ष्यते सा अत्यन्तं वैचित्र्यपूर्णा विकृता चेति। वर्तमानसमये सर्वाणि विद्याप्रतिष्ठानानि तु उपाधिप्रदानस्य यन्त्रागारत्वेन तथा ज्ञानमर्थोपार्जनस्य माध्यमरूपेण परिवर्तितम्। अर्थप्रधानेऽस्मिन् वर्तमानकाले विद्यालय-महाविद्यालय-विश्वविद्यालयेषु अर्थमाध्यमेनैव पाठ्यक्रमस्य महत्त्वं निर्धार्यते, न तु ज्ञानेन। केषाञ्चन शिक्षाप्रतिष्ठानानां पाठ्यक्रमशुल्कस्तु ततोऽधिकोऽस्ति यत्कारणात् छात्राणां कृते अध्ययनावसरः न लभ्यते। वर्तमानशिक्षापद्धतौ केवलमुच्चपदप्राप्तेः पार्थिवसुखस्य च सन्धानं प्रदीयते, न तु मानविकता व्यवहारिकज्ञानञ्चेति तादृशं ज्ञानं पुस्तके लिपिबद्धं भवति। वैदिककाले यः धर्मः मानवानां जीवने अविभक्ताङ्गरूपेण विवेचितः आसीत् तस्मिन् विषये अधुना विश्वासः न्यूनो भवति। यतो हि तत्र केचन असाधवः सन्ति ये स्वस्वार्थसिद्ध्यर्थं मनुष्यान् अनुचितमार्गे प्रेषयन्ति। अधुना तु आत्मीयसम्बन्धः अन्तिमप्रायः। भ्रातृत्वमधुना न दृश्यते, तत्स्थाने पारिवारिकसम्पद्विषये शत्रुता एव परिलक्ष्यते। वृद्धपितुः वृद्धमातुः च दायित्वं केनापि न स्वीक्रियते, फलत्वेन नगरे नगरे वृद्धाश्रमसंख्या वर्धिता। अधुना तु प्रयुक्तिविद्यायाः अपव्यवहारः एव दृश्यते। दूरदर्शनं, संगणकयन्त्रं, दूरवाणी इति एतैः अश्लीलता वर्धते। एतेषु यन्त्रेषु शिशवः सदा निमग्नाः सन्ति। अनेन कारणेन शिशवः स्वशैशवं विलोपयन्ति। समाजे मानवाः अनृतभाषण-

[14] कठोपनिषद् – १/२/२७,१/२/२८

[15] छान्दोग्योपनिषद् – ४/४

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

हिसा-द्वेष-संघर्षेषु लिप्ताः आसन्।

शिक्षायाः इदं विकृतरूपमस्माकं समाजं नाशयति। मानवाः स्वदायित्वं कर्तव्यं च विस्मरन्ति। अद्य अयं प्रश्नः उदेति यत् एतेभ्यः कथं मुक्तिर्भविष्यति?

एतस्माद् मुक्त्यर्थमादौ शिक्षापद्धतौ पाठ्यक्रमे च परिवर्तनं साधनीयम्। शिक्षाविषये वेद-उपनिषत्-पौराणिककथा-धर्मशास्त्र-ऋषिवृत्तान्त-सदुपदेश-कथासरित्सागर-पञ्चतन्त्र-हितोपदेशाः इति एतादृशीभिः नीतिकथाभिः सह गीताश्लोकानामपि अन्तर्भावः क्रियते। अनेन पाठ्यक्रमेण तु छात्राः भारतीयपरम्परामवगच्छन्ति तथा तेषु नैतिकगुणानां विकाशोऽपि सम्भवति। वर्तमानकाले विश्वविद्यालयानाम् उपाचार्याः समावर्तनम् उपलक्ष्य यथा भाषन्ते तथा वैदिककालेऽपि आसीत्। तैत्तिरीयोपनिषदः शिक्षावल्ल्याः अन्ते गुरुः शिष्यमुपदिशति - "सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितभ्याम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि। नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि। नो इतराणि। एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्। एवमु चैतदुपास्यम्।"[16]

अतएव स्पष्टतया इदमनुमीयते यत् वैदिककालिकशिक्षाव्यवस्था यदि वर्तमानशिक्षाव्यवस्थायां संयुज्यते तदा छात्राणामाध्यात्मिक-शारीरिक-मानसिकविकाशाः भविष्यन्ति।

**उपसंहारः :**

सामग्रिकरूपेण औपनिषदीयशिक्षाव्यवस्था श्रेष्ठादर्शेन नियन्त्रितासीत्। छात्रजीवनं तु समग्रजीवनस्य प्रस्तुतिपर्व। एवञ्च समाजोन्नतिः एव तस्य मुख्योद्देश्यम्। समाजोन्नतिसाधकमानविकगुणयुक्ताः आदर्शजीवनधारणस्य मुख्योत्साः वेदोपनिषदादिग्रन्थाः। तैत्तिरीयोपनिषदि आचार्याणां यत् शिक्षान्तभाषणं प्राप्यते तत्र भारतवर्षस्य शिक्षादर्शः सुन्दररूपेण प्रतिफलितोऽस्ति। इदं दीक्षान्तभाषणं सर्वेषां राष्ट्राणां सर्वकालिकच्छात्राणां कृते अत्यावश्यकमस्ति। वैदिकसाहित्यस्य एतस्य ज्ञाननिधेः संवर्धनं परमावश्यकम्। व्यवहारिकजीवने प्रयोगमाध्यमेन एनं ज्ञाननिधि संवर्धयेत्। आबाल्यादेव पाठ्यक्रमे सदाचार-सत्यपरायणता-न्यायपरायणता-परोपकारिता-अहिसा-भक्तिकथा-आख्यान-शास्त्रांश-महर्ष्युपदेश-महर्षिवृत्तान्तादयः विषयाः अन्तर्भावनीयाः। एवञ्च नैतिकमूल्यबोध-उत्तरदायित्व-कर्तव्यपरायणताः इति गुणानां विकाशः करणीयः। अनेनैव आदर्शनागरिकनिर्माणम् आदर्शसमाजनिर्माणं च सम्भवेताम्।

## सहायकग्रन्थसूची


- ईशादि नौ उपनिषद्, (२०२१), गोरक्षपुर्, गीताप्रेस्।
- स्वामी जुष्टानन्दः, (२०१२), ईशोपनिषद्, कोलकाता, उद्बोधनकार्यालयः।
- उपनिषदो का अध्ययन, (प्रथमसंस्करणम्, १९५६), दिल्ली, सत्साहित्यप्रकाशनम्।
- कल्याण-सेनगुप्तः, (२०२२), उपनिषद् ग्रन्थावली, कलकाता, पाण्डुलिपिः।
- स्वामी गम्भीरानन्दः, (२००८), उपनिषद् ग्रन्थावली, कोलकाता, उद्बोधनकार्यालयः।
- पण्डितरामनारायण-अवस्थी, (१९७५), उपनिषद् प्रकाश, लखनउ।
- स्वामी गम्भीरानन्दः, (२००८), कठोपनिषद्, कोलकाता, उद्बोवोधनकार्यालयः।
- पण्डित-श्रीनृत्यगोपालपञ्चतीर्थः, छान्दोग्योपनिषद्, वसुमतीसाहित्यमन्दिरम्।
- स्वामी गम्भीरानन्दः, (२०१४), तैत्तिरीयोपनिषद्, कोलकाता, उद्बोधनकार्यालयः।


[16] तैत्तिरीयोपनिषद्, शिक्षावल्ली

- स्वामी विशुद्धानन्दगिरिः, प्रश्नोपनिषद्, कोलकाता, गुप्तप्रेश्।
- सुबोधकुमार-चक्रवर्ती, (१९५८), वैदिक उपनिषद्, कोलकाता,।
- शान्ति-वन्द्योपाध्यायः, (२००३) वैदिक साहित्येर् रूपरेखा, कलकाता, संस्कृतपुस्तकभाण्डार्।
- बृहदारण्यकोपनिषद्, (२०१५), गोरक्षपुर्, गीताप्रेस्।
- श्रीसीतानाथ-तत्त्वभूषणः, (१९२८), बृहदारण्यकोपनिषद्, कोलकाता, ब्राह्ममिशन् प्रेस्।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# उपनिषदीयसद्भावनायां मानविकतावादः

**सत्येन्द्रनाथ-आदकः**
**SACT-अध्यापकः, योगदा-सत्सङ्ग-पालपाडा-महाविद्यालयः**
**पालपाडा, पूर्वमेदिनीपुरम्**

**प्रबन्धसारः**

*मनोरपत्यं पुमान् मानवः। मानवस्य भाव इति व्युत्पत्त्या मानव+तल् (तस्य भावस्त्वतलौ इति तल्प्रत्ययः) इत्यनेन मानवता इति पदं सिद्धम्। मानवता एव मानवस्य आन्तरिकबाह्यसौन्दर्यकारणं भवति। येषां मनुष्यत्वं नास्ति तेषां वृथा जीवनं जायते। मानववादः न केवलम् आत्मनः, अपि तु समाजस्य कल्याणं साधयति। मानवतायाः अभावात् समाजे शिशुभिः सह दुर्व्यवहारः, नारीनिर्यातनं, लुण्ठनम् इत्यादयः भवन्ति। यदि उपनिषदि प्रदत्तां मानवताशिक्षां वयं ग्रहीष्यामः, तर्हि भविष्यप्रजन्मस्य कृते इयम् उत्तमा पृथिवी भविष्यति।*

**कुञ्चीशब्दाः** – मानवता, सद्भावना, उदारता, मूल्यबोधः, धर्मः चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

**भूमिका–**

'शृण्वन्तु विश्वे अमृतस्य पुत्राः'[1] इति अमृतवचनानुसारं वयं सर्वे परमेश्वरस्य पुत्राः। मानवः जगत्पितुः महती सृष्टिः। पृथिव्याम् उत्तरमेरुतः दक्षिणमेरुपर्यन्तं, मिसिसिपीनद्याः समारभ्य गङ्गानदीं यावत् विविधसंप्रदायाः मानवाः निवसन्ति। यद्यपि तेषां प्रकृतिः, जातिः, धर्मः इत्यादयः भिन्नाः तथापि वयं सर्वे परमेश्वरस्य पुत्राः भवामः। तत्रापि सकलजीवेषु बल-ज्ञान-बुद्धि-कर्मकुशलतादृष्ट्या मानवः सृष्टेः श्रेष्ठः जीवः। मानवानां मानविकता एव सभ्यताविकाशस्य अन्यतमा शक्तिः।

**मानविकता-**

मनोरपत्यं पुमान् मानवः। 'भृग्वादेश्च' इत्यनेन अण्प्रत्यये अञ्-प्रत्यये वा मानवशब्दस्य निष्पत्तिः। तेन मानवेन कृतमिति विग्रहे 'तेन कृतम्' इति सूत्रेण ठक्-प्रत्यये मानविकशब्दो निष्पद्यते। मानवस्य भाव इति व्युत्पत्त्या मानव+तल् (तस्य भावस्त्वतलौ इति तल्प्रत्ययः) इत्यनेन मानवता इति पदं सिद्धम्। मानवता, मानविकता, मानविकमूल्यबोधः, मनुष्यत्वं च अस्य नामान्तराणि सन्ति। तस्य मानवस्य भावः मानविकता, मानविकत्वं वेति (तद्भावे तात्वमिति क्रमदीश्वराचार्यः)। तेन मानविकता कश्चन गुणपदार्थ एवेति ज्ञायते। नैतिकता हि मानवजीवनस्य मूलम्। इयं नैतिकता एव मानवानां जीवने सफलतां जनयति।

आहारनिद्राभयमैथुनक्रियाः पशुभिः सह मानवानाम् अपि समानाः। मित्रलाभे उक्तं च-

"आहारनिद्राभयमैथुनं च सामान्यमेतत्पशुभिर्नराणाम्।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः॥"[2]

पशवः केवलं स्वस्य जीवनार्थं जीवन्ति, परन्तु मानवाः केवलं स्वस्य उदरपूर्तये स्वार्थाय वा एव न जीवन्ति। जगति मानवतायाः माध्यमेन मानवः यशः प्राप्नोति। मानवधर्मरहितो मानवः पशुतुल्य एव प्रतीयते। ये मानवाः बहुजनहिताय बहुजनसुखाय च प्राणान् न समर्पयन्ति ते मनुष्याः पशुतुल्याः। मानवता मानवस्य अन्तःसौन्दर्यकारणं बाह्यसौन्दर्यकारणं च भवति। येषां मनुष्यत्वं नास्ति तेषां वृथा जीवनं जायते। मित्रलाभे उक्तं च –

"धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते।
अजागलस्तनस्येव तस्य जन्म निरर्थकम्॥"[3]

मानवतायुक्ताः मानवाः सदा अपरेषां मङ्गलं कुर्वन्ति। मानववादः न केवलं आत्मनः, अपि तु समाजस्य कल्याणं

---

[1] यजुर्वेदः- ११/५

[2] मित्रलाभः(प्रस्तावना)-२५

[3] मित्रलाभः(प्रस्तावना)-२६

साधयति। मानवतायाः अभावात् बहवः मानवाः विनश्यन्ति। दया, क्षमा परोपकारिता, शौर्यम् इत्यादयः गुणा: मानवेषु सदा भवेयुः। मानवतावादः मानवजीवनस्य प्रगतिशीलं दर्शनं भवति। मानवतावादस्योपरि मानवानां मनस: विकाश: निर्भरः अस्ति। मानवतावाद: मानवधर्मस्य सूचकः। अस्य महदुद्देश्यं जगतः सर्वेषां जनानां कल्याणं भवति, येन सर्वे मानवा: शान्तिमार्गे शाश्वतसुखम् अनुभवन्ति।

भारतीयपरम्परायां शास्त्रे तथा उपनिषदि बहुधा मानवतावर्णना प्राप्यते। ईशोपनिषदि लक्ष्यते-

"ईशा वास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्।

तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम्॥"[4]

परमात्मा जगतः अधीश्वरः। जगति विद्यमानं सर्वमेव तेन आच्छदितमिति। जागतिकानाम् वस्तूनां त्यागेन आत्मनः परिपालनं कर्तव्यम्। यत्र त्यागः नास्ति केवलं मोहः आसक्तिश्च भवति तत्र दुःखं अशान्तिश्च आयाति। त्यागानुसारेण भोगः, कदापि परधने लोभः न स्यात्। एतेन मानवतायाः माध्यमेन वयं उत्कृष्टतमं मोक्षं प्राप्तुं शक्नुमः। अस्माभिः कीदृशं कर्म कर्तव्यम् इति प्रसङ्गः उपनिषत्सु उपलभ्यते। तत्रोच्यते अस्माभिः निष्कामकर्म कर्तव्यम्। शत्रुं मित्रं वा न विचिन्त्य सर्वेषां कृते निःस्वार्थं कार्यं कुर्यात्। यथा- "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।"[5] मानवाः शतं वर्षाणि जीवितुमिच्छन्ति चेत् तर्हि शास्त्रविहितकर्मानुष्ठानं विधेयम्। निष्कामकर्मणा कर्मबन्धनस्य मोचनं भवति।

तैत्तिरीयोपनिषदि शिक्षणविधिभिः सह आदर्शजीवनपद्धतिः उल्लिखिता अस्ति। यथा - "मातृदेवः भव, पितृदेवो भव"[6]। पितु: मातुः आचार्यस्य च किमपि विरुद्धं कर्म कदापि केनापि न आचरणीयम्। जीवनस्य सर्वक्षेत्रेषु माता सुशिक्षिका भवति। आचार्यस्य प्रदत्तेन ज्ञानेन मानवः स्वजीवनं सुन्दरं सफलं च करोति। आचार्य: परमात्मनः मूर्त्तिस्वरूपः, पिता हिरण्यगर्भस्य, माता पृथिवीमूर्तिः च। तस्मात् अस्माभिः तेषां सदुपदेशः सदा अनुसरणीय:। यथोच्यते मनुना –

"आचार्यो ब्रह्मणो मूर्ति: पिता मूर्ति: प्रजापतेः।

माता पृथिव्या मूर्तिस्तु भ्राता स्वो मुर्तिरात्मनः॥"[7]

मातापितातिथीन् देवः इति मत्वा तेषाम् आज्ञापालनं कर्तव्यम्।

धर्मस्य मूलं सत्यम्। अतः सत्यं ज्योतिरूपम्। सत्यमेव मानवजीवनं द्योतयति। सत्यमार्गस्य अनुसरणं सदा अस्माकं मानवतायाः कृते कर्तव्यम्। सत्याश्रयिणोऽसत्यं लौकिकं सुखं परित्यज्य अलौकिकं पारलौकिकं च सुखं लभन्ते। सत्यं मानवानां विश्वासं वर्धयति। मुण्डकोपनिषदि उच्यते- "सत्यमेव जयते नानृतं, सत्येन पन्था विततो देवयान: "[8]। अपि च यजुर्वेदे उच्यते -"इदमहमनृतात् सत्यमुपैमि"[9]। सत्यं मानवं पापात् त्रायते, दुःखात् मोचयति, बन्धनात् रक्षति च। सत्यस्य कारणादेव मानव: मानवान् विश्वसिति। सत्येन पृथिवी धार्यते, सूर्यः तापं प्रददाति, वायुः सदा प्रवहति। एवं सत्ये सर्वाणि निहितानि सन्ति। चाणक्येन उक्तम् -

"सत्येन धार्यते पृथिवी सत्येन तपते रविः।

सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम्॥"[10]

परन्तु अद्यतनसमाजे सत्यस्य अभावः दृश्यते। प्रायशः सर्वे असत्यमार्गम् आश्रित्य एव जीवनं यापयन्ति।

मानवतया मानवस्य मनसि अलौकिकं सुखं जायते। नचिकेता यमराजस्य प्रदत्तानि सुखभोगादिविषयाणि परित्यज्यति स्म। एवं तेन उक्तं यत् मानवः धनेन न तृप्ति लभते। सर्वं सुखं स्वल्पायुष्कम्, अद्य एव न श्वः। भोगैः मानवस्य इन्द्रियशक्तिः ,धर्मः, वीर्यं, तेजः चेत्यादयः नश्यन्ति। अतः कठोपनिषदि उच्यते- "न वित्तेन तर्पणीयो मनुष्यो"[11]। अपि च बृहदारण्यकोपनिषदि यथोच्यते "जीवितं स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति"[12]। प्रजापतेः ब्रह्मणः देवमानवासुराश्च त्रयः सन्तानाः। ते सन्तानाः प्रजापतिब्रह्मणः सकाशात्

[4] ईशोपनिषद् - १.

[5] ईशोपनिषद्- २

[6] तौत्तिरीयोपनिषद् (शिक्षावल्ली)-११/२.

[7] मनुसंहिता-२/२२५,

[8] मुण्डकोपनिषद्- ३/१/६

[9] यजुर्वेदः- १/५.

[10] चाणक्यनीतिः

[11] कठोपनिषद्- १/१/२७.

[12] वृहदारण्यकोपनिषद्-२/४/२.

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

सदुपदेशं यदा प्रार्थितवन्तः, तस्मिन् समये ब्रह्मा 'द' इति शब्दं त्रिवारम् उक्तवान्। अस्यार्थः दया, दानं, दमश्च इति। एते गुणाः येषु मानवेषु सन्ति ते अमृतलोकं गच्छन्ति। बृहदारण्यकोपनिषदि उच्यते - "द द द इति दाम्यत दत्त दयध्वमिति तदेतत्रयं शिक्षेद्दमं दानं दयामिति"[13]। दमो नाम आत्मसंयमः। अस्माकम् इन्द्रियाणां स्वविषयेभ्यः संयमनमेव यमः। अहिसा-सत्यम्-अस्तेय-ब्रह्मचर्य-अपरिग्रहाणां साधनम् एव यमः। उक्तं च योगदर्शने- "अहिसा सत्यास्तेयब्रह्मचर्या-परिग्रहायमाः"[14]। नैतिकजीवनस्य कृते यमस्य भूमिका अनस्वीकार्या। आत्मसंयमस्य अभावे कदापि कस्मिन् विषये कोऽपि सफलतां प्राप्तुं न शक्नोति। आत्मसंयमस्य अभावात् सदा मनः चञ्चलं भवति। पुरा बेन-नहुषसुमुखादयः राजानः हस्त्यश्वधनादियुक्ताः सन्तः अपि अविनयवशात् विनष्टाः किञ्च विनयवशात् बहवः राजानः वनवासिनः अपि पुनःराज्यं प्राप्तवन्तः। पृथुः विनयात् पुनश्च राज्यं प्राप्तवान्। कुबेरः विनयात् धनाधिपत्यं लब्धवान्। एवं गाधिपुत्रः विश्वामित्रः क्षत्रियः सन् ब्राह्मणत्वं प्राप्तवान्। मनुना उकं च-

"पृथुस्तु विनयाद् राज्यं प्राप्तवान् मनुरेव च ।
कुवेरश्च धनैश्वर्यं ब्राह्मण्यञ्चैव गाधिजः ॥"[15]

मानवानां मानवीयतां प्राप्तुं प्रथमं दमस्य आवश्यकता वर्तते। भगवता श्रीकृष्णेन उक्तं- "बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः"[16]। बुद्धि-ज्ञान-असम्मोह-क्षमा-सत्य-दम-शमादीनां भावः प्राणिशरीरात् जायते।

**दानम्** (दा + ल्युट्) - देशकालादिकं विचार्य प्रयोजनानुसारं परेभ्यः किञ्चित् वितरणं दानम् इति उच्यते। दानेन मानवानां मनसि शान्तिः गृहे सुखं समृद्धि मङ्गलं च जायते। फलाकांक्षां परित्यज्य आत्मनः कष्टेन अर्जितवस्तु सत्पात्रेभ्यः प्रदानं दानं भवति। दानेन स्वर्गः प्राप्यते। दानं सदा गोपनेन करणीयम्। यदि एकहस्तेन कृतं दानम् अन्यहस्तः कदापि किमपि वा न जानाति तदा एतादृशस्य दानस्य महत्त्वम् अस्ति। यत् दानं सर्वान् विज्ञाय भवति तद् दानं केवलम् आत्मप्रचाराय एव। दानं बहुविधम्। यथा-भूमिदानं, गोदानम्, अन्नदानं, स्वर्णदानम्, अभयदानम् इत्यादिकं च। तेषु अभयदानं श्रेष्ठं मन्यते। पञ्चतन्त्रे उच्यते –

"न गोप्रदानं न महीप्रदानं न चान्नदानं हि तथा प्रधानम्।
यथा वहन्तीह बुधाः प्रधानं सर्वप्रदानेष्वभयप्रदानम् ॥"[17]

मानवाः परिश्रमेण धनम् अर्जयन्ति। परन्तु तद् धनं यदि ते दानं न कुर्वन्ति तर्हि तद् धनं व्यर्थं भवति। मधुमक्षिकाः मधुसंग्रहार्थं बहु प्रयतन्ते। किन्तु तद् मधु यदि न परोपकाराय दानं न करोति तर्हि मधुः कालक्रमेण नश्यति। दानेन दानवीरः कर्णः वीरविक्रमादित्यः च अद्यापि समाजे चिरं स्मरणीयौ। चाणक्येन उक्तं-

"देयं भोज्यधनं सदा सुकृतिभिर्नो संचयस्तस्य वै
श्रीकर्णस्य बलेः च विक्रमपतेः अद्यापि कीर्तिः स्थिता।
अस्माकं मधुदानभोगरहितं नष्टं चिरात् संचितं
निर्वाणादिति नैजपादयुगलं घर्षन्त्यह्वो मक्षिकाः ॥"[18]

दया (दय् + अङ् + टाप्) - दया इति शब्दस्यार्थः सहानुभूतिः। क्षमा, धर्मः, यज्ञः, वेदः च दयायाः पर्यायवाचकः भवति। 'दया' इति अतीव क्षुद्रः शब्दः। परन्तु दयायाः शक्तिः असीमा। यत्र दया नास्ति तत्र दीक्षा, शिक्षा, ध्यानं, दानं च निरर्थकं भवति। अस्माकं शरीरे नम्रतायाः दयायाः च आवश्यकता अस्ति। दयाहीनं कर्म निष्फलम्। दाक्षिण्यवरहितं रूपं, विद्यया हीनं जीवनं जलविहीनं सरोवरं च यथा न शोभते, तथैव दयारहितः धर्मः जगति न प्रतिष्ठितः। तेजः क्षमा धैर्यादिकं मानवानां दैवात् प्राप्तं लक्षणम्। श्रीगीतायामुक्तं च-

"तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।
भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥"[19]

मानवानाम् आभूषणमेव रूपं, रूपस्य आभूषणमेव गुणः, गुणस्य आभूषणं ज्ञानं, ज्ञानस्य आभुषणं क्षमा भवति, दयागुणेन मानवः सुख्यातिम् अर्जयति।

अन्ने अस्माकं प्राणशक्तिः तिष्ठति। अन्नं निन्दां न कुर्यात् एवम् अन्नं न त्यक्तव्यम्। अन्नम् अस्माभिः

---

[13] बृहदारण्यकोपनिषद्-५/२/३.
[14] योगदर्शनम्(साधनपादः)-३०
[15] मनुसंहिता- ७/४२.
[16] श्रीमद्भगवद्गीता-१०/४.
[17] पञ्चतन्त्रम्(मित्रभेदः)-३१३.
[18] चाणक्यनीतिः
[19] श्रीमद्भगवद्गीता-१६/३.

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

रक्षणीयम्। तैत्तिरीय- उपनिषदि उच्यते-‘प्राणो वा अन्नं शरीरमन्नादम्। प्राणे शरीरं प्रतिष्ठितम्’[20]। पुनश्च क्षुधार्तेभ्यः जनेभ्यः अन्नं दातव्यम्। अस्माकं मित्रत्वेन सर्वेषां हितसाधनं कर्तव्यम्। यजुर्वेदे यथोच्यते- “मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे। मित्रस्य चक्षुषा समीक्षामहे”[21]। सर्वे जनाः विश्वमेकं कुटुम्बमिव भावयन्ति। मित्रलाभे उक्तं च ‘उदारचरितानान्तु वसुधैव कुटुम्बकम्'[22] इति। केनापि सह भेदाभेदो न कर्तव्यः। सर्वे मानवाः सुखिनः स्युः, सर्वे निरोगिनः भवन्तु, कोऽपि दुःखं न प्राप्नुयात् इत्थं काम्यते। गरुडपुराणे उच्यते-

“सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाग् भवेत्॥”[23]

सम्प्रति समाजः पथभ्रष्टः, सभ्यतायाः प्रगति कृत्वा अधुना वयं यत्र तिष्ठामः तस्य नाम आधुनिकता इति कथ्यते। एवम् आधुनिकतासु अमानविकतायाः प्रसारः प्रत्यहं वर्धते। अतः प्रत्यहम् अमानविकतायाः प्रसारः वर्धते। चिन्ताशीलाः, बुद्धिजीविनः, समाजसंस्कारकाः प्रमुखाश्च वर्तमानसमाजस्य अन्तसाधने अस्थिरतायाः निवारणे च समर्थाः भविष्यन्ति महत्त्वपूर्णां भूमिकां ग्रहणीयाः।

**निष्कर्षः**

निष्कर्षरूपेण एतद् वक्तुं शक्यते यत्, सम्प्रति अस्माकं समाजे मानवता, दया, उदारता च अतीव दुर्लभा अस्ति। समाजे शिशुदुर्व्यवहारः, नारीनिर्यातनं, लुण्ठनम् इत्यादयः भवन्ति। सर्वत्र पक्षपातेन, द्वेषेण च मानवाः स्वार्थसाधनं कुर्वन्ति। फलतः दिशि दिशि उग्रविच्छिन्नतायाः प्रभावः दरीदृश्यते। अस्यां परिस्थितौ मानवतायाः अतीव आवश्यकता वर्तते। मानवानां मानवतायाः प्रथमा शिक्षा तस्य परिवारादेव अर्जनीया। अतः शैशवात् अस्माभिः शिशुभ्यः मानवप्रेम, प्रकृतिप्रेम, सेवा च शिक्षितव्या। यदि उपनिषदि प्रदत्ता मानवता शिक्षा एवं वयं ग्रहीष्यामः, तर्हि भाविजनानां कृते इयम् उत्तमा पृथिवी भविष्यति। किञ्च, वयं सर्वे यदि मानवतायाः मार्गम् अनुसरिष्यामः तर्हि देशस्य प्रगतिः अवश्यं भविष्यति। बङ्गीयकविना यथार्थेन उक्तं च अस्मात्-

‘ए विश्वके ए शिशुर वासयोग्य करे याव आमि,
नवजातकेर काछे ए आमार दृढ अङ्गीकार। इति शम्।

## सहायकग्रन्थसूची


- उपनिषद्- सम्पा. सेनः, तत्त्वभूषणः, घोषः, हरफप्रकाशणी, द्वितीयसंस्करणम् १९७६, कोलकाता-०७.
- चाणक्यनीति एवं कौटिल्य अर्थशास्त्र-सम्पा. प्रफेसर श्रीकान्तप्रसून,V&S Publishers, Mubai.Edition - २०१५.
- मनुसंहिता- सम्पा.डॉ. मानवेन्दु वन्द्योपाध्यायः, संस्कृत-पुस्तक-भाण्डारम्, तृतीयसंस्करणम्-२०१६, कोलकाता-०६.
- मित्रलाभः, सम्पा.डः सत्यनारायण चक्रवर्ती, संस्कृत-पुस्तक-भाण्डारम्, तृतीयसंस्करणम्-२००४, कोलकाता-०६
- यजुर्वेदसंहिता, सम्पा. श्री विजनविहारी गोस्वामी, हरफप्रकाशणी, चतुर्थ प्रकाशनम् - २०००, कोलकाता-०७
- श्रीमद्भगवद्गीता - सम्पा.स्वामी रामसुखदास, गीताप्रेस, गोरखपुरम्-२७३००५


[20] तौत्तिरीयोपनिषद्-३/१.
[21] यजुर्वेदः- ३६/१८.
[22] मित्रलाभः(कथा)-३/७१.
[23] गडुरपुराणम्-प्रेत-अध्याय कल्प-३५/५१

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# कौण्डभट्टदिशा शक्तिस्वरूपविचारः

**डॉ. स्वर्णलता पण्डा**
**अध्यापिका, संस्कृतविभागः, सुकुमारसेनगुप्तमहाविद्यालयः**
**पश्चिममेदिनीपुरम्, पश्चिमबङ्गः**

**प्रबन्धसारः**

*व्याकरणशास्त्रे मूलतत्त्वभावेन शब्दप्रक्रिया अर्थप्रक्रिया चेति विचारेण सोपानद्वयं संस्थापितं सत् प्रयोजनीयं तथ्यं प्रतिपादयति शब्दपदवाक्यादिप्रक्रियां नियमयति च । "शब्देष्वेवाश्रिता शक्तिः विश्वस्यास्य निबन्धनी"* * *इत्युक्त्यनुसारेण प्रायोगिकशब्दस्य या शक्तिर्विद्यते, सा शक्तिः विश्वस्य निबन्धने जातीयसंहतौ च सहायिका भवति। शब्देनैवार्थस्याववोधनत्वात् शब्दस्य शक्तिः सर्वजनग्राह्या। अतः 'शाब्दबोधं प्रति शक्तिग्रहमेव कारणम्' इति धिया शब्दस्य शक्तिः सर्वैः शास्त्रकारैः स्वीक्रियते। शब्दस्य प्रमाजनकत्वे सर्वैः शब्दैः सर्वेषां श्रोतृणां बोधः स्यादिति शाब्दबोधं प्रति वृत्तिप्रयोज्योपस्थितेरन्वयव्यतिरेकाभ्यां कारणत्वमवगम्यते। शाब्दबोधस्य कारणत्वेन अपेक्षिता एषा वृत्तिः शक्तिः लक्षणा व्यञ्जना चेति भावेन त्रिधा विभज्यते। तत्र 'शक्ति इति पदस्यार्थविवेचनावसरे शास्त्रकाराः स्व-स्वव्याख्यानुसारेण भिन्नं भिन्नं मतं परिपोषयन्ति। मुख्यतः विषयेऽस्मिन् वैयाकरण-नैयायिकयोः विवादः शास्त्रेषु समलङ्कृतः। प्राचीननैयायिका ईश्वरेच्छारूपां शक्ति स्वीकुर्वन्ति। नव्यनैयायिकाः केवलमिच्छामेव शक्तिरिति प्रतिपादयन्ति। तत्रापि वैयाकरणेषु भिन्नं मतं परिलक्ष्यते। वैयाकरणाः शक्तेः आश्रयरूपेण स्फोटरूपं शब्दमेवामनन्ति। नागेशः पदपदार्थयोः सम्बन्धान्तरमेव शक्तिरिति निरूपयति। भर्तृहरिरपि पदपदार्थयोः तादात्म्यरूपसम्बन्ध एव शक्तिः इति स्वीकरोति। तत्र आचार्यः कौण्डभट्टः बोधजनकता एव शक्तिरिति प्रतिपादयति। भूषणसारकृन्मते बोधजनकतैव शक्तिः। नैयायिकमीमांसकादीनां मतोल्लेखपुरःसरं वैयाकरणभूषणसारे प्रतिपादितानि तत्त्वानि परिशील्य समीक्षात्मकेन मार्गेण विचारः साधितोऽस्मिन् शोधप्रबन्धे।*

**कुञ्चीशब्दाः** – शक्तिः, सम्बन्धः, शब्दशक्तिः, ईश्वरेच्छा, सङ्केतः, बोधजनकता चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

**भूमिका-**

"साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिरि"[1]ति विचारवैभवात् शब्दानुशासनप्रक्रिया प्रयोगार्हभूतायां भाषायां विवक्षितपदसाधुत्वोपपत्तये एका अनन्या अनस्वीकार्या च सर्वसम्मतिविषयविशेषा प्रमाणसिद्धा शिष्टानुगम्या क्रिया। शब्दानुशासनविधौ कालगरिम्णा एतस्याः स्वरूपं विभिन्नतामाधाय युक्तिसम्मतां विचारात्मिकां क्रियां प्रत्यग्रीकरोति। प्रतिपादनेनालं यत् सूत्रात्मिकायां भूमौ प्रविश्य अद्यत्वे पाणिनीयं प्रतिबध्नाति। सूत्रवार्त्तिकभाष्यभावेनोपनिबद्धं तद् व्याकरणं त्रिमुनिव्याकरणभावेन ख्यातं महिम्ना संकीर्त्तितञ्च। एतस्मिन् व्याकरणे मूलतत्त्वभावेन शब्दप्रक्रिया अर्थप्रक्रिया चेति विचारेण सोपानद्वयं संस्थापितं सत् प्रयोजनीयं तथ्यं प्रतिपादयति शब्दपदवाक्यादिप्रक्रियां नियमयति च। "शब्देष्वेवाश्रिता शक्तिः विश्वस्यास्य निबन्धनी"[2] इत्युक्त्यनुसारेण प्रायोगिकशब्दस्य या शक्तिर्विद्यते, सा शक्तिः विश्वस्य निबन्धने जातीयसंहतौ च सहायिका भवति। शब्देनैवार्थस्यावबोधनत्वात् शब्दस्य शक्तिः सर्वजनग्राह्या। अतः "शाब्दबोधं प्रति शक्तिग्रहः कारणम्" इति धिया शब्दस्य शक्तिः सर्वैः शास्त्रकारैः स्वीक्रियते। शब्दस्य प्रमाजनकत्वे सर्वैः शब्दैः सर्वेषां श्रोतृणां बोधः स्यादिति शाब्दबोधं प्रति वृत्तिप्रयोज्योपस्थितेरन्वयव्यतिरेकाभ्यां कारणत्वम् अवगम्यते। सा च वृत्तिः दाहं प्रति वह्न्यादिवन्न स्वरूपेण

* वा.प.ब्र. का. का-118

[1] वा.प.ब्र. का. का-

[2] वा.प. ब्रह्मका. 118

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

हेतुः, सर्वेषां बोधापत्तेरिति ज्ञानविषयीभूताया एव तस्याः कारणत्वमङ्गीक्रियते। वृत्तिपदव्यवहार्यत्वम् अर्थपदोभयनिरूपितसम्बन्धत्वं वेति वृत्तेर्लक्षणम्। यदुक्तं नागेशेन परमलघुमञ्जूषायां "तद्धर्मावच्छिन्नविषयक-शाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्ति-विशिष्टज्ञानं हेतुः।"[3] संक्षेपेणात्रायं भावः यत् – यद्धर्मावच्छिन्नविषयकशाब्दबोधः अपेक्षितः तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतुः। तत्र गृहीतशक्तिकात् पदात् शाब्दबोधस्य दर्शनात् अगृहीतशक्तिकात् पदात् शाब्दबोधस्यादर्शनात् शाब्दबोधं प्रति शक्तिग्रहस्य कारणता स्वीक्रियते। येन 'गुड' इत्युक्ते गुडपदेन मधुरत्वस्य प्रतीतिर्न भवति। तस्याः शक्तेः आश्रयरूपेण स्फोटरूपं शब्दमेवामनन्ति वैयाकरणाः। शाब्दबोधे कारणत्वेन अपेक्षिता एषा वृत्तिः 'शक्तिः लक्षणा व्यञ्जना' चेति भावेन त्रिधा विभज्यते। काव्यमार्गे शब्दस्य त्रैविध्यं शक्तित्वं स्वीक्रियते - वाचकः, लाक्षणिकः, व्यञ्जकञ्च । यथोच्यते -

"वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः।
व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः॥

शक्तिर्लक्षणा व्यञ्जना चेति वृत्तिस्त्रिधा।

तत्र 'शक्तिः' इति पदस्यार्थविवेचनावसरे शास्त्रकाराः स्व-स्वव्याख्यानुसारेण भिन्नं भिन्नं मतं परिपोषयन्ति। मुख्यतः विषयेऽस्मिन् वैयाकरण-नैयायिकयोः विवादः मुख्यतया शास्त्रेषु समलङ्कृतः। प्राचीननैयायिकाः ईश्वरेच्छारूपां शक्ति स्वीकुर्वन्ति। नव्यनैयायिकाः केवलमिच्छामेव शक्तिरिति प्रतिपादयन्ति। तत्रापि वैयाकरणेषु भिन्नं मतं परिलक्ष्यते। वैयाकरणाः शक्तेः आश्रयरूपेण स्फोटरूपं शब्दमेवामनन्ति। नागेशः पदपदार्थयोः सम्बन्धान्तरमेव शक्तिरिति निरूपयति। भर्तृहरिरपि पदपदार्थयोः तादात्मरूपसम्बन्ध एव शक्तिः इति स्वीकरोति। तत्र आचार्यः कौण्डभट्टः बोधजनकता एव शक्तिरिति प्रतिपादयति। भूषणसारकृन्मते बोधजनकतैव शक्तिः।

**कौण्डभट्टदिशा विचारः -**

आचार्यः कौण्डभट्टः तदीये वैयाकरणभूषणसार इति व्याकरणदर्शनग्रन्थे अथ शक्तिनिर्णयः इति प्रतिपाद्य शक्तिस्वरूपविषये चर्चां साधितवान्। बोधजनकता एव शक्तिरिति शक्तेः स्वरूपविचारावसरे नैयायिक-मीमांसकादीनां मतप्रतिपादनपूर्वकं तत्तन्मतानां खण्डनमण्डनेन भर्तृहरि-नागेश-पतञ्जलिप्रभृतीनां मतप्रतिपादनपुरःसरं स्वकीयं व्याख्यानं साधितम्।

आचार्येण कौण्डभट्टेन वैयाकरणभूषणसारे "समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवदि"[4]ति वचनेन समासे अतिरिक्ता शक्तिरुक्ता। तन्मतानुसारेण व्यासेऽपि पृथक् शक्तिः अनुभूयते, तस्याः स्वरूपं संस्मरणविषयः। शक्तिरूपो धर्मः स्वसमानजातीयान् प्रबोधयति देवमनुष्यादिनिष्ठान् धर्मान् शक्तीश्च स्मारयतीत्याशयेन शक्तिस्वरूपमिति। अत एव "तद्धर्मामविच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतुः"[5] इति नागेशादयो निरूपयन्ति।

यतो हि धर्मविशिष्टशाब्दबोधे नरत्वविशिष्टो यः शब्दः तदर्थविषयकशब्दजन्यज्ञानं प्रति तद्धर्मावच्छिन्ननिरूपित-वृत्तिविशिष्टं पदज्ञानं कारणम्। नरत्वावछिन्न-नरनिरूपिता या वृत्तिः शक्तिर्लक्षणा वा तद्विशिष्टं यत्पदं नरपदं तस्य ज्ञानं नरत्वविशिष्टनरज्ञानं कारणम्। वृत्तिसहितपद-पदार्थयोरुपस्थितिरेव बोधजनकव्यापारोऽस्ति। शब्दार्थयोर्व्यवहारकारणं विना बोधः असम्भवः। विशिष्टज्ञानं प्रति विशेषणज्ञानस्य कारणत्वात् घटत्वविशिष्टघटज्ञानं प्रति घटत्वज्ञानं करणं, विशेषणतया वृत्तेः ज्ञानस्यावश्यकत्वात्। वृत्तिलक्षणं तु शब्दजन्यज्ञाने यः उपायभूतसम्बन्धः स वृत्तिः। तदुच्यते यत् पदपदार्थयोः संयोजकसम्बन्धो वृत्तिः। सा वागर्थाविव सीतारामाविव शब्दार्थाशं योजयति।

---

[3] प.ल.म.वृ.प्र.पृ-118

[4] समासे खलु भिन्नैवशक्तिः पङ्कजशब्दवत् बहूनां वृत्तिधर्माणां वचनैरेव साधने...॥ वै.भू.सा.-नामार्थस्य - 4, पृ. 349

[5] वै.सि.प.ल.म. वृ. पृ.21

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

नैयायिकमते सा वृत्तिः द्विधा शक्तिर्लक्षणा च। तन्मते शक्तिः ईश्वरसंकेतरूपा, अर्थे पदसंकेतरूपा च तत्रार्थबोधकं पदं वाचकं शक्त्या बोध्योऽर्थः वाच्यः। को नाम सङ्केतः, सङ्केतः परिभाषा शास्त्रकारादिसङ्केतो वा, परिभाषया अर्थबोधकं पदं परिभाषिकं व्यवह्रियते। यथा घी-नदी-वृद्धिगुणादिपदम्। यत्पदं शक्त्या परिभाषया वा अर्थं बोधयति किन्तु सादृश्यादिना तात्पर्यानुपपत्त्या वा बोधकं तल्लाक्षणिकम्। गङ्गायां घोषः, सभायां चन्द्रादौ तथा दर्शनात्।

प्राचीनवैयाकरणाः अपि बोधजनकता शक्तिः इति लक्षणं स्वीकुर्वन्तीति भूषणकारस्याभिप्रायः। अतः त्रिधा वृत्तिषु शक्तिज्ञानं विना वाच्यार्थसम्बद्धायाः लक्षणायाः व्यञ्जनायाश्चासम्भवात् कारणस्याभावात् प्रथमं शक्तिस्वरूपां वृत्ति स्वीकृत्य तल्लक्षणमुच्यते यद् –

"इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।

अनादिरर्थैश्शब्दानां सम्बन्धो योग्यता तथा॥"[6]

इन्द्रियाणां श्रवणत्वक्चक्षुजिह्वाघ्राणानां स्वविषयेषु शब्दस्पर्शरूपरसगन्धेषु ग्रहणरूपा यस्येन्द्रियस्य यो विषयः तमेव स्वभावतोऽनादिकालतश्च गृह्णाति। एवंरूपा बोधजनकताशक्तिः सृष्टेरारम्भकालादेव दरीदृश्यते। चक्षुरिन्द्रियस्य रूपविषयग्रहिणी अनादिकालिकी बोधजनकता शक्तिरस्ति। एवं श्रवणेन्द्रियस्य शब्दविषयग्राहिणो रसनेन्द्रियस्य रसविषयग्राहकता त्वगिन्द्रियस्य स्पर्शविषयभेदिका, घ्राणेन्द्रियस्य गन्धविषयविद्योतिका अनादिकालिकी बोधजनकता शक्तिः अनादिरारम्भिकाऽस्ति॥ एवं देवहिन्दुयवनाङ्ग्लपशुचेतनजडानामर्थैः सह योऽनादिकालिकबोधजनकत्वसम्बन्धः सैव योग्यता शक्तिः। योगे पदपदार्थयोः सम्बन्धे जातं योग्यम्। तस्य भावः योग्यता शब्दार्थसम्बन्धज्ञापिका शक्तिरित्यर्थः। एतेन प्राचीनवैयाकरणमते बोधजनकता शक्तिः प्रमाणीभूतेति।

न च पदपदार्थयोः सम्बन्धः एव शक्तिः। सम्बन्धश्च द्वित्वत्वे सति विशेष्यविशेषणभावभिन्नत्वे सति, विशिष्टबुद्धिनियामकत्वरूपा। अर्थात् (शक्तिः) द्वयोः (शब्दार्थयोः) मध्ये तिष्ठतीति द्विष्ठः न विशेषणं न च विशेष्य इति वक्तुं शक्यते। किन्तु अर्थविशिष्टशब्द एतादृश्याः बुद्धेः विशिष्टाया नियन्त्रको भवति। अस्यामवस्थायां बोधजनकता (ज्ञानकारणता) केवलं शब्दे एव तिष्ठति। अतो बोधकारणतायां द्विष्ठत्वाभावे सति पदपदार्थसम्बन्धरूपं शक्तिस्वरूपं नानुभूयते। प्राचीनानां मते कथं बोधजनकता शक्तिरित्युच्यते यत् बोधजनकतायाः द्विष्ठत्वं साधयति यद्यपि बोधजनकता (योग्यतारूपा शक्तिः) स्वरूपसम्बन्धेन शब्दे विद्यते। यतः शब्द एव बोधजनकस्तस्मिन्नेव बोधकता, तथापि सा परिचायकतासम्बन्धेन अर्थोऽपि तिष्ठति। यतः बोध्यार्थं विना बोधजनकतायाः स्वारस्यभङ्गापत्तेः।

अतो निरूपकतासम्बन्धेन नार्थेऽपि मन्तव्या। एवं स्वरूपसम्बन्धनिरूपकतान्यतरसम्बन्धेन बोधजनकता शब्दार्थोभयनिष्ठा संजाता, तेन तस्यां पदपदार्थयोः सम्बन्धत्वमुपपन्नं भवति। अनयैव युक्त्या ईश्वरेच्छाशक्तिरपि ईश्वरमात्रनिष्ठा सती स्वरूपपरिचायकतासम्बन्धाभ्यां पदपदार्थोभयस्था सञ्जाता। एवं नैयायिकसम्मतम् ईश्वरेच्छायां शक्तेः स्वरूपमिति संगच्छते। अत्रेदमेवाशयः यत् एकनिष्ठायाः ईश्वरेच्छायारूपायाः शक्तेः, द्विष्ठत्वजन्यसम्बन्धसंसिद्ध्यर्थं यथा स्वाविषयार्थबोधविषयकबोधजनकत्वसम्बन्धेन ईश्वरेच्छा शब्दे तिष्ठति अर्थात् स्वं घटपदं कम्बुग्रीवादिमद्विषयबोधजनकं भवत्वित्याकारिका ईश्वरेच्छा स्वपदग्राह्या। स्वविषयः कम्बुग्रीबादिमत् सम्पूर्णव्यक्तिरूपोऽर्थः अर्थाविषयकबोधजनकत्वं घटशब्दे। उक्तसम्बन्धेन ईश्वरेच्छा एकपदस्था, सैव ईश्वरेच्छा स्वविषयबोधविषयत्वसम्बन्धेन अर्थस्था भवति। स्वपदेन ईश्वरेच्छारूपा शक्तिः गृह्यते। तस्याः विषयबोधः (ज्ञानं) बोधस्य विषयोऽर्थः। बोधविषयत्वसम्बन्धेन ईश्वरेच्छा अर्थः। अनया रीत्या ईश्वरेच्छा पदपदार्थोभयनिष्ठा सिद्धा। नैयायिकमतेऽपि तस्य शक्तिमत्त्वं सिद्धम्।

सामान्यतः इयमीश्वरेच्छा पदविशेष्यिका, अर्थविशेष्यिका च। इदं पदमिममर्थं बोधयतु इत्याकारिका

[6] वै.भू.सा.शक्तिनि. पृ. 390

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

पदविशेष्यिका, अयमर्थः एतत्पदजन्यबोधविषयो भवतु इत्याकारिका अर्थविशेष्यिका। विशेष्या ईश्वरेच्छापि द्विधा। इदं पदं कम्बुग्रीवादिमद् व्यक्तित्वावच्छिन्नार्थ-बोधजनकम् इति पदविशेष्यिका तथैव अयं कम्बुग्रीवादिमद्व्यक्तित्वावच्छिन्नोऽर्थः घटपदजन्यबोध-निश्चय इत्यर्थविशेष्यिका शक्तिः।

नैयायिकसम्मता ईश्वरेच्छा शक्तिः वैयाकरणैः न स्वीक्रियते, यतो हि तन्मतानुसारेण आत्माश्रयदोषः, यथा शाब्दबोधरूपं कार्यं कारणीभूताया ईश्वरेच्छायाः आकारे (स्वरूपे) सन्निविष्टम् । शाब्दबोधः पदनिष्ठा या शक्तिः तज्ज्ञानाधीनोपस्थितिजन्यो भवति। यस्मिन्काले नैयायिकैः शक्तिज्ञानं क्रियते, तस्मिन्क्षणे शाब्दबोधरूपकार्यस्य अप्रसङ्गेन अभावेन तादृश्याः शाब्दबोधघटितायाः ईश्वरेच्छारूपशक्तिस्वरूपमनुपपन्नं भवति।

अतो वैयाकरणदृष्ट्या ईश्वरेच्छा शक्तिः न स्वीकरणीया। यतः शाब्दबोधरूपं कार्यम् ईश्वरेच्छारूपकारणकुक्षिप्रविष्टं दृश्यते। यदा कारणकुक्षौ कार्यं तिष्ठति तदा आत्माश्रयदोषः। तस्मादेव "इन्द्रियाणां स्वविषयेष्वि"ति कारिकोल्लिखिता। इन्द्रियाणामिति चक्षुरादीनां निर्विषयाणां कथं विषयबोधने सामर्थ्यं यतो हि ज्ञानेच्छायत्न-संस्काराः एव सविषया भवन्ति। अत आह स्वविषयेषु - स्वानि इन्द्रियाणि तेषां विषयः विश्वपदार्थः। यथा चक्षुषा गृह्यते चाक्षुषं रूपं, श्रवणेन श्रूयते श्रावणः शब्दः, त्वचा गृह्यते त्वाकः स्पर्शः, रसनया आस्वाद्यते रासनो रसः, घ्राणो गन्ध इत्येवमादयः।

एवमिन्द्रियाणाम[7]पि सविषयत्वं सिद्धम्। अनादिकालादिन्द्रियाणां रूपादिविषयेषु प्रत्यक्षजनकता शक्तिरस्ति। अर्थात् घटादिविषयेषु इन्द्रियजन्यप्रत्यक्षकारणता शाश्वतमेव। तथा एवमेव देशकालघटादीनां शब्दानामपि भूमिसमय-कम्बुग्रीवादिमद्व्यक्तित्वावच्छिन्नैरर्थैः सह बोधजनकतारूपा योग्यता अनादिकालिकी बोध्या। स्वविषयेष्वर्थेषु सम्बन्धो योग्यता च अनादिरेवेति हि तदाशयः। तथा च इन्द्रियनिष्ठा इन्द्रियविषयघटादिनिरूपिता या कारणता सा तथा अनादिस्तथा सकलशब्दनिष्ठा घटादिनिरूपिता योग्यताऽपि अनादिरिति तात्पर्यम्। सैव शक्तिः शब्दार्थयोः सम्बन्धाभिधायिका। अत्रेदमेव तात्पर्यं यत् चक्षुरादीनां स्वविषयेषु चाक्षुषेषु घटादिरूपेषु यथाऽनादिर्योग्यता तदीयचाक्षुषादिकारणता तथा शब्दानामपि अर्थेन सह तद्बोधकारणतैव योग्यता सैव शक्तिरिति तात्पर्यम्। अतः अनादित्वे सति बोधकारणत्वे सति शब्दार्थयोः सम्बन्धत्वं योग्यतेति प्राचीनवैयाकरणसम्मतलक्षणं सभाजयति।

किन्तु अनादिभूतबोधजनकता शक्तिरिति स्वीकारे सन्देहः जायते यत् - तत्र अनादिभूतं विशेषणं व्यभिचरितम्, अव्याप्तिसम्भवात्। यतो हि आधुनिकदेवदत्तचैत्रादिपदेषु इदानीन्तनीये देवदत्तादीनामपि अनादित्वं नास्ति किन्तु सादित्वमेव वर्तते। अत्र अनादिबोधकारणताया अभावो जायते। यदि देवदत्तादिपदेऽनादित्वविशिष्टा बोधकारणता स्वीक्रियते तदा पित्रादीनां सङ्केताऽज्ञानेऽपि शाब्दबोधोत्पत्तिः स्यात्। अत्र एतत्कालिकैः मातापित्रादिभिः ग्राह्यम्। कुचुटुतुपु इत्यत्र या बोधजनकता तस्यानादित्वं कथमुपहासास्पदमिति। यद्यपि मातापित्रादिसङ्केतिते चैत्रमैत्रादिपदेऽपि बोधकारणत्वमस्त्येव। रामपदेन दशरथापत्यस्यैव बोधो न तु शबरवाल्मीकानां, तथापि अनादिभूतबोधकारणत्वं योग्यता इत्यत्र बोधगतस्य ज्ञानस्थस्य अनादित्वस्याभावेन बोधगतविशेषणस्याभावः सिद्ध्यति। तेन अनादित्वविशिष्टबोधकारणताया अभावो भवति। अर्थात् विशेषणाभावप्रयुक्तविशिष्टाभावो भवति। यत्र विशेषणं नास्ति तत्र विशिष्टमपि। अनादीति विशेषणस्याभावे विशिष्टबोधोऽपि न स्यात्, अतः अनादित्वस्य कारणत्वं सम्भवति।

यदि शक्तिलक्षणेऽनादिभूतं कारणं दीयते, आधुनिके विष्णुमित्रादिपदे इदानीन्तनीयबोधकारणता सङ्केतो वा दृश्यते, न तु अनादिभूता योग्यता तत्र अनादित्वे पुरुषयत्नापेक्षत्वे विशेषणे सति उपस्थितिर्न भविष्यति उपस्थिति विना शाब्दबोधोऽनुपतिष्ठते। एतत्सर्वं स्पष्टीकर्तुमुच्यते ग्रन्थकारेण - "अन्यथा

[7] वै.भू.सा.शक्तिनि.पृ.390

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

पित्रादिसङ्केताज्ञाने अपि अन्वयबोधप्रसङ्गः”[8]। अनादिकालात् सम्बद्धा या बोधकारणता, सा देवदत्तादिपदे स्वीक्रियते चेत् पित्रादीनां मातापित्राद्युच्चारितानां संकेतानां बोधजनकानामज्ञानेऽपि पित्रादिद्वारा बोधितस्य संकेतस्य ज्ञानं विनाप्यन्वयबोधप्रसङ्गः, अनादिकालिकबोधमात्रेण उपास्थितिसम्भवात्। परन्तु एवं न जायते तत्र सङ्केतज्ञानं कारणं भवति। सङ्केतनिरपेक्षस्य शाब्दबोधो न दृश्यते इति तात्पर्यात्।

ननु बोधकारणत्वमेव शक्तिलक्षणमस्तु नाम[9]। अनादित्वं न कारणम्। अत एव अनादित्वं न शक्तिशरीरे प्रवेष्टव्यम्। तेन तत्र हेतुता न सम्भाव्यते, किन्तु बोधकारणतायां प्रसिद्धार्थप्रदर्शनमात्रमर्थबोधकम्। यदि प्रसिद्धार्थबोधकत्वमनादित्वं स्यात्तर्हि सर्वत्र प्रसिद्धा शक्तिरेव स्यात्। लाक्षणिकेषु पदेष्वपि प्रसिद्धबोधकारणता शक्तिः प्रसज्येत। यथा गङ्गायां घोषः इत्यादौ प्रसिद्धा शक्तिः तटे लक्षणा, इदानीं तटनिरूपिते सागरपदे शक्तिप्रसङ्गः सम्भाव्यते। इत्येवं लाक्षणिकातिव्याप्तिः। तथा च हरिपदं विष्णौ शक्तं हरिरूपोऽर्थः हरिपदबोध्यः इतीश्वरीयः संकेतः, ततस्तत्र संकेतस्य ज्ञानं भवति। अत्र हरिरूपार्थपरिचायिकायाः (साधिकायाः) शक्तेः ज्ञानं जायते। एवं सागरपदे सगरखातावच्छिन्नार्थसाधकस्य ईश्वरीयसंकेतस्य ज्ञानं भवति। परन्तु अत्रापूर्वखातरूपोऽर्थः सागरपदशक्यः। एवं संकेतज्ञाने जाते सति तटरूपार्थसाधिका शक्तिर्न मन्यते। किन्तु अपूर्वखातरूपशक्यार्थसम्बन्धरूपा लक्षणा मन्यते।

शाब्दबोधे सङ्केतविशिष्टज्ञानस्यापि अपरिहार्यता वर्तते। यत्र सङ्केतः ज्ञानं विना बोधगम्यो न भवितुमर्हति। तर्हि संकेतो हि शक्तिरेवं स्वीकरणीयमिति मीमांसकानामभिप्रायः। अत यदुक्तं भूषणे-संकेतज्ञानमपि हेतुर्वाच्यमिति[10]। शक्तिज्ञाने संकेतज्ञानं कारणं तथा च संकेतग्रहसचिवस्य बोधकत्वे नातिव्याप्तिः नापि योग्यताज्ञानमपि कारणं बोध्यम्। तथा च शाब्दबोधीयकारणतायां संकेतज्ञानस्य हेतुत्वे सिद्धे च संकेत एव शक्तिरिति कथं न मन्येत इदानीन्तनीये चैत्रादिपदे मातापित्रादीनां संकेतोऽस्ति विश्वादौ ईश्वरीयः सङ्केतोऽस्ति आवश्यकत्वात् अवश्यापेक्ष्यज्ञानविषयत्वात् च। अतः सङ्केतज्ञानमेव शक्तिः, संकेतश्च आधुनिके संकेतविषये देवदत्तादौ सङ्केतश्च अस्माच्छब्दादयमर्थो बोद्धव्य इत्युक्तम्। अत्र वैयाकरणैः शक्तिग्राहकः संकेतः, न तु शक्तिरूपी मन्यते, तदनुपपन्नं भवति।

मीमांसकमतेऽपि जगति ईश्वराभावान्न ईश्वरेच्छा शक्तिः। किन्तु यस्य कस्यापि सङ्केत एव शक्तिः। आधुनिके नाम्नि बोधो दृश्यते। द्वादशेऽहनि पिता नाम कुर्यादिति इति धिया श्रुत्यापि ईश्वरेच्छा न मन्तव्या। तत्रापि आनुपूर्विपदे संकेतस्यैव शक्तित्वात्। तात्पर्यं तु न संकेतः, तस्य पदजन्योपस्थितिजनकत्वाभावात् न तत्र शक्तिः तथा च शाब्दबोधं प्रति साक्षात् कारणं शक्तिः। यद्यपि वृत्त्योपस्थितेषु अनेकार्थकशब्देषु तात्पर्य एव निर्णायकः, तथापि पदपदार्थयोः सम्बन्धोऽभिधा प्रकरणादिना पदस्य योऽर्थः, स एव वाच्यः न तु तात्पर्यगम्यः। शक्तिस्तु पदार्थान्तरं पदनिष्ठबोध्यानां पदपदार्थयोः वाच्यवाचकभावनियामिकाऽस्ति। सा वाचकत्वसम्बन्धेन पदनिष्ठा साधितत्वसम्बन्धेनार्थनिष्ठा इति मीमांसकमतं खण्डितं ग्रन्थकारेण। यदुच्यते तेन – “सङ्केतः न स्वरूपेण हेतुः, अगृहीतशक्तिकाद् अर्थबोधप्रसङ्गात्। नापि सामान्यतो ज्ञातः, प्रमेयत्वादिना तज्ज्ञानेऽपि बोधप्रसङ्गात्”। अर्थात् सामान्यतः ज्ञातः सङ्केतोऽपि शाब्दबोधं प्रति कारणरूपेण न ग्रहणीयः। कारणं सङ्केतः सामान्यतो ज्ञातः सन् हेतुरिति चेत्तदा प्रमेयत्वेन ज्ञातेऽपि सङ्केते शाब्दबोधापत्तिर्जायते। अत्रेदमेव तात्पर्यं यत् यदि सामान्यरूपेण ज्ञातसङ्केतद्वारा शाब्दबोधो भवति तर्हि प्रमेयत्व-अभिधेयत्वादिपदेनापि साक्षात् शाब्दबोधो भविष्यति। यथा, घटपटादिवत् सङ्केतोऽपि सामान्यस्वरूपतः प्रमेयपदार्थः। अनेन प्रमेयत्वज्ञानेन यस्य कस्य ज्ञाने सति सङ्केतज्ञानत्वात् घटपटादिपदेषु शाब्दबोधो भवष्यति। किन्तु वस्तुतः

[8] वै.भू.सा. शक्ति.पृ.394

[9] तत्रैव

[10] वै.भू.सा.शक्तिनि. पृ.394

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

घटस्य कम्बुग्रीवादिमदर्थे सङ्केतस्तिष्ठति। पुनश्च यदि सङ्केतस्य विशेषरूपविशिष्टधर्मेण ज्ञातः सन् हेतुश्चेत्तदा सङ्केतत्वेन तज्ज्ञानरहितानामपि व्यवहारिकपदार्थमात्र-ज्ञानवतां पामराणां बोधजनकत्वमात्रग्रहणे शाब्दबोधोदयात् व्यभिचारः स्यात्। अर्थात् गवादिपदे यद्यपि ईश्वरीयसङ्केतो वर्तते, तथापि तत्र सङ्केतत्वेन तज्ज्ञानशून्यानां लौकिकमीमांसकादीनां तत्तदर्थबोध-जनकत्वग्रहवतामेव बोधोदयेन व्यभिचारो जायते। यतो हि लौकिकाः, मीमांसकाः नास्तिका भवन्ति। अतः मीमांसकमतमिदं कौण्डभट्टाय न रोचते।

कौण्डभट्टमतेन सङ्केतः स्वरूपतः शाब्दबोधं प्रति हेतुरूपेण न सिद्ध्यति। कारणं यदि सङ्केतः स्वभावतः शाब्दबोधं प्रति हेतुर्भवति तर्हि शक्तिज्ञानं विनाऽपि शाब्दबोधो भविष्यति। यदि संकेताख्यां शक्ति स्वरूपतः हेतुं मन्यते तर्हि अगृहीतशक्तिकात् गृहीता ज्ञाता संकेतरूपा शक्तिर्यस्यासावगृहीतशक्तिकस्तस्मात् अज्ञातसङ्केतरूप-शक्तिकाच्छब्दात् संकेतशक्तिज्ञानं विनाऽपि शाब्दबोधः प्राप्नोति चेन्न रोचते।

अत एव कौण्डभट्टदिशा बोधजनकतैव हेतुः। अर्थबोधजनकतावच्छेदकत्वेन सङ्केतस्य हेतुत्वस्वीकारापेक्षया बोधजनकताया एव हेतुत्वे लाघवम्। येन वैयाकरणानामपि अभीष्टः सिद्धो भवति। अर्थात् अर्थधीजनकतानिरूपितविषयतासम्बन्धा-वच्छिन्नावच्छेदकत्वस्यावच्छेदकत्वापेक्षया अर्थधीजनक-तात्वेन हेतुताया औचित्येन वैयाकरणेष्टसिद्धिरित्यर्थः। अतः "अस्माच्छब्दाद् अयमर्थो बोद्धव्यः" इति अर्थविशेष्यकशब्दजन्यबोधविषयत्वप्रकारकज्ञानस्यापि पदार्थोपस्थिति प्रति कारणत्वात् पदजन्यबोधविषयताया अपि शक्तित्वं न स्वीकृत्य "इदं पदमिममर्थं बोधयतु" इति पदविशेष्यकार्थविषयकबोधजनकत्वप्रकारकज्ञानस्य पदार्थोपस्थिति प्रति कारणत्वात् बोधजनकता शक्तिः स्वीक्रियते, उभयरूपशक्तिस्वीकारेऽप्यस्माकम् इष्टापत्तिरेव। न चोभयविधशक्तिस्वीकारे व्यभिचारकारणात्।

अव्यहितोत्तरत्वनिवेशेनाऽदोषात् कार्यजनकत्वे सति कार्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वरूपं कारणत्वं कुत्रापि शक्तौ न स्यात् बोधरूपकार्यसत्त्वेऽपि उभयोरभावस्य सत्त्वादित्यापत्तिरपि न समीचीना। अतः स्पष्टञ्चेदमुक्तं यत् – न च स्वातन्त्र्येणार्थबोधकताज्ञानं कारणमिति वाच्यम्[11]। अर्थात् संकेतविशेषणं विना प्राधान्येन अर्थबोधकता शक्तिः नोचिता पटत्वावच्छिन्नविषयकबोधजनकत्वज्ञानसम्भवात्। अन्यथा घटपदात् घटपदे पटत्वावच्छिन्नविषयक-बोधशक्तिग्रहस्य आपत्तिः स्यादिति।

स्वातन्त्र्येणार्थबोधकज्ञानं कारणं वाच्यमिति मीमांसकानां मतं निरस्तं कौण्डभट्टेन। यदुक्तं तेन – "नेदं तज्जनकमिति ग्रहवतो बाधेन पदे परग्रहं जानतोऽपि तद्ग्रहासम्भवात्। अन्यथा भ्रान्तिज्ञानस्यापि भ्रान्तत्वापत्तेरिति[12]। अर्थात् स्वातन्त्र्येण बोधजनकता शक्तिरिति न सम्भवितुमर्हति अन्यथा भ्रान्तिज्ञस्य भ्रान्तित्वापत्तिः भविष्यति। तथाहि पदविशेष्यकशक्तिज्ञानाव्यवहितोत्तरजायमानबोधं पदविशेष्यकशक्तिज्ञानं कारणम् अर्थविशेष्यकशक्ति-ज्ञानाव्यवहितोत्तरजायमानबोधं प्रति अर्थविशेष्यक-शक्तिज्ञानं कारणमिति विवेकः। तस्मादर्थबोधजनकता शक्तिः सङ्केतस्तु तद्ग्राहकः। तर्हि ग्रन्थकारेण उक्तम् - "इदञ्चार्थधीजनकत्वं पित्रादिसङ्केतज्ञानादेव गृह्यते, अतः तज्ज्ञानात् पूर्वं न बोधः[13]। अतः सङ्केताज्ञानाभावे शाब्दबोधोपपत्तिः न स्यात्। पुनश्च लक्षणास्थले शक्तेरभावात् तत्र लक्ष्यार्थबोधो न सम्भवति, परन्तु अर्थबोधजनकतारूपशक्तिस्वीकारे 'गङ्गाया घोषः' इत्यादिस्थले तटार्थे लाक्षणिकगङ्गापदस्य अनादिबोधकारणतारूपार्थबोधजनकता तटे हि विद्यमाना भवति येन शक्तिद्वारा तटार्थस्य बोधो जायते, किन्तु लक्षणोच्छेदापत्तिर्जायते इत्याशङ्कायां ग्रन्थकारश्चातुर्येण प्रसिद्धाऽप्रसिद्धभेदेन शक्तेर्द्वैविध्ये सिद्धे लक्षणाया अनङ्गीकरणे न कश्चन दोष इति समाधानं दर्शितवान्। आमन्दबुद्धिवेद्यात्वं प्रसिद्धात्वं, सहृदयहृदयमात्र-

11 वै.भू.सा. श.नि. (व्या. का. प्रभाकरमिश्रः) पृ.400

12 वै.भू.सा. श.नि. (व्या. का. प्रभाकर मिश्रः) पृ.400

13 तत्रैव पृ.402

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

वेद्यात्वमप्रसिद्धात्वम्। 'गङ्गायां घोषः' इत्यत्र गङ्गापदस्य प्रवाहरूपेऽर्थे प्रसिद्धा शक्तिः तीरेऽर्थे चाऽप्रसिद्धा शक्तिरिति शक्त्यैव प्रयोगनिर्वाहे न लक्षणाऽपेक्षते। अन्यथा शाब्दबोधे शक्तिजन्योपस्थितेः लक्षणाजन्योपस्थितेश्च कारणत्वे गौरवं स्यात् । अत एव शक्तेः बोधजनकत्वलक्षणं स्वीकर्त्तव्यमिति कौण्डभट्टस्याशयः।

**उपसंहारः -**

अनुशीलनेन प्रतिभातं जायते यत् कौण्डभट्टस्य मतानुसारेण बोधजनकतैव हेतुः इति यत् शक्तिस्वरूपं तत्सर्वथा लाघवम् । अर्थबोधजनकतावच्छेदकत्वेन सङ्केतस्य हेतुत्वस्वीकारापेक्षया बोधजनकताया एव हेतुत्वे लाघवम् । येन वैयाकरणानामपि अभिष्टः सिद्धो भवति। नागेशमतानुसारेण पदपदार्थयोः सम्बन्धान्तरमेव शक्तिरिति यच्छक्तिस्वरूपं, भर्तृहरिमतानुसारेणापि पदपदार्थयोः तादात्मरूपसम्बन्ध एव शक्तिः इति यच्छक्तिस्वरूपं प्रतिपादितं, तत्सर्वथा आचार्यकौण्डभट्टप्रतिपादिते बोधजनकता एव शक्तिरिति शक्तिस्वरूपे बोधगम्यं जायते। तथ्यस्यास्य परिपुष्ट्यर्थं कौण्डभट्टेना "इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा" - इति हरिकारिकापि प्रतिपादिता। चक्षुरादीन्द्रियाणां घटाद्याकारबोधतया स्वविषयेषु घटादिषु योग्यता आकृतिर्दृश्यते सा च अनादिः, न प्रेरणाविषयस्तथैव शब्दानां स्वविषयेष्वर्थेषु सम्बन्धो योग्यता च अनादिरेवेति हि तदाशयः। तथा च इन्द्रियनिष्ठा इन्द्रियविषयघटादिनिरूपिता या कारणता सा तथा अनादिस्तथा सकलशब्दनिष्ठा घटादिनिरूपिता योग्यताऽपि अनादिरिति तात्पर्यम्। अत एव कौण्डभट्टस्य मतानुसारेण बोधजनकतैव हेतुः इति स्वीकारे लाघवं जायते इत्यत्र न काचित् विप्रतिपत्तिः।

## सहायकग्रन्थसूची


- वैयाकरणभूषणसारः, दर्पण-प्रभासमेतः, चौखम्बा-संस्कृत-सीरीज-अफिस, वाराणसी, १९६९
- वैयाकरणसिद्धान्तकौमुदी, मोतीलाल-बनारसी-दास, दिल्ली, २०००
- वैयाकरणसिद्धान्तलघुमञ्जूषा, कुञ्चिका-कलासम्वलिता चौखम्वा-संस्कृत-सीरीज, वाराणसी, १९८५
- व्याकरणदर्शनेर इतिहास, गुरुपदहालदार, कोलकाता १३५० वङ्गाव्दः।
- शब्दशक्तिप्रकाशिका, चौखम्वा-संस्कृत-सीरीज, वाराणसी, १९३५
- प्रकरणपञ्चिका, शालिकनाथ, वेनारस हिन्दु युनिभर्सिटि, वाराणसी, १९६१
- प्रौढ़मनोरमा, शब्दरत्न-भैरवी भावप्रकाश टीका सम्बलिता , चौखम्वा-संस्कृत-सीरीज, वाराणसी।
- महाभाष्यम्. प. दधिरामशर्मा, चौखम्वा सुरभारती प्रकाशनम्, वाराणसी, १९८८
- मानमेयेदय, श्रीदीननाथ त्रिपाठिनवर्तीर्थ, संस्कृत कलेज, कोलकाता, १९९०
- वाक्यपदीयम्, सम्पूर्णनन्द संस्कृत विश्वविद्यालय, वाराणसी, १९९८
- न्यायदर्शनम्, श्रीयुक्तफणिभूषणतर्कबागीशः, पश्चिमवङ्ग-राजक-पुस्तक-पर्षद्, कोलकाता, १९८३
- न्यायसिद्धान्तमुक्तावली, किरणबलीटीकोपेता, प.श्रीकृष्ण-वल्लभाचार्य्यः चौखम्वा-संस्कृत संस्थानम्, वाराणसी, वि.सं २०६३
- अष्टाध्यायी, ड. तपनशङ्करभट्टाचार्य, संस्कृत-बुक-डिपो, कोलकाता, २००४
- आख्यातवादः, प्रवालकुमार सेन, संस्कृतपुस्तक भान्डार, कोलकाता, १९७९

ISSN : 2583-2271
Vol. - 3, No. 1: 2023


- काशिका, ड. जयशङ्करलालत्रिपाठी, ड. सुधाकरमालवीय, तारा-बुक् एजेन्सी, वाराणसी, १९८६)
- तत्त्वचिन्तामणिः. कामाख्यानाथ तर्कवागीश चौखम्वा संस्कृत प्रतिष्ठानम्, दिल्ली, १९९०
- न्यायदर्शनम् गौतमप्रणीतं वात्स्यायनभाष्यसहितम्, चौखम्वा संस्कृततसीरीज वाराणसी।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# शाब्दिकानां नामार्थः

**उत्तम-घोषः**
**शोधच्छात्रः, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्**
**वेलुडमठः, पश्चिमवङ्गराज्यम्- ७११२०२**

**प्रबन्धसारः**

*शाब्दिकानां मञ्जूषादिग्रन्थे नामार्थविषये प्रोक्ताः षट् पक्षा यथाग्रन्थमत्र निरूपिताः। जातिशक्तिवादे मीमांसकानां जातावेव शक्तिरिति मतं पूर्वपक्षत्वेनोपस्थाप्य व्यक्तिशक्तिवादे तत्खण्डनं विहितम्। व्यक्तिशक्तिवादे व्यवहारप्रमाणं पाणिनिसम्मतिश्च प्रदर्शिता। तदनु लिङ्गं नामार्थ इति पक्षे प्रसङ्गानुसारं शास्त्रीयं लौकिकं च लिङ्गमुपपाद्य लिङ्गस्य शब्दनिष्ठत्वमुत अर्थनिष्ठत्वमिति नागेशकौण्डभट्टादीनां मतं परिशीलितम्। संख्यायाः कारकस्य च नामार्थत्वपक्षे विभक्तीनां वाचकत्वमुत द्योतकत्वमिति विषयः विस्तरेण पर्यालोचितः। सर्वान्ते च शाब्दबोधे शब्दस्यापि भानात् शब्दोऽपि नामार्थ इति पक्षः प्रतिपादितः, तत्र च प्रसङ्गानुसारम् अनुकार्यानुकरणयोः भेदोऽभेदश्च इति पक्षद्वयं विचारितम्।*

**कुञ्चीशब्दाः** - जातिशक्तिवादः, व्यक्तिशक्तिवादः, प्रवृत्तिनिमित्तम्, शक्यतावच्छेदकम्, शास्त्रीयलिङ्गम् चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

**(१) जातिः नामार्थः-**

मीमांसकाः शब्दानां जातावेव शक्ति कल्पयन्ति। जातिर्नामात्र न तु नित्यमेकमनेकानुगतम् अपि तु प्रवृत्तिनिमित्तमेव। यन्निमित्तमादाय शब्दः प्रवर्तते तदेव तस्य प्रवृत्तिनिमित्तम्। यथा घटत्वं निमित्तमादाय घटशब्दः घटरूपार्थे प्रवर्तते तेन घटत्वमत्र प्रवृत्तिनिमित्तमित्युच्यते। एवं मीमांसकानां जातौ शक्तिर्नाम प्रवृत्तिनिमित्ते शक्तिरिति ज्ञेयम्। जातौ शक्त्यङ्गीकारे तेषां युक्तय एवं सन्ति-

**जातिः नामार्थः इति पक्षे मतानि**

**१.** लाघवात् जातौ शक्तिः। यदि व्यक्तौ शक्तिरङ्गीक्रियते तर्हि व्यक्तीनामानन्त्यात् सर्वासु व्यक्तिषु शक्तिरङ्गीकर्तव्या भविष्यति। जगति विद्यमानेषु सर्वेषु गोषु शक्तिरङ्गीकर्तव्या भविष्यति, तदानीं महद्गौरवं स्यात्। जातौ शक्त्यङ्गीकारेण सर्वेषु गोषु गोत्वरूपजातेरैक्यात् एकत्र गौत्वजातौ शक्तिस्वीकारादेव गोत्वाश्रयतया सर्वेषां गवां ग्रहणं भविष्यति इत्यतीव लाघवमस्ति।

**२.** "नागृहीतविशेषणा बुद्धिर्विशेष्ये उपजायते" इति न्यायात् जातौ शक्तिः। बुद्धिरादौ विशेषणं गृहीत्वा ततो विशेष्ये प्रवर्तते। विशेषणमविषयीकृत्य कदापि बुद्धिः विशेष्ये न प्रवर्तते। विशिष्टज्ञानं प्रति विशेषणज्ञानं कारणं भवति। अत एव दण्डमविजानन् कश्चन दण्डिनं पुरुषं वेत्तुमसमर्थो भवति। एवं शब्दाद्यदि विशिष्टज्ञानमनुभवसिद्धं तर्हि आदौ शाब्दात् विशेषणज्ञानं सम्पादनीम्। एवञ्च विशेषणे जातौ शक्तिकल्पनं विना शब्दात् विशेषणज्ञानं नैव सम्पादयितुं शक्यते। एवं विशिष्टज्ञानोपपत्तये विशेषणे अर्थाज्जातौ शब्दस्य शक्तिः कल्पनीयैव।

o ननु शब्दो विशेषणं बोधयित्वा ततो विशेष्यं बोधयेत्, एककालं विशेष्ये विशेषणे उभयत्र शक्तिरिति चेन्न "**विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे**" इति न्यायेन शब्द एकवारं विशेषणं बोधयित्वा क्षीणशक्तिर्भवति। अतो विशेष्यं बोधयितुं न क्षमते। एवञ्च विशिष्टज्ञानस्य विशेषणज्ञानपरतन्त्रत्वात् किञ्चादौ शब्देन विशेषणे प्रवृत्तिनिमित्ते बोधनीये पुनः व्यक्तौ शक्तिकल्पनाया अशक्यत्वात् केवलं जातावेव शक्तिरिति मीमांसकाः।

**३.** बोधाप्रसङ्गात् न व्यक्तौ शक्तिरपि तु जातावेव। यदि व्यक्तौ शक्तिः तर्हि व्यक्त्यन्तरस्य बोधो नोपपद्येत। यथा एकस्यां श्वेतगवि गोशब्दस्य शक्त्यङ्गीकारेण कृष्णगोः गोशब्देन ग्रहणं न स्यात् कृष्णगवि गोशब्दस्य शक्त्यभावात्। एवं व्यक्त्यन्तरस्य बोधाप्रसङ्गात् व्यक्तौ न शक्तिरपि तु जातौ शक्तिरङ्गीक्रियते।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

o ननु यदि जातौ शक्तिः तर्हि व्यक्तेर्भानं कथं सिध्यति। तथाहि गामानय इत्युच्यमाने गोपदार्थस्यानयनं दृश्यते तत्र व्यक्तेर्ग्रहणं कथं सम्भवति इति चेदुच्यते लक्षणयात्र व्यक्तेर्भानं भवति। गामानय इत्युच्यमाने गोत्वजातेरानयनासम्भवाल्लक्षणया गोव्यक्तेरानयनं भवति। तथाहि लक्षणा नाम स्वशक्यसम्बन्धः। स्वं शब्दः, तेन शक्या भवति जातिः, तस्या जातेः सम्बन्धः(स्वाश्रयत्वम्) सर्वासु व्यक्तिषु वर्तते। सम्बन्धश्चात्र स्वाश्रयत्वम्। स्वं जातिः, तदाश्रयत्वं सर्वासु व्यक्तिषु यतो हि जातिः समवायेन व्यक्तिषु तिष्ठति। एवञ्चात्र शक्तौ शक्तिस्वीकारेऽपि स्वशक्यसम्बन्धरूपलक्षणया व्यक्तेरुपस्थितिः सिध्यति। अतः व्यक्तौ शक्तेः स्वीकारस्यावश्यकता नास्ति, जातावेव शक्तिकल्पनमुचितम्।

o ननु जातिशक्तिवादे यथा लक्षणा अङ्गीक्रियते तथा व्यक्तिशक्तिवादेऽपि लक्षणास्तु। जातिशक्तिवादे लक्षणया व्यक्तेरुपस्थितिर्भवति व्यक्तिशक्तिवादे लक्षणया व्यक्त्यन्तरस्योपस्थितिर्भविष्यति। जातिशक्तिवादे स्वशक्यसम्बन्धो लक्षणा, सम्बन्धश्च स्वाश्रयत्वम् इत्याश्रीयते। व्यक्तिशक्तिवादेऽपि स्वशक्यसम्बन्धो लक्षणा, सम्बन्धस्तु स्वसमवेताश्रयत्वम् इत्याश्रीयते। स्वं शब्दः, स्वशक्या व्यक्तिः, तत्सम्बन्धश्च व्यक्त्यन्तरे स्वसमवेताश्रयत्वसम्बन्धेन। स्वं व्यक्तिः, तत्र समवेता नाम समवायेन वर्तमाना भवति जातिः, तस्याः आश्रयत्वं व्यक्त्यन्तरे इति लक्षणसमन्वयः। एवं व्यक्तिशक्तिवादे व्यक्तौ शक्त्यङ्गीकारेऽपि स्वशक्यसम्बन्धरूपलक्षणया स्वसमवेताश्रयत्वरूप-सम्बन्धेन च व्यक्त्यन्तरस्योपस्थितिर्भवत्येव तेन व्यक्तौ शक्तिस्वीकारेण व्यक्तीनामानन्त्येऽपि न गौरवम् इति चेत् न उभयमते लक्षणास्वीकारेऽपि जातिशक्तिवादे लक्षणाघटकसम्बन्धे लाघवम् अस्ति। तथाहि व्यक्तिशक्तिवादे लक्षणाघटकसम्बन्धः स्वसमवेता-श्रयत्वम् इत्याश्रीयते, जातिशक्तिवादे तु स सम्बन्धः स्वाश्रयत्वम् इत्येवाश्रीयते इति लक्षणाघटकसम्बन्धे एव लाघवमस्ति इत्यतो लाघवात् जातावेव शक्तिः स्वीकार्या।

**(२) व्यक्तिः नामार्थः**

मीमांसानां जातिशक्तिवादं खण्डयितुं व्यक्तिशक्तिवाद आरभ्यते। शब्दानां व्यक्तावेव शक्तिर्न तु जातौ। घट इत्युच्यमाने घटव्यक्तेरेवोपस्थितिर्भवति न तु घटत्वजातेः लोके तथैव व्यवहारात्। अत्र क्रमशः व्यक्तिशक्तिवादिनः जातिशक्तिवादिनाम् आक्षेपं समादधति-

**व्यक्तिः नामार्थः इति पक्षे पूर्वोक्ताक्षेपाणां समाधानम्**

**१.** व्यक्तौ शक्तिस्वीकारेण व्यक्तीनामानन्त्यात् अनन्तशक्तिकल्पना कर्तव्या इति दूषणं जातिशक्तिवादिभिरुक्तम्, परन्तु व्यक्तिशक्तिपक्षे नास्ति अनन्तशक्तिकल्पनदोषः। तथाहि व्यक्तीनामनन्तत्वेऽपि न प्रत्येकं व्यक्तौ शक्तिः कल्प्यते येन अनन्तशक्तिकल्पनं स्यादपि तु सर्वासु व्यक्तिषु विद्यमानमनुगतं धर्ममादाय तद्धर्मोपलक्षितव्यक्तौ शक्तिः कल्प्यते। व्यक्तीनामानन्त्येऽपि शक्यतावच्छेदकजातिरेकैव भवति। तादृशजात्युपलक्षितव्यक्तौ शक्तिरिति भावः। यथा शक्यो भवति गौः, शक्यता गवि, शक्यताया अवच्छेदकजातिः गोत्वम्, तच्च सर्वासु शुक्लनीलपीतगोषु वर्तत एव।

एवञ्च शुक्लनीलपीतादिगवामनन्तत्वेऽपि तेषु वर्तमानस्य गोत्वरूपशक्यतावच्छेदकजातेरेकत्वात् तादृशगोत्वजात्युप-लक्षितासु सर्वासु गोषु एकैव शक्तिः स्वीक्रियते। एवमेव मनुष्यत्वरूपशक्यतावच्छेदक-जातेरेकत्वात् तादृशमनुष्यत्वजात्यु-पलक्षितेषु सर्वेषु मनुष्येषु एकैव शक्तिः स्वीक्रियते, शक्यतावच्छेदकभेदसत्त्वे एव शक्तेर्भेदो भवति। एवं व्यक्तीनामानन्त्येऽपि न अनन्तशक्तिकल्पनदोषो वर्तते।

अत्र साक्षान्न व्यक्तौ शक्तिरपि तु कञ्चन धर्ममुपलक्षणीकृत्य व्यक्तौ शक्तिग्रहः क्रियते। अतः व्यक्तिशक्तिवादे धर्माकृतिविशिष्टा व्यक्तिर्बुध्यते न तु तद्धर्मप्रकारेण। अत्र जात्युपलक्षितव्यक्तौ शक्तिग्रहे जातेरुपलक्षणत्वं वर्तते, अर्थात् जातिः स्वाश्रितानां सर्वासां व्यक्तीनां स्वस्वरूपतः शक्तिग्रहविषयत्वं सम्पाद्य स्वयं शक्तिग्रहाविषया बोधाविषया च भवति। यथा काकवद्देवदत्तगृहम् इत्यत्र काकः स्वोपलक्षिततृणत्वादिना तद्गृहमितरेभ्यो व्यावर्तयति, तथा जातिः व्यक्तीरुपस्थाप्य

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

स्वोपलक्षिताभिस्ताभिः शक्तिमितरेभ्यो व्यावर्तयति इत्येव विशेषोऽस्मिन् पक्षे।

ननु शक्यत्वे सति शक्यविशेषणस्यैव शक्यतावच्छेदकत्वम् इति नैयायिकनियमात् शक्यतावच्छेदके शक्यत्वं शक्यविशेषणत्वञ्चापेक्षते। अत्र यदि जातिः शक्यतावच्छेदिका तर्हि तत्र गोत्वादिजातेः शक्यत्वं शक्यविशेषणत्वञ्च स्यात्। परन्तु प्रकृते केवलव्यक्तिशक्तिवादे शक्यस्तु गौरत्र, तेन गोत्वादीनां शक्यत्वाभावेऽपि कथं शक्यतावच्छेदकत्वमिति चेदुच्यते अस्माकम् अस्मिन् केवलव्यक्तिशक्तिवादे शक्यतावच्छेदके शक्यत्वं भवेदेव इति नियमो नास्ति, शक्यत्वाभावे अपि केवलं शक्यविशेषणत्वस्य सत्त्वेऽपि तच्छक्यतावेदकं भवितुमर्हिति। यथा गङ्गायां घोष इत्यत्र लक्ष्यः तटः तेन तटत्वस्यालक्ष्यत्वेऽपि लक्ष्यभूततटविशेषणत्वेन तस्य लक्ष्यतावच्छेदकत्वमङ्गीक्रियते यथा वा घटनिर्माणं प्रति दण्डत्वस्यान्यथासिद्धत्वेन कारणत्वाभावेऽपि कारणीभूत-दण्डविशेषणत्वेन तस्य कारणतावच्छेदकत्वमङ्गीक्रियते तथैव प्रकृतेऽपि गोत्वादिजातेः शक्यत्वाभावेऽपि शक्यविशेषणत्वेन शक्यता-वच्छेदकत्वाङ्गीकारे बाधकं किमपि नास्ति।

**२.** "नागृहीतविशेषणा बुद्धिर्विशेष्ये उपजायते" इति न्यायस्तु विशिष्टज्ञाने प्रवर्तते। किञ्च विशिष्टज्ञाने विशेषणज्ञानम् आवश्यकमित्येवास्य न्यायस्य तात्पर्यमस्ति न तु विशेषणे शक्तिर्विशेष्ये लक्षणेति।

**३.** बोधाविषयरूपदोषोऽप्यधुना नास्ति। तथाहि एकस्मिन् श्वेतगवि गोपदस्य शक्तिस्वीकारेण तेन पदेन कृष्णगोर्ग्रहणं न स्यादित्यासीद्दोषः परन्तु सम्प्रति तु न केवले व्यक्तौ शक्तिराश्रीयते अपि तु शक्यतावच्छेदकजात्युपलक्षितव्यक्तौ शक्तिराश्रीयते। एवञ्चात्र शक्यतावच्छेदकजातेः गोत्वस्यैकत्वात् सर्वेषां शुक्लकृष्णादीनां गवां ग्रहणं भविष्यतीति न दोषः। उक्तञ्च कुमारिलभट्टेन-

आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम्।
शब्दः सुकरसम्बन्धो न च व्यभिचरिष्यति॥

(तं. वा.- ३.१.१२)

व्यक्तीनाम् अनन्तत्वेऽपि प्रवृत्तिनिमित्तात्मकं जात्यादि-रूपमेकं धर्मं परिचायकत्वेन अङ्गीकृत्य गवाद्यात्मकः सुग्राह्यगवादिनिष्ठवाच्यत्वसम्बन्धः शक्तिग्रहाविषयव्यक्तिं न बोधयिष्यतीति कारिकार्थः।

ननु जातिशक्तिवादे गामानय इत्युच्यमाने गोत्वस्यानयनक्रियया सम्बन्धाभावात् अन्वयानुपपत्त्या गवि लक्षणा इति साधु किन्तु **गौरस्ति** इत्यत्र तु गोत्वस्य सत्तायामन्वयो भवत्येव अतोऽत्र अन्वयानुपपत्तिरूप-लक्षणाबीजस्याभावात् व्यक्तेर्बोधस्तु न जायेत, दृश्यते च लोके गौरस्तीत्यादिषु गोव्यक्तेरेव सत्तायामन्वयः, अतो न जातौ शक्तिरपि तु व्यक्तावेव शक्तिः। केषाञ्चिन्नये तात्पर्यानुपपत्तिरेव लक्षणाबीजं न त्वन्वयानुपपत्तिः अन्यथा गङ्गायां घोषः इत्यत्र अन्वयानुपपत्तिपरिहारार्थं घोषपदस्य मीने लक्षणा स्यात्तावतापि अन्वयानुपपत्तिपरिहारस्य सम्भवात् इति चेन्न **आयुर्वै घृतम्** इति वेदवाक्यानुरोधेन अन्वयानुपपत्तिरपि क्वचित् लक्षणाबीजं भवितुमर्हति, अन्यथा मीमांसकानां नये वेदस्य अपौरुषेत्वस्वीकारात् कर्तृत्वस्याप्यभावात् तात्पर्यस्यापि अभावे तात्पर्यानुपपत्तिरूपलक्षणाबीजस्य अभावात् लक्षणा न सम्भवेत्।

**व्यक्तिशक्तिवादे प्रमाणान्तराणि**

व्यक्तावेव शक्तिग्रह इत्यत्र युक्त्यन्तरमपि प्रदर्श्यते, तथाहि शक्तिग्राहकेषु व्यवहार आन्यतम्यं भजते। दृश्यते च लोके व्यक्तावेव शब्दव्यवहारो भवति। गामानय, अश्वं बधान इत्यादौ गोव्यक्तेरानयनम्, अश्वव्यक्तेर्बन्धनम् इत्यादिव्यवहारं दर्शं दर्शं सर्वे गवाश्वादिपदानां तत्तद्व्यक्तौ शक्तिं जानन्ति, अतो व्यक्तावेव शक्तिग्रहः।

व्यक्तिः नामार्थः इत्यत्र शास्त्रीयं प्रमाणम्- भगवतः पाणिनेरपि व्यक्तिशक्तिवादोऽभिमतः। तेन "**अणुदित्सवर्णस्य चाप्रत्ययः**" इति "**सरूपाणामेकशेष एकविभक्तौ**" इति च सूत्रं प्रणीतम्। "**इको यणचि**" इत्यत्र इकारेण यथा अष्टादश-इवर्णानां ग्रहणं स्यात्तदर्थम् अणुदित्सूत्रं प्रणीतम्। यदि पाणिनेर्जातिशक्ति-वादोऽभिप्रेतः स्यात्तदानीम् इकारेण इत्वजातिर्बुध्येत तेन च इकारेण इत्वावच्छिन्नाष्टदशेवर्णानां स्वत एव ग्रहणं स्यात्, तदर्थम् अणुदित्सूत्रकरणं व्यर्थम्। व्यक्तिशक्तिवादपक्षे एव अणुदित्सूत्रस्य चारितार्थ्यं वक्तुं

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

शक्यते। एवमेव स्वरूपसूत्रेऽपि शब्दस्य द्वित्वे बहुत्वे च एक एव शब्दः शिष्यते। जातिपक्षाश्रयणे तज्जात्यवच्छिन्नानां सर्वेषां शब्दानां कृते एक एव शब्दः पर्याप्तः स्यात्, एकस्यैव शब्दस्यावस्थित्यर्थम् इदं सूत्रं व्यर्थं स्यात्। तस्यापि व्यक्तिपक्षाभिमतत्वेन एकेन शब्देन एकस्या एव व्यक्तेरभिधानात् द्व्यादिव्यक्तीनां बोधार्थं द्व्यादिशब्दोपादानस्य अवश्यकर्तव्यत्वेन तत्र इतरनिवृत्तिपूर्वकैकस्य शब्दस्यावस्थानार्थमिदं सूत्रं चरितार्थम्। एवं भगवतः पाणिनेरपि व्यक्तिशक्तिवाद एवाभिप्रेतः।

**वैयाकरणानां सिद्धान्तः**

वैयाकरणेष्वपि आचार्यो व्याडिरासीद् व्यक्तिशक्तिवादी, आचार्यो वाजप्यायनस्तु जातिशक्तिवादी। सरूपसूत्रभाष्ये भाष्यकारेण उभयोर्मतं समर्थितं- "न ह्याकृतिपदार्थस्य द्रव्यं न पदार्थो द्रव्यपदार्थकस्य चाकृतिर्न पदार्थः, उभयोरुभयं पदार्थः" इति। अनेन किञ्चन विशिष्टमेव पदार्थत्वेन स्वीक्रियते, आकृतिविशिष्टं द्रव्यं, द्रव्यविशिष्टाकृतिर्वा पदार्थ इति। पाणिनेरपि न केवलं व्यक्तिशक्तिवादे एवाभिप्रायोऽपि तु उभयत्र तात्पर्यमस्ति। व्यक्तिः पदार्थ इति मत्वा यथा सरूपसूत्रमकरोत्तथा जातिः पदार्थ इति मत्वा "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्" इति सूत्रमपि कृतवान्।

**(३) लिङ्गमपि नामार्थः**

जातिव्यक्तिभ्यां सह लिङ्गमपि नामार्थो भवति। अतः स्वार्थद्रव्यलिङ्गानि नामार्थाः इत्यप्यस्ति पक्षः। अस्मिन् पक्षे लिङ्गं प्रकृतेरेवार्थः, प्रत्ययास्तु लिङ्गस्य द्योतका न तु वाचकाः। पुंल्लिङ्गः शब्दः इत्यादिसामानाधिकरण्यात् "ह्रस्वो नपुंसके प्रातिपदिकस्य", "आङो नाऽस्त्रियाम्", "स्वमोर्नपुंसकाद्" इत्यादिशास्त्रप्रामाण्येन च लिङ्गं शब्दनिष्ठमेव। पुनश्च वाक् मधु इत्यादौ प्रत्ययानां लुकि वाक् मधु इत्यादिप्रकृतिमात्रमवशिष्यते। एवञ्चात्र वाक् मधु इत्यादौ प्रत्ययं विनापि केवलं प्रकृतिमात्रादेव स्त्रीत्वस्य क्लीबत्वस्य च प्रतीतिर्भवति। अतो लिङ्गं प्रकृतिनिष्ठमेवेति स्वीकार्यमेव न तु प्रत्ययनिष्ठम्। ननु वाक् मधु इत्यादौ लुप्तप्रत्ययस्यानुसन्धानेनैव तत्र स्त्रीत्वपुंस्त्वादेर्भानं भवति इति लिङ्गं प्रत्ययनिष्ठमिति चेन्न प्रकृतिप्रत्ययविभागं वैयाकरणा एव जानीयुः किन्तु प्रकृतिप्रत्ययविभागमजानताम् अवैयाकरणानामपि ततः स्त्रीत्वपुंस्त्वादिप्रतीतेः लिङ्गं प्रकृतिनिष्ठमेव।

**द्विविधं लिङ्गम्**

लिङ्गं नाम किमिति चेल्लोके तावदुच्यते-

स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः।
उभयोरन्तरं यच्च तदभावे नपुंसकम्॥ इति।
(म.भा.- ४.१.३)

एवं लोके स्तनलोमादिना स्त्रीत्वपुंस्त्वादिप्रतीतावपि शास्त्रे खट्वादिशब्दे तादृशलक्षणस्यासत्त्वात् ततः स्त्रीत्वबोधाभावात् तत्र स्त्रीत्वप्रयुक्तं कार्यं न स्याद्, एवं लौकिकपुंस्त्वस्य दाराशब्दवाच्ये असत्त्वात् तत्र पुंस्त्वप्रयुक्तं "तस्माच्छसो नः पुंसि" इत्यादिकार्यं न स्यात्तेन च दारान् इत्यद्यप्रयोगापत्तिः। अतः शास्त्रे न तु लौकिकं लिङ्गमाश्रीयते अपि तु शास्त्रीयं पारिभाषिकं लिङ्गमाश्रीयते। तच्च सत्त्वरजस्तमोगुणानां वृद्धिः पुंस्त्वम्, अपचयः स्त्रीत्वम्, साम्यावस्थारूपस्थितिमात्रं नपुंसकत्वमिति। एतदवस्थात्रयस्य पदार्थमात्रे सत्त्वात् खट्वादिष्वपि सम्भवात्तत्र स्त्रीलिङ्गत्वं सम्भवति। एवं दारादिष्वपि बोध्यम्।

**भूषणकाराणां नये लिङ्गस्य शब्दनिष्ठत्वम्**

ननु एकस्मिन् तटरूपार्थे सत्त्वरजस्तमोगुणानां वृद्ध्यपचयादिविरुद्धधर्माणामसम्भवात् कथं तटशब्दस्य त्रिषु लिङ्गेषु व्यवहार, एवमेव परब्रह्मणो निर्गुणत्वात् तत्र सर्वविधगुणानामभावात् कथं तद्वाचकात्मादिशब्दानां पुंसि व्यवहार इति चेदुच्यते लिङ्गं न अर्थनिष्ठमपि तु शब्दनिष्ठमेव। ननु तथापि एकस्मिन् शब्दे सत्त्वादिगुणानां वृद्ध्यपचयादिविरुद्धधर्माः समकालं स्थातुं न प्रभवन्ति तेन तटादिशब्दानां कथं त्रिलिङ्गकत्वमिति प्रश्नस्तदवस्थ इति चेदुच्यते लिङ्गं शब्दनिष्ठमेव। तथापि अत्र दोषो नास्ति लिङ्गभेदात् शब्दोऽपि भिद्यते। एकस्यैव तटशब्दस्य त्रिषु लिङ्गेषु व्यवहार इति नास्ति अपि तु पुंसि विद्यमानः तटशब्दः, स्त्रियां विद्यमानः तटशब्दः, क्लीबे विद्यमानः तटशब्दश्च परस्परस्माद्भिन्नः। त्रिष्वपि लिङ्गेषु विद्यमानानां तेषां त्रयाणां तटशब्दानां समानाकारत्वात् एकत्वेन व्यवहारमात्रं भवति एतावता ते न समानाः। अतो न दोषः। अपि च लिङ्गस्य अर्थनिष्ठत्वे स्त्रीत्वार्थविशिष्टे एकस्मिन्

अयं पदार्थः, इयं व्यक्तिः, इदं वस्तु इति त्रिविधः त्रिलिङ्गकः प्रयोगः न स्यात्। लिङ्गस्य शब्दनिष्ठत्वे तु तत्तच्छब्दमादाय तत्तल्लिङ्गोपपत्तिरिति न दोषः। अतः लिङ्गं शब्दनिष्ठमेवेति भूषणकाराः।

**(४) संख्या नामार्थः-**

जातिव्यक्तिलिङ्गैः संख्यापि नामार्थः। एकत्वादिकं तु प्रकृतेरेवार्थः, विभक्तिस्तु तत्र एकत्वादीनां द्योतिकामात्रम्। अत एव दधि मधु इत्यादिषु प्रत्ययं विनापि एकत्वादीनां प्रतीतिर्जायत एव। एवं तर्हि प्रकृतेरेव एकत्वादीनां बोधे "द्व्येकयोर्द्विवचनैकवचने" इत्यादिविभक्तिविधानं व्यर्थमिति चेन्न प्रकृतेः संख्यायाः प्रतीतेरपि विभक्तीनां तत्रार्थे तात्पर्यग्राहकत्वात्। ननु दधि मधु इत्यादिषु लुप्तविभक्तीनां स्मरणादेकत्वादीनां भानमिति चेन्न प्रकृतिप्रत्ययविभागमजानतोऽपि ततो एकत्वादिप्रतीतेः। अस्तु एवं सत्यपि अनन्तप्रकृतिषु संख्याकल्पनेन अनन्तशक्तिकल्पनगौरवं भवतीति चेदुच्यते फलमुखगौरवं तु न दोषाय कल्प्यत इति। एवं संख्यापि नामार्थो भवति विभक्तिस्तु तत्रार्थे तात्पर्यग्राहिका।

**संख्या नामार्थः इति पक्षे प्रमाणम्**

संख्यायाः प्रकृत्यर्थत्वे प्रमाणं भवति "आदिर्ञिटुडवः" इत्यत्र आदिशब्दे एकवचनम्। ञिटुडव इत्यत्र तु बहुवचनमस्ति तर्हि तद्विशेषणत्वेन आदिरित्यत्र कथमेकवचनमिति चेदुच्यते अत्र बहुत्वे एकवचनमिति। तर्हि प्रत्ययानां संख्यावाचकत्वे तत्सत्त्वे तत्सत्त्वम्, तदभावे तदभावः इति अन्वयव्यतिरेकनियमाभ्यां बहुत्वप्रतिपादकप्रत्ययसत्त्वे बहुत्वप्रतीतिः तदभावे च बहुत्वाप्रतीतिस्स्यात् किन्तु प्रकृते तु बहुत्वप्रतिपादकजस्प्रत्ययाभावेऽपि बहुत्वार्थस्य भानादत्र व्यतिरेकव्यभिचारो वर्तते तेन च विभक्तीनां नैव वाचकत्वं स्वीकर्तुं शक्यते। एवं व्यभिचारसत्त्वात् विभक्तीनां द्योतकत्वमेव सुतरामायाति। एवं संख्याया अपि नामार्थत्वे आहत्य चतुष्कं नामार्थ इति आयाति।

**(५) कारकं नामार्थः**

कारकमपि नामार्थो भवति इति कारकमपि गृहीत्वा पञ्चकं नामार्थः इति पक्षः समुद्भवति। यथा टाबादिसन्निधाने स्त्रीत्वं तदभावे न स्त्रीत्वम् एवम् अमादिसन्निधाने एकत्वं कर्मत्वञ्च प्रतीयेते तदभावे न प्रतीयेते इत्यन्वयव्यतिरेकाभ्यां लिङ्गसंख्याकारकाणां प्रत्ययार्थत्वमिति चेन्न दधि तिष्ठति दधि पश्य इत्यादौ प्रत्ययं विनापि लिङ्गसंख्याकारकादीनां प्रतीतेः एते प्रकृतेरेवार्था भवन्ति। लुप्तप्रत्ययानुसन्धानात्तत्प्रतीतिरित्यपि न तदजानतोऽपि तद्बोधदर्शनादिति पूर्वमेव प्रतिपादितम्। एवं कारकस्यापि नामार्थत्वेन पञ्चकं नामार्थः इति पक्षः समायातः। एवमाहत्य नामार्थविषये पञ्च पक्षाः शास्त्रेषु प्रसिद्धाः। दीक्षितेनाप्युक्तम्-

एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा।
नामार्था इति सर्वेऽपि पक्षाः शास्त्रे व्यवस्थिताः॥
(वै.भू.का. -२५)

**(६) शब्दः नामार्थः**

स्वार्थद्रव्यलिङ्गसंख्याकारकादिवत् शब्दोऽपि नामार्थः। शब्दाज्जायमाने बोधे यथा स्वार्थद्रव्यादयः प्रतीयन्ते तथा शब्दोऽपि विशेषणतया प्रतीयते। युधिष्ठिर आसीदित्युच्यमाने युधिष्ठिरशब्दवाच्यः कश्चन आसीदिति युधिष्ठिरशब्दस्यापि शाब्दबोधे विशेषणतया भानं भवति। हरिणाप्युक्तम्-

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥
(वा.प-१.११३)

लोके शाब्दबोधात्मकः प्रत्ययो ज्ञानं वा शब्दरूपविशेषणभानं विना नैव सम्भवति। सर्वं शाब्दबोधात्मकं ज्ञानं शब्देन नित्यसम्बद्धतया भासते इत्यर्थः। विष्णुमुच्चारय इत्यादौ यदि विष्णुशब्दस्य शाब्दबोधे भानं स्यात् तर्हि केवलस्य अर्थस्योच्चारणासम्भावात् तादृशप्रयोग एव न स्यात्। अतः शाब्दबोधे शब्दोऽपि विशेषणतया भासते इति स्वीकर्तव्यम्।

ननु यदा शब्दात् कस्यचिद्बोधो जायते तदानीं शब्दो भवति वाचकः, यदा च तस्मिन्नेव बोधे शब्दस्यापि विषयतया भानं स्वीक्रियते तदा शब्दस्तत्र वाच्यो भवति। एवमेकस्यैव शब्दस्य वाच्यत्वं वाचकत्वमिति विरुद्धधर्मद्वयं कथं सम्भवति इति चेदुच्यते- तेजः स्वयं प्रकाशते अन्यानि वस्तूनि अपि प्रकाशयति,

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

स्वप्रकाशत्वेन तस्मिन् ग्राह्यत्वं वर्तते, अन्यप्रकाशकत्वेन तस्मिन् ग्राहकत्वं वर्तते, एवं तेजसि यथा ग्राह्यत्वग्राहकत्वरूपविरुद्धधर्मौ स्तः तद्वत् प्रकृतेऽपि शब्दाज्जायमाने बोधे शब्दस्य वाचकत्वं, तस्मिन्नेव बोधे शब्दस्य विषयत्वाच्च शब्दस्य वाच्यत्वमपि। शाब्दबोधे शब्दः स्वविषयत्वम् असम्पाद्य अर्थं नैव बोधयति। अत एव हरिणोक्तम्-

ग्राह्यत्वं ग्राहकत्वञ्च द्वे शक्ती तेजसो यथा।
तथैव सर्वशब्दानामेते पृथगवस्थिते ।
विषयत्वमनादृत्य शब्दैर्नार्थः प्रकाशते।
(वा.प-१.५५-५६)

**शब्दस्य नामार्थत्वे फलम्**

शब्दोऽपि शाब्दबोधे विषयो भवति इत्यत एव अनुकरणेन अनुकार्यस्य बोधो जायते। अनुकरणस्य लक्षणं तावत्- स्वसदृशशब्दमात्रबोधतात्पर्यकोच्चारणविषयत्वमिति। स्वमत्र अनुकरणम्। अनुकार्यं तु- स्वसदृशशब्दप्रतिपाद्यत्वे सति शब्दत्वमिति। स्वञ्चात्रानुकार्यम्। अनुकार्यानुकरणयोः पक्षद्वयं भेदोऽभेदश्च। यदा अनुकार्यानुकरणयोः भेद इति पक्षस्तदानीम् अनुकरणेन अनुकार्यस्वरूपप्रतिपादकत्वेन अर्थवत्त्वाद् अनुकरणस्य प्रातिपदिकत्वं सिध्यति ततश्च स्वाद्युत्पत्तिः। अस्य पक्षस्य ज्ञापकं तावत् "भुवो वुग्लुङ्लिटोः" इति सूत्रे भुव इति निर्देशनम्। भुव इत्यत्र षष्ठीनिर्देशस्तदैव सिध्यति यदात्र भेदानुकरणं स्वीक्रियते, तस्मिन् पक्षे एव अनुकरणस्यार्थवत्त्वात्।

यदा तु अनुकार्यानुकरणयोरभेद इति पक्षः तदा अनुकरणेन आनुपूर्विमात्रबोधनात् कस्याप्यर्थस्याबोधनात् अर्थवत्त्वाभावात् प्रातिपदिकत्वं न भवति। तदभावे च तन्निबन्धना स्वाद्युत्पत्तिरपि न। अस्य पक्षस्य ज्ञापकं तावत् भू सत्तायाम् इत्यत्र भू इत्यविभक्तिको निर्देशः। भू इत्यविभक्तिको निर्देशस्तदैव सङ्गच्छते यदात्र अभेदानुकरणं स्वीक्रियते, तस्मिन् पक्षे एव अनुकरणस्यार्थवत्त्वाभावेन प्रातिपदिकत्वासिद्धेः।

ननु "अपदं न प्रयुञ्जीत" इति भाष्याद् यत् पदं नास्ति तस्य प्रयोगः असाधुः, तेन प्रकृते अभेदानुकरणपक्षे भू- इत्यस्य अर्थवत्त्वाभावात् प्रतिपदिकत्वाभावाच्च सुबाद्यनुत्पत्तेः पदत्वाभावात् कथं भू सत्तायाम् इत्यस्य भू इति प्रयोगः सङ्गच्छते इति चेदुच्यते अपदं न प्रयुञ्जीत इत्यत्र यथा पदत्वमभीप्सितम् तथा पदत्वस्य भू इत्यत्रापि सत्त्वात् न दोषः। तथाहि अपदमित्यस्य हि अपरिनिष्ठितमित्यर्थः। परिनिष्ठितत्वं तावत्- अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वमिति। यथा रामः इति परिनिष्ठितम्, राम सु इत्यपरिनिष्ठितम्। राम सु इत्यत्र अप्रवृत्तनित्यविधिर्भवति "ससजुषो रुः" इति रुत्वविधिः, तस्य उद्देश्यतावच्छेदकं पदान्तत्वविशिष्टसत्त्वं, पदान्तसकारमुद्दिश्य रुत्वविधेः प्रवर्तनात्। तेन आक्रान्त एवास्ति राम सु इति समुदायः। अतः तदाक्रान्तत्वं राम सु इति समुदाये। अतोऽस्य अपरिनिष्ठत्वम्। राम इत्यत्र तु रुत्वविधेः सत्त्वात् पदान्तत्वविशिष्टसत्त्वस्यादर्शनात् एतादृशोद्देश्यतावच्छेदकाक्रान्तत्वाभावात् परिनिष्ठितत्वम्। एवं प्रकृते भू इत्यत्र अप्रवृत्तनित्यविधिः अर्थवत्सूत्रेण प्रातिपदिकत्वविधिः, तस्य उद्देश्यतावच्छेदकम् अर्थवत्त्वम्, अर्थवतः प्रातिपदिकसंज्ञाविधानात्। तेन अनाक्रान्तमेवास्ति भू इति, तस्य अभेदानुकरणेनार्थवत्त्वाभावात्। एवञ्च अप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वरूपपरिनिष्ठितत्वस्य भू इत्यस्य सत्त्वात् तस्य पदत्वं सिध्यति। एवञ्च "अपदं न प्रयुञ्जीत" इत्यत्र अपदेन भू इत्यस्य ग्रहणाभावात् तस्य प्रयोगे न दोषः।

देवदत्तो भवति इत्यत्र परिनिष्ठितत्वलक्षणस्य अव्याप्तिवारणाय अप्रवृत्तेति। अन्यथा देवदत्तो भवति इत्यत्र "तिङ्ङतिङः" इत्यस्य एकवारं प्रवृत्तावपि अतिङन्तपदपरतिङन्तरूपोद्देश्यतावच्छेदकत्वस्य अधुनापि सत्त्वात् तेनाक्रान्तत्वेन देवदत्तो भवति इत्यस्य परिनिष्ठितत्वं न स्यात्। अप्रवृत्तपदोपादानेन तु "तिङ्ङतिङः" इत्यस्य एकवारं प्रवृत्तत्वात् सः अप्रवृत्तविधिः न इति तस्य ग्रहणाभावान्नाव्याप्तिः।

सेद्धा इत्यत्र अपरिनिष्ठितत्ववारणाय नित्यविधीति दलम्। अन्यथा तत्र "स्वरतिसूतिसूयतिधूञूदितो वा" इति वैकल्पिकेड्विधेः अप्रवृत्तिपक्षेऽपि ऊदिद्धातुत्वरूपोद्देश्यता-वच्छेकत्वस्य अधुनापि सत्त्वात् तेन आक्रान्तत्वात् सेद्धा इति धातुप्रत्ययसमुदायस्य परिनिष्ठितत्वं न स्यात्। नित्यविधीत्युपादानेन च

"स्वरतिसूति….." इत्यादीड्विधीनां वैकल्पिकत्वात् तस्यात्र ग्रहणाभावात् नाव्याप्तिः। एवं सेधिता इति सेड्रूपवत् सेद्धा इति अनिड्रूपमपि परिनिष्ठितमेव। परिनिष्ठितशब्दः साधुशब्दापरपर्यायः।

अभेदपक्षे अनुकरणस्य अनुकार्यस्वरूपबोधकत्वाभावेन कथम् अनुकरणात् अनुकार्यस्वरूपप्रतीतिरिति चेदुच्यते सादृश्यसम्बन्धेन तद्भवति। यथा मैत्रसदृशपिण्डदर्शने सादृश्यसम्बन्धेन मैत्रस्मरणं तथैव भू-इत्यद्यनुकरणेन तादृशानुकार्यस्य ज्ञानमिति बोध्यम्।

**निष्कर्षः**

एवं नामार्थविषये आहत्य षट् पक्षाः शास्त्रेषु प्राप्यन्ते तेष्वपि नामार्थाः पञ्चैव इत्येव प्रसिद्धम्। तत्रापि च आद्यः त्रयः प्रायः सर्वैर्बाहुल्येनाङ्गीकृताः। संख्याकारकयोः नामार्थत्वे न तथा सर्वेषां सहमतिः-

स्वार्थं द्रव्यञ्च लिङ्गञ्च संख्या कर्मादिरेव च।
अमी पञ्चैव नामार्थास्त्रयः केषाञ्चिदग्रिमाः॥
(मुग्धबोधटीकायां दुर्गादासः)

**संकेतपञ्जिः**

तं. वा. = तन्त्रवार्तिकम्
म. भा. = महाभाष्यम्
वै.भू.का. = वैयाकरणभूषणकारिका
वा.प. = वाक्यपदीयम्

## सहायकग्रन्थसूची


- नागेशभट्टः। *परमलघुमञ्जूषा- भावप्रकाशिका बालबोधिनी।* सम्पा. जयशङ्करलालत्रिपाठी। चौखम्बा कृष्णदास अकादमी, वाराणसी
- नागेशभट्टः। परमलघुमञ्जूषा- किरणावली। सम्पा. आचार्यलोकमणिदाहालः। चौखम्बा सुरभारती प्रकाशन, वाराणसी।
- नागेशभट्टः। परमलघुमञ्जूषा- तत्त्वप्रकाशिका, विवृतिः। सम्पा. झा उदयनाथः। नाग पाब्लिशर्स।
- कौण्डभट्टः। वैयाकरणभूषणसारः- काशिका, दर्पणम्। सम्पा. शास्त्री नन्दकिशोरः। चौखम्बा सुरभारती प्रकाशन, वाराणसी।
- कौण्डभट्टः। वैयाकरणभूषणसारः- दर्पण, सुबोधिनी। सम्पा. द्विवेदी चन्द्रिकाप्रसादः। चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी।
- कौण्डभट्टः। वैयाकरणभूषणसारः- सावित्री। सम्पा. आद्याप्रसादमिश्रः। सम्पूर्णानन्दसंस्कृतविश्व-विद्यालयः।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# उपसर्गार्थचन्द्रिकायां संकलितानां किरातार्जुनीयस्थ-अनूपसृष्टप्रयोगाणां विश्लेषणम्

**सुखदेव-साउः**
**शोधच्छात्रः, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्**
**वेलुडमठः, पश्चिमवङ्गराज्यम्- ७११२०२**

---

**प्रबन्धसारः**

*पञ्चसु खण्डेषु विभक्तः उपसर्गार्थचन्द्रिकाख्यः ग्रन्थः चारुदेवशास्त्रिणः विशिष्टा कृतिः अस्ति। अत्र ग्रन्थे क्रमेण प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप इत्येतैः द्वाविंशतिभिः उपसर्गैः सह पाणिनीयधातुपाठे पठितानां धातूनां योगे सति यद्यद्रूपं लौकिकवैदिकप्रयोगे च दृश्यते, तेषां प्रयोगाणां संकलनं कृत्वा प्रत्येकं प्रयोगस्य कः अर्थः इति प्रतिपादितः ग्रन्थकर्त्रा। उपसर्गयोगे धातूनाम् अर्थवैचित्र्यं भवति इति सर्वविदितः विषयः। तदेव अर्थवैचित्र्यमादाय तत्तदुपसृष्टप्रयोगाणां के के अर्थाः भवन्ति इति ग्रन्थे प्रतिपादितं विद्यते। मम शोधप्रबन्धेऽस्मिन् उपसर्गार्थचन्द्रिकादिशा किरातार्जुनीयाद् अनूपसृष्टधातूनाम् उदाहरणानि स्वीक्रियन्ते। तेषु उदाहरणेषु च अनूपसृष्टतत्तद्धातूनां के अर्थाः भवन्ति इति मल्लिनाथाचार्यकृतघण्टापथटीकादिशा उद्ध्रियते। ततश्च उपसर्गार्थचन्द्रिकाकारः तत्र कम् अर्थं स्वीकरोति इत्यपि प्रतिपादये। एवञ्च उभयोः मतम् आलोच्य तयोः साम्यमस्ति वा न वा इत्यपि आलोचयिष्ये।*

**कुञ्चीशब्दाः**:- उपसर्गार्थचन्द्रिका, अनूपसृष्टधातवः, सोपसृष्टधातुः, किरातार्जुनीयम्, चारुदेवशास्त्री चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

**उपोद्घातः**

संस्कृतमातुः प्रसाराय दत्तचित्तः नैकेषु शास्त्रेषु मतिमान् चारुदेवशास्त्रिमहोदयः अर्वाचीनसंस्कृतवाङ्मये स्वकृतिभिः विशिष्टं स्थानं बिभर्ति। महाभागोऽयं स्वजीवनकाले छात्राणां हिताय छात्रोपयोगिनः विविधान् ग्रन्थान् श्रन्थयाञ्चकार। तस्य कृतिषु अनुवादकला, शब्दापशब्दविवेकः, व्याकरणचन्द्रोदयः, उपसर्गार्थचन्द्रिका, वाक्यमुक्तावली, प्रस्तावतरङ्गिणी चेत्येतानि पुस्तकानि प्रसिद्धानि सन्ति। तदतिरिच्य अपि महोदयेन महाभाष्यस्य नवाह्निकानां हिन्दीभाषायाम् अनुवादं व्याख्यानञ्च कृतम्। एवमेव वाक्यपदीयस्य संस्कर्तृरूपेणापि शास्त्रिमहोदयस्य प्रसिद्धिः विद्यते। साहित्ये तु महात्मगान्धिनः जीवनचरितम् आदाय गान्धिचरितम् इति ग्रन्थं प्रथयाञ्चकार। शास्त्रिमहोदयः नानाशास्त्रेषु निष्णातोऽपि व्याकरणशास्त्रमेव अधिकतया प्रीणाति स्म इति तस्य कृतीः अवलोक्य निश्चयेन वक्तुं शक्यते। तस्य कृतिषु उपसर्गार्थचन्द्रिकाग्रन्थस्य विषयम् आदाय मया अयं शोधप्रबन्धः लिख्यते अतः उपसर्गार्थचन्द्रिकाविषये सामान्येन किञ्चिदुच्यते। तथाहि उपसर्गार्थचन्द्रिका इति ग्रन्थः पञ्चसु खण्डेषु विभक्तः अस्ति। ग्रन्थेऽस्मिन् प्रपरादिभिः द्वाविंशतिभिः उपसर्गैः सह पाणिनीयधातुपाठे पठितानां धातूनां क्रमेण योगेन ये सोपसृष्टाः प्रयोगाः संस्कृतवाङ्मये दृश्यन्ते ते प्रयोगाः एव अत्र संकलिताः सन्ति। एवञ्च उपसर्गयोगे धातूनाम् अर्थवैचित्र्यं भवति इति सर्वविदितः विषयः। तदेव अर्थवैचित्र्यमादाय तत्तदुपसृष्टप्रयोगाणां के के अर्थाः भवन्ति इति ग्रन्थे प्रतिपादितं विद्यते। मम शोधप्रबन्धेऽस्मिन् मया उपसर्गार्थचन्द्रिकादिशा किरातार्जुनीयाद् अनूपसृष्टधातूनाम् उदाहरणानि स्वीक्रियन्ते। तेषु उदाहरणेषु च अनूपसृष्टतत्तद्धातूनां के अर्थाः भवन्ति इति मल्लिनाथाचार्यकृतघण्टापथटीकादिशा उद्ध्रियते। ततश्च उपसर्गार्थचन्द्रिकाकारः तत्र कम् अर्थं स्वीकरोति इत्यपि प्रतिपादये। एवञ्च उभयोः मतम् आलोच्य तयोः साम्यमस्ति वा न वा इत्यपि आलोचयिष्ये।

उपसर्गार्थचन्द्रिकायां किरातार्जुनीयम् इति महाकाव्यात् नव अनूपसृष्टप्रयोगाः संकलिताः दृश्यन्ते। तत्र क्रमशः अनूपसृष्टस्य क्रमुधातोः, गम्-धातोः, गै-धातोः, तप-धातोः, बन्ध-धातोः, वृतु-धातोः, शीङ्-धातोः तथा हृञ्-धातोः एकैकम् उदाहरणं संकलितम्। एवमेव अनुप्रेत्युपसर्गद्वययुक्तस्य कृ-धातोः एकम् उदाहरणं

संकलितम् इति आहत्य नव उदाहरणानि अत्र मया आलोच्यन्ते। अधः तानि क्रमशः आलोच्यन्ते -

**१. अनूपसृष्टस्य क्रमु पादविक्षेपे इति धातोः प्रयोगः**

अनूपसृष्टस्य क्रमु-धातोः एकम् उदाहरणं किरातार्जुनीयाद् उपसर्गार्थचन्द्रिकायां स्वीकृतम्। तद् उदाहरणम् अस्ति- "आश्रमानुक्रमः पूर्वैः स्मर्यते न व्यतिक्रमः" इति। इदमुदाहरणं किरातार्जुनीयमहाकाव्ये एकादशे सर्गे षट्सप्ततितमे श्लोके उपलभ्यते[1]। तत्र सम्पूर्णः श्लोकः अस्ति—

कथं वादीयतामर्वाङ्मुनिता धर्मरोधिनी।
**आश्रमानुक्रमः पूर्वैः स्मर्यते न व्यतिक्रमः॥**

**अन्वयः**— धर्मरोधिनी अर्वाक् मुनिता कथं वा आदीयतां पूर्वैः आश्रमानुक्रमः स्मर्यते व्यतिक्रमः न।

उदाहरणेऽस्मिन् अनुक्रमः इति अनूपसृष्टः प्रयोगः दृश्यते। अनुपूर्वकात् भ्वादिगणीयस्य परस्मैपदिनः सकर्मकस्य सेटः क्रमु-धातोः "भावे" (अष्टाध्यायी-३.३.१८) इति सूत्रेण घञ्-प्रत्यये अनुक्रम इति कृदन्तशब्दः निष्पद्यते। अत्र ब्रह्मचर्यादीनाम् आश्रमाणां पौर्वापर्येण आश्रयणम् एव आश्रमानुक्रमपदस्य अर्थः इति शास्त्रिमहोदयेन समगृह्यत। अयमेव अर्थः घण्टापथटीकाकृद्भिः मल्लिनाथैरपि स्वीचक्रे। एवञ्च अत्र अनुक्रमशब्देन पौर्वापर्यभावः गम्यते।

**२. अनूपसृष्टस्य गम्लृ गतौ इति धातोः प्रयोगः**

अनूपसृष्टस्य गम्-धातोः एकम् उदाहरणं किरातार्जुनीयाद् उपसर्गार्थचन्द्रिकायां स्वीकृतम्। तच्च उदाहरणं विद्यते - "शिवमिवानुगतं गजचर्मणा" इति। उपसर्गार्थचन्द्रिकायाम् अस्य उदाहरणस्य संकेतस्थानं प्रदत्तम् अस्ति कि० ५/४ इति। अर्थात् किरातार्जुनीये पञ्चमसर्गे चतुर्थः श्लोकः अस्य उदाहरणस्य संकेतत्वेन प्रदत्तः अस्ति। परन्तु इदं संकेतस्थानं प्रामादिकम् अस्ति। किरातार्जुनीये तु अयं श्लोकः पञ्चमे सर्गे द्वितीये श्लोके उपलभ्यते[2]। तथाहि तत्र सम्पूर्णः श्लोकः विद्यते—

तपनमण्डलदीपितमेकतः सततनैशतमोवृतमन्यतः।
हसितभिन्नतमिस्रचयं पुरः **शिवमिवानुगतं गजचर्मणा**॥
इति।

**अन्वयः**— एकतः तपनमण्डलदीपितम् अन्यतः सततनैशतमोवृतं पुरः हसितभिन्नतमिस्रचयं गजचर्मणा शिवम् इव अनुगतम्।

उदाहरणे अस्मिन् अनुगतम् इति अनूपसृष्टः प्रयोगः दृश्यते। अनुपूर्वकस्य भ्वादिगणीयस्य परस्मैपदिनः सकर्मकस्य अनिटः गम्-धातोः क्तप्रत्यये इदं रूपं सिद्ध्यति। सञ्जीवन्यां गजचर्मणा अनुगतम् इत्यस्य गजचर्मणा पश्चाद् व्याप्तम् इत्यर्थः कृतः। तत्र मल्लिनाथः अनोः पश्चाद्रूपे अर्थे प्रमाणत्वेन ददाति- "पश्चात्सादृश्ययोरनु" इति अमरकोषवाक्यम्। उपसर्गार्थचन्द्रिकायाम् अपि अनुगतम् इति पदस्य पश्चाल्लम्बिना परिधानेन आच्छादितम् इत्यर्थः दृश्यते।

**३. अनूपसृष्टस्य गै शब्दे इति धातोः प्रयोगः**

उपसर्गार्थचन्द्रिकायां किरातीर्जुनीयाद् अनूपसृष्टस्य गै शब्दे इति धातोः एकमेव उदाहरणं संकलितम्। तच्च उदाहरणं विद्यते- "अनुजगुरथ दिव्यं दुन्दुभिध्वानमाशाः" इति। इदम् उदाहरणं किरातार्जुनीये तृतीये सर्गे षष्ठितमे श्लोके उपलभ्यते[3]। तत्र सम्पूर्णः श्लोकः अस्ति—

**अनुजगुरथ दिव्यं दुन्दुभिध्वानमाशाः**
सुरकुसुमनिपातैर्व्योम्नि लक्ष्मीर्वितेने।
प्रियमिव कथयिष्यन्नालिलिङ्ग स्फुरन्तीं
भुवमनिभृतवेलावीचिबाहुः पयोधिः॥

**अन्वयः**— अथ आशाः दिव्यं दुन्दुभिध्वानम् अनुजगुः, व्योम्नि सुरकुसुमनिपातैः लक्ष्मीः वितेने, अनिभृतबेलावीचिबाहुः पयोधिः प्रियं कथयिष्यन् इव स्फुरन्तीं भुवम् आलिलिङ्ग इति।

उदाहरणेऽस्मिन् अनुजगुः इति अनूपसृष्टः प्रयोगः दृश्यते। भ्वादिगणीयस्य परस्मैपदिनः अकर्मकस्य अनिटः

[1] किरातार्जुनीयम् (घण्टापथ-व्याख्यया हिन्दीव्याख्यया च समुल्लसितम्), चौखम्बा सुरभारती प्रकाशन, पुटसंख्या- ३३१।

[2] किरातार्जुनीयम् (घण्टापथ-व्याख्यया हिन्दीव्याख्यया च समुल्लसितम्), चौखम्बा सुरभारती प्रकाशन, पुटसंख्या-१२०।

[3] किरातार्जुनीयम् (घण्टापथ-व्याख्यया हिन्दीव्याख्यया च समुल्लसितम्), चौखम्बा सुरभारती प्रकाशन, पुटसंख्या- ९९।

गै शब्दे इति धातोः कर्तरि लिट्लकारस्य प्रथमपुरुषबहुवचनस्य इदं रूपम् अस्ति। मल्लिनाथकृतघण्टापथे अनुजगुः इति पदस्य अनुदध्वनुः इत्यर्थः लिखितः। अनुदध्वनुः इति रूपं भ्वादिगणीयस्य परस्मैपदिनः ध्वन शब्दे इति धातोः लिट्लकारस्य प्रथमपुरुषबहुवचनस्य अस्ति। अस्य पश्चात् शब्दं चक्रुः इत्यर्थः। उपसर्गार्थचन्द्रिकायाम् अनुजगुः इति पदस्य अनुरसितं चक्रुः इति विस्तृतिः दृश्यते। अनुरसितम् इति पदं भ्वादिगणीयस्य परस्मैपदिनः रस शब्दे इति धातोः क्तप्रत्ययेन निष्पद्यते। तेन अनुरसितं चक्रुः इत्यस्य पश्चात् शब्दं चक्रुः इत्येव अर्थः।

**४. अनूपसृष्टस्य तप सन्तापे इति धातोः प्रयोगः**

उपसर्गार्थचन्द्रिकायां किरातार्जुनीयात् तप सन्तापे इति धातोः एकमेव उदाहरणं स्वीकृतम्। तच्च उदाहरणं विद्यते- “तेनानिमित्तेन तथा न पार्थस्तयोर्यथा रिक्ततयाऽनुतेपे” इति। इदम् उदाहरणं सप्तदशे सर्गे चत्वारिंशे श्लोके उपलभ्यते[4]। तथाहि तत्र सम्पूर्णः श्लोकः अस्ति—

**तेनानिमित्तेन तथा न पार्थस्तयोर्यथा रिक्ततयाऽनुतेपे।**
स्वमापदं प्रोज्झ्य विपत्तिमग्नं शोचन्ति सन्तो
ह्युपकारिपक्षम्॥

**अन्वयः**— पार्थः तयोः रिक्ततया यथा अनुतेपे तथा तेन अनिमित्तेन न अनुतेपे हि सन्तः स्वाम् आपदं प्रोज्झ्य विपत्तिमग्नम् उपकारिपक्षं शोचन्ति।

उदाहरणे अस्मिन् अनूपसृष्टस्य तप्-धातोः अनुतेपे इति प्रयोगः दृश्यते। अयं च प्रयोगः भ्वादिगणीयस्य परस्मैपदिनः सकर्मकस्य अनिटः तप-धातोः कर्मणि लिट्लकारे प्रथमपुरुषैकवचने निष्पद्यते। अत्र तयोः रिक्तता पार्थम् अनुतताप इति कर्तृवाच्यस्य कर्मवाच्ये तयोः रिक्ततया पार्थः अनुतेपे इति प्रयोगः। अत्र अनुतेपे इति पदस्य शुशोच इत्यर्थः मल्लिनाथाचार्यः लिलेख। उपसर्गार्थचन्द्रिकायाम् अपि स एव अर्थः स्वीकृतो वर्तते।

**५. अनूपसृष्टस्य बन्ध बन्धने इति धातोः प्रयोगः**

उपसर्गार्थचन्द्रिकायां किरातार्जुनीयात् बन्ध बन्धने इति धातोः एकमेव उदाहरणं संकलितं दृश्यते। तच्च उदाहरणं विद्यते— “रिपुराप पराभवाय मध्यं प्रकृतिप्रत्यययोरिवानुबन्धः” इति। इदम् उदाहरणं त्रयोदशे सर्गे ऊनविंशतितमे श्लोके उपलभ्यते। तथाहि तत्र सम्पूर्णः श्लोकः विद्यते—

स भवस्य भवक्षयैकहेतोः सितसप्तेश्च विधास्यतोः
सहार्थम्।
**रिपुराप पराभवाय मध्यं प्रकृतिप्रत्यययोरिवानुबन्धः॥**

**अन्वयः**— सह अर्थं विधास्यतोः भवक्षयैकहेतोः भवस्य सितसप्तेः च मध्यं रिपुः प्रकृतिप्रत्यययोः मध्यम् अनुबन्धः स इव पराभवाय आप इति।

उदाहरणे अस्मिन् अनुबन्धः इति अनूपसृष्टः प्रयोगः दृश्यते। अनु इति उपसर्गपूर्वकात् क्र्यादिगणीयस्य परस्मैपदिनः सकर्मकस्य अनिटः बन्ध बन्धने इति धातोः भावार्थे घञ्प्रत्यये अनुबन्धः इति रूपं निष्पद्यते। व्याकरणे प्रसिद्धः इत्संज्ञको वर्णः एव अत्र अनुबन्धशब्देन इष्टः। तथाहि प्रकृतिप्रत्यययोः मध्यं यथा अनुबन्धः अर्थात् इत्संज्ञकः वर्णः लोपार्थम् एव भवति तथैव शिवार्जुनयोः युद्धेऽपि सः शत्रुः शूकरः नाशाय आप इति श्लोकस्य अस्य भावार्थः। मल्लिनाथाचार्यः अनुबन्धपदेन इत्संज्ञकवर्णमेव स्वीचकार। चारुदेवमहोदयोऽपि अनुबन्धपदस्य तमेव अर्थम् अत्र स्वीकरोति। तथाहि सः लिखति- “प्रकृतिप्रत्ययादिषु वर्तमान इत्संज्ञको वर्णो व्याकरणशास्त्रेऽनुबन्ध इति व्यपदेशं भजते। स च परिनिष्ठिते प्रयोगार्हे शब्दे न श्रूयते। कार्यविशेषायोपात्तः सद्यो लुप्यते”[5] इति।

**६. अनूपसृष्टस्य वृतु वर्तने इति धातोः प्रयोगः**

उपसर्गार्थचन्द्रिकायां किरातार्जुनीयात् वृतु वर्तने इति धातोः एकमेव उदाहरणं प्रदत्तम् अस्ति। तच्च उदाहरणं विद्यते- “आसेदुषां गोत्रभिदोऽनुवृत्त्या” इति। इदम् उदाहरणं किरातार्जुनीये अष्टादशे सर्गे अष्टादशे श्लोके

[4] किरातार्जुनीयम् (घण्टापथ-व्याख्यया हिन्दीव्याख्यया च समुल्लसितम्), चौखम्बा सुरभारती प्रकाशन, पुटसंख्या- ५०२।

[5] उपसर्गार्थचन्द्रिका (द्वितीयः खण्डः), भारतीय-विद्या-प्रकाशनम्, पुटसंख्या- २३८।

उपलभ्यते[6]। तत्र सम्पूर्णः श्लोकः विद्यते—

**आसेदुषां गोत्रभिदोऽनुवृत्त्या** गोपायकानां भुवनत्रयस्य।
रोचिष्णुरत्नावलिभिर्विमानैर्द्यौराचिता तारकितेव रेजे॥

**अन्वयः**— गोत्रभिदः अनुवृत्या आसेदुषां भुवनत्रयस्य गोपायकानां रोचिष्णुरत्नावलिभिः विमानैः आचिता द्यौः तारकिता इव रेजे।

अस्मिन् उदाहरणे अनुवृत्त्या इति अनूपसृष्टः प्रयोगः दृश्यते। अनु इत्युपसर्गपूर्वकात् भ्वादिगणीयस्य आत्मनेपदिनः अकर्मकस्य सेटः वृतु वर्तने इति धातोः "स्त्रियां क्तिन्" (अष्टाध्यायी- ३.३.९४) इति सूत्रेण क्तिन्-प्रत्यये अनुवृत्ति इति कृदन्तं प्रातिपदिकं निष्पद्यते। तस्य तृतीयाविभक्तौ एकवचने अनुवृत्त्या इति रूपम्। मल्लिनाथाचार्यः घण्टापथे अनुवृत्त्या इति पदस्य अनुसरणेन इत्यर्थं लिखितवान्। उपसर्गार्थचन्द्रिकाकारः अस्मिन् उदाहरणे अनुवृत्तिः इति पदस्य न कमपि अर्थं लिलेख परन्तु पूर्वत्र उदाहरणेषु प्रयुक्तान् अर्थान् दृष्ट्वा ज्ञायते यद् अनुवृत्तिः इत्यस्य अनुसरणरूपः अर्थः एव तस्य अभीष्टः वर्तते।

**७. अनूपसृष्टस्य शीङ् स्वप्ने इति धातोः प्रयोगः**

उपसर्गार्थचन्द्रिकायां किरातार्जुनीयाद् अनूपसृष्टस्य शीङ् स्वप्ने इति धातोः एकम् उदाहरणं प्रदत्तं विद्यते। तच्च उदाहरणम् अस्ति- "पुरानुशेते तव चञ्चलं मनः" इति। उपसर्गार्थचन्द्रिकायाम् अस्य उदाहरणस्य संकेतस्थानं कि० ७/८ इति लिखितम् अस्ति। अर्थात् सप्तमसर्गे अष्टमे श्लोके अयं श्लोकांशः अस्तीति सूचितः परन्तु चारुदेवशास्त्रिणा प्रदत्ते संकेते इदम् उदाहरणं न प्राप्तं मया अपि तु अष्टमे सर्गे अष्टमे श्लोके इदम् उदाहरणं मया दृष्टम्[7]। तत्र सम्पूर्णः श्लोकः विद्यते—

जहीहि कोपं दयितोऽनुगम्यतां **पुरानुशेते तव चञ्चलं मनः।**
इति प्रियं काञ्चिदुपैतुमिच्छतीं पुरोऽनुनिन्ये निपुणः सखीजनः॥

**अन्वयः**— प्रियम् उपैदुम् इच्छतीं काञ्चित् निपुणः सखीजनः कोपं जहीहि, दयितः अनुगम्यताम्, चञ्चलं तव मनः पुरा अनुशेते इति पुरः अनुनिन्ये इति।

उदाहरणे अस्मिन् अनुशेते इति अनूपसृष्टः प्रयोगः दृश्यते। अनुपूर्वकाद् अदादिगणीयस्य आत्मनेपदिनः अकर्मकस्य सेटः शीङ् स्वप्ने इति धातोः कर्तरि लट्-लकारस्य प्रथमपुरुषैकवचनस्य इदं रूपम्। घण्टापथे अनुशेते इति पदस्य अनुशयिष्यते इत्यर्थः लिखितः। अनुशयिष्यते इति पदस्य अनुतप्स्यते इत्यर्थः। एवञ्च अनुशेते इत्यस्य अनुतप्स्यते इत्यर्थः आगतः। उपसर्गार्थचन्द्रिकायां पराऽनुशेते इत्यस्य अचिरादेव सानुतापं भविष्यति इत्यर्थः विद्यते। उभयोः समानः एव अर्थः।

**८. अनूपसृष्टस्य हृञ् हरणे इति धातोः प्रयोगः**

उपसर्गार्थचन्द्रिकायां किरातार्जुनीयाद् अनूपसृष्टस्य हृञ्-धातोः एकम् उदाहरणं संकलितम्। तच्च उदाहरणं विद्यते- "व्रीडितस्य ललितं युवतीनां क्षीबता बहुगुणैरनुजह्रे" इति। इदम् उदाहरणं नवमे सर्गे सप्तषष्टितमे श्लोके उपलभ्यते[8]। तत्र सम्पूर्णः श्लोकः अस्ति—

रुन्धती नयनवाक्यविकासं सादितोभयकरा परिरम्भे।
**व्रीडितस्य ललितं युवतीनां क्षीबता बहुगुणैरनुजह्रे॥**

**अन्वयः**— नयनवाक्यविकासं रुन्धती परिरम्भे सादितोभयकरा युवतीनां क्षीबता बहुगुणैः व्रीडितस्य ललितम् अनुजह्रे।

अस्मिन् उदाहरणे अनुजह्रे इति अनूपसृष्टः प्रयोगः दृश्यते। भ्वादिगणीयस्य उभयपदिनः द्विकर्मकस्य अनिटः हृञ् हरणे इति धातोः कर्तरि आत्मनेपदे लिट्लकारे प्रथमपुरुषैकवचने अनुजह्रे इति प्रयोगः सिद्ध्यति। मल्लिनाथाचार्यः अनुजह्रे इति पदस्य अनुचक्रे इत्यर्थं लिलेख। उपसर्गार्थचन्द्रिकाकारोऽपि अनुजह्रे इति क्रियापदस्य अनुकरणरूपार्थं स्वीचकार।

---

[6] किरातार्जुनीयम् (घण्टापथ-व्याख्यया हिन्दीव्याख्यया च समुल्लसितम्), चौखम्बा सुरभारती प्रकाशन, पुटसंख्या- ५२१।

[7] किरातार्जुनीयम् (घण्टापथ-व्याख्यया हिन्दीव्याख्यया च समुल्लसितम्), चौखम्बा सुरभारती प्रकाशन, पुटसंख्या- १९७।

[8] किरातार्जुनीयम् (घण्टापथ-व्याख्यया हिन्दीव्याख्यया च समुल्लसितम्), चौखम्बा सुरभारती प्रकाशन, पुटसंख्या- २५५।

**९. अनुप्रेत्युपसर्गद्वयोपसृष्टस्य कृ विक्षेपे इति धातोः प्रयोगः**

उपसर्गार्थचन्द्रिकायां किरातार्जुनीयाद् अनु-प्र इत्युपसर्गद्वययुक्तस्य कृ विक्षेपे इति धातोः एकम् उदाहरणं दृश्यते। तच्च उदाहरणं विद्यते- "सोत्कण्ठैरमरगणैरनुप्रकीर्णान्" इति। इदम् उदाहरणं किरातार्जुनीये सप्तमे सर्गे द्वितीये श्लोके उपलभ्यते[9]। तत्र सम्पूर्णः श्लोकः विद्यते—

**सोत्कण्ठैरमरगणैरनुप्रकीर्णान्नि**र्याय ज्वलितरुचः पुरान्मघोनः।
रामाणामुपरि विवस्वतः स्थितानां नासेदे चरितगुणत्वमातपत्रैः॥

**अन्वयः**— सोत्कण्ठैः अमरगणैः अनुप्रकीर्णात् ज्वलितरुचः मघोनः पुरात् निर्याय विवस्वतः उपरि स्थितानां रामाणाम् आतपत्रैः चरितगुणत्वं न आसेदे।

अस्मिन् उदाहरणे अनुप्रकीर्णात् इति अनूपसृष्टः प्रयोगः दृश्यते। अनुप्र इत्युपसर्गद्वयपूर्वकस्य तुदादिगणीयस्य परस्मैपदिनः सकर्मकस्य सेटः कृ विक्षेपे इति धातोः क्तप्रत्यये अनुप्रकीर्ण इति कृदन्तं प्रातिपदिकं निष्पद्यते। तस्य पञ्चम्येकवचने अनुप्रकीर्णात् इति रूपं निष्पद्यते। घण्टापथे अनुप्रकीर्णात् इति पदस्य आकीर्णात् इत्यर्थं लिलेख मल्लिनाथाचार्यः। उपसर्गार्थचन्द्रिकायाम् अनुप्रकीर्णात् इति पदस्य समन्तादावृताद् इत्यर्थः लिखितः।

**निष्कर्षः**

किरातार्जुनीयमहाकाव्यात् संकलितेषु उदाहरणेषु मल्लिनाथाचार्यकृतटीकायाम् उपसर्गार्थचन्द्रिकायाञ्च अनूपसृष्टप्रयोगाणां विवरणं दृष्ट्वा इदं वक्तुं शक्यते यत् उभौ अपि सर्वत्र समानम् अर्थमेव स्वीचक्रतुः। चारुदेवमहोदयस्य मल्लिनाथाचार्यकृतविवरणेन सह मतैक्यम् अस्तीति। तथा च ते अनूपसृष्टस्य क्रमुधातोः पौर्वापर्यभावरूपम् अर्थं स्वीकुर्वन्ति। द्वितीये उदाहरणे अनूपसृष्टस्य गम्-धातोः पश्चाद् व्याप्तिरूपम् अथवा पश्चाद् आच्छादनरूपम् अर्थं स्वीकुर्वन्ति। यद्यपि अनूपसृष्टस्य गम्-धातोः पश्चाद्गमनरूपम् अर्थमेव प्रसिद्धम् अस्ति तथापि श्लोके तु अनुगतम् इति पदेन पश्चात् आच्छादनरूपः अर्थः एव प्रतीयते। अतः स एव अर्थः अत्र अभीष्टः। तृतीये उदाहरणे अनूपसृष्टस्य गै-धातोः पश्चात् शब्दकरणरूपः अर्थः एव प्रतीयते। चतुर्थे उदाहरणे अनूपसृष्टस्य तप-धातोः सन्तापः अथवा शोचनरूपः अर्थः स्वीकृतः। पञ्चमे उदाहरणे अनूपसृष्ट-बन्धधातुना निष्पन्नस्य अनुबन्धपदस्य इत्संज्ञकः वर्णः इत्यर्थः दृश्यते। अत्र अनुबन्ध इति पदस्य यौगिकरूपः अर्थः न स्वीकृतः अपि तु रूढ्यर्थः एव आचार्यैः स्वीकृतः। षष्ठे उदाहरणे अनूपसृष्टस्य वृतु-धातोः अनुसरणरूपः अर्थः विद्यते। सप्तमे उदाहरणे अनुपूर्वकात् शीङ्-धातोः अनुतापरूपः अर्थः दृश्यते। अष्टमे उदाहरणे अनुपूर्वकात् हृञ्-धातोः अनुकरणरूपः अर्थः वर्तते। अन्तिमे च अनुप्र इत्युपसर्गद्वयपूर्वकात् कृ-धातोः निष्पन्नस्य अनुप्रकीर्णम् इति पदस्य समन्ताद् आवृत्तः इति अर्थः अस्ति।

नैयायिकादयः यथा प्रादीनां निपातानां द्योतकत्वं चादीनां च वाचकत्वं स्वीकुर्वन्ति न तथा वैयाकरणाः मनुते। ते तु प्रादीनां चादीनां च निपातानां द्योतकत्वरूपं पक्षं यथा स्वीकुर्वन्ति तथैव उभयोः अपि वाचकत्वम् अस्ति इत्यपि पक्षं स्वीकुर्वन्ति। इदानीं वाचकत्वपक्षे तु पूर्वोक्ताः अर्थाः अनु इत्यस्यैव सन्ति इति स्वीक्रियते। एवञ्च अत्र प्रबन्धे अनु इत्युपसर्गस्य अर्थवैचित्र्यं स्पष्टं द्रष्टुं शक्यते इति शिवम्।

**सहायकग्रन्थसूची**

• भारविः। किरातार्जुनीयम् (महामहोपाध्याय-कोलाचल-मल्लिनाथसूरिकृतया घण्टापथ-व्याख्यया हिन्दीव्याख्यया च समुल्लसितम्)। मिश्रः, बदरीनारायणः (व्याख्याकारः)। वाराणसी : चौखम्बा सुरभारती प्रकाशन। २०२०।

[9] किरातार्जुनीयम् (घण्टापथ-व्याख्यया हिन्दीव्याख्यया च समुल्लसितम्), चौखम्बा सुरभारती प्रकाशन, पुटसंख्या- १७४।

- भारविः। किरातार्जुनीयम् (प्रथमः सर्गः)। वसु, अनिल चन्द्र (सम्पादकः प्रणेता च)। कलिकाता : संस्कृत बुक डिपो। २०१८।
- चारुदेवशास्त्री। उपसर्गार्थचन्द्रिका (द्वितीयः खण्डः)। दिल्ली : भारतीय-विद्या-प्रकाशनम्। १९७८।
- भट्टोजिदीक्षितः। वैयाकरणसिद्धान्तकौमुदी (तृतीयः खण्डः)। गिरधरशर्मा परमेश्वरानन्दशर्मा (सम्पादकौ)। दिल्ली : मोतीलाल बनारसीदास। २०११।
- भट्टोजिदीक्षितः। वैयाकरणसिद्धान्तकौमुदी (चतुर्थः खण्डः)। गिरधरशर्मा परमेश्वरानन्दशर्मा (सम्पादकौ)। दिल्ली : मोतीलाल बनारसीदास। २०११।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# श्रीभावबोधिनीदिशा ‘यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्’ इति सूत्रे विध्यादिपदोपादानप्रयोजनम्

**शुभङ्कर-वर्मणः**
**शोधच्छात्रः, व्याकरणविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः**
**तिरुपतिः, अन्ध्रप्रदेशः, ५१७५०७**

---

**प्रबन्धसारः**

*प्रबन्धेऽस्मिन् आचार्यकरपुटुगलश्रीधर्मश्रीविरचितां ‘श्रीभावबोधिनी’नामकवैयाकरणसिद्धान्तकौमुदीटीकाम् आश्रित्य ‘यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्’ (१-४-१३) इति सूत्रे विध्यादिपदोपादानप्रयोजनम् इति विषये आलोचना विहिता। तत्रादौ सूत्रस्य ज्ञानार्थं सूत्रार्थः स्पष्टीकृतः। अनन्तरं तदादि, विधिः, प्रत्यये इति सूत्रगतानां त्रयाणां पदानां सूत्रे ग्रहणप्रयोजनम् अव्याप्त्यतिव्याप्त्यादिदोषप्रदर्शनपुरस्सरम् उपपादितम्।*

**कुञ्चीशब्दाः** - शब्दस्वरूपम्, अङ्गम्, तदादि, विधिः, प्रत्ययः चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

**प्रस्तावना**

पाणिनीयव्याकरणजगति विद्यमानेषु ग्रन्थेषु अन्यतमा सुप्रसिद्धा च वर्तते श्रीमद्भट्टोजिदीक्षितविरचिता पाणिनीयसमस्तसूत्रसंवलिता वैयाकरणसिद्धान्तकौमुदी। वर्तमानकालेऽस्मिन् वैयाकरणसिद्धान्तकौमुद्याः अध्ययनम् एव पाणिनीयव्याकरणाध्ययनस्य प्रवेशद्वारम्। व्याकरणस्य प्राथमिकज्ञानावाप्त्यर्थं सर्वेऽपि जनाः एनमेव ग्रन्थं मुख्यतया समाश्रयन्ति। अनेनैव अनुमातुं शक्यते यत् संस्कृतव्याकरणवाङ्मये अस्याः कीदृशं माहात्म्यं वैशिष्ट्यं ग्रहणयोग्यता च वर्तते। अत एव उच्यते-

**कौमुदी यदि कण्ठस्था वृथा भाष्ये परिश्रमः।**
**कौमुदी यद्यकण्ठस्था वृथा भाष्ये परिश्रमः॥ इति।**

मालाकारो यथा नैकविधपुष्पाणि मालारूपेण यथायथं ग्रथ्नाति तथैव ग्रन्थकारेणापि स्वग्रन्थे पाणिनीयाष्टाध्याय्याः सर्वाण्यपि सूत्राणि प्रयोगदृष्ट्या प्रक्रियाक्रमेण सुव्यवस्थापितानि। एषा कौमुदी पूर्वार्द्धोत्तरार्द्धभेदेन द्विधा विभक्ता। तत्र संज्ञादीनि प्रकरणानि सन्ति। तेषु अजन्तपुँलिङ्गप्रकरणान्तर्गतस्य **यस्मात्प्रत्यय-विधिस्तदादि प्रत्ययेऽङ्गम् (अष्टा. १-४-१३)** इति सूत्रे विध्यादिपदो-पादानप्रयोजनम् इति विषयमाश्रित्य प्रबन्धेऽस्मिन् आलोचना क्रियते।

**सूत्रार्थः**

षड्विधेषु पाणिनीयसूत्रेषु इदं संज्ञासूत्रम्। सूत्रेऽस्मिन् पञ्च पदानि सन्ति। विधानमिति विधिः, प्रत्ययस्य विधिः प्रत्ययविधिः इति षष्ठीतत्पुरुषः। तत् प्रकृतिरूपम् आदिर्यस्य शब्दस्वरूपस्य तत् तदादि इति बहुव्रीहिः। यस्मात् इति पञ्चम्यन्तम्, प्रत्ययविधिः इति प्रथमान्तम्, तदादि इति प्रथमान्तम्, प्रत्यये इति सप्तम्यन्तम्, अङ्गम् इति प्रथमान्तं पदम्। अत्र **आकडारादेका संज्ञा (अष्टा. १-४-१)** इत्यस्य अधिकारः वर्तते। तदादि इति नपुंसकवशादत्र शब्दस्वरूपमित्यध्याहार्यम्। तेन सूत्रार्थः भवति— ‘यस्मात् धातोर्वा प्रातिपदिकाद् वा प्रत्ययो विधीयते तदादि शब्दस्वरूपं प्रत्यये परतोऽङ्गसंज्ञं भवति’ इति। अत एव कौमुद्यामुक्तम्— “यः प्रत्ययो यस्मात्क्रियते तदादि शब्दस्वरूपं तस्मिन्प्रत्यये परेऽङ्गसंज्ञं स्यात्”[1] इति।

अत्र अङ्गमिति संज्ञा, यस्मात्प्रत्ययविधिस्तदादि इति संज्ञी च वर्तते। अर्थात् यस्याः प्रकृतेः प्रत्ययः भवति, तस्मिन् प्रत्यये परे तस्य प्रकृतेः तथा तेन साकं तस्य

---

[1] वैयाकरणसिद्धान्तकौमुदी, भट्टोजीदीक्षितः, गिरिधरशर्मा तथा परमेश्वरानन्दशर्मा(सम्पादकः) पृ.-१९४।

आगम-आदेश-विकरणादिसहितस्य शब्दस्वरूपस्य अङ्गसंज्ञा भवति। अतः तादृशसम्पूर्णप्रकृतिः अङ्गशब्देन उच्यते। अष्टाध्याय्याम् अङ्गसंज्ञाम् अधिकृत्य **अङ्गस्य (अष्टा. ६-४-१)** इति कश्चित् अधिकारः विद्यते। षष्ठाध्यायस्य चतुर्थपादादारभ्य सप्तमाध्यायस्य समाप्तिपर्यन्तम्, आहत्य पञ्चसु पादेष्वस्य अधिकारः तिष्ठति। अधिकारेऽस्मिन् उक्तानि सर्वाण्यपि कार्याणि अङ्गसंज्ञकमाधारीकृत्यैव भवन्ति।

**तदादि-पदोपादानप्रयोजनम्**

ननु यस्मात्प्रत्ययविधिस्तदङ्गमित्येवास्तु, तदादिग्रहणा-भावेऽपि कार्यसिद्धेः इत्याशङ्कायामाह- "भवामि भविष्यामीत्यादौ विकरणविशिष्यस्याऽङ्गसंज्ञार्थं तदादिग्रहणम्"[2] इति। अर्थात् **यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् (अष्टा. १-४-१३)** इति सूत्रे तदादिग्रहणाभावे भू-धातोर्मिप्प्रत्ययविधानात् तत्प्रकृतेः भूधातुमात्रस्य एवाङ्गसंज्ञा भविष्यति न तु शप्स्यादिविकरणविशिष्टस्य भू-धातोः, तेन भवामि भविष्यामीत्यादिविकरणविशिष्टस्य **अतो दीर्घो यञि (अष्टा. ७-३-१०१)** इति दीर्घो न प्राप्नोति। अतः अत्र दीर्घाभावरूपाव्याप्तिदोषवारणाय सूत्रे तदादिग्रहणं कर्तव्यम्। तच्चाह श्रीभावबोधिन्याम्— "कृते च तदादिग्रहणे तदादिसमुदायो यो भव इति भविष्य इति च तादृशसमुदायस्याङ्गसंज्ञायाम् **अतो दीर्घो यञि (अष्टा. ७-३-१०१)** इति दीर्घो भवति इति पङ्क्त्याशयः"[3] इति। ननु तदादिग्रहणाभावे प्रकृतेरेवाङ्गसंज्ञायाम् **अतो दीर्घो यञि (अष्टा. ७-३-१०१)** इति सूत्रमेव व्यर्थं स्यात्, अतः तत्सामर्थ्यात्तदादेरेवाङ्गसंज्ञा भविष्यति। तेन च भवामि भविष्यामीत्यादौ दीर्घसिद्ध्या सूत्रे नास्ति तदादिपदग्रहणप्रयोजनमिति चेन्न, पिपठिषामि चिकीर्षामीत्यादौ **अतो दीर्घो यञि (अष्टा. ७-३-१०१)** इत्यस्य सार्थक्यसम्भवात्।

**विधिपदोपादानप्रयोजनम्**

विधिः इति पदग्रहणाभावे **'यस्मात्प्रत्ययस्तदादि प्रत्ययेऽङ्गम्'** इति न्यासे च यस्मात्परः प्रत्ययोऽस्ति तदादि अङ्गसंज्ञं स्यात् इत्यर्थेनैव सकलेष्टसिद्धौ सूत्रे पुनः विधिग्रहणं किमर्थमिति प्रष्टुराशयः। तत्र उत्तरयति— "स्त्री इयती"[4]ति। इदं परिमाणमस्या इत्यर्थे इदम्शब्दात् **किमिदंभ्यां वो घः (अष्टा. ५-२-४०)** इति सूत्रेण वतुपि तेनैव सूत्रेण वतुप्प्रत्ययघटक-वकारस्य घादेशे च कृते, तस्य पुनः **आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् (अष्टा. ७-१-२)** इति इयादेशे **इदङ्किमोरीश्की (अष्टा. ६-३-९०)** इति इदम ईशादेशे 'ई-इयत्' इति स्थिते **यस्येति च (अष्टा. ६-४-१४८)** इति ईकारलोपे **उगितश्च (अष्टा. ४-१-६)** इति स्त्रीत्वे द्योत्ये ङीपि 'इयती' इति रूपम्। तत्र स्त्रीशब्दसमभिव्याहारे 'स्त्री इयती' इति दशायाम् इयत्-प्रत्यये परतः स्त्रीशब्दस्याङ्गत्वे **स्त्रियाः (अष्टा. ६-४-७९)** इति सूत्रेण इयङादेशः प्राप्नोति। अतः स्त्री इयती इत्यादिस्थले इयङादेशरूपातिव्याप्ति-दोषनिवारणाय सूत्रे विधिग्रहणं कृतम्। तदुक्तं श्रीभावबोधिनीकारेण— "कृते च विधिग्रहणे इयत्प्रत्ययस्य स्त्रीशब्दाद्विहितत्वाभावेन न स्त्रीशब्दस्याङ्गसंज्ञाप्रसक्तिः"[5] इति।

यद्यत्र "**स्त्रियाः**" इति सूत्रे 'असवर्णे' इति पदमनुवर्त्य असवर्णे अजादौ प्रत्यये परतः स्त्रिया इयङ् स्यादित्यर्थः क्रियते तर्हि अत्र विधिग्रहणाभावेऽपि स्त्री इयती इत्यत्र नेयङादेशप्राप्तिः। अतः अत्र दोषाभावात् दोषान्तरं प्रदर्श्यते- "तदा तु भनक्तीति प्रत्युदाहरणं देयम्। तत्र हि श्नमि परे 'भ' इत्यस्याङ्गत्वे 'अतो दीर्घो यञि' इति दीर्घापत्तेः"[6] इति। वस्तुतस्तु विधिः इति पदानुपादाने वारि औ इत्यत्र इकोऽचीति नुमापत्तिरभ्युपेया।

**प्रत्यये इति पदोपादानप्रयोजनम्**

ननु प्रत्यये इति पदानुपादानेऽपि तदादिपदेन प्रत्ययविशिष्टस्य व्यपदेशिवद्भावेन प्रकृतिमात्रस्य च ग्रहणादुभयोरप्यङ्गसंज्ञायां दोषाभावेन

[2] वैयाकरणसिद्धान्तकौमुदी, भट्टोजीदीक्षितः, गिरिधरशर्मा तथा परमेश्वरानन्दशर्मा (सम्पादकः) पृ.-१९४।
[3] वैयाकरणसिद्धान्तकौमुदी, श्रीभावबोधिनी व्याख्या, पृ.-५८।
[4] वैयाकरणसिद्धान्तकौमुदी, भट्टोजीदीक्षितः, गिरिधरशर्मा तथा परमेश्वरानन्दशर्मा(सम्पादकः) पृ.-१९४।
[5] वैयाकरणसिद्धान्तकौमुदी, श्रीभावबोधिनी व्याख्या, पृ.-६०।
[6] तत्रैव

 ISSN : 2583-2271
Vol. - 3, No. 1: 2023

सप्तम्यन्तप्रत्ययपदोपादानं किमर्थं चेदुच्यते- "प्रत्ययविशिष्टस्य ततोऽप्यधिकस्य वा मा भूत्"[7] इति। अर्थात् यस्मात्प्रत्ययविधिरितिसूत्रे प्रत्यये इति पदोपादानादेव प्रत्ययाव्यवहितपूर्वत्वविशिष्टस्य अङ्गसंज्ञालाभेनार्थापत्त्या अङ्गाधिकारसूत्रे 'प्रत्यये' इति सप्तम्यन्तपदमुपतिष्ठते। एवञ्च **उरत् (अष्टा. ७-४-६६)** इति सूत्रेऽपि सप्तम्यन्तप्रत्ययपदोपस्थित्या तद्विहितस्याभ्याससंज्ञक-ऋवर्णस्थानिकस्य अकारस्य परनिमित्त-कत्वेन **अचः परस्मिन् पूर्वविधौ (अष्टा. १-१-५७)** इति स्थानिवत्त्वात् **न सम्प्रसारणे सम्प्रसारणम् (अष्टा. ६-१-३७)** इति निषेधेन वव्रश्चेत्यत्र पुनः सम्प्रसारणं न भवति। प्रकृते प्रत्यये इति पदानुपादाने तु उरदिति अत्वस्य प्रत्ययपरत्वलाभानापत्तौ परनिमित्तकत्वाभावेन **अचः परस्मिन् पूर्वविधौ (अष्टा. १-१-५७)** इत्यस्य अप्राप्त्या अकारस्यात्र सम्प्रसारणत्वाभावेन **न सम्प्रसारणे सम्प्रसारणम् (अष्टा. ६-१-३७)** इति निषेधस्याप्राप्त्या वव्रश्चेत्यत्राभ्यासस्य पुनः **ग्रहिज्यावयिव्यधिवष्टिविचति-वृश्चतिपृच्छतिभृज्जतीनां ङिति च (अष्टा. ६-१-१६)** इति सम्प्रसारणापत्त्या वव्रश्चेत्यस्यासिद्धिः स्यात्। एतदेव टीकाकारेण - "सप्तम्यन्तप्रत्ययपदानुपादाने तु..."[8] इत्यादिना प्रतिपादितम्। अपि च ततोऽप्यधिकस्य अर्थात् प्रकृति-प्रत्ययसमुदायादधिकस्य अङ्गत्वे तु 'देवदत्तः ओदनमपाक्षीत्' इत्यादौ देवदत्तादि-शब्दोत्तरसुपं निमित्तीकृत्य लुङ्-पर्यन्तमङ्गत्वात्तस्य लुङ्-परत्वेन **लुङ्लङ्लृङ्क्ष्वडुदात्तः (अष्टा. ६-४-७१)** इत्यनेन देवात्पूर्वमप्यडापत्तिः स्यात्। अतः सूत्रे प्रत्यये इति पदोपादानम्।

**उपसंहारः**

संसारे प्रवृत्तानां सर्वासामपि विद्यानां मूलं भगवतो निःश्वासभूताः परमपूताः वेदा एव इत्यत्र नास्ति संशयलेशोऽपि। तत्र पुनः षड्वेदाङ्गेषु प्रधानं वर्तते व्याकरणम्। अत एव भाष्यकारेण उक्तम् – "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च, प्रधानं च षट्स्वङ्गेषु व्याकरणम्, प्रधाने च कृतो यत्नः फलवान् भवति"[9] इति। अतः प्रबन्धेऽस्मिन् वैयाकरणसिद्धान्तकौमुद्यन्तर्गतस्य अजन्तपुँलिङ्गप्रकरणस्थस्य **यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् (अष्टा. १-४-१३)** इति सूत्रस्य विषये आलोचना विहिता वर्तते। तत्रादौ सूत्रगतपदानां परिचयप्रदर्शनपुरस्सरं सूत्रार्थः स्पष्टीकृतः। अनन्तरं तत्रत्यानां विध्यादिपदानामुपादानप्रयोजनविषये श्रीभावबोधिनीव्याख्यान-दिशा विस्तरेण चर्चा कृता। तेषां च पदानाम् अनुपादाने दोषाः दोषस्थलाश्च प्रदर्शिताः, प्रदानेन च तेषां समाधानमपि प्रदर्शितम् इति शिवम्।

**सहायकग्रन्थसूची**


- भट्टोजीदीक्षितः। (२०११)। वैयाकरणसिद्धान्तकौमुदी (प्रथमभागः)। शर्मा, गिरिधरः तथा शर्मा, परमेश्वरानन्दः (सम्पादकः)। दिल्ली : मोतिलाल बनारसीदास।
- भट्टोजीदीक्षितः। (१९२५)। वैयाकरणसिद्धान्त-कौमुदी। करपुटुगल श्री धर्म्मश्री (व्याख्याकारः)। वाराणसी : जयकृष्णदासगुप्ता।
- भट्टोजीदीक्षितः। (१९६६)। वैयाकरणसिद्धान्त-कौमुदी। शर्मा, सभापतिः (व्याख्याकारः)। शर्मपञ्चुली, बालकृष्णः(सम्पादकः)।वाराणसी : श्याम वाराणसी प्रेस।
- भट्टोजीदीक्षितः। (२००७)। प्रौढमनोरमा। त्रिपाठी, जयशङ्करलालः (सम्पादकः व्याख्याकारश्च)। वाराणसी : चौखम्बा कृष्णदास अकादमी।
- पतञ्जलिः। (२००६)। व्याकरणमहाभाष्यम्। शास्त्री, गुरुप्रसादः (सम्पादकः)। दिल्ली : राष्ट्रियसंस्कृतसंस्थानम्।


[7] वैयाकरणसिद्धान्तकौमुदी, भट्टोजीदीक्षितः, गिरिधरशर्मा तथा परमेश्वरानन्दशर्मा (सम्पादकः) पृ.-१९४।

[8] वैयाकरणसिद्धान्तकौमुदी, श्रीभावबोधिनी व्याख्या, पृ.-६१।

[9] व्याकरणमहाभाष्यम्, पतञ्जलिः, जयशङ्करलालत्रिपाठी (सम्पादकः) पृ.-२५।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023


- पतञ्जलिः। (२०१७)। व्याकरणमहाभाष्यम्। त्रिपाठी, जयशङ्करलालः (सम्पादकः)। वाराणसी : चौखम्बा कृष्णदास अकादमी।
- वामनः जयादित्यः च। (१९८५)। काशिका। त्रिपाठी, जयशङ्करलालः तथा मालवीयः, सुधाकरः (सम्पादकः)। दिल्ली : तारा बुक एजेन्सि।
- नागेशभट्टः। (२००१)। लघुशब्देन्दुशेखरः (चन्द्रकलाटीकया सहितः)। मिश्रः, भैरवः (टीकाकारः)। शास्त्रिपेण्डसे, नरहरिः (सम्पादकः)। वाराणसी : चौखम्बासंस्कृतसंस्थानम्।
- पाणिनिः। (२००९)। अष्टाध्यायी। पाण्डेयः, गोपालदत्तः (सम्पादकः)। वाराणसी : चौखम्बासुरभारती-प्रकाशनम्।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# स्वतन्त्रा ऋषयः

**कृष्णपद-रुइदासः**
**शोधच्छात्रः, व्याकरणविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः**
**तिरुपतिः, अन्ध्रप्रदेशः, ५१७५०७**

---

**प्रबन्धसारः**

*ऋषयः कवयः। ऋषिश्च किल दर्शनात्। कविदर्शनं नाम रसतदुपायभूतनववार्थोन्मेषकं काव्यप्रादुर्भावफलकम्।* ***कविः क्रान्तदर्शनः***, **कविः क्रान्तदर्शी**** इत्यादिवचोभिः कवेः **ऋषित्वं**# सूपपादितम्। तत्र साधुशब्दप्रयोगे महाकविप्रयोगाभिमुखा वैयाकरणा दृश्यन्ते। व्याकरणं हि शब्दसाधुत्वविवेचकं शास्त्रम्। प्रायः सर्वेषां शब्दानां व्युत्पत्त्याधायकत्वात् व्याकरणशास्त्रं वेदपुरुषस्य मुखत्वेन## प्रत्यपादि। भाषाकौशलं हि प्रायः काव्यतः शिक्षणीयम् इति वदन्ति विचक्षणाः। पदप्रयोगविज्ञानं कविकाव्येषु यथा प्रसीदति, न तथाऽन्यत्र। तथापि तादृशमहाकाव्यादिषु केचन प्रयोगाः समुपलभ्यन्ते, ये सामान्यनियमेन न व्युत्पादयितुं शक्यन्ते। तत्र ज्ञापकादिवचनग्रहणादेव शब्दानां साधुत्वं विज्ञाप्यते। तादृशन्यायः तत्प्रतिपादकदृष्टान्तैः सह सम्प्रति प्रस्तूयते।*

**कुञ्चीशब्दाः** – घिसंज्ञा, कविः, ऋषिः, पतिः, समासः चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

**मुख्यप्रबन्धः**

ते कवयः काव्यनिर्माणरूपतपोबलेन उच्चारितान् अव्युत्पन्नान् शब्दान् अपि साधूकुर्वन्ति। तेन **सीतायाः पतये नमः, सखिना वानरेन्द्रेण** इत्यादिप्रयोगाः सङ्गच्छन्ते। अयमर्थः – संस्कृतशास्त्रे सर्वेऽपि शब्दा धातुजाः व्युत्पन्नाश्च, केचन एवाव्युत्पन्नाः डित्थडवित्यादयः। तेषामप्यर्थवत्त्वात्प्रातिपदिकसंज्ञायां सुबुत्पत्तिः प्रयोगश्च दृश्यत इह। किन्तु साधुशब्दप्रयोगे व्याकरणशास्त्रमनुसरन्ति काव्यविदः। यद्वोच्यते **सीतायाः पतये नमः** इत्यत्र समासे एव घिसंज्ञायां सत्यां पतये इति रूपसिद्धिसम्भवात्, सखिना वानरेन्द्रेण इत्यत्र च सखिपदस्य घिसंज्ञाभावाच्च कथमीदृशप्रयोक्तृकृतकाव्यं महाकाव्यत्वं भजते। यतो हि सीतापतये, सख्या चेति प्रयोक्तव्ये समासराहित्यस्यापि घिसंज्ञा विहिता। किञ्च समुदाये सखिरूपत्वाभावात् सुसखि इत्यादिस्थले घिसंज्ञा सिद्ध्यत्येव, अत्र समुदायत्वाभावात् साक्षात्तत्पदस्य घिसंज्ञा कृता। एवञ्च तेषां प्रयोगाणां साधुत्वसम्पादनाय कवीनामार्षत्वं प्रतिपादितम्। ऋषयः खलु स्वतपोबलेन प्रयुक्तानामपि शब्दानां साधुत्वं सम्पादयन्ति। अतः तत्र तत्र अपशब्दप्रयोगात् ते साधुत्वेनैव विवेचनीया इति सिद्धान्तिते–

**आक्षेपः**

कथमुच्यते? स्मृतिपाठादन्यत्र स्वाच्छन्द्येनेदृशप्रयोगम् चरतामस्मादृशानां यज्ञकर्मणि अपशब्दोच्चारणजन्यं पापं भवत्येव। न हि केवलं विभक्तिवचनयुक्ताः, अपि च स्वरयुक्ताः प्रयोगाः कर्तव्याः। तादृशदोषयुक्तशब्दोच्चारणेन ब्रह्महत्याजन्यं पापं लभते अवाग्योगवित्। उक्तं च **महाभाष्ये**[1] -

> **दुष्टः शब्दः स्वरतो वर्णतो वा**
> **मिथ्याप्रयुक्तो न तमर्थमाह।**
> **स वाग्वज्रो यजमानं हिनस्ति**
> **यथेन्द्रशत्रुः स्वरतोऽपराधात्॥**

---

*निरुक्तम् ३/१२/४

**ईशावास्योपनिषत् ८, शाङ्करभाष्यम्।

#काव्यकौतुके भट्टतोतः।

##मुखं व्याकरणं स्मृतम् – पाणिनीयशिक्षा ४१-४२

[1] पस्पशाह्निके द्वितीयगौणप्रयोजनमिदम्।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

एवञ्च एकस्य हि गोशब्दस्य गावी, गोणी, गोता, गोपोतलिकेत्येवमादयो नैकेऽपभ्रंशाः सन्ति। तेषामपशब्दानां प्रयोगेण अवाग्योगविदपशब्दैः दुष्यति, अज्ञानशरणात्। वाग्योगवित्तु अनन्तं जयं लभते, विज्ञानशरणात्।

**शतपथब्राह्मणे** (१/५/२/१)[2] आख्यानमिदमुपलभ्यते यत् कदाचित् इन्द्रः विश्वरूपं जघान, येन तत्पिता त्वष्टा क्रुद्धः सन् इन्द्रघातकं पुत्रमिच्छुः आभिचारिकयज्ञं सम्पादयामास। तस्मिन् यज्ञकर्मणि **स्वाहेन्द्रशत्रुर्वर्धस्व** इति मन्त्रं प्रयुयुजिरे। इन्द्रशत्रुः इति पदेऽस्मिन् द्विविधं विग्रहवाक्यं, द्विविधः समासः च – इन्द्रस्य शत्रुः इति षष्ठीतत्पुरुषः, इन्द्रः शत्रुः यस्य सः बहुव्रीहिसमासः। तत्र इन्द्रशत्रुपदे अन्तोदात्तस्वरस्याविधानात् पूर्वपदप्रकृतिस्वरविधानात् च इन्द्रः शातयिता यस्य स एतादृशः इत्यर्थोत्पन्नत्वात् यज्ञेन समुद्भूतं वृत्रम् इन्द्र एव आजघ्ने। अतः स्वरयुक्ताशब्दानां प्रयोगेण उत्पन्नो हन्ता हतः।

तर्हि **सीतायाः पतये नमः** इत्यत्र घित्वप्रयुक्तपतिशब्दः कथं प्रयुक्तः? **पतिः समास एव** (अ.ध्या.१/४/८) इत्यनेन सूत्रेण पतिशब्दस्य समासे एव घिसंज्ञाविधानात्। तेन पति ङे इति स्थिते पत्ये इति रूपस्य विधानं युक्तम्। कथं हि **घेर्ङिति** (अ.ध्या.७/३/१११) इत्यनेन गुणे, अयादेशे पतये इति रूपं प्रयुङ्क्ते? एवं हि **सखिना वानरेन्द्रेण**[3], इत्याद्यशुद्धप्रयोगाः दृश्यन्ते। अत्र **शेषो घ्यसखि** (अ.ध्या.१/४/७) इत्यनेन सूत्रेण सखिवर्जितस्य घिसंज्ञाविधानात् व्यर्थं हि **आङो नाऽस्त्रियाम्** (अष्टाध्यायी ७/३/१२०) इत्यनेन नादेशविधानं, दृश्यते हि नादेशयुक्तम्।

**समाधानम्**

(१) **सीतायाः पतये नमः** इत्यस्य प्रयोगस्यार्षत्वाच्छुद्धत्वमस्त्येव। वैदिकप्रकरणस्थेन **षष्ठीयुक्तश्छन्दसि वा** (अ.ध्या.१/४/९) इत्यनेन सूत्रेण षष्ठीविभक्तियुक्तेन सीतापदेन सह युक्तस्य पतिशब्दस्य घिसंज्ञा विधीयते। तेन पतिशब्दस्य घिसंज्ञायां सत्यां पतये इति रूपं सिद्ध्यति।

(२) पतिरिख्यातः पतिः। पा रक्षणे इत्यस्माद्धातोः **तत्करोति तदाचष्टे** इत्यनेन णिचि, **णेरनिटि** (अ.ध्या.६/४/५१) इत्यनेन णिलोपे **अच इः** (उणादिः ४/१३८) इत्यनेन औणादिकः इ-प्रत्ययः। तेन पतिशब्दो निष्पद्यते। अस्य च पतिशब्दस्य **पतिः समास एव** इत्यत्रोक्तपतिशब्देन न ग्रहणम्। अतः घिसंज्ञायाम् असत्यां पतये इति प्रयोगः साधुः, लाक्षणिकत्वात्।

(३) सखिशब्देऽपि असखीति पर्युदासः[4]। **शेषो घ्यसखि** इत्यस्मिन् सूत्रे न सखि असखि इति पर्युदासप्रतिषेधाश्रयणात् सखिशब्देऽपि घिसंज्ञा विधीयते। तेन सखि टा इत्यत्र **आङो नाऽस्त्रियाम्** इत्यनेन नादेशे सखिना इति रूपं सिद्ध्यति।

(४) सीतायाः पतये इति समस्तं पदमित्यङ्गीकर्तुं शक्यम्। तेन सीतायाः पतये इत्यत्र समासे सति प्रातिपदिकावयवस्य सुपः अलुग्भवति। अतः **सुपो धातुप्रातिपदिकयोः** (अ.ध्या.२/४/७१) इत्यनेन सुपो लुकि प्राप्ते, तस्यालुग्विधीयते। किन्तु **तत्पुरुषे कृति बहुलम्** (अ.ध्या.६/३/१४) इत्यनेन सूत्रेण सप्तम्या अलुग्विधीयते। तर्हि सीतायाः इत्यस्मिन् पदे षष्ठ्याः कथम् अलुगारभ्यते? बाहुलकस्य **क्वचिदन्यदेव**[5] इत्यर्थग्रहणात् षष्ठ्या अपि अलुग्विधानं शक्यम्।

एवञ्च समासे एव पतिशब्दस्य घिसंज्ञाविधानात् **किरातार्जुनीये**[6] **भारविः** वाचस्पतेः इति घिसंज्ञाम् आचकले –

---

[2] अथ यदब्रवीत् – **इन्द्रशत्रुर्वर्धस्व** इति तस्मादु हैनमिन्द्र एव जघान। अथ यद्ध शश्वदवक्ष्यत् – इन्द्रस्य शत्रुर्वर्धस्व शश्वदुह स इन्द्रमेवाहनिष्यत।

[3] रामायणम्, त.बो. २५७

[4] नञर्थौ द्वौ समाख्यातौ पर्युदासप्रसज्यकौ।
पर्युदासः सदृग्ग्राही प्रसज्यस्तु निषेधकृत्॥

[5] क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः
क्वचिद्विभाषा क्वचिदन्यदेव।
विधेर्विधानं बहुधा समीक्ष्य
चतुर्विधं बाहुलकं विधन्ति॥

[6] ११/४३

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

**अविज्ञातप्रबन्धस्य वचो वाचस्पतेरपि।**
**व्रजत्यफलतामेव नयद्रुह इवेहितम्॥**

वाचः पतिः इति विग्रहे षष्ठीतत्पुरुषसमासे पूर्ववल्लुकि प्राप्ते बाहुलकत्वात् अलुग्विहितम्। कस्कादित्वात् सः। वाचः पतिः इत्यत्र **कस्कादिषु च** (अ.ध्या.८/३/४८) इत्यनेन विसर्गस्य सकारादेशेन वाचस्पतिः इति शब्दनिष्पत्तिः। अथवा **षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु** (अ.ध्या.८/३/५३) इत्यनेन सूत्रेण छान्दसत्त्वात् विसर्गस्य सकारादेशे वाचस्पतिः इति शब्दो निष्पद्यते। उक्तञ्चेदं सर्वं तत्रैव **घण्टापथे**[7]**।**

कैश्चन वास्तोष्पतिशब्दस्य निपातनात् पतिशब्दे परे सामान्यतः अलुग्ज्ञाप्यते। **द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पति-गृहमेधाच्छ च** (अ.ध्या.४/२/३२) इत्यस्मिन् सूत्रे निपातनात् अलुक् सत्वं च।

अपरे तु **षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु** इत्यनेन सूत्रेण सत्वविधानसामर्थ्यात् लोकवेदसाधारण्येन वृद्धकुमारीवर[8]न्यायेन अलुग्ज्ञाप्यत इत्याहुः।

वाचस्पतिशब्दात्समस्तादेव ष्यञ् यक् वा सिद्ध्यति। यथा प्रयुक्तं **शिशुपालवधे**[9] **माघेन –**

**आत्मोदयः परज्यानिर्द्वयं नीतिरितीयती।**
**तदूरीकृत्य कृतिभिर्वाचस्पत्यं प्रतायते॥**

वाचस्पतिशब्दे कस्कादित्वादलुक् सत्वं च विहितम्। वाचस्पतिशब्दात् समस्तात् **गुणवचनब्राह्मणादिभ्यः कर्मणि च** (अ.ध्या.५/१/१२४) इत्यनेन भावे ष्यञ्प्रत्यये सति वाचस्पत्यम् इति रूपं सिद्ध्यति। उक्तञ्चेदं सर्वं तत्रैव **सर्वाङ्कषायाम्**[10]**।** सिद्धान्तकौमुद्यां भट्टोजीदीक्षितः **षष्ठ्याः पतिपुत्रपृष्ठपारपद-पयस्पोषेषु** इत्यस्मिन् सूत्रे **वाचस्पति विश्वकर्माणम्** इति पृथगेव पदं पपाठ।

**उपसंहारः**

प्रयोगशरणा वैयाकरणाः इति सुप्रसिद्धिः। प्रयोगश्चात्र शिष्ट[11]वचनम्। काव्ये शिष्टाः कवयः। कविशब्दः यथा काव्यकर्तरि तथा ऋषौ प्राज्ञे परमात्मनि च वर्तते। ऋषेः योगसमाधिः दर्शनसर्वस्वं, कवेस्तु रसस्पर्शकप्रतिभासमाधिः इति विवेकः। तादृशानां कवीनाम् असाधुशब्दप्रयोगेण न हि शिष्टत्वं सङ्गच्छते। **छन्दोवत्कवयः कुर्वन्ति**[12] इति वचनात् श्लोकानुपपत्तिप्रसङ्गोऽसङ्गतः, छान्दसत्वात्। किं तर्हि तदुच्चारयितृणामस्मादृशानामपि प्रत्यवायो भवतीति चेन्न, ऋषीणां तपोमाहात्म्यबलात् अस्माकमपि श्रुतिस्मृतिपुराणाध्ययनविधि-बलाच्च तदन्तर्गततत्पाठे दोषाभावः। अतः स्वातन्त्र्येण असाधुशब्दप्रयोगे कवीनाम् ऋषीणां वा प्रत्यवायाभावः इति शम्।

**सहायकग्रन्थसूची**


- झा परमेश्वरः। (१९०५)। प्रयोगदर्पणः। झा शशिनाथः (सम्पा.)। बिहारः : कामेश्वर सिंहं दरभाङ्गा संस्कृत विश्वविद्यालयः।
- पाणिनिः। (२०१०)। अष्टाध्यायी। दीक्षिता पुष्पा (सम्पा.)। नई दिल्ली : संस्कृतभारती।
- भट्टोजिदीक्षितः। (२०१७)। वैयाकरणसिद्धान्तकौमुदी (मूलमात्रम्)। गोविन्दाचार्यः (सम्पा.)। नई दिल्ली : चौखम्बा-सुरभारती-प्रकाशनम्।
- पतञ्जलिः। (२०२१)। महाभाष्यम्। शास्त्री श्रीभार्गवः (सम्पा.)। नई दिल्ली : चौखम्बा-संस्कृत-प्रतिष्ठानम्।


[7] कस्कादित्वात्सः। अथवा **षष्ठ्याः पतिपुत्रपृष्ठपारपदयस्पोषेषु** इति सकारः। एतस्मादेव ज्ञापकादलुगिति केचित्।

[8] **न मु ने** (८/२/३) इति सूत्रभाष्ये स्पष्टम्।

[9] २/३०

[10] कस्कादित्वादलुक्सत्वे। **षष्ठ्याः पतिपुत्र**-(८/३/५३) इत्यादिना सत्वमिति स्वामी तन्न। तस्य छन्दोविषयत्वात्। ब्रह्मणादित्वाद्भावे ष्यञ्प्रत्ययः।

[11] ये ब्राह्मणाः कुम्भीधान्याः अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण कस्याश्चिद्विद्यायाः पारंगतास्तत्रभवन्तः शिष्टाः – महाभाष्यम्।

[12] महाभाष्ये **यू स्त्र्याख्यौ नदी** (१/४/३) इत्यस्मिन् सूत्रभाष्ये।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023


- वामनजयादित्यौ। (१९९२)। प्रौढमनोरमा। शास्त्री सीतारामः (सम्पा.)। वाराणसी : काशी-हिन्दू-विश्वविद्यालयः।
- नागेशः। (१९९८)। लघुशब्देन्दुशेखरः। मिश्रः आचार्यविश्वनाथः (सम्पा.)। नई दिल्ली : चौखम्बा-संस्कृत-प्रतिष्ठानम्।
- कालिदासः। (२०१७)। रघुवंशम्। झा रामचन्द्रः (सम्पा.)। वाराणसी : चौखम्बा-कृष्णदास-अकादमी।
- माघः। (२०२१)। शिशुपालवधम्। शास्त्री श्रीपण्डितः हरगोविन्दः (सम्पा.)। वाराणसी : चौखम्बा-विद्याभवनम्
- भारविः। (२०२०)। किरातार्जुनीयम्। मिश्रः श्रीबदरीनारायणः (सम्पा.)। वाराणसी : चौखम्बा-सुरभारती-प्रकाशनम्।
- भट्टतोतः। (२०१८)। काव्यकौतुकम्। सिघलः डः विनयकुमारः (सम्पा.)। नई दिल्ली : चौखम्बा विद्याभवनम्।
- यास्कः। (२०१८)। निरुक्तम्। पाठकः डा. जमुना (सम्पा.)। वाराणसी : चौखम्बा-संस्कृत-सीरिज-अफिस्।
- शङ्काराचार्यः। (१९९२)। ईशावास्योपनिषच्छाङ्करभाष्यम्। जालानः घनश्यामदासः (सम्पा.)। गोरखपुर : गीताप्रेसः।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# "भाव्यमानोऽण् सवर्णान्न गृह्णाति" "अर्थवद्ग्रहणे नानर्थकस्य" इत्यनयोः परिभाषयोः समीक्षात्मकमध्ययनम्

**अमितकुमार-साउः**
**शोधच्छात्रः, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानम्**
**वेलुडमठः, पश्चिमबङ्गराज्यम् – ७११२०२**

---

***प्रबन्धसारः –***

*स्वजीवनस्य लक्ष्यसाधनाय स्वीकृते मार्गे कदाचिन्मध्यमार्गे द्वौ पन्थानौ युगपदुपस्थितौ भवतः। तदा वयं लक्ष्यनाशाय शङ्कामहे। तदानीमेव कश्चन सज्जनः सद्गुरुर्वा यथा अस्माकं दिङ्निर्देशं करोति तथैव व्याकरणे क्वचिदेकस्मिन्नेव लक्ष्ये एकाधिकानि लक्षणानि समुपतिष्ठन्ति। एकस्मिन् लक्ष्ये एककालमेकस्यैव लक्षणस्य प्रवृत्तियोग्यत्वात् अनियमः भवति। यत्र च अनियमो भवति तत्र नियम उपतिष्ठते। तस्मिन्नेव अनियमे नियमं करोति परिभाषा। व्याकरणपरिभाषाशास्त्रं सुविशालं सुविस्तृतञ्च वर्तते। नागेशेन विरचितात् परिभाषेन्दुशेखरात्प्रागपि पञ्चदशभिराचार्यैः परिभाषापाठः कृतः। तेषु सर्वेष्वपि परिभाषाग्रन्थेषु व्याडिकृतः परिभाषाग्रन्थः प्राचीनतम इति विद्वांसः मन्वते। व्याड्यनन्तरं शाकटायनेनाऽपि परिभाषापाठः कृतः। दुर्गासिंहेनाऽपि कातन्त्रपरिभाषासूत्राणामुपरि एका वृत्तिर्विरचिता। एवञ्च अनुव्याडि पुरुषोत्तमदेवेनैव पाणिनिमनुसृत्य परिभाषावृत्तिर्विरचिता। अनेन लौकिकशब्दानां सिद्धये अष्टाध्यायीसूत्राणामुपरि 'भाषावृत्तिः' इत्याख्यो ग्रन्थो विरचितः। अनुपुरुषोत्तमदेवं केभ्यश्चिद् वर्षेभ्यः परं सीरदेवेन परिभाषाणामुपरि 'बृहत्परिभाषावृत्तिः' इत्यभिधेयो ग्रन्थो व्यरच्यत। अस्मिन् लघुशोधप्रबन्धे "भाव्यमानोऽण् सवर्णान्न गृह्णाति" "अर्थवद्ग्रहणे नानर्थकस्य" इत्यनयोः परिभाषयोः उपरि समीक्षात्मकमध्ययनं कृतम्। अनयोः परिभाषयोः उपरि व्याडिपुरुषोत्तमदेवसीरदेवनागेशाचार्यादीनाम् आचार्याणां किं मतं, कश्च अभिप्रायः तेषां कुत्र मतपार्थक्यं कुत्र च सादृश्यम्, अनयोः परिभाषयोः किं ज्ञापकं तैः तैः आचार्यैः स्वीकृतं, कुत्र च परिभाषायाः अनित्यत्वं स्वीकृतम् इत्यादयः विषयाः पर्यालोचिताः।*

**कुञ्चीशब्दाः** – परिभाषा, परिभाषार्थः, ज्ञापकम्, परिभाषाफलम्, समीक्षा चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

**॥ भाव्यमानोऽण् सवर्णान्न गृह्णाति ॥**

**परिभाषार्थः** - भाव्यमानः नाम विधीयमानः। विधीयमानः अण् सवर्णान्न गृह्णातीत्यर्थः।

**परिभाषायाः फलम्** - इहेत्यादौ '**इदमः इश्**' (अ. ५/३/३) अनेन सूत्रेण इदमः स्थाने इशादेशो विधीयते। परन्तु अस्याः परिभाषायाः स्वीकारात् इदमः त्रिमात्रस्य स्थाने त्रिमात्रादेशो न भवति। तथा च लविता लवितुमित्यादौ '**वॄतो वा**' (अ. ७/२/३८) **इ**ति विकल्पेन इटः दीर्घविधानाज्ज्ञायते विधीयमानोऽण् सवर्णान्न गृह्णाति।

**परिभाषायाः ज्ञापकम्** - केचन सुखेन प्रतिपत्त्यर्थं क्रीणीते, मिमीते इत्यादौ श्ना-विकरणस्य '**ई हल्यघोः**' (अ. ६/४/११३) इत्यनेन सूत्रेण विधीयमानं दीर्घेकारग्रहणमस्याः ज्ञापकमिति कथयन्ति। यतः यदि विधीयमानः अण् स्वीयान् सवर्णान् गृह्णीत तदा प्रकृतसूत्रे ह्रस्वस्यैवेकारस्य ग्रहणेन आकारस्य स्थाने सवर्णग्रहणेन दीर्घादेशः स्यात् तदर्थं सूत्रे पृथक्तया दीर्घग्रहणं व्यर्थं सज्ज्ञापयति 'भाव्यमानोऽण् सवर्णान्न गृह्णातीति'।

**परिभाषायाः अनित्यत्वविचारः** - इयं परिभाषा अनित्या। अतः अमू-इत्यादौ '**अदसोसेर्दादु दो मः**' (अ. ८/२/८०) इत्यनेन सूत्रेण ह्रस्वस्यैवोकारस्य पाठे सत्यपि दीर्घस्यादेशः भवति। अत इयं परिभाषा अनित्या अर्थात् क्वचित् विधीयमानस्थलेऽपि अण् सवर्णान् गृह्णातीत्याशयः। अस्या अनित्यत्वे 'दिव उत्' (अ. ६/१/१३१) इत्यत्र तपरकरणमेवास्या ज्ञापकम्। यतः दिवः स्थाने '**च्छ्वोः शूडनुनासिके च**' (अ. ६/४/१९) इत्यनेन सूत्रेण ऊठादेशे

सत्यपि विधीयमानस्य सवर्णग्रहणनिषेधात् अयं सवर्णान् न गृह्णेत तदा ऊठः स्थाने ह्रस्वादेशः सिध्यत्येव तथापि ह्रस्वादेशार्थं सूत्रे तपरकरणं ज्ञापयति क्वचिद्भाव्यमानोऽण् सवर्णान् गृह्णातीति।

**समीक्षा** – सीरदेववद्व्याडि-पुरुषोत्तमदेव-नीलकण्ठ-प्रभृतयः समानस्वरूपेण इमां परिभाषां पठितवन्तः। परन्तु आचार्यः नागेशः किञ्चिद्भिन्नस्वरूपेण इमां पठितवान्।[1] नागेशाचार्यस्तु भाष्यकारमनुसृत्य परिभाषास्वरूपम् उपन्यस्तवान्।[2] परिभाषार्थः सर्वेषां नये समान एव। पाणिनीयपरम्परायाम् अणुदित्सूत्रेण, जातिपक्षे, गुणानामभेदकत्वपक्षे च सवर्णः गृह्यते। अनया परिभाषया विधीयमानस्थलेषु एतेषां सवर्णनिषेधो बोध्यते। दीक्षिताचार्येण **अप्रत्ययः** इत्यत्र यौगिकार्थः स्वीकृतः। तेन अणुदित्सूत्रस्य अविधीयमानोऽण् सवर्णान् गृह्णातीति सूत्रार्थः कृतः। एवञ्च भाव्यमानस्थलेषु सर्वत्र सवर्णग्राहकताया निषेधे सम्भवे आगमादेशयोः सवर्णग्राहकत्वनिषेधार्थं 'टित्किन्मित्सूपसंख्यानं कर्तव्यमि'ति वार्तिकोक्तवचनं व्यर्थं स्यात्। अतः अणुदित्सूत्रे **अप्रत्ययः** इत्यस्य रूढ्या प्रत्ययमात्रार्थस्स्वीकृतः। ततश्च योगविभागेन प्रत्ययः सवर्णस्य ग्राहको न भवतीत्यर्थः स्वीकर्तव्यः। परन्तु तथापि अप्रत्ययग्रहणं व्यर्थम् यतः प्रत्यये अनभिधानात् सवर्णग्राहकत्वं नास्ति, आदेशे च मिमीते इत्यादौ दीर्घविधानार्थं 'ई हल्यघोः' (अ. ६/४/११३) इत्यत्र दीर्घग्रहणं ज्ञापयति आदेशे सवर्णग्रहणं न भवति, आगमे च 'वृतो वा' (अ. ७/२/३८) इत्यत्र वा इटः दीर्घविधानं ज्ञापयति आगमेऽपि सवर्णग्राहकता न भवतीति। एवञ्च पूर्वोक्तस्थलेषु प्रकारान्तरेणैव सवर्णग्रहणाभावः सिद्धः तथापि यदप्रत्ययः इति प्रतिषेधं शास्ति तज्ज्ञापयति भाव्यमानेन सवर्णानां ग्रहणं नेति नागेशाचार्यस्याशयः। अप्रत्ययः इति प्रतिषेधः एकदेशानुमत्या परिभाषायाः ज्ञापकः। अर्थात् प्रत्ययः, आगमः आदेशश्च त्रयः भाव्यमानाः। एतेषु त्रिषु स्थलेषु सवर्णग्राहकत्वं नेष्यते। तस्मात् आचार्येण नागेशेन अणुदित्सूत्रस्यैव अर्थरूपेयं परिभाषा इति स्वीकृता। तथा च सुखेन प्रतिपत्त्यर्थं ज्याद ईयसः इति कर्तव्ये यत् 'ज्यादादीयसः' (अ. ६/४/१६०) इति दीर्घोच्चारणमेवास्याः ज्ञापकमित्यप्युक्तम्।

परन्तु नीलकण्ठदीक्षिताचार्यस्तु अस्यां परिभाषायामसत्याम् अणुदित्सूत्रस्थस्य अप्रत्ययः इति प्रतिषेधस्य उदिदंशेन सह अन्वयः स्यात्तदर्थं तन्निवारणाय इयं परिभाषा पठिता इति जग्राह। सीरदेवेन 'दिव उत्' इत्यत्र तपरकरणेन परिभाषायाः अनित्यता ज्ञापिता। परन्तु नागेशाचार्यः **दिव उत्** इत्यत्र तपरकरणेन पृथग्परिभाषां ज्ञापितवान् – **भाव्यमानोऽप्युकारः सवर्णान् गृह्णाती**ति। तथा च 'चोः कुः' (अ. ८/२/३०) इत्यादौ उदिदुच्चारणसामर्थ्यात् सवर्णग्रहणमिति। अर्थात् नागेशाचार्यः अस्याः परिभाषायाः अनित्यत्वं नैव स्वीचकार। नीलकण्ठदीक्षितोऽपि **'उर्ऋत्'** इति (अ. ७/४/७) तपरकरणेन परिभाषाया अनित्यत्वं स्वीकृतवान्। श्रीमच्छेषाद्रिसुधीमहोदयस्तु पृथग्परिभाषामेव करोति – "क्वचिद्भाव्यमानोऽप्यण् सवर्णान् गृह्णाती"ति। व्याडिः 'ई हल्यघोः' (अ. ६/४/११३) इति सूत्रे दीर्घेकारपाठमेव अस्याः परिभाषायाः ज्ञापकमित्यभिमन्यते।[3] पुरुषोत्तमदेवः अपि इदमेव ज्ञापकमित्यभिमन्यते। परन्तु स 'केचित् पुनरिमां ज्ञापकसिद्धां पृथग्परिभाषां नेच्छन्ति' इत्यादिना उक्तवान् यदेषा ज्ञापकसाधनीया पृथग्परिभाषा न अपि तु 'अणुदित्सवर्णस्य चाऽप्रत्ययः' इति सूत्रोक्तस्य 'अप्रत्ययः' इति पदस्यैवार्थरूपेयं परिभाषा।

**॥ अर्थवद्ग्रहणे नानर्थकस्य ॥**

**परिभाषार्थः** - अर्थोऽस्यास्तीति अर्थवान्। शास्त्रे अर्थवदनर्थवतोः विचारे सति अर्थवत एव शास्त्रविहितानि कार्याणि भवन्ति नाऽनर्थकस्य इति।

**परिभाषाज्ञापनम्** - 'स्वं रूपं शब्दस्याशब्दसंज्ञा' (अ. १/१/६८) इति सूत्रभाष्ये भाष्यकारेण इयं परिभाषा ज्ञापिता। स्वं रूपं शब्दस्याशब्दसंज्ञेति सूत्रस्यार्थस्तावत् – व्याकरणशास्त्रे संज्ञाशब्दान् परित्यज्य अन्यत्र शब्दग्रहणेन स्वरूपग्रहणं भवति। संज्ञाशब्दानां ग्रहणेन तु

[1] भाव्यमानेन सवर्णानां ग्रहणम् न, प.शे, प.सं. १९।

[2] म., सू.सं १/१/६९

[3] व्या.वृ प.सं. ३०।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

अर्थग्रहणं भवति। तत्र भाष्यकारेण शङ्का कृता अस्मिन् सूत्रे स्वमिति पदं किमर्थम्? रूपमिति शब्देनैव शब्दस्वरूपमिति अर्थे सिद्धे तत्र पुनः स्वशब्दग्रहणमर्थनिर्देशार्थं दीयते इति भाष्यकारस्योत्तरम्। अर्थात् अत्र **स्व** इति शब्दः अर्थः इत्यस्मिन्नर्थे प्रयुज्यते। एवं क्रियमाणे अर्थवता शब्देन स्वस्य ग्रहणं भवति इति सूत्रार्थः फलति। अस्य अन्योऽप्यर्थः सम्भवति – अनर्थकशब्देन सह कस्यापि ग्रहणं न भवति इति वक्तुं शक्यते। अर्थात् कस्यापि शब्दस्य उच्चारणेन तस्य सार्थकस्यैव अर्थवतः शब्दस्य ग्रहणं भवति, न तु निरर्थकस्येति भाष्यकारेण ज्ञापितेयं परिभाषा।

तथा च 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' (अ. ८/२/३६) इत्यत्र भ्राजग्रहणम् अस्याः ज्ञापकम्। यदि एकदेशस्यापि अर्थवत्त्वं स्यात् तदानीं राजग्रहणेनैव भ्राजस्य ग्रहणं भवेदेव अतः सिद्धे सति यदुभयोः ग्रहणं कृतं तज्ज्ञापयति "अर्थवद्ग्रहणे नाऽनर्थकस्य" इति।

**परिभाषाफलम्** - परिभाषायाः फलं तावत्, डुधाञ्-धारणपोषणयोः इति धातोः '**अन्येभ्योऽपि दृश्यन्ते**' (अ. ३/२/७५) इति सूत्रेण कर्त्रर्थे क्वनिप्-प्रत्यये कर्तृरूपार्थवत्त्वात् प्रकृतपरिभाषापरिष्कृतेन क्वनिपः अनुबन्धलोपादिकार्ये सिद्धे क्वनिपः नकारस्य '**वनो र च**' (अ. ४/१/७) इति सूत्रेण रेफादेशे वन्नन्तस्य समुदायानन्तरं स्त्रीप्रत्यये ङीपि प्रक्रियाकार्ये धीवरीति रूपं सिद्ध्यति।

तथैव पिवरीत्यत्र पा-पाने धातोः पा-स्थाने पिबादेशे तस्मात् '**अन्येभ्योऽपि दृश्यन्ते**' इति सूत्रेण कर्त्रर्थे वनिप्-प्रत्यये वनिपः कर्तृरूपार्थवत्त्वात् प्रकृतपरिभाषापरिष्कृतेन वनिपः अनुबन्धलोपादिकार्ये सिद्धे वनिपः नकारस्य '**वनो र च**' इति सूत्रेण रेफादेशे वन्नन्तस्य च स्त्रीप्रत्यये ङीपि प्रक्रियाकार्ये पीवरीति रूपं सिद्ध्यति। अत एव श्वानम् अतिक्रान्तो अतिशुनी इत्यत्र समुदायस्य अर्थवत्त्वात् केवलस्य वन्निति समुदायस्य अर्थवत्त्वाभावाद् '**वनो र च** इति सूत्रं प्रकृते नोपयुज्यते। तथैव युवानमतिक्रान्तः इत्यत्र समुदायस्य अर्थवत्त्वात् केवलस्य वनः अर्थवत्वाऽभावाद् '**वनो र च**' इति' सूत्रम् अस्मिन् न प्रयुज्यते। तथा '**इन्हन्पूषार्यम्णां शौ**' (अ. ६/४/१२) इत्यादिषु सूत्रेषु क्विबन्तस्य हनः अर्थवत्त्वात् प्लीहानौ प्लीहानः इत्यादौ एकदेशस्य हनः अर्थवत्त्वाभावाद् एतयोः स्थलयोः दीर्घः '**सर्वनामस्थाने चाऽसम्बुद्धौ**' (अ. ६/४/८) इति सूत्रेण भवति।

ननु श्वानमतिक्रान्तो अतिशुनी इत्यादौ कथं वन्शब्दस्याऽनर्थकत्वं यतो हि तस्य स्वरूपेण तु अर्थवत्त्वं विद्यते एव। यथा '**वृद्धिरादैच्**' (अ. १/१/१) इत्यत्र वृद्धिरिति पदस्य संज्ञासंज्ञिसम्बन्धात् प्राग् स्वरूपेणार्थवत्त्वात् प्रातिपदिकत्वम्। तथा चाऽवोचन् –

'यस्मिन्नुच्चारिते शब्दे यदा योऽर्थः प्रतीयते।
तमाहुरर्थं शब्दस्य नाऽन्यदर्थस्य लक्षणम्॥'

अर्थात् यस्योच्चारणादनन्तरमेव यः अर्थः शब्दस्यादौ प्रतिभाति स एव शब्दस्य मूलार्थः, शब्द आदौ स्वस्य प्रकृतार्थं बोधयित्वा स्वरूपार्थं बोधयति तत्परत्वात्तस्य। यथा '**वृद्धिरादैच्**' इत्यादिषु वृद्धिपदमादौ वर्धनरूपार्थं बोधयति तदनन्तरमेव स्वरूपतया संज्ञासंज्ञिबोधकतया पृथगर्थं प्रतिपादयति। परन्तु अतिशुनीत्यादौ वनादयो वर्णसमुदायाः न स्वरूपपराः, अतिशुनीत्यादिसमुदायस्य सम्पादनाय तेषामुपात्तत्वात्। अत एव **अर्थवद्ग्रहणे नानर्थकस्ये**त्यत्र पदकृत्यविचारकाले काशिकाकारेण अर्थवच्छब्दस्य अर्थ उक्तः 'अभिधेयवचनोऽयमर्थशब्दः' इति। यतः अभिधेयः पुनः चतुर्धा जातिगुणक्रियाद्रव्यभेदेन। तदानीं यदि अर्थवतः एव प्रातिपदिकसंज्ञा तदानीम् अभाववचनशशविषाणादिशब्दानां प्रातिपदिकसंज्ञा न स्यात् तेषामर्थाऽभावात्, यतो हि अभावोऽपि अभिधेय एव अन्यथा अभाववचनमनुच्चारणीयं स्यात्। अतः अर्थवद्ग्रहणं नान्तस्य अवधेः मा भूत्, अन्यथा अव्युत्पन्नपक्षे वनं धनम् इत्यादौ नान्तस्याऽवधेः प्रातिपदिकसंज्ञा सुबुत्पत्तिश्च स्यात् ततश्च पदसंज्ञायां 'नलोपः प्रातिपदिकान्तस्य' (अ. ८/२/७) इति नलोपः स्यात्। अतः वनं, धनमित्यादौ नान्तस्यावधेः अर्थवत्त्वाभावात्तेषाम् अनर्थकत्वम्। यदा तु अतिशुन्यादौ वनादयो वर्णसमुदायाः स्वरूपपराः भवन्ति तदा तेषामर्थवत्त्वं भवत्येव।

'आतो लोप इटि च' (अ. ६/४/६४) इत्यत्र तु निरर्थकस्य इडागमस्य तथा सार्थकस्य इट्-प्रत्ययस्य च ग्रहणं भवति।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

यदि अत्र उभयोर्विवक्षा न स्यात् तदानीं निरर्थकस्य इडागमस्य टिद्-अकृत्वा अन्यत्किमपि कुर्याद् अतः तत् करणं ज्ञापयति 'आतो लोप इटि च' इत्यत्र इटः सामान्यग्रहणं भवति इति रक्षिताचार्यस्य मतम्। परन्तु तथा सति 'इटोऽत्' इत्यत्र निरर्थकस्य इटः सार्थकस्य इट्-प्रत्ययस्यापि अदादेशः स्यात् तदा अनिष्टापत्तिः प्रत्ययस्येटः अदादेशविधानात्। तथा च इड्वहिमहिङ् – इत्यत्र प्रत्याहारार्थं वर्णान्तरे कर्तव्ये यत् ङित्करणं तदपि ङित्कार्यार्थं स्यात् तदानीं सस्रंसिमहे- 'अनिदितां हल उपधायाः क्ङिति' (अ. ६/४/२४) – इत्यादिना सूत्रेण ङिति परे उपधायाः अनुनासिकलोपः स्यात्।

पुरुषोत्तमदेवमते तु दाशृधावुधात्वेकदेशयोः दाधाशब्दयोः अनर्थकत्वाद् **अर्थवद्ग्रहणे नाऽनर्थकस्ये**ति प्रकृतपरिभाषया प्रनिदाशति प्रनिधावति इत्यादौ 'दाधा घ्वादाप्' इति सूत्रेण घुसंज्ञायाः अभावात् 'नेर्गदनदपतपदघुमास्यतिहन्ति-यातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च' (अ. ८/४/१७) इत्यादिना सूत्रेण णत्वं न भवति। तथा च काशे कुशे इत्यादौ पदैकदेशस्य शेः अनर्थकत्वात् 'शे' इति सूत्रेण प्रगृह्यसंज्ञा न भवति। परन्तु इदं मतमन्ये न सहन्ते। अन्याचार्याणां मते तु सत्यमापि घुसंज्ञायां नेः दाधाशब्दौ प्रति उपसर्गत्वाभावो वर्तते, अपि तु नेः उपसर्गत्वं दाशं धावं प्रति च वर्तते। अतः तत्र नेर्गदादिना सूत्रेण णत्वं न भवत्येव। अतः इदं परिभाषायाः असाधारणफलमिति स्वीकर्तुं न शक्यते। तथैव काशे कुशे इत्यादौ न्यासकारेण 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' इति परिभाषया लाक्षणिकत्वात् 'शे' इति सूत्रेण प्रगृह्यसंज्ञा न भवतीति प्रोक्तम्, अतः अत्रापि प्रकृतपरिभाषायाः अपूर्वकत्वं स्वीकर्तुं न शक्यते। 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' (अ. १/२/४५) इत्यत्रार्थवद्ग्रहणात् मुख्यगौणयोः अर्थवतोरुभयोः प्रातिपदिकसंज्ञा भवति। अतस्तत्र अर्थवद्ग्रहणाज्ज्ञायते प्रकृतपरिभाषा स्वरूपविधिविषये एव प्रवर्तते। तेन प्रलम्बतः इत्यत्र प्रशब्दस्यानर्थकत्वेऽपि प्रशब्दात्सुबुत्पत्तौ 'अव्ययादाप्सुपः' (अ. २/४/८२) इत्यनेन सुब्लुक् भवति। अत्र च ज्ञापकम् 'अधिपरी अनर्थकौ' (अ. १/४/९३) इति सूत्रम्। अनेन सूत्रेण अनर्थकयोः अर्थान्तरवाचकयोः अधिपर्योः उपसर्गसंज्ञानिवृत्तये निपातसंज्ञा-धिकारे कर्मप्रवचनीयसंज्ञाविधानम्। एवञ्च अत्र निपातत्वात्तयोः अव्ययत्वं तत्सामर्थ्याच्च सुब्लुगपि सिद्धः इति न समीचीनम्। यतो हि अत्र प्रशब्दस्य प्रकरणादिना प्रकर्षरूपार्थसिद्धत्वाद् अत्रानर्थकाद् विभक्त्यभावो न। यतो हि अर्थवत्सूत्रेण मुख्यगौणयोरुभयोरपि प्रातिपदिकसंज्ञा भवत्येव। भाष्ये 'निपातस्य अनर्थकस्य च प्रातिपदिकसंज्ञा वक्तव्ये'ति प्रत्याख्यातत्वात्।

**समीक्षा** - इयं परिभाषा 'अर्थवत् परिभाषा' इति नाम्ना प्रसिद्धा। व्याडिविरचिते 'परिभाषासूचने' इयं प्रथमा परिभाषा। सीरदेववत् पुरुषोत्तमदेवः, व्याडिः, हरिभास्करादयः इमां सविस्तरं पठितवन्तः। अस्य अर्थविषये मतभेदाः न सन्ति परन्तु परिभाषायाः हेतौ प्राचीनैः सह आधुनिकानां परिभाषाकाराणां नागेशादीनां केषाञ्चित् मतभेदाः भवन्ति। सीरदेववद् व्याडिरपि 'स्वं रूपं शब्दस्याऽशब्दसंज्ञा' (अ. १/१/६८) इति सूत्रे रूपग्रहणमस्याः ज्ञापकमिति वदति। पुरुषोत्तमदेवस्तु अस्याः न्यायमूलकत्वं स्वीकरोति, 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' (अ. ८/२/३६) इति सूत्रे भ्राजग्रहणमपि ज्ञापकत्वेन गृहीतवान्। नीलकण्ठः न्यायमूला एषा इति वदति न तु ज्ञापकसिद्धा।[4] हरिभास्करस्तु सीरदेववत् अस्याः ज्ञापकसिद्धतां स्वीचकार।[5]

## सहायकग्रन्थसूची


- परिभाषेन्दुशेखरः सुबोधिनीहिन्दीव्याख्योपेतः, श्रीनागेशभट्टः व्याख्याता मिश्रः श्रीविश्वनाथः., चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१६.
- परिभाषेन्दुशेखरः हैमवतीटीकया सम्मलितः श्रीनागेवाभट्टः सम्पादकः पण्डितश्रीकालिकाप्रसाद


[4] नी.प.वृ, प.सं. ११।

[5] ह.प., प.स. ९।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

सम्पूर्णानन्द संस्कृत विश्वविद्यालय वाराणसी, १९९१.

- परिभाषासंग्रह, अभ्यारोपाद-वासुदेवशास्त्रमहामहो-पाध्यायकाशिनाथः (सम्पादकः, सङ्कलकश्च), भण्डारकरप्राच्यविद्यासंशोधनमन्दिरम, पुणे, १९६०.
- सिंहः डॉ. पर्णदत्तः, व्याकरणशास्त्रीय परिभाषाएँ एक अनुशीलन (परिभाषेन्दुशेखर के आधार पर), कला प्रकाशन, बी.एच.यू, वाराणसी – ५, सन – १९९९

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# कारकाह्निके ध्रुवमपायेऽपादानम्

**पिन्टु-दे**
**छात्रः, संस्कृतविभागः, रामकृष्णमिशन्-विद्यामन्दिरम्**
**वेलुडमठः, पश्चिमवङ्गराज्यम्- ७११२०२**

---

**प्रबन्धसारः**

*वैयाकरणमूर्धन्यभूतेन सूत्रकृता पाणिनिना कारकाह्निके 'कारके' इति अधिकारसूत्रमुपस्थाप्य तदनन्तरं 'ध्रुवमपायेऽपादानम्' इत्यपादानसंज्ञकं सूत्रं सूत्रितम्। तत्र कथं पाणिनिना प्रथमतया अपादानं निर्दिष्टमिति जिज्ञासायां कानिचन वचनानि विदुषां पुरस्तात् प्रस्तूयन्ते, तद्यथा वाङ्गलानां चिकित्सितं व्याकरणं शब्दशास्त्रम् । अस्यापि नामान्तरं शब्दानुशासनमिति। व्याक्रियन्ते व्युत्पाद्यन्ते विविच्यन्ते पृथक् क्रियन्ते असाधुशब्देभ्यः साधुशब्दाः अनेनेति व्याकरणम् । अत एव शब्दानुशासनमिति व्युत्पत्त्या साधुशब्देभ्योऽसाधुशब्दानां पृथक्करणमिति व्याकरणम्। अतः प्रथमतया अपायस्य बुद्धिः बुद्धौ प्रतिभाति । मन्ये एतदेवाभिप्रेत्य पाणिनिना आर्षचाक्षुष्केण प्रथमतया अपादानकारकं प्रस्तुतम्।*

*अप आ-पूर्वात् दाधातोः भावे ल्युट्प्रत्यये अपादानमित्येवं रूपम्। अपादीयते पृथक् क्रियते इति अपादानम्। अप-अय-घञ् इति व्युत्पत्तिः। अपायते इति अपाय इति विग्रहः । ध्रुवम् अपाये अपादानमिति पदच्छेदः। ध्रुवं स्थिरम् , ध्रु गतिस्थैर्ययोःइत्यस्मात्कुटादेः पचाद्यच्। ये तु ध्रुव स्थैर्ये इति पठन्ति तेषामिगुपधलक्षणः कप्रत्ययः। अपाये इत्यत्र विषये सप्तमी। अपायस्य साध्यत्वेन विषयभूत इत्यर्थः। अपायो नाम विभागो विश्लेषः इति। सूत्रस्यास्य वृत्तौ दीक्षित आह –'अपायो विश्लेषस्तस्मिन् साध्ये ध्रुवं यदवधिभूतं कारकमपादानसंज्ञं स्याद्' इति ।*

**कुञ्चीशब्दाः** - ध्रुवम्, अपायः, शब्दानुशासनम्, अवधिभूतम्, पाणिनिः, असंस्पृष्टम्, पतञ्जलिः, कैयटः चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

वैयाकरणमूर्धन्यभूतेन सूत्रकृता पाणिनिना कारकाह्निके '**कारके**'[1] इति अधिकारसूत्रमुपस्थाप्य तदनन्तरं '**ध्रुवमपायेऽपादानम्**'[2] इत्यपादानसंज्ञकं सूत्रं सूत्रितम्। तत्र कथं पाणिनिना प्रथमतया अपादानं निर्दिष्टमिति जिज्ञासायां कानिचन वचनानि विदुषां पुरस्तात् प्रस्तूयन्ते, तद्यथा वाङ्गलानां चिकित्सितं व्याकरणं शब्दशास्त्रम्। अस्यापि नामान्तरं शब्दानुशासनमिति। व्याक्रियन्ते व्युत्पाद्यन्ते विविच्यन्ते पृथक् क्रियन्ते साधुशब्देभ्योऽसाधुशब्दाः अनेनेति व्याकरणम्। अत एव शब्दानुशासनमिति व्युत्पत्त्या साधुशब्देभ्योऽसाधुशब्दानां पृथक्करणमिति व्याकरणम्। अतः प्रथमतया अपायस्य बुद्धिः बुद्धौ प्रतिभाति। मन्ये एतदेवाभिप्रेत्य पाणिनिना आर्षचक्षुष्केण प्रथमतया अपादानकारकं प्रस्तुतम्।

अप-आ-पूर्वात् दाधातोः भावे ल्युट्प्रत्यये अपादानमित्येवं रूपम्। अपादीयते पृथक् क्रियते इति अपादानम्। अप-अय-घञ् इति व्युत्पत्तिः। अपायते इति अपाय इति विग्रहः। ध्रुवम् अपाये अपादानमिति पदच्छेदः। ध्रुवं स्थिरम्, ध्रु गतिस्थैर्ययोः इत्यस्मात्कुटादेः पचाद्यच्। ये तु ध्रुव स्थैर्ये इति पठन्ति तेषामिगुपधलक्षणः कप्रत्ययः। अपाये इत्यत्र विषये सप्तमी। अपायस्य साध्यत्वेन विषयभूत इत्यर्थः। अपायो नाम विभागो विश्लेषः इति। सूत्रस्यास्य वृत्तौ दीक्षित आह – 'अपायो विश्लेषस्तस्मिन् साध्ये ध्रुवं यदवधिभूतं कारकमपादानसंज्ञं स्याद्'[3] इति।

ननु अपायस्य द्विष्ठत्वनियमात् यथा तेन विभागेन योऽपेति सोऽपाययुक्तः। तथा- यतोऽपैति सोऽप्यपाययुक्तः, तस्मादुभयत्र पञ्चम्या भवितव्यम्'[4]।

---

[1] पाणिनिमुनिः १/४/२३

[2] पाणिनिमुनिः १/४/२४

[3] वैयाकरणसिद्धान्तकौमुदी (पा) १/४/२५

[4] काशिका, पदमञ्जरी

तस्मादेवं वक्तव्यम्- 'अपायो विश्लेषः तस्मिन् साध्ये यद् ध्रुवमवधिभूतं कारकं तदपादानं स्यात्। तेन '**वृक्षात् पर्णं पतती'त्यादौ** वृक्षस्य ध्रुवत्वं पर्णस्यापायत्वादुक्तसूत्रेण वृक्षे अपादानत्वसिद्धिः।

ननु ध्रुवस्य स्थिरमित्यर्थे सति **धावतः अश्वात् पतति** इत्यादौ गतिषूक्तेष्वपादानसंज्ञिषु लक्षणासङ्गतिः जायते इति चेन्न, '**ध्रुवमेकरूपमुच्यते**[5]। **ध्रुवमस्य शीलमिति** यथा तथा चापाये साध्ये यदेकरूपमित्युक्ते प्रकृतधातूपात्तगत्यनाविष्टत्वे सति यदुपयोगीति लभ्यते। तच्चार्थात् अवधिभूतमेव भवति। तस्मात् धावतः अश्वात् पततीत्यादौ गतियुक्तेष्वपि अपादानत्वसिद्धिः। प्रसङ्गेऽस्मिन् हेलाराजेन उदीरितं – "ध्रुवं कूटस्थं निष्क्रियमिति द्रव्यस्वभावो ध्रौव्यं सूत्रे न प्रत्येतव्यम्, अपि च असन्तुष्टश्चलनोऽत्र ध्रुवशब्दः। तथा ह्यपाये साध्ये यद् ध्रुवं तेनापायेनासंस्पृष्टमित्येषोऽर्थः। एवञ्च कृत्वा 'धावतः अश्वात्पतितः' इत्यत्र पातस्याश्वकर्तृकत्वाभावात्तेनानावेशे ध्रुवताश्वस्यात्रास्त्येव"[6] **इति**।

पतञ्जलिनापि सम्यगुक्तम्- "अध्रौव्यस्याविवक्षितत्वात् नात्राध्रौव्यं विवक्षितम्। किं तर्हि ध्रौव्यम्। इह तावत् अश्वात् त्रस्तात् पतित इति यत्तदश्वेऽश्वत्वमाशुगामित्वं तद्ध्रुवं तच्च विवक्षितमिति।"[7]

कैयटेनापि व्याख्यातं यद्- "ध्रुवमेकरूपमुच्यते। तच्च ध्रौव्यमपायविषयम् आश्रीयते। न तु अनवच्छिन्नम्। ततोऽपाये यदनाविष्टं तदपाये ध्रुवमुच्यते। देवदत्तकर्तृके च पाते त्रस्तस्याप्यश्वस्यापायानावेशाद् ध्रुवत्वम्। देवदत्तस्यैवापाया-वेशादध्रुवत्वम्। अथवा अश्वस्य त्रस्तत्वादध्रौव्यं तत्प्रथममविवक्षितमित्यर्थः।" इति।

ननु अश्वेऽश्वत्वमाशुगामित्वम् इति एतादृशार्थकरणे ध्रुवत्वं गृह्यते। अर्थात् यत्र क्रिया न प्रवृत्तिनिमित्तं तत्र अश्वे आशुगामित्वं रथे रथत्वं ग्रहीतुं शक्यं परन्तु धावतः पतितः, त्वरमाणात् पतितः, इत्यादौ शब्दप्रवृत्तिनिमित्ते ध्रुवत्वस्य अविवक्षितत्वम्। पतञ्जलिना उक्तं – "सतोऽप्यविवक्षा भवति। यथा अलोमिका एडका। अनुदरा कन्येति। असतश्च विवक्षा भवति समुद्रः कुण्डिका, विन्ध्यो **व**र्धितकमिति"[8] इति। अतः भाष्यकारेणापि विवक्षितत्वमविवक्षितत्वञ्चोभौ स्वीकृतौ।

कौण्डभट्टस्तु प्रकृतधात्वर्थप्रधानीभूतव्यापाराना-श्रयत्वे सति तज्जन्यविभागाश्रयत्वं ध्रुवत्वमिति स्वीकरोति।

कातन्त्रव्याकरणे एवमुक्तं यत् –

'**संयुक्तस्य हि विश्लिष्टक्रियारम्भो भवेद्यतः।**
**तदेवावधिभावेन ह्यपादानमिति स्मृतम्॥**'[9] इति।

अपादानविषये एतत्सर्वं पर्यालोच्य वक्तुं शक्यते महाभाष्यकारस्य पतञ्जलेः मतमेव वैयाकरणानामधिकसम्मतम्।

ननु परस्परान्मेषावपसरतः, अथवा अपसरतो मेषादपसरति मेषः, इत्यादौ यत्र मेषद्वयनिष्ठविश्लेषजनकक्रियाद्वयजन्य एक एव विभागः, तत्र विश्लेषजनकक्रियाश्रयत्वादुभयोः मेषयोरपादानत्वं न स्यादिति चेदुच्यते – एकस्मिन्नेव विभागे तद्विभागजनकक्रिया व्यक्तिभेदाद्भिन्ना। एवञ्चैतन्मेषनिष्ठक्रियायाः मेषान्तरेऽभावेनोभयोः अपादानत्वं सिध्यति। एवञ्चैतन्मेषनिष्ठा या तद्व्यक्तिरूपा विश्लेषजनकक्रिया, मेषान्तरस्य तदनाश्रयत्वे अपादानत्वं स्वनिष्ठक्रियाव्यक्त्याश्रयत्वेन च कर्तृत्वं सिध्यति।

कौण्डभट्टैरपि भणितं- "यथा निश्चलमेषादपसरद् द्वितीयमेषस्थले निश्चलमेषस्यापसरन्मेषक्रियामादाय ध्रुवत्वं, तथाप्यत्र विभागैक्येऽपि क्रियाभेदादेकक्रियामादाय परस्य ध्रुवत्वम्। तथा च विश्लेषाश्रयत्वे सति तज्जनकतत्क्रियायामपादानत्वं वाच्यम्"[10] इति।

परस्परान्मेषावपसरतः इत्यत्रापादानत्वसिद्धये इयमेव युक्तिराश्रिता भट्टोजिदीक्षितेन तथा चोक्तं – "**परस्परान्मेषावपसरतः** इत्यत्र तु सृधातुना गतिद्वयस्यापि अपादानादेकनिष्ठां गतिं प्रतीतरस्यापादानत्वं न

---

[5] महाभाष्यम् कैयट १/४/२४
[6] वाक्यपदीये साधनसमुद्देशे का. १३८
[7] महाभाष्यम् १/४/२४
[8] महाभाष्ये......
[9] व्याकरण-दर्शनेर – इतिहास
[10] बैयाकरणभूषणसारः - सुबर्थनिर्णयः

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

विरुद्ध्यते[11]”इति।

भर्त्तृहरिणापि उक्तं –

**“अपाये यदुदासीनं चलं वा यदि वाचलम्।**
**ध्रुवमेवातदावेशात्तदपादानमुच्यते॥**
पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ।
तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमिष्यते॥
मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक्।
मेषयोः स्वक्रियापेक्षं कर्तृत्वञ्च पृथक् पृथक्॥”[12] इति।

एवञ्च विविधेषु ग्रन्थेषु प्राच्यनव्यैः प्रतिपादितानां सिद्धान्तानां समालोचने विश्लेषजनकक्रियायामवधित्वेन विवक्षिते सति तदन्यस्य अवधित्वोपयोगिव्यापारस्य अनाश्रयत्वमेव ध्रुवत्वं ध्रुवमपायेऽपादानमिति सूत्रे सिद्धान्तभूतमिति गूढार्थः।

“**अपायस्तु अत्र विभागसंयोगानुकूलः अवधिसाकाङ्क्षो गतिविशेषः**”[13] इति प्रतिपादितम् उद्द्योते। एवञ्च यदा गतावववधेरुल्लेखो भविष्यति तदेव अत्रापायः स्वीक्रियते नान्यथा। तथा चोक्तं कैयटेन – ‘सति ह्यवधौ गतिरपायो भवति नान्यथा , गतिविशेषत्वादपायस्य’ इति। तस्मात् पर्णस्य पतनक्रियायां यदि वृक्षस्यावधित्वेन विवक्षा भवति तदेव तस्यापादानसंज्ञा ‘**वृक्षात् पर्णं पतती**’त्यत्र। यदा तु वृक्षस्यावधित्वं न विवक्ष्यते, पर्णसम्बन्धविवक्षायां ‘**वृक्षस्य पर्णं पतती**’त्यत्र सम्बन्धसामान्येन षष्ठ्येव। प्रतिपादितञ्च हरिणा-

**“गतिर्विना त्ववधिना नापाय इति गम्यते।**
**वृक्षस्य पर्णं पततीत्येव भाष्ये निदर्शितम्॥”**[14] इति

शम्।

## सहायकग्रन्थसूची


- श्रीनागेशभट्ट. ***“परमलघुमञ्जूषा”*** व्याख्याकार. आचार्य-लोकमणि-दाहालः. वाराणसी : चौखाम्वा-सुरभारती-प्रकाशन्, पु.मु २०११.
- महर्षिपतञ्जलि. ***“महाभाष्यम्(पस्पशाह्निकम्)”*** अनुवादक. दण्डिस्वामी दामोदर् आश्रम. कलकाता, आद्यापीठः दण्डिस्वामी दामोदर् आश्रम दक्षिणेश्वर रामकृष्ण संघ, च.प्र १४१७.
- श्रीभर्त्तृहरि. ***“वाक्यपदीयम् (ब्रह्मकाण्ड)”*** आचार्य वामदेवाचार्य. वाराणसीः कृष्णदास एकादेमी,तृतीय संस्करणम् २०००.
- महर्षिपाणिनि. ***“अष्टाध्यायी”***. सम्पादक. श्रीगोपालदत्त-पाण्डेय. “अष्टाध्यायी(सूत्रपाठः)”. वाराणसीः चौखाम्वा-सुरभारती-प्रकाशन्.
- आचार्यपतञ्जलि. ***“महाभाष्यम् (नवाह्निकम्)”***. सम्पादक. रुद्रधरझाशर्मा. वाराणसीः चौखाम्वा-संस्कृत –सीरीज्.
- आचार्यपतञ्जलि. ***“महाभाष्यम् (नवाह्निकम्)”***. सम्पा. हरिनारायणतिवारी. वाराणसी : चौखाम्वा-विद्याभवनम्.
- श्रीनागेशभट्ट. ***“लघुशब्देन्दुशेखरः”***. व्याख्याकारः श्रीब्रह्मदत्तद्विवेदी. वाराणसी : चौखाम्वा-संस्कृत-सिरिज-ओफिस्, द्वि. सं. २००८.
- आचार्यभर्तृहरि. ***“वाक्यपदीयम् (अम्बाकर्त्रीटीकोपेतम्)”***. वाराणसीः सम्पूर्णानन्दसंस्कृतविश्वविश्वविद्यालय.
- श्रीमत्कौण्डभट्ट. ***“वैयाकरणभूषणसारः”***. व्याख्याकारः चन्द्रिकाप्रसाद्-द्विवेदी. दिल्लीः चौखाम्बा संस्कृत प्रतिष्ठान, पु.मु. २०११.
- श्रीमत्कौण्डभट्ट. ***“वैयाकरणभूषणसारः”***. दर्पणप्रभाटीकाद्वयोपेतः. वाराणसी : चौखाम्बा-संस्कृतभवनम्.
- भट्टोजिदीक्षित. ***“वैयाकरणसिद्धान्तकौमुदी”***. बालमनोरमातत्त्वबोधिनीटीकोपेता. दिल्ली : मोतिलालवेनारसीदास. पु.मू. २०११.
- भट्टोजिदीक्षित. ***“वैयाकरणसिद्धान्तकौमुदी (कारकप्रकरणम्)”***. सम्पा. सान्यालशास्त्री. अयोध्यानाथ. कोलकाताः संस्कृतपुस्तकभाण्डार


[11] प्रौढमनोरमा-कारकप्रकरणे

[12] वाक्यपदीयम् साधनसमुद्देशे का.२०५,२०६,२०८

[13] महाभाष्यस्य नागेशकृतोद्द्योतटीकायाम् -१/४/२४

[14] वाक्यपदीयम् कारिका

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# न्यायवैशेषिकदर्शनदिशा कारणतावादविमर्शः

**विप्लव-सरकारः**
**शोधच्छात्रः, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**बी-४, कुतुबसांस्थानिकक्षेत्रम् ,नवदेहली – ११००१६**

---

**प्रबन्धसारः**

*न्यायवैशेषिकदर्शने कार्यकारणविचारः प्रायेण समानः। न्यायवैशेषिकदर्शने कार्यकारणतावादः कर्मबन्धननिःश्रेयसमूलकः। न्यायसूत्रस्यादिमसूत्रे एव निःश्रेयसकारणं तत्त्वज्ञानं, तत्त्वज्ञानस्य कारणं पदार्थज्ञानं, षोडशपदार्थानां तत्त्वज्ञानेन यथार्थज्ञानेन वा प्रेत्यभावः अर्थात् आवागमनचक्रात् मोक्षः। न्यायवैशेषिकोक्तकारणपरिभाषया स्पष्टं यत् कारणं कार्यस्य पूर्ववर्ति कार्योत्पत्त्यनन्तरञ्च कार्यसहचारि। उत्पत्तिक्रियायां न कारणं परिवर्तते प्रत्युत विविधानां कारणानां सहभागित्वमपेक्षते कार्योत्पत्तौ। अतः अनेकीभूतानां कारणानां न्यायवैशेषिकैः त्रिधा वर्गीकृतं कारणम् समवाय्यसमवायिनिमित्तकारणभेदात्। अतः अस्मिन् शोधप्रबन्धे समवाय्यसमवायिनिमित्तकारणभेदानां ग्रन्थकारदिशा सम्यक्तया प्रतिपादनपुरःसरं तस्मिन् विषये यथामति नूतनतत्त्वानाम् उपस्थापनमपि करिष्यते।*

**कुञ्चीशब्दाः** -अपवर्गः, कारणम्, समवायिकारणम्, असमवायिकारणम्, निमित्तकारणम्, निःश्रेयसः चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

न्यायवैशेषिकदर्शने कार्यकारणविचारः प्रायेण समानः। न्यायवैशेषिकदर्शने कार्यकारणतावादः कर्मबन्धननिःश्रेयसमूलकः। न्यायसूत्रस्यादिमसूत्रे एव निःश्रेयसःकारणं तत्त्वज्ञानं तत्त्वज्ञानस्य कारणं पदार्थज्ञानं षोडशपदार्थानां तत्त्वज्ञानेन यथार्थज्ञानेन वा प्रेत्यभाव अर्थात् आवागमनचक्रात् मोक्षः। जन्ममरणचक्रमेव दुःखं दुःखस्यात्यन्तिकी निवृत्तिरेवापवर्गः **"तदत्यन्तविमोक्षोऽपवर्गः।[1]"**

उपर्युक्तप्रसङ्गे न्यायवैशेषिकयोः कार्यकारणभावः न असत्कार्यवादमात्रमपि तु निःश्रेयससिद्धान्ताचारशास्त्रीयसिद्धान्तं सृष्टिविज्ञानञ्च वर्तते। एतेष्वेवाधारितः कार्यकारणसिद्धान्तः एतेषाम्।

**कारणस्य स्वरूपम्**

कारणतावादविमर्शपक्षे आदौ कार्यकारणस्वरूपाणाम् अवगमोऽनिवार्यः खल्वेव प्रतीयते। कारणस्वरूपे कारणतासिद्धान्तः न्यायवैशेषिकदर्शनानां प्राचीनग्रन्थानां तद्यथा— न्यायसूत्रभाष्यवार्त्तिकतात्पर्यटीकापरिशुद्धीटीकावैशेषिक सूत्रप्रशस्तपादभाष्य-न्यायकन्दल्याश्चावलोकनेन प्रतीयते नैतेषु ग्रन्थेषु कारणकार्यविचारः परिभाषास्वरूपादिकं न तथा विवेचितं येन एतस्य ज्ञानं सुकरं भवेत् प्रत्युत अवयविवादारम्भवादः परमाणुवादस्योपादानकारणता, ईश्वरस्य निमित्तकारणता, समवायसम्बन्धसृष्टिसंहारादिकं निपुणं परन्त्वारम्भवादस्य स्थापनार्थं कारणतासिद्धान्तानां निराकरणमेव कृतमित्येवावभासते। मन्ये तदानीं कारणकार्यस्वरूपपरिभाषणं नावश्यकं स्यात् स्वतः सिद्धत्वात्। परवर्तिकाले प्रमेयापेक्षया प्रमाणमीमांसायाः माहात्म्यमवख्यापयन् न्यायवैशेषिकग्रन्थेषु कार्यकारणविचारः समीक्षितः। तेषु प्रकरणग्रन्थेषु सप्तपदार्थी, तर्कभाषा, तर्कसंग्रहः, भाषापरिच्छेदमुक्तावल्यादिषु कारणकार्यभावस्य विशदव्याख्यानम् उपलभ्यते।

**न्यायवैशेषिकनये कारणशब्दार्थः**

येन किञ्चित् क्रियते स कारणशब्दस्य सामान्यार्थः। एतत्कारणमनेकैः विद्वद्भिः परिभाषितम्। आचार्यः शिवादित्यः सप्तपदार्थ्यां [2] - कार्योत्पादकत्वं कारणमिति लक्षणमुवाच। नैतत् स्पष्टं लक्षणं कारणशब्दार्थमात्रस्य

---

[1] न्या.द.१/१/२२

[2] स.प.पृ-२७९

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

व्याख्यापकत्वात् **उदयनाचार्यः**[3] अन्यथासिद्धान्तान्वय-व्यतिरेकवतामप्यकारणत्वे कार्यस्य आकस्मिकत्वप्रसङ्गः इत्युक्त्वा कारणं स्पष्टं विवेचयति। तर्कसंग्रहे अन्नम्भट्टः-

"**यस्य कार्यात् पूर्वभावो नियतोऽनन्यथासिद्धश्च तत्कारणम्।**[4] **कार्यनियतपूर्ववृत्तित्वं कारणमि**"[5]ति तर्कभाषायां केशवमिश्रः मुक्तावल्यां विश्वनाथपञ्चाननः। अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता इत्यादिलक्षणमभिहितम् एतेषां विदुषामनुसारम् अन्यथासिद्धिशून्यनिष्ठा या अवश्यम्भाविनी पूर्ववर्तिता अर्थात् **कार्योत्पत्त्यव्यवहिते पूर्वस्मिन् क्षणे कार्याधिकरणवृत्तिता तदेव कारणत्वमिति** कारणस्यास्य लक्षणविवेचनं न्यायसिद्धान्तमुक्तावल्यां तर्कसंग्रहे च सुष्ठु विवेचितम् -

तत्रास्य कारणस्य विषये तत्त्वचतुष्टयमित्थमवधेयम् -

- कार्याव्यवहितपूर्वं कारणस्यावश्यविद्यमानत्वम्।
- कारणस्य अन्यथासिद्धिशून्यत्वं नियतत्वञ्च।
- कारणस्य कार्याधिकरणदेशे अवश्यभावित्वम्।
- कारणाभावप्रतियोगितावच्छेदकधर्मवत्त्वम्।

एतत्सर्वं निर्दुष्टं कारणलक्षणमवख्यापनार्थमेव तथा चोक्तं कार्यनियतावश्यम्भाविनी पूर्ववृत्तिः पूर्वक्षणवृत्तिर्यस्य तत्तथेत्यर्थः अनियतरासभादौ अतिव्याप्तिवारणाय नियतपदम्। कार्यवारणाय पूर्ववृत्तित्वम्। दण्डत्वादीनामपि नियतत्वात् तत्रापि कारणत्वमापद्यते अतस्तद्वारणाय अन्यथासिद्धमिति। ननु अनन्यथासिद्धत्वविशेषणस्य आवश्यकत्वेन तत एव रासभादावतिव्याप्तिनिरासः अतः नियतपदमनर्थकमेव अतोऽनन्यथासिद्धकार्यपूर्ववृत्तिकारणमिति चरितार्थम्। अत्र अनन्यथासिद्धत्वपदमपि विचारणीयम्। अनन्यथासिद्धत्वम् = अन्यथासिद्धिशून्यत्वम्। अन्यथासिद्धिश्चावश्यक्लृप्तनियत-पूर्ववर्तिभिर्दण्डादिभिरेव घटरूपकार्यसम्भवे तत्सहभूतत्वं तच्च दण्डत्वादौ वर्ततेऽतो दण्डत्वादिकमन्यथासिद्धम् एतदन्यथासिद्धं त्रिविधमिति मणिकारः। तथाहि—

- येन यदैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तं प्रति तेन तदन्यथासिद्धम्। यथा तन्तुना तन्तुरूपं तन्तुत्वं च पटं प्रति।
- यथा पूर्ववृत्तित्वे ज्ञाते एव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तं प्रति तदन्यथासिद्धं यथा शब्दं प्रति पूर्ववृत्तित्वे ज्ञाते एव पटं प्रति आकाशस्य।
- अन्यत्र क्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतमन्यथासिद्धम्। यथा पाकजस्थले गन्धं प्रति रूपप्रागभावस्य। एवञ्च अनन्यथासिद्धनियतपूर्ववृत्तित्वं कारणत्वम्।

आचार्यविश्वनाथपञ्चाननः स्वीयमुक्तावलीग्रन्थे कारिकामाध्यमेन पञ्चान्यथासिद्धान् वर्णयति—

**"येन सह पूर्वभावः कारणमादाय वा यस्य।**
**अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम्॥**
**जनकं प्रति पूर्ववृत्तितामपरिज्ञाय न यस्य गृह्यते।**
**अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्वभाविनः॥**
**एते पञ्चान्यथासिद्धा दण्डत्वादिकमादिमम्।**
**घटादौ दण्डरूपादि द्वितीयमपि दर्शितम्॥**
**तृतीयं तु भवेद्व्योम कुलालजनकोऽपरः।**
**पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ॥"**[6]

अभिप्रायस्तु यत्कार्यं प्रति कारणस्य पूर्ववृत्तिता येन रूपेण गृह्यते कार्यं प्रति तद्रूपमन्यथासिद्धम्। घटं प्रति दण्डत्वम् इति प्रथमः। यस्य स्वातन्त्र्येणान्वयव्यतिरेकौ न स्तः किन्तु कारणमादायैवान्वयव्यतिरेकौ गृह्येते तदन्यथासिद्धं तथा दण्डरूपमिति द्वितीयः। अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रति अन्यथासिद्धत्वम्। घटादिकम्प्रत्याकाशस्य इति तृतीयः। यत्कार्यजनकत्वम्प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं प्रत्यन्यथासिद्धं यथा कुलालपितुः घटं प्रति इति चतुर्थः। अवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तद्भिन्नमन्यथासिद्धम् इति पञ्चमः। एष एव अन्यथासिद्धः

[3] आ.त.वि. पृ - १८
[4] त.स. पृ - २९
[5] त.भा. पृ - २५
[6] भा.परि. का - १९/२०/२१/२२

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

अस्मिन् लक्षणे अभिमतः। एवं पूर्वोक्तसमेषान्तथ्यानामनुशीलनानन्तरं कारणस्य निष्कृष्टं लक्षणम् अन्यथासिद्धिशून्यत्वे सति कार्यतावच्छेदकसम्बन्धेन कार्याधिकरणे कार्याव्यवहित-प्राक्क्षणावच्छेदेन विद्यमानात्यन्ताभावप्रतियोगिता-नवच्छेदकधर्मवत्त्वं कारणत्वमिति समुदितलक्षणम्।

**न्यायवैशेषिकदर्शने कारणभेदाः**

न्यायवैशेषिकोक्तकारणपरिभाषया स्पष्टं यत् कारणं कार्यस्य पूर्ववर्ति कार्योत्पत्त्यनन्तरञ्च कार्यसहचारि। उत्पत्तिक्रियायां न कारणं परिवर्तते प्रत्युत नैकेषां विविधानां कारणानां सहभागित्वमपेक्षते कार्योत्पत्तौ। अतः अनेकीभूतानां कारणानां न्यायवैशेषिकैः त्रिधा वर्गीकृतं कारणम् समवाय्यसमवायिनिमित्तकारणभेदात्। केषाञ्चन आधुनिकविदुषामभिमतं यद् नैतानि कारणानि प्राचीनन्यायवैशेषिकग्रन्थेषूल्लिखितानि अपितु नव्यैराचार्यैः प्रतिपादितानि। मन्ये न्यायसूत्रेषु न कारणत्रयप्रसङ्गः परं न्यायदर्शनस्य प्राचीनतमग्रन्थे वात्स्यायनभाष्ये चतुर्थाध्याये शून्यत्वमुपादानकारणं जगतः अस्य खण्डनप्रसङ्गे बीजावयवः कुतश्चिन्निमित्तात् प्रादुर्भूता क्रिया, पूर्वव्यूहं जहाति व्यूहान्तरं चापद्यते व्यूहान्तराद् अङ्कुरः उत्पद्यते दृश्यन्ते खल्ववयवः तत्संयोगाश्च हेतवः। अस्मिन् वाक्ये कुतश्चिन्निमित्तात् इति पदे अदृष्टरूपेण निमित्तकारणमेव सूचितम्। हेतवः इति पदेन अवयवरूपसमवायिकारणम् अवयवसंयोगरूपि असमवायिकारणञ्च सूचितं तथा च प्रथमाध्यायस्य द्वादशसूत्रवार्तिके सर्वाणि कार्यजातानि समवाय्यसमवायिनिमित्तकारणसंयोगाद् भवन्तीति वाक्येनापि प्राचीनग्रन्थकृतामभिमतं कारणत्रयं ध्वन्यते। वैशेषिकसूत्रेष्वपि यत्र तत्र दृश्यते एव कारणचर्चा। अतो नैतद् वक्तु शक्यते यत् प्राचीनैः दार्शनिकैः कारणत्रयमस्वीकृतमपितु एतत् सत्यं यन्न तथा परिष्कृतं यथापेक्षितम्।

**समवायिकारणम्**

समवायिकारणस्य लक्षणं **तर्कभाषायां**[7] - यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम्, यथा तन्तवः पटस्य समवायिकारणं यतः तन्तुष्वेव पटः समवेतो जायते न तुर्यादिषु। एतदेव लक्षणम् अन्नम्भट्टेनाप्यभिहितम्।[8] विस्तरेणैवमवगन्तव्यं यत् यस्मिन् समवेतं समवायेन सम्बद्धं सत् कार्यमुत्पद्यते तत् समवायिकारणं तद्यथा येषु तन्तुषु समवायेन सम्बद्धं सत् पटात्मकं कार्यमुत्पद्यते तस्मात् तन्तवः समवायिकारणम् अर्थात् समवायः नित्यसम्बन्धः, यत्कारणं कार्येण सह नित्यतयावस्थितं कार्यनाशे सत्यपि यस्य कारणस्य नाशाभावः तत् समवायिकारणम्। यतो हि तन्तुपटयोः मृद्घटयोर्वा न कदाचिद् व्यवच्छेदः अतो मृद् घटस्य, तन्तुः पटस्य समवायिकारणम्। अतो **न्यायबोधिनीटीकायामस्य**[9] लक्षणम् – समवायसम्बन्धावच्छिन्नकार्यतानिरूपित-तादात्म्यसम्बन्धावच्छिन्नकारणत्वं समवायिकारणत्वं तद्यथा समवायसम्बन्धेन घटाधिकरणे कपालादौ कपालादेः तादात्म्यसम्बन्धेनैव सत्त्वात् समवायसम्बन्धावच्छिन्नघटत्वावच्छिन्नकार्यतानिरूपित-तादात्म्यसम्बन्धावच्छिन्नकपालत्वावच्छिन्न-कारणतायाः कपालादौ सत्त्वाल्लक्षणं सङ्गच्छते। पटोऽपि स्वगतरूपादेः समवायिकारणम् इति अन्नम्भट्टेनोक्तं तत् कथं सङ्गच्छते तदित्थम् - समवायेन जन्यभावत्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन द्रव्यस्यैव कारणत्वाज्जन्यभावेषु द्रव्यगुणकर्मसु त्रिषु द्रव्यमेव समवायिकारणं द्रव्ये तु द्रव्यावयवाः समवायिकारणम्। अतो गुणादावपि द्रव्यमेव समवायिकारणम् इति अवगन्तव्यम्। वस्तुतः यत्समवेतं कार्यं भवतीत्यत्र "यस्मिन् समवेत"मिति व्युत्पत्या यन्निरूपितसमवायसम्बन्धावच्छिन्न-वृत्तित्वाश्रयः कार्यं ततः समवायिकारणम्। तथा च कार्यनिष्ठसमवायसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणत्वं समवायिकारणत्वमिति फलितम्।

एवञ्च भारतीयदर्शनपरम्परायां यदुपादानकारणं तदेव न्यायवैशेषिकदर्शने समवायिकारणमित्यभिधीयते। कथमेतदिति चिन्तनप्रसङ्गे नैष केवलं शाब्दिको भेदः अपि

[7] त.भा. पृ – ४०

[8] त.स. पृ - ७३

[9] त.स. पृ - ७३

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

तु सूक्ष्मतयावलोकनेन सैद्धान्तिकभेदोऽप्येष वर्तते केवलमुपादानकारणेन एवं प्रतीयते कारणमेव कार्यरूपेण परिणमते परं नैयायिकानां मतं कारणकार्ययोर्मध्ये आधाराधेयभावो विद्यते उभावपि समवायसम्बन्धेन नित्यसम्बन्धेन वा प्रवर्त्तते न तु तादात्म्यसम्बन्धेन, समवायिकारणशब्दः एतेषां सिद्धान्तमधिकं प्रस्फुटयति समवायीत्यनेनाधारत्वं द्योत्यते। अतोऽधाराधेयभावः स्पष्टं परिलक्ष्यते। अतः न्यायदर्शनस्य मुख्यप्रतिपाद्यकारण-कार्यभेदवादस्पष्टीकरणमनेन शब्देन भवति।

**असमवायिकारणम्**

**समवायिकारणप्रत्यासन्नमवधृतसामर्थ्यमसमवायिकारणम्।**[10] तर्कसंग्रहे अधिकं स्पष्टं लक्षणमाह - कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणमसमवायिकारणम्। यथा तन्तुसंयोगः पटस्य। तन्तुरूपं पटरूपस्य, एतद् असमवायिकारणं द्विविधं कार्येण सहैकस्मिन्नर्थे समवेतं सत् यत् कारणं तदसमवायिकारणमिति प्रथमः। कारणेन सहैकस्मिन्नर्थे समवेतं सत् यत् कारणं तदपरमसमवायिकारणमिति सम्प्रत्ययः। अत्र कारणेनेत्यस्य स्वकार्यसमवायिकारणेनेत्यर्थः। द्रव्यमात्रे अवयवसंयोगस्यैवाऽसमवायिकारणत्वात्पटात्मककार्ये तदवयव-तन्तुसंयोगस्यैवासमवायिकारणत्वमिति उदाहरणेन प्रदर्श्यते। यथा तन्तुसंयोगः पटात्मककार्येण सहैकस्मिन्नर्थे तन्तौ समवायसम्बन्धेन वर्तमानत्वे सति कारणत्वात् पटात्मककार्यम्प्रति तन्तुसंयोगोऽसमवाय-कारणमिति प्रत्ययः। द्वितीयमसमवायिकारणं कारणेन सह पटरूपसमवायिकारणमिति प्रत्ययः। द्वितीयमसमवायिकारणं कारणेन सह = पटरूपसमवायिकारणीभूतपटेन सह एकस्मिन्नर्थे तन्तुरूपेऽर्थे समवेतं सत् समवायसम्बन्धेन वर्तमानं सत् तन्तुरूपं पटगतरूपं प्रति कारणं भवति। अतोऽसमवायिकारणं तन्तुरूपं पटगतरूपं प्रति कारणं भवति। उपरिगतविवेचनानुसारम् असमवायिकारणस्य सामान्यं निष्कृष्टं लक्षणं - समवायसम्बन्धावच्छिन्नकार्यतानिरूपिता या समवायस्वसमवायि-समवेतत्वान्यतरसम्बन्धावच्छिन्न-कारणता तदाश्रयत्वम् असमवायिकारणमिति। तत्रेदमवधातव्यं यत् आत्मनो ये विशेषगुणा ज्ञानेच्छादयस्ते तु कुत्राऽपि पदार्थेऽसमवायिकारणानि न भवन्ति। अतोऽसमवायिकारणस्य सामान्यलक्षणे आत्मविशेषगुणभिन्नत्वमवश्यं विशेषणीयम्। एवञ्च समवायिकारणेऽसमवायिकारणत्वेनाभिमतस्य प्रत्यासन्नं वृत्तित्वं द्विविधं कार्येकार्थप्रत्यासत्या कारणैकार्थप्रत्यासत्या च। घटादिकं प्रति कार्येकार्थप्रत्यासत्या कपालसंयोगादिकमसमवायि-कारणम् इति प्रथमकल्पः। घटरूपं प्रति कारणैकार्थप्रत्यासत्या कपालरूपमसवायिकारणमिति द्वितीयकल्पः। तथा च समवायसम्बन्धावच्छिन्नकार्यता-निरूपितसमवायस्वसमवायि-समवेतत्वान्यतरसम्बन्धा-वच्छिन्नकारणतावत्वे सति आत्मवृत्तिविशेषगुणभिन्नत्वे सति कारणत्वम् असमवायिकारणसामान्यलक्षणं पर्यवसितं भवति। तथा चोक्तं विश्वनाथपञ्चाननेन- "इत्थं च कार्येकार्थकारणैकार्थान्यतरप्रत्यासत्त्या समवायिकारणे प्रत्यासन्नं कारणं ज्ञानादिभिन्नमसमवायिकारणमिति सामान्यलक्षणं पर्यवसन्नम्"[11] इति।

**निमित्तकारणम्**

तदुभयभिन्नं कारणं निमित्तकारणम्। यथा तुरीवेमादिकं पटस्य। यत्र समवायिकारणं नाप्यसमवायिकारणम्, अथ च कारणं तन्निमित्तकारणम्।

न्यायवैशेषिकदर्शने यत् कारणं न तु समवायिकारणं न च असमवायिकारणं तन्निमित्तकारणमित्याचक्षते तद्यथा पटकार्योत्पत्तौ अनेकानि कारणानि तन्तुः तन्तुसंयोगः, तन्तुरूपं, तन्तुवायः, तुरीवेमाकालदेशाश्च। एतेषु तन्तुः समवायिकारणं तन्तुसंयोगः असमवायिकारणम् एतदतिरिक्तं यान्यपि कारणानि तानि सर्वाणि निमित्तकारणानि यतो हि नैतानि समवायिकारणानि न च असमवायिकारणानि सन्ति। अत एतानि निमित्तकारणानि। न्यायदर्शनोक्तनिमित्तकारणस्यैतत् पटरूपिकार्यं प्रति नियतपूर्ववृत्तित्वे सति अनन्यथासिद्धत्वात्। वैशिष्ट्यं यन्नैतद्

---

[10] न्या.क. पृ - २४४

[11] न्या.सि.मु. पृ - ८४

समवाय्यसमवायिकारणवत् कार्योत्पत्त्यनन्तरमपि कार्येण सहवृत्तित्वं भजते अपि तु कार्योत्पत्त्यनन्तरं कार्यात् पृथक् जायन्ते। किञ्च समवाय्यसमवायिकारणनाशात् कार्यनाशः परं न तथा निमित्तकारणनाशात् कार्यनाशः न तन्तुवायतुरीवेमादिनाशे पटनाशः। अत एव न्यायवैशेषिकसमुदाये उभयकारणभिन्नं यदपि कारणं तन्निमित्तकारणम्। तत्रेदमपि ज्ञेयं यत् - घटादिकार्यनाशं प्रति समवायिकारणनाशस्य असमवायिकारणनाशस्य च कारणत्वं परन्तु द्व्यणुकनाशं प्रति समवायिकारणस्य परमाणोः नाशासम्भवात् असमवायिकारणस्य परमाणुद्वयसंयोगस्य नाशसम्भवात् सर्वत्र असमवायिकारणनाशात् कार्यद्रव्यस्य नाश इति न्यायवैशेषिकाणां सिद्धान्तः। उक्तं च जगदीशतर्कालङ्कारेण - **"द्रव्यनाशो द्विविधः। क्वचिदसमवायिकारणनाशात् क्वचित् समवायिकारणनाशाच्च। तत्राद्यो यथा परमाणुद्वयसंयोगनाशाद् द्व्यणुकनाशः। द्वितीयो यथा परमाणुद्वयसंयोगनाशाद् द्व्यणुकनाशः। द्वितीयो यथा कपालनाशाद् घटनाशः। घटनाश उभयतः सम्भवति।"**[12]

न्यायवैशेषिकसम्प्रदाये प्रतिपादितानि त्रिविधान्येतानि कारणानि सामान्यतया साधारणासाधारणेऽभ्युपगतानि, साधारणानि तानि यानि सामान्यतया सर्वेषां कार्याणाङ्कृते आवश्यकीभूतानि अष्टौ कारणानि – ईश्वरः, ईश्वरज्ञानम्, इच्छा, कृतिः, दिक्, कालः, अदृष्टः, प्रागभावश्चेति। तथा चोक्तम्— **ईश्वरस्तद् ज्ञानेच्छाकृतयः प्रागभावकालदिगदृष्टान्यष्टौ साधारणकारणानि।**[13] तत्रेदमपि अवगन्तव्यं यत् समवायिकारणं द्रव्यस्यैव, अर्थात् द्रव्ये पृथिव्यादिनवान्यतमे एव समवायिकारणता स्वरूपसम्बन्धेन वर्तते न तु द्रव्यभिन्ने। असमवायिकारणत्वं गुणेषु कर्मसु चैव वर्तते न त्वन्यत्रेति व्यवस्था। उक्तं च विश्वनाथपञ्चाननेन-

**"समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम्।**
**गुणकर्ममात्रवृत्ति**
**ज्ञेयमथाप्यसमवायिहेतुत्वम्॥"**[14]

विशिष्टकार्यप्रतिपत्त्यर्थं विशिष्टं कारणमसाधारणं कारणं तद्यथा घटकार्यम्प्रति दण्डः असाधारणं कारणं दण्डः घटम्प्रत्येव कारणं न तु पटम्प्रति। एवं न्यायवैशेषिकदर्शनोक्तकारणताविषयकसिद्धान्तः एतदाधारीकृत्यैव असत्कार्यवादसिद्धान्तः न्यायवैशेषिकाणामादृतः।

## सहायकग्रन्थसूची


- अन्नंभट्टः। **तर्कसंग्रहः**। सम्पा.श्रीनिरञ्जनस्वरूप ब्रह्मचारी, वाराणसी : दीपिकासह प्रकाशक दण्डिस्वामी श्रीमद् आनन्द वोधाश्रम्।
- अन्नंभट्टः। **तर्कसंग्रहः**। सम्पा. श्रीनारायणचन्द्रगोस्वामीकृत, कलिकाता : व्याख्यासह श्रीमति कल्यानीदासगुप्त कर्तृक प्रकाशित।
- अन्नंभट्टः। **तर्कसंग्रहः।** सम्पा. गोविन्दाचार्यः, वाराणसी : चौखम्बा सुरभारती प्रकाशन,२०१४।
- तर्कतीर्थः, अमरेन्द्रमोहनः। **न्यायदर्शनम्**। मुंशिराम, मनोहरलाल पाबलिशार्स, २०१८।
- भट्टाचार्यः, विश्वनाथ न्यायपञ्चाननः। **कारिकावली।** प्रभा मञ्जुशा, दिनकरी रामरूद्री व्याख्यासह, देहली : चौखम्बा संस्कृत प्रतिष्ठान।
- भट्टाचार्यः, विश्वनाथ न्यायपञ्चाननः। **न्यायसिद्धान्तमुक्तावली।** सम्पा.गजाननशास्त्री मुसलगाँवकर, वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०१४।
- भट्टाचार्यः, विश्वनाथः न्यायपञ्चाननः। **न्यायसिद्धान्तमुक्तावली**। सम्पा. श्रीकृष्णवल्लभाचार्यः, चौखम्बा संस्कृत संस्थान १९७८।


[12] तर्का.मृ. पृ – ४१

[13] तर्का.मृ. पृ – ३६

[14] कारिकावली. का. २३

ISSN : 2583-2271
Vol. - 3, No. 1: 2023


- भट्टाचार्यः, विश्वनाथः न्यायपञ्चाननः। **न्यायसिद्धान्तमुक्तावली**। सम्पा. हरिरामशुक्लाशास्त्री, वाराणसी : चौखम्बा संस्कृत सीरिज, १९७२।
- भट्टाचार्यः, जगदीशः। **तर्कामृतम्।** सम्पा.रामचन्द्रमिश्र, वाराणसी : चौखम्बाविद्याभवनम्।
- भट्टाचार्यः, विश्वनाथः न्यायपञ्चाननः। **भाषापरिच्छेदः**। सम्पा.पञ्चाननशास्त्री, कलिकाता : प्रका. सतीनाथभट्टाचार्यः, काँथि मेदिनीपुर।
- महर्षिः , गौतमः। **न्यायदर्शनम् ( पाँच खण्ड )**। सम्पा.महामहोपाध्याय फणिभूषणतर्कवागीश, कलिकाता : पश्चिमबङ्ग राज्य पूस्तक पर्षद्।
- महर्षिः , गौतमः। **न्यायसूत्रम्।** सम्पा.महेशझा , वाराणसी : चौखम्बा संस्कृत सीरिज अफिस, २०२३।
- मिश्रः, केशवः। **तर्कभाषा।** सम्पा. वदरीनाथशुक्ल, वाराणसी : मोतिलालवाराणसीदास १९६८।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# न्यायनये मुक्तिवादस्य स्थानम्

**दीपक-मण्डलः**

**शोधच्छात्रः,न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

**बी-४, कुतुबसांस्थानिकक्षेत्रम् ,नवदेहली – ११००१६**

**प्रबन्धसारः**

*प्रयोजनमन्तरा न कस्यापि प्रवृत्तिर्भवतीति सूत्रकारैः महर्षिभिः स्वीयसूत्रप्रारम्भे प्रयोजनपूर्वकं सूत्रमुपपादितम्। समेषां शास्त्रकाराणां मुख्यं प्रयोजनं भवति निःश्रेयसम्। तच्च निःश्रेयसं कथं भवतीति जिज्ञासायां यद्यपि साधने दार्शनिकानां वैमत्यं दृश्यते तथापि लक्ष्ये दार्शनिकानां वैमत्यं नास्तीति निश्चप्रचं वक्तुं शक्यते। तादृशीं रीतिं मनसि निधाय प्रकृतेऽपि न्यायसूत्रकारैः महर्षिभिः अक्षपादैः आदौ* ***"प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छल-जातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेय-साधिगमः"*** *इति सूत्रमुद्बोधितम्। परन्तु भट्टाचार्यैः मुक्तिवादस्य प्रारम्भे प्रतिपादितं यत् –* ***"प्रयोजनमुद्दिश्यैव पुमांसस्तदुपाये प्रवर्तन्ते, अतः शास्त्रस्य प्रयोजनं प्रथमतः प्रदर्शयन्ति शास्त्रकृतः"*** *इति। तत्रापि एकं मुख्यं प्रयोजनम् अपरञ्च गौणप्रयोजनं भवति। मुख्यं प्रयोजनं तु सुखं तद्भोगो दुःखाभावश्चेति प्रदर्शयति गदाधरः –* ***"स्वतः प्रयोजनं सुखं तद्भोगो दुःखाभावश्च"*** *इति। तच्च सुखम् अन्येच्छानधीनेच्छाविषयत्वरूपं ग्राह्यम् अन्यथा सुखसाक्षात्काररूपभोगं प्रति विषयतया जनके सुखे अव्याप्त्यापत्तिः। एतत्सर्वं मनसि निधाय भट्टाचार्यो भणति –* ***"दुःखासम्भिन्नसुखरूपतया स्वर्गस्यैवाऽऽन्वीक्षिक्यादिशास्त्रफलस्याप्यपवर्गस्यात्यन्तिकदुःखनिवृत्तिरूपस्य स्वत एव प्रयोजनम्"*** *इति। अर्थात् आत्यन्तिकदुःखनिवृत्तिरूपं यन्निःश्रेयसं भवति तदेव मुख्यप्रयोजनं भवतीति यद्भट्टाचार्यैः भाषितम्। तत्र मुक्तेः स्वरूपनिरूपणप्रसङ्गे व्योमशिवाचार्यस्य मतं स्वीकृत्य उदयनाचार्यैः किरणावल्यां यद्यपि दुःखसन्ततेः अत्यन्तोच्छिद्यत्वे प्रमाणं –* ***"दुःखसन्ततिरत्यन्तमुच्छिद्यते सन्ततित्वात् प्रदीपसन्ततिवत्"*** *प्रदर्शितम्। तथापि गदाधर भट्टाचार्यैः साक्षान्मुक्तौ प्रमाणमुपस्थापितं यत् – "मुक्तौ प्रमाणन्तु दुःखत्वं देवदत्तदुःखत्वं वा स्वाश्रयाऽसमानकालीनध्वंसप्रतियोगिवृत्ति कार्यमात्रवृत्तित्वात् सन्ततित्वाद्वा एतत्प्रदीपत्ववत्" इति अत्र वाक्ये हेतुपक्षयोर्भेदाद् अनुमानचतुष्टयमवलोक्यते। एकेनानुमानेन कार्यसम्भवे द्वितीयानुमानानुधावने किं बीजं तस्य विश्लेषणं वर्तते।*

**कुञ्चीशब्दाः** – निःश्रेयसम्, अनुमानम्, प्रमाणविद्या, पुरुषार्थः, पदार्थः चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

प्रयोजनमन्तरा न कस्यापि प्रवृत्तिर्भवतीति सूत्रकारैः महर्षिभिः स्वीयसूत्रप्रारम्भे प्रयोजनपूर्वकं सूत्रमुपपादितम्। समेषां शास्त्राणां मुख्यं प्रयोजनं भवति निःश्रेयसम्। तच्च निःश्रेयसं कथं भवतीति जिज्ञासायां यद्यपि साधने दार्शनिकानां वैमत्यं दृश्यते तथापि लक्ष्ये दार्शनिकानां वैमत्यं नास्तीति निश्चप्रचं वक्तुं शक्यते। तादृशीं रीतिं मनसि निधाय प्रकृतेऽपि न्यायसूत्रकारैः महर्षिभिः अक्षपादैः आदौ **"प्रमाणप्रमेयसंशयप्रयोजन-दृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः"**[1] इति सूत्रमुद्बोधितम्। तत्र तेषां मुख्यं लक्ष्यं तत्त्वज्ञानं, तेन तत्त्वज्ञानेन मोक्षस्य अवाप्तिः सम्भवति, तेन च **"ऋते ज्ञानान्न मुक्तिः, विद्यया विन्दतेऽमृतम्, विद्ययाऽमृतमश्नुते"** इत्यादिश्रुतिवाक्या-नामपि सार्थक्यं सम्भवति। सूत्राणामुपरि वात्स्यायनेन न्यायभाष्यं लिखितम्। तत्र तेन आचार्येण उद्घोषितं यत् प्रमाणप्रमेयेषु संशयादीनामन्तर्भावेऽपि तेषां पृथक् निर्वचनमन्तरेण इयं न्यायविद्या अध्यात्मविद्यामात्रं स्यात् न्यायविद्यायाः पृथक्प्रस्थानत्वं सततं विद्यत एव। तथाहि - **"तत्र संशयादीनां पृथग्वचनमनर्थकम्, संशयादयो**

[1] न्यायसूत्र (१/१/१)

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

**यथासम्भवं प्रमाणेषु प्रमेयेषु चान्तर्भवन्तो न व्यतिरिच्यन्ते इति। सत्यमेतत्, इमास्तु चतस्रो विद्याः पृथक्प्रस्थानाः प्राणभृतामनुग्रहायोपदिश्यन्ते यासां चतुर्थीयमान्वीक्षिकी न्यायविद्या तस्याः पृथक्प्रस्थानाः संशयादयः पदार्थाः तेषा पृथग्वचनमन्तरेण अध्यात्मविद्यामात्रमियं स्याद् यथोपनिषदः तस्मात् संशयादिभिः पदार्थैः पृथक् प्रस्थाप्यते।"**[2] इयमान्वीक्षिकी न्यायविद्या। अनुमानञ्च अन्वीक्षा। प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा, तया प्रवर्तते इयं न्यायविद्या इति आन्वीक्षिकीव्यपदेशं भजते। तत्र परार्थानुमानं न्यायशब्देनोच्यते, नीयते विवक्षितार्थसिद्धिरनेनेति व्युत्पत्तेः। अवयवसमुदायात्मके च न्याये प्रत्यक्षादीनां चतुर्णामपि प्रमाणानां सम्बन्धो विद्यते। आगमः प्रतिज्ञा, हेतुरनुमानम्, उदाहरणं प्रत्यक्षम्, उपमानमुपनयः। सर्वेषामेकार्थसमवाये सामर्थ्यप्रदर्शनं निगमनम्। न्यायश्च विप्रतिपन्नपुरुषप्रतिपादक इति तस्य महान् प्रकर्षः। सर्वोपजीव्यं न्यायं सपरिकरं व्युत्पादयदियं न्यायविस्तराख्यं शास्त्रं विद्यास्थानेषु प्रथमस्थानमारोहति इत्यत्र नास्ति विशयः। न्यायविद्या तु प्रमाणादिकं व्युत्पादयतीति प्रमाणविद्येति गीयते। ईक्षत्यधिकरणभाष्ये भगवत्पादाः पदवाक्यप्रमाणज्ञेनाचार्येण इति ग्रन्थेन वादरायणाचार्यं प्रमाणशब्दोदितन्यायविद्यावेदितृतया स्वीकुर्वन्ति - इतरा विद्या अप्रमाणविद्या इति विदग्धभणितिः, अपि च प्रमाणमीश्वरं व्युत्पादयति न्यायविद्या, उक्तञ्च सूत्रकारेण- **"मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्।"**[3]

तत्रापि आचार्याणामियमुक्तिः - **"तन्मे प्रमाणं शिव"**[4] इति। एतेनापि निश्चप्रचं वक्तुं शक्यते यदियं न्यायविद्या प्रमाणविद्या एव। सर्वज्ञस्येश्वरस्य प्रमाणत्वं प्रतितन्त्रसिद्धान्तः, उक्तं वरदराजाचार्येण तार्किकरक्षायां - **"प्रतितन्त्रो यथा न्याये सर्वज्ञस्य प्रमाणता"**[5] इति। वेदकर्तृत्वेनेश्वरं साधयितुमेव महता प्रबन्धेन शब्दस्यानित्यत्वं व्यवस्थापितं सूत्रकारैः।

**आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना**
**यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥**[6]

इति ब्रुवन्मनुरपि धर्मबोधकत्रय्यादीनां धर्मबोधे जननीये आन्वीक्षिक्यपेक्षां मनुते। प्रवर्तकत्वरूपधर्मद्वारेण सर्वविद्यानामुपकारकत्वादाश्रयो न्यायविद्या। तथा च न्यायवार्तिकं **"सर्वासां विद्यानामियमुपकरोति, उपकारित्वादाश्रयो राजभृत्यवत्"**[7] इति अनेन न्यायविद्या राजविद्येत्युक्तं भवति। उक्तं च -

**प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तिता ॥**[8] इति ॥

अपि च समेषामपि विद्यास्थानानां मूलस्तम्भभूता आन्वीक्षिकी वेदप्रामाण्यहेतुत्वात्। वेदे प्रमाणतया व्यवस्थापिते किल वेदवाक्यानामर्थविचाररूपमीमांसादिविद्यास्थानस्य याथार्थ्यम्। जयन्तभट्टाः न्यायमञ्जर्यामुपक्रमे इत्थं प्रतिपादयन्ति -

**जयन्ति पुरजिद्दत्तसाधुवादपवित्रिताः।**
**निदानं न्यायरत्नानामक्षपादमुनेर्गिरः ॥**[9]

उपसंहारे च -

**न्यायोद्गारगभीरनिर्मलगिरा गौरीपतिस्तोषितो**
**वादे येन किरीटिनेव समरे देवः किराताकृतिः।**
**प्राप्तोदारवरस्ततः स जयति ज्ञानामृतप्रार्थना**
**नाम्नाऽनेकमहर्षिमस्तकवलत्पादोऽक्षपादो मुनिः ॥**[10]

एतस्मात् कारणात् लोकयात्रानिर्वाहकतया सर्वोपजीव्यस्यानुमानस्य, विप्रतिपन्नपुरुषप्रतिपादकतया श्रेष्ठस्य सपरिकरस्य न्यायस्य, सर्वविद्यापेक्षितप्रमाणादेश्च व्युत्पादनेन, अपवर्गसाधनोपदेशपरत्वेन, श्रुतिस्मृतिसम्मतत्वेन च वाङ्मये उन्नतं पदमधिरूढं विलसति न्यायदर्शनमित्यत्र नास्ति कश्चन विशयावकाशः।

---

[2] न्या.भा. (१/१/१)
[3] न्या.भा. २/१/६८
[4] तार्किकरक्षा पृ. ८
[5] तार्किकरक्षा का. ६०
[6] मनु. १२/१०६
[7] न्या. वा. पृ. २१
[8] न्या. सू. १/१/१ (भाष्य पृ. १२)
[9] न्या. म. मङ्गलश्लोकः - ४
[10] न्या. म. उपसंहारश्लोकः

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

समेषां दार्शनिकानां मुख्यं लक्ष्यं भवति दुःखाद् विमुक्तिः। सा च विमुक्तिः शास्त्रप्रतिपादिततत्त्वज्ञानेन सम्भवतीति न्यायसूत्रकारस्य लक्ष्यं मनसि निधाय मणिकारैरुच्यते- **"अथ जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुरष्टादशविद्यास्थानेषु अभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय।"**[11] अर्थाद् दुःखपङ्कनिमग्नानां जीवानां समुद्धरणेच्छया न्यायशास्त्रस्य प्रणयनम्। पदार्थतत्त्वज्ञानेन साक्षान्मुक्तिः सम्भवति न वेति जिज्ञासायां न्यायभाष्यकारो वदति - **"तत् खलु निःश्रेयसं कि तत्त्वज्ञानानन्तरमेव भवति? नेत्युच्यते, कि तर्हि? तत्त्वज्ञानात्।**[12] अर्थात् तत्त्वज्ञानेन साक्षान्मुक्तिः नैव सम्भवति। अपि च तत्त्वज्ञानेन मिथ्याज्ञानस्य नाशः, मिथ्याज्ञाननाशे सति दोषाणां नाशः, दोषनाशे सति प्रवृत्तेः नाशः, प्रवृत्तिनाशे सति जन्मनः नाशः, जन्मनाशे सति एकविशत्यात्मकदुःखस्य नाशः। तादृशदुःखनाशस्तु मोक्षः पदार्थः। तथाहि- **"दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञाना-नामुत्तरोत्तराऽपाये तदनन्तरापायादपवर्गः"**[13], **"तदत्यन्तविमोक्षोऽपवर्गः"।**[14] अनेन ज्ञायते यत् न्यायशास्त्रे दुःखानामात्यन्तिकनिवृत्तिः मोक्षपदार्थः। दार्शनिकप्रस्थाने मोक्षविषये दार्शनिकानां वैमत्यं दृश्यते। एवञ्च दुःखानामात्यन्तिकनिवृत्तिः मोक्षरित्यत्र निवृत्तिः दुःखप्रागभावरूपा, दुःखात्यन्ताभावरूपा दुःखध्वंसरूपा वेत्यादिजिज्ञासां मनसि निधाय सप्तदशशताब्द्यां श्रीमता गदाधरभट्टाचार्येण **मुक्तिवाद** इत्याख्यः ग्रन्थः विरचितः। यत्र मुक्तिविषयिणी कथा विद्यते।

धर्मार्थकाममोक्षेषु चतुर्विधेषु पुरुषार्थेषु मोक्ष एवात्यन्तिकः पुरुषार्थः। तत्सम्पत्तिश्च श्रवणेन मननेन निदिध्यासनेन च सम्भवति। श्रुतिरपि वदति- **"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"**[15] इति। एतेन ज्ञायते यद् आदौ मुमुक्षोरात्मसाक्षात्कारे श्रवणमनननिदिध्यासनानि तत्त्वज्ञानजनकानि भवन्ति। याज्ञवल्क्योऽपि स्वपत्नीं मैत्रेयीमुपदिशति-

**"श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।**
**मत्वा च सततं ध्येय एते दर्शनहेतवः॥"**[16]

अनेन वक्तुं शक्यते यत् मोक्षसम्पत्तिस्तु न स्वोत्पत्तौ श्रवणमनननिदिध्यासनाधीनात्मसाक्षात्काराधीना सहकारितयापि कर्मादीनपेक्षते। तत्र निखिलशास्त्रधुरीणवेदान्तेषु प्रसिद्धापि सा नैयायिकनये जीवब्रह्मभेदस्य जागरुकत्वात् कथं संगच्छत इत्याशंका पिशाचीप्रसारनिस्सारणक्षमः महामहोपाध्यायः नव्यनैयायिकः श्रीमान् गदाधरभट्टाचार्यः **"तदत्यन्तविमोक्षोऽपवर्गः"** इति सूत्रकारीयमुक्तिपदार्थलक्षण-घटकात्यन्तिकपदस्य प्रतिवादिदुर्घटकल्पनानिघर्षणपूर्वकं यया युक्त्याऽर्थं कृत्वा **मुक्तिवादे** तादृशीं मुक्ति जीवब्रह्मणोर्भेदेऽपि संस्थापितवान्।

शास्त्रप्रवृत्तौ उद्देश-लक्षण-परीक्षायाः कारणत्वं स्वीक्रियते नैयायिकैः। तथा चोक्तं न्यायशास्त्रकारेण वात्स्यायनेन- **"त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः- उद्देशो लक्षणं परीक्षा चेति।"**[17] उद्देशादीनां यथा कारणत्वं प्रवृत्तौ स्वीक्रियते तथैव शास्त्राणां प्रयोजनमपि वक्तव्यम्। तच्च प्रयोजनं निःश्रेयसमिति शास्त्रज्ञैः स्वीयप्रथमसूत्रे सूचितम्। परन्तु भट्टाचार्यैः मुक्तिवादस्य प्रारम्भे प्रतिपादितं यत् - **"प्रयोजनमुद्दिश्यैव पुमांसस्तदुपाये प्रवर्तन्ते, अतः शास्त्रस्य प्रयोजनं प्रथमतः प्रदर्शयन्ति शास्त्रकृतः"**[18] इति। तत्रापि एकं मुख्यं प्रयोजनम् अपरञ्च गौणप्रयोजनं भवति। मुख्यं प्रयोजनं तु सुखं तद्भोगो दुःखाभावश्चेति प्रदर्शयति गदाधरः - **"स्वतः प्रयोजनं सुखं तद्भोगो दुःखाभावश्च"**[19] इति। तच्च सुखम् अन्येच्छानधीनेच्छाविषयत्वरूपं ग्राह्यम् अन्यथा सुखसाक्षात्काररूपभोगं प्रति विषयतया जनके सुखे अव्याप्त्यापत्तिः। तत्र गौणप्रयोजनं तु

[11] प्रा.वा.प्र., पृ.सं.-७
[12] न्या.सू.भा. (१/१/१)
[13] न्या.सू. (१/१/२)
[14] न्या. सू. (१/१/२२)
[15] बृह.उप. २/५
[16] बृह.उप. ४/५
[17] न्या. भा. १/१/३
[18] मुक्तिवादः पृ. ०१
[19] मुक्तिवादः पृ. २

इतरेच्छाधीनेच्छाविषयः भोजनादिः, भोगशब्देन सुखसाक्षात्कारो बोध्यते। सुखं किं सांसारिकसुखं गृह्यते इति वक्तुं न शक्यते, यतः सांसारिकसुखस्य दुःखानुविद्धतया तादृशं सुखं कदापि मुख्यप्रयोजनं भवितुं नार्हति। अपि तु तादृशं सुखं ग्रहणयोग्यं भवति यत् कदापि दुःखानुविद्धं न भवति। तादृशं सुखमित्थं भवति –

**यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्।**
**अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्॥**

एतत्सर्वं मनसि निधाय भट्टाचार्यो भणति - **"दुःखासम्भिन्नसुखरूपतया स्वर्गस्यैवाऽन्वीक्षिक्यादि-शास्त्रफलस्याप्यपवर्गस्यात्यन्तिकदुःखनिवृत्तिरूपस्य स्वत एव प्रयोजनम्"**[20] इति। अर्थात् आत्यन्तिकदुःखनिवृत्तिरूपं यन्निःश्रेयसं भवति तदेव मुख्यप्रयोजनं भवतीति भट्टाचार्यैः भाषितम्। तत्र मुक्तेः स्वरूपनिरूपणप्रसङ्गे **व्योमशिवाचार्यस्य** मतं स्वीकृत्य उदयनाचार्यैः किरणावल्यां यद्यपि दुःखसन्ततेः अत्यन्तोच्छिद्यत्वे प्रमाणं - **"दुःखसन्ततिरत्यन्त-मुच्छिद्यते सन्ततित्वात् प्रदीपसन्ततिवत्"**[21] प्रदर्शितम्। तथापि गदाधरभट्टाचार्यैः साक्षान्मुक्तौ प्रमाणमुपस्थापितं यत् - **"मुक्तौ प्रमाणन्तु दुःखत्वं देवदत्तदुःखत्वं वा स्वाश्रयाऽसमानकालीनध्वंसप्रतियोगिवृत्ति कार्यमात्रवृत्तित्त्वात् सन्ततित्वाद्वा एतत्प्रदीपत्ववत्"**[22] इति अत्र वाक्ये हेतुपक्षयोर्भेदाद् अनुमानचतुष्टयमवलोक्यते। एकेनानुमानेन कार्यसम्भवे द्वितीयानुमानानुधावने किं बीजं तस्य विश्लेषणं वर्तते।

"तदत्यन्तविमोक्षोऽपवर्गः" इति न्यायसूत्रे दुःखानामात्यन्तिकनिवृत्तिः मोक्ष इति सूत्रकारैः यत् संसूचितं तस्य स्वारस्यं प्रकाशयितुं भट्टाचार्यैरुच्यते **"अथ दुःखनिवृत्तिः दुःखस्य ध्वंसरूपोऽभावः"**[23] इति। दुःखध्वंसरूपोऽभाव इति यद् भट्टाचार्यैः प्रतिपादितं एतेन ज्ञायते दुःखप्रागभावस्य मोक्षरूपत्वं प्रभाकरैः यत् स्वीकृतं तन्न समीचीनम्। यतः प्रागभाव-अत्यन्ताभावयोः नित्यत्वात् तयोः साध्यत्वेन कथमपि ग्रहणं नैव सम्भवति। अनेन प्रकारेण आत्यन्तिकपदस्य स्वारस्यमपि विवेचितम्। नित्यसुखाभिव्यक्तिमुक्तिरिति कुमारिलमतस्य निराकरणे अद्वैतमतस्य निराकरणे एकदण्डिमतस्य त्रिदण्डिमतस्य च निराकरणे याः युक्तयोऽपि प्रदर्शिताः भट्टाचार्यैरित्यलम्।

## सहायकग्रन्थसूची


- आचार्य वात्स्यायनः, **न्यायभाष्यम्,** प्रसन्नपदाटीकाकारः सुदर्शनाचार्यः, सं. द्वारिकादासशास्त्री, सुधी प्रकाशनम्, वाराणसी, १९८६
- उदयनाचार्यः, **किरणावली**, सं. जे. एस. जेटली, ओरियण्टल इन्स्टीट्यूट, बड़ौदा, १९९१
- उदयनाचार्यः, **किरणावली**, सं. हिन्दी अनु. पं. गौरीनाथशास्त्री, सं. सं. विश्वविद्यालय, वाराणसी, १९८०
- गदाधरभट्टाचार्यः, **मुक्तिवादः**, दुण्ढिराज शास्त्री, चौखम्बासंस्कृतग्रन्थमाला प्रकाशक, वाराणसी
- जयन्तभट्टः, **न्यायमञ्जरी**, सम्पा. पं. दुण्डिराजशास्त्री, चौखम्भा संस्कृत संस्थानम्, वाराणसी, १९३४
- जयन्तभट्टः, न्यायमञ्जरी (ग्रन्थिभंग), सम्पा, चन्द्रधरः, सं. नगीन जे. साह, अहमदाबाद, १९९०
- महर्षिगौतमः न्यायदर्शनम्, अनु. दुण्ढिराजशास्त्री, चौखम्भा संस्कृत संस्थानम्, वाराणसी, १९९०
- महर्षिगौतमः न्यायसूत्रम् (भाष्य तथा न्यायसूची निबन्धसहितः), सं. गंगानाथझा, ओरिएण्टल बुक एजेंसी पुणे, १९३९
- महर्षिगौतमः न्यायसूत्रम् (भाष्य-वार्तिक-ताराटीकासहितः), सं. तारानाथ, मुंशीराममनोहरलालः, दिल्ली, ९८५


[20] मुक्तिवादः पृ. ३
[21] किरणावली मुक्तिप्रकरणम्
[22] मुक्तिवादः पृ. ६
[23] मुक्तिवादः पृ. ८

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# सादृश्यपदार्थविमर्शः

**अलोक-सेनः**
**शोधच्छात्रः,रामकृष्णमिशन्-विवेकानन्दविश्वविद्यालयः**
**वेलुडमठः, पश्चिमवङ्गराज्यम्- ७११२०२**

---

**प्रबन्धसारः**

*समान इव दृश्यतेऽसौ इति विग्रहेण समानपूर्वकात् दृश्धातोः कञि प्रत्यये सदृशशब्दो निष्पद्यते। सदृशस्य भाव इत्यर्थे सदृशशब्दादुत्तरं ष्यञि प्रत्यये सादृश्यशब्दो निष्पन्नो भवति। पदार्थतत्त्वविचक्षणा वैशेषिका नैयायिकाश्च सादृश्यस्य यद्यपि पदार्थत्वमस्तीति कथयन्ति तथापि तस्यातिरिक्तपदार्थत्वं नाङ्गीकुर्वन्ति। परन्तु मीमांसकेषु प्राभाकरा वैयाकरणा आलंकारिका नैयायिकेष्वपि महादेवभट्टप्रमुखा आचार्याः सादृश्यमतिरिक्तपदार्थरूपेण स्वीचक्रुः। तथाहि शोधपत्रेऽस्मिन् सादृश्यस्य पदार्थत्वमस्ति न वा, तस्यातिरिक्तपदार्थत्वे किं मानम्, अतिरिक्तपदार्थत्वे का हानिः, तस्य निर्दुष्टं लक्षणं किम्, प्रसिद्धे लक्षणे के दोषाः सन्ति, तेषां दोषाणां निराकरणं कथं सम्भवति, सादृश्यस्यातिरिक्तपदार्थघटकानुमानानां विचारः इत्यादीनां विषयाणामालोचनमधस्तात्प्रतिपाद्यते।*

**कुञ्चीशब्दाः** - सदृशः, सादृश्यम्, साधर्म्यम्, पदार्थः, सन्निकर्षः चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

**प्रस्तावना**

संस्कृतसाहित्ये दर्शनशास्त्राणि अतीव महनीयं पदमलङ्कुर्वन्ति। तत्र दिव्यचक्षुषामखिलपदार्थजातं करतलामलकवत्कुर्वन् परमकारुणिको महर्षिर्गौतमो जगतो जटिलान् सम्प्रश्नान् बोधयितुं प्राणभृतां परमकल्याणाय पदार्थानां साधर्म्यवैधर्म्यज्ञानपूर्वकं दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञाननाशजनकं सत्यासत्यनिष्कर्षलक्षणं मोक्षफलप्रतिपादकं न्यायसूत्रं रचयाञ्चकार। प्राचीनन्याये यद्यपि षोडशपदार्थाः स्वीकृताः तथापि नव्यैः सूत्रभाष्याविरुद्धतया सप्त एव पदार्थाः प्रतिपादिताः। पदार्थानां सप्तत्वे वैशेषिकाणामपि विरोधो नास्ति। प्रोक्तञ्च *न्यायसिद्धान्तमुक्तावल्याम्* – "*एते च पदार्था वैशेषिकप्रसिद्धा नैयायिकानामप्यविरुद्धाः, प्रतिपादितञ्चैवं भाष्ये*"[1] इति। परन्तु पदार्थानां संख्याविषये दार्शनिकानां वैमत्यं दरीदृश्यते। तत्र भाट्टैः द्रव्यगुणकर्मसामान्याभावाभेदेन पञ्च पदार्थाः स्वीक्रियन्ते। प्रोक्तञ्च *मानमेयोदये*-

वयं तावत्प्रमेयं तु द्रव्यजातिगुणक्रियाः।
अभावश्चेति पञ्चैतान् पदार्थानाद्रियामहे॥[2] इति।
(मा.मे २/५)

प्राभाकरास्तु द्रव्यगुणकर्मसामान्यसंख्यासमवायसादृश्य-शक्तिभेदेन अष्टौ पदार्थान् स्वीकुर्वन्ति। प्राभाकराः कथयन्ति सादृश्यस्यातिरिक्तपदार्थत्वे कुतः सप्त एव पदार्थाः? ते अनुमानप्रमाणसहायेन सादृश्यस्यास्तित्वमपि साधयन्ति। किञ्च, सादृश्यस्यातिरिक्तपदार्थत्वम् अस्ति न वेति विषये नैयायिकेष्वपि मतविरोधः दरीदृश्यते। तथाहि पदार्थत्वेन स्वीकृतस्य सादृश्यस्य स्वरूपनिर्णयपुरःसरमतिरिक्तपदार्थत्वमस्ति न वेति अधस्ताद्विचार्यते।

**सादृश्यस्यातिरिक्तपदार्थत्वसिद्धिः**

प्राभाकराः कथयन्ति सप्तपदार्थभिन्नस्य सादृश्यस्यातिरिक्तपदार्थत्वमस्ति। इन्द्रियसन्निकर्षमात्रेण सादृश्यज्ञानाभावान्न तत्प्रत्यक्षज्ञानस्य विषयो भवति। नापि अनुमानस्य विषयो भवति लिङ्गाभावेऽपि सादृश्यज्ञानसम्भवात्। तच्च सादृश्यं नव्यन्याये प्रसिद्धेषु सप्तपदार्थेष्वपि अन्तर्भवति। अतः सादृश्यनामकः कश्चन पदार्थोऽस्तीत्यत्र नास्ति सन्देहः। ननु सादृश्यस्यातिरिक्तपदार्थत्वे किं मानमिति

---

[1] पञ्चाननभट्टाचार्यः(सम्पा.), *भाषापरिच्छेदः*, पृ. १७-१८।

[2] स्वामियोगिन्द्रानन्दः(सम्पा.), *मानमेयोदयः*. पृ. १४२।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

जिज्ञासायामनुमीयते तैः प्राभाकरैः - सादृश्यं सप्तपदार्थानन्तर्भूतं षड्भावानन्तर्भूतत्वे सति अभावानन्तर्भूतत्वादिति। अस्यानुमानस्य सिद्धये सादृश्ये षड्भावानन्तर्भूतत्वमभावानन्तर्भूतत्वञ्चादौ साधनीयम्। तथाहि प्रथममनुमानम् - सादृशं षड्भावानन्तर्भूतं सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वादिति। सतिसप्तमी विशिष्टार्थं बोधयति। तेन सामान्येतरवृत्तित्वविशिष्ट-सामान्यवृत्तित्वमेव हेतुरिति बोध्यम्। अत्र विशेष्योऽस्ति सामान्यवृत्तित्वमिति विशेषणन्तु सामान्येतरवृत्तित्वमिति। सामान्यवृत्तित्वरूपविशेष्यमात्रस्य हेतुत्वे सामान्यत्वस्य स्वरूपेण सामान्यवृत्तित्वे सति षड्भावान्तर्गतत्वाद् व्यभिचारः। सामान्येतरवृत्तित्वरूपविशेषणमात्रस्य हेतुत्वे द्रव्यत्वादावतिव्याप्तिः। द्रव्यत्वं सामान्यभिन्ने द्रव्ये तिष्ठति। अतः सामान्येतरवृत्तित्वे सति षड्भावान्तर्गतत्वाद्व्यभिचारः। तथाहि व्यभिचारवारणाय सामान्येतरवृत्तित्वविशिष्टसामान्य-वृत्तित्वस्यैव हेतुत्वमिति स्वीकर्तव्यम्। तेन सादृश्यस्य सामान्येतरेषु द्रव्यगुणादिषु विद्यमानात् किञ्च, सामान्येऽपि सत्त्वात् सामान्येतरवृत्तित्वविशिष्टसामान्यवृत्तित्वं सादृश्ये तिष्ठति। अपि च द्रव्यादयः केऽपि पदार्थाः सामान्ये नैव तिष्ठन्ति। परन्तु सादृश्यं सामान्ये वर्तते। सादृश्यं द्रव्यादिष्वन्तर्भवति चेत्तर्हि तत्सामान्ये स्थातुं न शक्नोति। परन्तु सामान्ये सत्त्वात् सादृश्यं न षड्भावपदार्थेषु अन्तर्भवति। अतः यत्र यत्र सामान्येतरवृत्तित्वविशिष्टसामान्यवृत्तित्वं तत्र तत्र षड्भावानन्तर्भूतत्वमिति व्याप्तिः। अपि च सादृश्ये सामान्येतरवृत्तत्वविशिष्टसामान्यवृत्तित्वरूपहेतोर्विद्यमानात् पक्षधर्मताप्यस्ति। षड्भावानन्तर्गतत्वव्याप्य-सामान्येतरवृत्तित्वविशिष्टसामान्यवृत्तित्ववदिदं सादृश्यमित्यत्र परामर्शः। अतः सादृश्यं षड्भावानन्तर्भूतवदित्यनुमितिः जायतेऽस्मादनुमानात्। परन्तु प्रमेयत्वे सामान्येतरवृत्तित्वं सामान्यवृत्तित्वञ्च तिष्ठति। तथाहि सामान्येतरवृत्तित्वविशिष्टसामान्यवृत्तित्व-रूपहेतोः सत्त्वेऽपि षड्भावानन्तर्भूतत्वरूपसाध्या-भावाद्व्यभिचार इति चेन्न 'व्यतिरेकित्वे सती'ति दलमपि हेत्वंशे योज्यम्। तेन हेतोः सम्पूर्णं रूपं भवति व्यतिरेकित्वविशिष्टसामान्येतरवृत्तित्व-विशिष्टसामान्यवृत्तित्वमिति। व्यतिरेकित्वं नाम अत्यन्ताभावप्रतियोगित्वम्। केवलान्वयित्वं नाम अत्यन्ताभावाप्रतियोगित्वम्। अतः प्रमेयत्वस्य केवलान्वयित्वात्तत्रात्यन्ताभावप्रतियोगित्वं नास्तीति न व्यभिचारः।

तथात्वेऽपि भावत्वे व्यभिचारः। भावत्वस्याभावनिष्ठा-त्यन्ताभावप्रतियोगितया व्यतिरेकित्वात् सामान्येतरद्रव्यवृत्तित्वात् सामान्यवृत्तित्वाच्च तत्र व्यतिरेकित्वविशिष्ट-सामान्येतरवृत्तित्वविशिष्टसामान्यवृत्तित्वरूप-हेतुरस्ति। सत्तावत्त्वमेव भावत्वम्। ननु सत्तायाः द्रव्यगुणकर्ममात्रवृत्तित्वात् सामान्यादिचतुष्टयेऽभावात् कुतः सत्तावत्त्वं भावत्वमित्यत्रोच्यते सत्तावत्त्वं क्वचित् समवायेन क्वचित् स्वसमवायिसमवेतसम्बन्धेन क्वचित् स्वसमवायिस्वरूपसम्बन्धेन बोध्यम्। तेन समवायेन सत्तायाः द्रव्यगुणकर्ममात्रवृत्तित्वात्तेषु भावत्वमपि तिष्ठति। एवं स्वसमवायिसमवेतत्वेन सामान्ये विशेषे च सत्ता तिष्ठति। अत्र स्वं सत्ता स्वसमवायि द्रव्यगुणकर्मैतत्त्रितयं तत्र समवेता जातिः, एवं स्वं सत्ता स्वसमवायि परमाण्वादि तत्र समवेता विशेषाः। अपि च स्वं सत्ता स्वसमवायि द्रव्यगुणकर्मैतत्त्रितयं, तत्र स्वरूपेण समवायसंसर्गो वर्तते। अतः समवायस्वसमवायिसमवेतत्वस्वसमवायि-स्वरूपत्वान्यतमत्वेन सम्बन्धेन सत्तावत्त्वरूपस्य भावत्वस्य सामान्यवृत्तित्वेऽपि षड्भावानन्तर्गतत्वरूपसाध्याभावाद् भावत्वे व्यभिचारः इति चेन्न, तत्र भावत्वमुक्तान्यतमत्वसम्बन्धेन सत्तावत्त्वं न बोध्यम्। भावत्वन्तु द्रव्यादिषट्कान्यतमत्वरूपमेव ज्ञेयम्। अन्यतमत्वन्तु तद्भिन्नभिन्नत्वरूपोऽन्योन्याभावः इति बोध्यम्। अतः स च षड्भावानन्तर्भूतः इति अन्योन्याभावरूपे भावत्वे साध्यस्यापि सत्त्वान्न व्यभिचारः।

एवं सादृश्यमभावानन्तर्भूतं सत्त्वेन प्रतीयमानत्वादिति। सत्त्वं नाम भावत्वम्। सत्त्वमित्यत्र तृतीयाया अर्थः प्रकारत्वम्। तेन भावत्वप्रकारकप्रतीतिविषयत्वं हेतुरिति लभ्यते। अतः यत्र यत्र भावत्वप्रकारकप्रतीतिविषयत्वं तत्र तत्र

 ISSN : 2583-2271
Vol. - 3, No. 1: 2023

अभावानन्तर्गत्वमिति व्याप्तिरत्र न सम्भवति अभावे अपि हेतोः सत्त्वात्। यथा कस्यापि भ्रान्तपुरुषस्य अभावविशेष्यको भावत्वप्रकारकः यो भ्रमः तत्र भावत्वप्रकारकप्रतीतिविषयत्वरूपहेतोर्विद्यमानेऽपि अभावानन्तर्गततत्वरूपसाध्याभावाद् व्यभिचारः इति चेन्न, तत्र प्रतीयमानत्वादित्यस्य प्रमीयमानत्वात् नाम प्रमाविषयत्वादित्यर्थो बोध्यः। तेन भावत्वप्रकारकप्रमाविषयत्वं हेतुरिति पर्यवसितम्। अभावे तु भावत्वप्रकारकभ्रमविषयत्वस्य सत्त्वेऽपि भावत्वप्रकारकप्रमाविशेष्यत्वाभावान्न व्यभिचारप्रसङ्गः।

एतयोः अनुमानयोः सिद्धत्वात् प्रकृतानुमानस्यापि सिद्धिर्भवति। प्रकृतानुमानं हि सादृश्यं सप्तपदार्थानन्तर्भूतं षड्भावानन्तर्भूतत्वे सति अभावानन्तर्भूतत्वादिति। सतिसप्तम्या विशिष्टार्थो वर्तते। तेन हेतोः रूपं भवति षड्भावानन्तर्भूतत्वविशिष्टाभावानन्तर्भूतत्वादिति। अस्य हेतोः सादृश्यरूपपक्षवृत्तित्वात् पक्षधर्मता अस्ति। किञ्च, यत्र यत्र षड्भावानन्तर्भूतत्वविशिष्टाभावानन्तर्भूतत्वं तत्र तत्र सप्तपदार्थानन्तर्भूतत्वमिति व्याप्तिरत्रास्ति। सप्तपदार्था-नन्तर्भूतत्वव्याप्यषड्भावानन्तर्भूतत्व-विशिष्टाभावानन्तर्भूतत्ववदिदं सादृश्यमिति परामर्शः। तस्मात्सादृश्यं सप्तपदार्थानन्तर्भूतत्ववदित्यनुमितिः जायतेऽस्मादनुमानवाक्यात्। अतः द्रव्यादिसप्तपदार्थानन्तर्गततत्वात् सादृश्यस्यातिरिक्त-पदार्थत्वमस्तीत्यवश्यमेव स्वीकर्तव्यमिति मीमांसकानामाशयः।

उदयनाचार्येण सादृश्यस्यातिरिक्तपदार्थत्वम् अनङ्गीकृतम्। तन्नये पदार्थः द्विविधो भावाभावभेदेन। न च तदुभयात्मकोऽनुभयात्मको वा पदार्थोऽस्ति, भावाभावयोः परस्परविरोधात्। अतः सादृश्यं भावपदार्थोऽभावपदार्थो वा भवितुमर्हति। तत्रापि नाभाव इत्युक्ते भावत्वप्रतीतौ नाभावो भवति। एवञ्च न भाव इत्युक्ते च अभावत्वप्रतीतौ न भावपदार्थो भवति। तदुच्यते -

"परस्परविरोधे हि न प्रकारान्तरस्थितिः।
नैकतापि विरुद्धानामुक्तिमात्रविरोधतः॥"[3] इति।
(न्या.कु ३/८)

यद्यपि नैयायिकाः सादृश्यस्य पदार्थत्वं स्वीकुर्वन्ति तथापि तस्यातिरिक्तत्वे मानाभावात्तन्न स्वीकुर्वन्ति। वस्तुतः सादृश्यस्याभावत्वे तत्सप्तमपदार्थरूपाभावेऽन्तर्भवति। भावत्वे च गुणवत्त्वे द्रव्ये, सामान्यवत्त्वे निर्गुणवत्त्वे च कर्मणि, निष्कर्मत्वे सति सामान्यवत्त्वे गुणे, निर्गुणत्वे निःसामान्यत्वे भावत्वेऽसमवतत्वे च समवाये, समवेतत्वे सति अनेकाश्रितत्वे सामान्ये, एकाश्रितत्वे सति समवेतत्वे विशेषेऽन्तर्भवति। अतः सप्तपदार्थेषु एवान्तर्भावात् कुतः सादृश्यस्यातिरिक्तपदार्थत्वम्?

न्यायसिद्धान्तमुक्तावल्यामपि विश्वनाथन्यायपञ्चाननेन सादृश्यस्यातिरिक्तपदार्थत्वं निराकृतम्। प्रोक्तञ्च - *सादृश्यमपि न पदार्थान्तरं, किन्तु तद्भिन्नत्वे सति तद्गतभूयोधर्मत्वमिति*[4]। सादृश्यमुभयनिष्ठधर्मोऽस्ति। यस्य सादृश्यं स प्रतियोगी, यस्मिन् सादृश्यं स अनुयोगी। सादृश्यस्य प्रतियोग्युपमानं भवति, अनुयोगी च उपमेयो भवति। यथा चन्द्रसदृशं मुखमित्यत्र चन्द्रस्य सादृश्यं मुखे वर्तते। अतः चन्द्रप्रतियोगिकं सादृश्यमनुयोगिनि मुखे तिष्ठति। लक्षणे तत्पदेन प्रतियोगिनो ग्रहणम्। तेन प्रतियोगिभिन्नत्वे सति प्रतियोगिगतभूयोधर्मवत्त्वं सादृश्यस्य लक्षणम्। प्रतियोगिभिन्नत्वं नाम प्रतियोगिभेदवदनुयोगीति बोध्यम्। यत्र प्रतियोगिगता बहवो धर्मा अनुयोगिनि तिष्ठन्ति तत्र सादृश्यमस्तीति बोध्यम्। यथा उपर्युक्ते उदाहरणे प्रतियोगिचन्द्रतः मुखं भिन्नमस्ति। अपि च चन्द्रगतधर्मा आह्लादकत्ववर्तुलत्वतेजस्त्वादयो मुखेऽपि तिष्ठन्ति। अतो मुखे चन्द्रसादृश्यमस्त्येव।

परन्तु चन्द्रमुखदर्शनजन्ययोः सुखयोर्भिन्नत्वात् तत्तन्निष्ठाह्लादकत्वमपि भिन्नं भवति। अतः कुतः तयोः सादृश्यमित्यत्रोच्यते किरणावल्याम् – "यद्यपि आह्लादयोः चन्द्रमुखदर्शनजन्ययोः सुखयोर्भिन्नत्वेनाह्लादजनकत्वस्यापि मुखे चन्द्रे भिन्नत्वं तथापि स्वाश्रयोपधाश्रयकत्वसम्बन्धेन

---

[3] आचार्यविश्वेश्वरः(सम्पा.), *न्यायकुसुमाञ्जलिः*, पृ. ११७।

[4] प.श्रीकृष्णवल्लभाचार्यः(सम्पा.), *न्यायसिद्धान्तमुक्तावली*, पृ. ३१।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

एकवैजात्यवैशिष्ट्यमेव मुखचन्द्रसाधारणधर्मो बोध्यः"[5] इति। अत्र स्वमाह्लादकत्वद्वयगतं वैजात्यम्, तदाश्रयमाह्लादकत्वम्, तदुपधायकत्वं चन्द्रादाविति। अतोऽनेन सम्बन्धेनैव चन्द्रमुखगता विजातीयधर्माः आह्लादकत्ववर्तुलत्वादयो मुखे चन्द्रेऽपि च तिष्ठन्ति। तत्राह्लादकत्वं वर्तुलत्वमित्यादयः साधारणधर्मा एव सादृश्यनामकपदार्थाः। आह्लादकत्वं न पदार्थान्तरमस्ति। यतो हि चन्द्रभिन्नत्वं नाम चन्द्रभेदविशिष्टत्वं, तच्च अन्योन्याभावरूपम्, तद्धि आह्लादाव्यवहित-प्राक्क्षणावच्छेदे आह्लादाधिकरणवृत्त्य-न्ताभावाप्रतियोगित्वरूपम्। अतः आह्लादकत्वरूप-सादृश्यमभावे एव अन्तर्भवति।

ननु सादृश्यलक्षणे तद्भिन्नत्वे सतीति दलस्याभावे तद्गतभूयोधर्मवत्त्वमात्रस्य लक्षणत्वे चन्द्रसदृशं मुखमित्यादौ स्वगतभूयोधर्मवत्त्वस्य प्रतियोगिचन्द्रगत-भूयोधर्मवत्त्वस्य स्वस्मिन्नेव चन्द्रे सत्त्वात्सादृश्यनिरूपके चन्द्रे सादृश्यस्य गतत्वाच्चन्द्रे चन्द्रसादृश्यापत्तिः स्यात्। तथाहि चन्द्रे चन्द्रसादृश्यापत्तेर्वारणाय तद्भिन्नत्वे सतीति दलं योज्यम्। उक्तञ्च मञ्जुषायाम् – "तत्र चन्द्रगतधर्मवत्त्वमात्रोक्तौ चन्द्रेऽपि चन्द्रसादृश्यापत्तेः, ततः सत्यन्तमनुयोगितासम्बन्धेन विवक्षणे तु न देयमिति महादेवः। तस्यायमर्थः मुखं चन्द्रसदृशमिति व्यवहारात्सादृश्यस्य चन्द्रः प्रतियोगी मुखञ्चानुयोगि। चन्द्रे तु न सादृश्यानुयोगिता चन्द्रश्चन्द्रसदृश इति व्यवहाराभावात्। तथा चानुयोगिताविवक्षयैव चन्द्रेऽतिव्याप्तिवारणसम्भवात्तद्भिन्नत्वे सतीति विशेषणं न देयमि"[6]ति।

एवं -

गगनं गगनाकारं सागरः सागरोपमः।
रामरावणयोर्युद्धं रामरावणयोरिव॥

इत्यत्रापि गगनगतभूयोधर्मवत्त्वस्य स्वस्मिन्नेव गगने सागरगतभूयोधर्मस्य स्वस्मिन्नेव सागरे सत्त्वात् सादृश्यनिरूपके गगने सागरे च सादृश्यगतत्वात् गगने गगनगतसादृश्यापत्तिः सागरे सागरगतसादृश्या-पत्तिर्दुर्वारा। अतः तद्भिन्नत्वे सतीति दलमवश्यमेव प्रकृतलक्षणे देयम्। प्रोक्तञ्च प्रभायाम् – "गगनं गगनाकारम् इत्याद्यनन्वयालङ्कारेऽतिव्याप्ति-वारणाय तद्भिन्नत्वे सतीति। सादृश्यमुपमाभेदे इत्यालंकारिकसूत्रेण भेदघटितसादृश्यस्यैव उपमात्व-प्रतिपादनादिति भावः"[7] इति।

अत्र वक्तव्यं यत् नैयायिकाः सादृश्यसाधर्म्ययोः समार्थकत्वमङ्गीकुर्वन्ति। तथाहि प्रभाकृता अत्र सादृश्यमुपमा भेदे इति पाठो गृहीतः। परन्तु काव्यप्रकाशे मुलपाठोऽस्ति "साधर्म्यमुपमा भेदे"[8] इति। नैयायिकसम्प्रदाये यद्यपि सादृश्यं नातिरिक्तपदार्थः इति मतं प्रसिद्धमस्ति तथापि आलङ्कारिका वैयाकरणाश्च सादृश्यस्यातिरिक्तपदार्थत्वमङ्गीकुर्वन्ति।

आलंकारिकाणां नये साधर्म्यन्तु सम्बन्धविशेषोऽस्ति। सम्बन्धश्चैकप्रतियोगिकापरानुयोगिक एव नियतः। यथा दण्डी पुरुषः इत्यत्र दण्डप्रतियोगिकः पुरुषानुयोगिकः संयोगसम्बन्धोऽस्ति। परन्तु साधर्म्याख्यसम्बन्धस्य कौ प्रतियोग्यनुयोगिनौ भवतः इत्यत्रोच्यते साधारणधर्मो हि अत्र प्रतियोगी अनुयोगिनौ चात्र उपमानोपमेयौ। उक्तञ्च विस्तारिकायां परमानन्दभट्टाचार्यैः – "सादृश्यस्य प्रतियोग्युपमानमनुयोग्युपमेयम्। अस्य साधर्म्यस्योपमानोपमेयं च द्वावप्यनुयोगिनौ"[9] इति। अयमेव भेदः सादृश्यसाधर्म्ययोः। तच्च सादृश्यमुद्योतकारमते अतिरिक्तपदार्थः एव। प्रोक्तञ्च तेन – "सादृश्यप्रयोजकसाधारणधर्मसम्बन्धो ह्युपमा सादृश्यं चातिरिक्तपदार्थः"[10] इति।

ननु भूयोधर्मवत्त्वमित्यनेन कस्य ग्रहणम्? सकलपदार्थवृत्तयो ये भूयांसः धर्माः तद्वत्वं तत्सादृश्यमिति बोध्यते चेत्तर्हि तत्पदार्थनिष्ठाभिधेयत्वप्रमेयत्वादयो धर्माः पदार्थान्तरेऽपि सत्त्वादभिधेयत्वप्रमेयत्वादयो धर्मा अपि

---

[5] प.श्रीकृष्णवल्लभाचार्यः(सम्पा.), *न्यायसिद्धान्तमुक्तावली*, पृ. ३२।

[6] सि. शंकररामशास्त्री(सम्पा.), *कारिकावली*, पृ. ७५।

[7] सि. शंकररामशास्त्री(सम्पा.), *कारिकावली*, पृ. ७५।

[8] भट्टवामनाचार्यः(सम्पा.), *काव्यप्रकाशः*, पृ. ५४०।

[9] भट्टवामनाचार्यः(सम्पा.), *काव्यप्रकाशः(बालबोधिनी)*, पृ. ५४१।

[10] भट्टवामनाचार्यः(सम्पा.), *काव्यप्रकाशः(बालबोधिनी)*, पृ. ५४१।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

सादृश्यपदवाच्या भवन्तु इति चेन्न, अत्र धर्मपदेन असाधारणधर्मा ग्राह्याः। तेन चन्द्रसदृशं मुखमित्यत्र सादृश्यप्रतियोगिनि चन्द्रे विद्यमानानाम् असाधारणधर्माणामाह्लादकत्ववर्तुलत्वादीनामनुयोगिनि मुखेऽपि सत्त्वात् सादृश्यलक्षणसमन्वयः।

प्रकृतलक्षणे तद्गतत्वमित्यस्याभावे तद्भिन्नत्वे सति भूयोधर्मवत्त्वमित्यस्यैव लक्षणत्वे चन्द्रभिन्नत्वे सति आह्लादकत्वं चन्द्रसादृश्यमिति सिध्यति। अतः तद्गतत्वमिति पदं व्यर्थमिति चेन्न, तद्भिन्नत्वस्याभावे कस्य भूयोधर्मो ग्राह्यः इति संशयो जायते। तेन चन्द्रभिन्नत्वे सति केशादिमत्त्वस्यापि चन्द्रसादृश्यत्वप्रसङ्ग आगच्छति। अतः तद्वारणाय प्रतियोगिनिष्ठभूयोधर्मवत्त्वमिति द्योतनाय लक्षणे तद्गतमिति पदमपि देयम्। उक्तञ्च मञ्जूषायाम् – "अस्मद्गुरुचरणास्तु तद्गतत्वं न लक्षणे प्रविष्टं, किन्तु चन्द्रभिन्नत्वे सति आह्लादकत्वं चन्द्रसादृश्यमिति रीत्या विशिष्यैव धर्माणां लक्षणे प्रवेशः। ते च धर्मा उपमानसाधारणा ग्राह्याः। तेन चन्द्रभिन्नत्वे सति केशादिमत्त्वं न चन्द्रसादृश्यमिति स्फोरणाय तद्गतत्वोत्कीर्तनमित्याहुः"[11] इति। प्रभाकारमते तु तद्गतत्वमिति पदं न लक्षणघटितमस्ति। वस्तुतः तत्पदमुपमानोपमेयनिष्ठभूयोधर्माणामुमानोपमेय-साधारणत्वबोधनाय अत्र प्रयुक्तम्। परन्तु लक्षणं तद्भिन्नत्वे सति आह्लादकत्वं विशिष्य वक्तव्यमिति बोध्यम्।

लक्षणे भूयः इति पदस्यापि प्रयोजनं नास्ति। यतो हि कुत्रचिदेकेनैव सामान्यधर्मेण सादृश्यं कल्प्यते कुत्रचित्तु एकाधिकेन सामान्यधर्मेण। यथोक्तं मुक्तावल्याम् – "यथा गोत्वं नित्यं तथा अश्वत्वमपि"[12] इति। अत्र ध्वंसप्रागभावप्रतियोगित्वेन एकेन धर्मेण सादृश्यम्। परन्तु तत्र धर्माणां भूयस्त्वाभावात् नित्यत्वरूपसाधारणधर्मः सादृश्यपदवाच्यो न भवतु। पुनश्च सिंहे गोभेदपटभेदाश्वभेदादयो बहवो धर्मा वर्तन्ते। ते च धर्माः काकेऽपि तिष्ठन्ति। अतः प्रतियोगिरूपसिंहभिन्नत्वे सति प्रतियोगिसिंहगतभूयोधर्म-वत्त्वमनुयोगिनि काके वर्तमानात् तद्धर्मगतसादृश्यमपि तत्र भवतु। परन्तु तत्तद्धर्मसहायेन सिंहसदृशः काकः इति व्यवहारो न लोके दृश्यते। तथाहि उच्यते अत्र प्रकृतभूयोधर्मपदेन प्रायेण भूयोधर्मैः सादृश्यप्रतीतिरिति तात्पर्यविषयार्थकमेव बोध्यम्। तेन क्वचिद्भूयोधर्माभावे सति एकेनैव धर्मेण सादृश्यं कल्प्यते, क्वचिच्च भूयोधर्मसत्त्वेऽपि न सादृश्यं कल्प्यते। तेन ध्वंसप्रागभावप्रतियोगित्वरूपेण एकेन धर्मेण गोत्वाश्वत्वयोर्मध्ये सादृश्यम्। अपरतो भेदरूपभूयोधर्मसत्त्वेऽपि सिंहकाकयोः सादृश्यं नास्ति। तदुच्यते रामरुद्रीटीकायाम् – "यद्यपि घटभेदपटभेदादयो भूयांसो धर्माः तत्रापि सम्भवन्त्येव गोत्वाश्वत्वयोर्नित्यत्वरूपैकधर्ममादाय सादृश्यमङ्गीकृत्य एवोक्तमिति भूयस्त्वोपपादनमसङ्गतमेव। तथापि प्रायेण भूयोधर्मैरेव सादृश्यप्रतीतिरिति तात्पर्यविषयार्थकमेव प्रकृते भूयोपदमिति धेयम्। नरोऽयं सिंहसदृश इत्यादौ घटभिन्नत्वादिर्न तात्पर्यविषयः, किन्तु पराक्रमः"[13] इति। अतः तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वमेव सादृश्यलक्षणमिति पर्यवसितम्।

धर्मो द्विविधो जात्युपाधिभेदेन। ननु प्रकृतलक्षणे धर्मपदं जातिपरमुपाधिपरं वा? जातिपरं कथ्यते चेत्तर्हि यथा गोत्वं नित्यं तथा अश्वत्वमपि इत्यत्र सादृश्यानुपपत्तिः, नित्यत्वस्योपाधिपरत्वात्। यदि कथ्यते धर्मपदमत्रोपाधिपरं तथात्वे घटपटयोः कम्बुग्रीवादिमत्त्वादिरूपैकोपाधिविरहात् तयोः सादृश्यं नास्तीति चेन्न, सादृश्यकधर्मः क्वचित् जातिरूपो भवति। यथा घटसदृशः पटः। क्वचिदुपाधिरूपो भवति। यथा गोत्वाश्वत्वगतनित्यत्वमिति। अपि च चन्द्रसदृशं मुखमित्यत्र आह्लादकत्वं सादृश्यम्। परन्तु कारणतावच्छेदकभेदेन कारणताभेदस्याश्यकत्वादिति नियमेन चन्द्रदर्शनजन्येन सुखेन सह मुखदर्शनजन्यस्य सुखस्य भेदप्रतीतिर्भवत्येव। तयोर्न एकाह्लादकत्वरूपं सादृश्यमिति चेन्न। प्रोक्तञ्च रामरुद्रीटीकायाम् – "स्वाश्रयोपधायकत्वसम्बन्धेन एकवैजात्यविशिष्टत्वमेव

[11] सि. शंकररामशास्त्री(सम्पा.), *कारिकावली*, पृ. ७३।
[12] पञ्चाननभट्टाचार्यः(सम्पा.), *भाषापरिच्छेदः*, पृ.२३।
[13] सि. शंकररामशास्त्री(सम्पा.), *कारिकावली*, पृ. ७५।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

प्रकृते साधारणधर्मः, मुखचन्द्रदर्शनजन्यञ्च एकजातीयमेव सुखमिति भावः"[14] इति। अतः सादृश्यस्य जातिरूपत्वात्क्वचिदुपाधिरूपत्वात्क्वचिच्च द्रव्यादिरूपत्वादतिरिक्त-पदार्थत्वकल्पने गौरवो दुर्वारः। तथाहि सप्तपदार्थेष्वन्तर्गतत्वात् सादृश्यस्यातिरिक्तपदार्थत्वं नास्तीति प्राचां तथा अधिकांशनव्यानामभिमतमिति।

नव्येषु महादेवभट्टरामरुद्रभट्टाचार्यादिभिः सादृश्यस्य विषयतादिवदतिरिक्तपदार्थत्वं स्वीक्रियते। ते कथयन्ति सादृश्यस्यातिरिक्तपदार्थत्वमनङ्गीक्रियते चेत्तर्हि समानाकारतानुभवाभावेऽपि यत्र यत्र सदृश इत्याकारकप्रतीतिर्भवति तत्र तत्र समानाकारकानुभवापलापापत्तिरपि भवति। प्रतीतेः समानत्वं नाम एकप्रकारत्वम्। यथा चन्द्रसदृशं मुखमित्यत्र आह्लादकत्ववर्तुलत्वतेजस्वित्वादीनां प्रकारता, घटसदृशः पटः इत्यत्र द्रव्यत्वपृथिवीत्वादीनां च प्रकारतास्ति। आह्लादकत्वादिवद्द्रव्यत्वपृथिवीत्वादीनां प्रतीतिः सादृश्यांशेऽनुभवसिद्धत्वात् समानाकारताप्रतीतेः अभावेऽपि समानाकारताप्रतीतिः भवति। परन्तु सादृश्यस्यातिरिक्त-पदार्थत्वे न तादृशी अनुपपत्तिर्भवति। प्रोक्तञ्च रामरुद्रभट्टाचार्येण – "यद्यपि मुखे चन्द्रे च नैकं सादृश्यम्, अन्यथा पटे चन्द्रसादृश्याप्रतीतिरापत्तिरिति सादृश्यांशे तादृशप्रतीत्योर्न समानाकारतोपपत्तिः, तथापि उभयसादृश्यसाधारणस्य सादृश्यत्वरूपाखण्डोपाधेः अनुगततया घटो रूपवान् पटो रूपवानिति प्रतीत्या रूपांश इव सादृश्यांशे समानाकारतोपपत्तिरिति ध्येयम्"[15] इति।

ननु सादृश्यस्यातिरिक्तपदार्थत्वे सप्त पदार्था इति विभागानुपपत्तिर्भवत्येवेति चेन्न, पदार्थानां विभागसूत्रे विभागवाक्ये च तेषामेव पदार्थानां संग्रहः ये साक्षद्रूपेण परम्परया वा तत्त्वज्ञानोपयोगिनो भवन्ति। न च समेषामेव पदार्थानां संग्रहार्थं विभागो कृतः इति बोध्यः। सादृश्यस्य तु न तत्त्वज्ञानोपयोगित्वमस्ति परन्तु पदार्थविभागे संग्रहाभावेऽपि पृथक्पदार्थत्वम् अस्ति। तथाहि आत्मा आत्मेतरद्रव्यभिन्न इत्याद्याकारकात्मविशेष्यकात्मेतर-द्रव्यभेदप्रकारकज्ञानं तत्त्वज्ञानम्। तज्जन्यज्ञानविषयत्वं तदुपयोगित्वम्। अत्र आत्मविशेष्यकात्मेतरद्रव्यभेदप्रकारक-तत्त्वज्ञानं प्रति पक्षज्ञानविधया आत्मज्ञानस्य जनकत्वात्, प्रतियोगिज्ञानविधया आत्मेतरद्रव्यादिपदार्थज्ञानस्य च जनकत्वाज्जनकज्ञानविषयतया आत्मादीनां तत्त्वज्ञानविषयत्वम्। तथाहि सादृश्यादीनामतिरिक्त-पदार्थानां सत्त्वेऽपि आत्मनि तद्भेदः अनुमित्यात्मकतत्त्वज्ञानविषयो न भवतीति प्रतियोगिज्ञानविधया अपि सादृश्यज्ञानं न तत्त्वज्ञानोपयोगि। अतो न विभागव्याघातः इति तात्पर्यम्। एवं विषयता प्रकारता अवच्छेदकता प्रभृतीनामपि अतिरिक्तपदार्थत्वमस्तीति आचार्याणामाशयः।

**निष्कर्षः**

अनियतपदार्थवादिनो नैयायिका नियतपदार्थवादिनश्च वैशेषिकाः। अतो बहवः पदार्थाः सन्ति तेषु मोक्षोपयोगिनो भवन्ति प्राचां नये प्रमाणादयः षोडशपदार्थाः, नव्यानां मते तु द्रव्यादयः सप्तपदार्था एव। मीमांसकैः स्वीकृतस्य सादृश्यस्य पदार्थत्वमस्तीति नैयायिका अपि स्वीकुर्वन्ति। परन्तु महर्षिगौतमैः स्वीकृतेषु पदार्थेषु सादृश्यस्य प्रमेयेऽन्तर्भावात् गङ्गेशोपाध्यायस्वीकृतेषु सप्तपदार्थेषु जात्यादिष्वन्तर्गत-त्वादतिरिक्तपदार्थत्वं नास्तीति। यद्यपि सर्वैः प्राचीनैः आचार्यैः सादृश्यस्यातिरिक्तपदार्थमपाकृतं तथापि नव्येष्वेकदेशिनः महादेवभट्टाचार्यादयः सादृश्यस्याप्य-तिरिक्तपदार्थत्वमङ्गीकुर्वन्ति। परन्तु सादृश्यरूपातिरिक्त-पदार्थस्य प्रमीतिविषयत्वेऽपि तस्यात्मतत्त्वज्ञानं प्रत्यनुपयोगित्वात् पदार्थविभागसूत्रेषु आप्तवचनेषु च अनन्तर्भावः। अतः सादृश्यानामतिरिक्तपदार्थत्वेऽपि आत्मतत्त्वज्ञानाय तेषामुपयोगाभावान्न प्रसिद्धपदार्थविभागे कापि हानिरिति शिवम्।

[14] प.हरिरामशुक्लः(सम्पा.), *न्यायसिद्धान्तमुक्तावली*, पृ. ४४।

[15] प.हरिरामशुक्लः(सम्पा.), *न्यायसिद्धान्तमुक्तावली*, पृ. ४४।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

**सहायकग्रन्थसूची**


- केशवमिश्रः। *तर्कभाषा* (द्वितीय खण्ड)। सम्पा. गङ्गाधरकरः। कोलकाता: महाबोधिनी-वुक्-एजेन्सि, २०१९। (तृतीयसंस्करणम्)।
- विश्वनाथन्यायपञ्चाननः। *कारिकावली (मुक्तावलीप्रभा-मञ्जूषादिनकरीयरामरुद्रीय-समन्विताः)*। सम्पा. शंकररामशास्त्री। मद्रास्: श्रीबालमनोरमामुद्रा-क्षरशाला, १९२३।
- *वैशेषिकदर्शनम्*। *उपस्कारकणादशास्त्रविवृत्ति-वैशेषिकभाष्यसमन्विताः*। सम्पा. प्रो. कृ. त पाण्डुरङ्गिः। बेङ्गलूरुः विद्याधीशस्नातकोत्तरसंस्कृत-शोधकेन्द्रः, २०११।
- विश्वनाथन्यायपञ्चाननः। *भाषापरिच्छेदः (न्यायसिद्धान्त-मुक्तावलीमुक्तावलीसंग्रहौ* सहितौ)। कोलकाता: महाबोधि-बुक्-एजेन्सि, २०१६।
- लौगाक्षिभास्करः। *तर्ककौमुदी*। सम्पा. वासुदेवशर्मा। मुम्बायी: निर्णयसागरमुद्रणालयः, १८३६।
- वरदराजः। *तार्किकरक्षा (सारसंग्रह-निष्कण्टक-लघुदीपिका:* सहिता)। सम्पा. पण्डितविन्ध्येश्वरीप्रसादद्विवेदी। वराणसी: मेडिकल्हालनामकयन्त्रालयः, १९०३।
- मम्मटाचार्यः। *काव्यप्रकाशः (बालबोधिनी*सहिता)। सम्पा. भट्टवामनाचार्यः। दिल्ली: चौखाम्ब- संस्कृत-प्रतिष्ठान, २०१३।
- Mammatacharya. kāvyaprakāśaḥ. Ed. Ganganath Jha. Varanasi: Bharatiya Vidya Prakasan, 1967.
- Annaṃbhaṭṭaḥ. Tarkasaṃgrahadīpikā. Ed. Gopinath Bhattacharya. Kolkata: Progressive Publishers, 2015.
- Annaṃbhaṭṭaḥ. Tarkasaṃgrahadīpikā. Ed. Vashwant Vasudev Athalye. Pune: Bhandarkar Oriental Research Institute, 2003.
- Udayanācāryaḥ. Kiraṇāvalī. Ed. Narandra Chandra Vadantatirtha. Kolkata: The Asiatic Society, 2002.

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# न्यायदर्शने आत्मतत्त्वमीमांसा

**मिन्टु-दे**
**शोधच्छात्रः, न्यायवैशेषिकविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**बी-४, कुतुबसांस्थानिकक्षेत्रम् ,नवदेहली – ११००१६**

**प्रबन्धसारः**

*न्यायशास्त्रस्य प्रवर्तकेन गौतममुनिना निःश्रेयसमेव शास्त्रस्य प्रयोजनमिति प्रतिपादितम्। निःश्रेयसं नाम मोक्षः, तस्य सिद्धिः प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानात् भवति । एतेष्वपि प्रामुख्येन आत्मादिद्वादशप्रमेयपदार्थस्वरूपनिश्चयो वस्तुतः मोक्षप्रयोजकः। अतः आदौ तु आत्मनस्वरूपबोधकं लक्षणं गौतमदिशा प्रतिपादनादनन्तरं तस्य भेदविषयेऽपि उक्तम्। तत्र जीवात्मा परमात्मा चेति द्विविधः आत्मा न्यायदर्शने कथितः। जीवात्मा अनेकः शरीरभेदात् परमात्मा एक एव अस्ति। पुनः ईश्वरास्तित्वे प्रमाणमीश्वरस्य स्वरूपं चेति विषयद्वयमधिकृत्य न्यायग्रन्थेषु बहुविचारः प्राप्यते तस्य कथनमपि अत्र विधास्यते। अन्तिमस्तावत् प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानानन्तरं परम्परया कीदृशं निःश्रेयसं भवति, तच्च आञ्जस्येन उपस्थापितम्। अतः न्यायोक्ततत्त्वानां वर्तमानसन्दर्भे यदुपादेयत्वं विद्यते तस्य विस्तृतं विश्लेषणं प्रबन्धेऽस्मिन् कृतं विद्यते।*

**कुञ्चीशब्दाः** -आत्मा, ईश्वरः, मुक्तिः, निःश्रेयसम्, अपवर्गः चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

न्यायशास्त्रस्य प्रवर्तकेन गौतममुनिना निःश्रेयसमेव शास्त्रस्य प्रयोजनमिति प्रतिपादितम्। निःश्रेयसं नाम मोक्षः, तस्य सिद्धिः प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानात् भवति। तद्यथोक्तं-“प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्त-सिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छल जातिनिग्रहस्थानानां तत्त्वज्ञाना-न्निःश्रेयसाधिगमः”[1]। एतेष्वपि प्रामुख्येन आत्मादिद्वादशप्रमेयपदार्थस्वरूप-निश्चयो वस्तुतः मोक्षप्रयोजकः। तद्यथोक्तम्-

“**आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखा-पवर्गास्तु प्रमेयम्।**”[2]

**आत्मा-**

न्यायदर्शने गौतमः ऋषि आत्मनः स्वरूपबोधकं लक्षणं प्रतिपादितवान् यत् “इच्छाद्वेषप्रयत्नसुख-दुःखज्ञानान्यात्मनो लिङ्गम्”[3]। इच्छाद्वेषादिभिर्विशेषगुणै-स्तदाश्रयः आत्मा अनुमीयते। “जानाति इच्छति यतते” इत्यनुभवात् ज्ञानपूर्विकैव सर्वापि प्रवृत्तिः। इन्द्रियादीनामधिष्ठाता आत्मा। तद्यथोक्तम्-

“आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम्।”[4] इति।

स आत्मा स्पर्शादिभिः गुणैरहितः ज्ञानस्य आश्रयो भवति। स देशकालादीनां बन्धनेभ्यः विमुक्तोऽस्ति। अयमात्मा नित्यः विभुश्च विद्यते। सारथिः रथमिव आत्मा शरीरं सञ्चालयति। अयं द्रष्टा भोक्ता चास्ति[5]। विभिन्नानां क्रियाणामाधारभूतो प्रमेयात्मा विद्यते[6]। अयमेव प्रमाता भवति। जीवात्मा परमात्मा चेति द्विविधः आत्मा न्यायदर्शने कथितः। जीवात्मा अनेकः शरीरभेदात्, परमात्मा एक एव। मुक्तात्मा शान्तः निर्विकारः संज्ञाशून्यः चास्ति। शरीरस्य बन्धने तस्यैवात्मनः सुखदुःखयोः प्रतीतिः जायते[7]। नैयायिकाः आत्मनः अस्तित्वं प्रमाणैः साधयन्ति। स्वस्य आत्मनः सत्तायाः यथार्थज्ञानं प्रत्यक्षेण अपि प्राप्तुं शक्यते। तदनुसारं ब्रह्म इति प्रमेयपदार्थ आत्माऽस्ति[8]। आत्मा मानसिकप्रत्यक्षस्य विषयोऽस्ति।

---

1 न्या.सू-१/१/१

2 न्या.सू-१/१/९

3 न्या.सू-१/१/१०

4 का.वली.का-४७

5 तत्रात्मा सर्वस्य द्रष्टा सर्वस्य भोक्ता सर्वज्ञः सर्वानुभावी। न्या.भा. १/१/१

6 एककतृत्वं ज्ञानेच्छाप्रभृतीनां सामान्यत्वम्। न्या.भा. ३/२/३४

7 न्या.वा. ३/१/१

8 न्या.भा. ३/१/१

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

परस्य आत्मा तु अनुमानेन वेद्यो भवति। स च आत्मा शरीरेन्द्रियाद्यतिरिक्तो भवति। तथाहि-

शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः।
तथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृतिः॥
मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत्।[9]

इत्थमिन्द्रियादिभिन्नः स इति न्यायसिद्धान्तः। आत्मा न इन्द्रियम् अपि तु इन्द्रियाणां नियन्ता अस्ति। एवञ्च इन्द्रियलब्धज्ञानस्य विश्लेषणमपि कुरुते। नैयायिकानामात्मनः स्वरूपं वेदान्तिनामिव प्रतीयते परं च वेदान्तः एकात्मदर्शनमस्ति। न्यायश्च अनेकात्मवादि दर्शनं विद्यते।

**ईश्वरः**

महर्षिणा गौतमेन न्यूनैरेव सूत्रैरीश्वरस्य व्याख्यानं कृतमस्ति। उत्तरवर्तिनः नैयायिकाः वात्स्यायन-उद्योतकर-वाचस्पतिमिश्र-उदयन-जयन्तभट्ट-गङ्गेशादयः ईश्वरास्तित्वविषये गम्भीरविचारान् प्रस्तुतवन्तः। इदं दर्शनमीश्वरवादि दर्शनमस्ति, अस्य दर्शनस्य मते ईश्वरानुकम्पया जीवः मोक्षं प्राप्तुं शक्नोति। इमे श्रवण-मनन-निदिध्यासनैः सह ईश्वरकृपाम् आत्मज्ञानसाधनत्वेन प्रदर्शितवन्तः[10]। ईश्वरास्तित्वे प्रमाणमीश्वरस्य स्वरूपं चेति विषयद्वयमधिकृत्य न्यायग्रन्थेषु बहुविचारः कृतोऽस्ति। उदयनाचार्येण न्यायकुसुमाञ्जलिनामको ग्रन्थः ईश्वरसिद्धिमधिकृत्यैव लिखितः। तद्यथा -

"स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः।
यदुपास्तिमसावत्र परमात्मा निरूप्यते॥" [11]

**ईश्वरसिद्धिः**

रूपादिरहित ईश्वरः अतीन्द्रियः। अतः अनुमानेन साध्यते[12]। न्यायसिद्धान्तमुक्तावलीकारेण कारिकावलीग्रन्थस्य मङ्गलाचरणव्याख्यानव्याजेन ईश्वरस्य सिद्धिः कृता। तद्यथा-

"नूतनजलधररुचये गोपवधूटीदुकूलचौराय।
तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय॥[13]"

अत्र स व्याख्यानं करोति "संसारमहीरुहस्य बीजाय निमित्तकारणतयेत्यर्थः। एतेन ईश्वरे प्रमाणमपि दर्शितं भवति। तथाहि - यथा घटादिकार्यं कर्त्तृजन्यं तथा क्षित्यङ्कुरादिकमपीति[14]। अत्रानुमानस्वरूपमित्थं बोध्यं - "क्षित्यङ्कुरादिकं सकर्तृकं, कार्यत्वात् घटवत्"। सकर्तृकत्वञ्च उपादानगोचरापरोक्षज्ञानचिकीर्षाकृति-मज्जन्यत्वम्। तथा च यथा घटः स्वोपादानकपालगोचरापरोक्ष-ज्ञानचिकीर्षाकृतिमता कुलालेन जन्यते, तथैव अवयविरूपमिदञ्जगदपि स्वोपादानपरमाणुगोचरापरोक्षज्ञान-चिकिर्षाकृतिमता केनापि अवश्यं जन्यः स्यात्। एवं च न्यायनये जगतः सृष्टिः परमाणुतःभवति। जगतः उपादानकारणं परमाणुः, तद्विषयकापरोक्षज्ञानेच्छाकृतिमान् ईश्वर एव भवति। न च तत्कर्तृत्वमस्मदादीनामल्पज्ञानां सम्भवतीति तत् कर्त्तृत्वेनेश्वरसिद्धिर्बोध्यम्। न च शरीराजन्यत्वेनाकर्त्तृकत्वसाधकेन सत्प्रतिपक्षः वक्तुं शक्यः, अप्रयोजकत्वात्। कार्यत्वहेतुकानुमाने तु कर्त्तृत्वेन कार्यत्वेन कार्यं कारणमात्र एवानुकूलस्तर्को विज्ञेयः। शब्दप्रमाणेनापि ईश्वरास्तित्वं साध्यते[15]। द्यावाभूमी जनयन्देव एकः। "विश्वस्य कर्त्ता भुवनस्य गोप्ता" इति श्रुतिरपि तत्र प्रमाणम्। संसारे उत्पन्नान् विभिन्नान् जीव-कीट-पतङ्ग-पृथिवी-समुद्रान् अवलोक्यानुमातुं शक्यते यदेषां कर्त्ता द्रष्टाऽवश्यमेव स्यादिति। जीवकर्मणां वैविध्यात् तदधिष्ठातृतया ईश्वरास्तित्वमनुमीयते। आचार्योदयनेन ईश्वरसिद्धये बहुविधानुमानानि प्रदर्शितानि तद्यथा-

"कार्यायोजनाधृत्यादेः पदात्प्रत्ययतः श्रुतेः।
वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्ययः॥"[16]

विश्वं वेत्ति इति विश्ववित्। विश्वविषयकज्ञानवान्। अव्ययः- नित्यः, अत एव नित्य ज्ञानेच्छाकृतिमान् ईश्वरः सर्वज्ञोऽस्ति। असौ वेदानां रचयिता अस्ति, असौ नैतिकशासकः जीवात्मनां धर्माधर्मयोरधिष्ठाताऽस्ति।

---

[9] न्या.सि.मु. ४८
[10] न्या.भा. ४/१/१९-२१
[11] न्या.कु. का-२
[12] न्या.भा. १/३/७
[13] न्या.सि.मु.
[14] न्या.सि.मु.(ईश्वरसिद्धिः) पृ.२६
[15] न्या.भा. ३/१/१७
[16] न्या.कु. ५/१

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

असौ जीवात्मनां पितृसदृशं संरक्षणं करोति[17]। भगवद्गीतायां कथितमस्ति यत् 'अहं' विश्वस्य गतिरस्मि।

"गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत्।
प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम्॥[18]"

उपनिषत्सु कथितमस्ति "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी केवलो निर्गुणश्च[19]।

**मोक्षः**

निःश्रेयसं चरमदुःखध्वंस आत्यन्तिकदुःखाभावश्च मोक्षस्य पर्यायाः सन्ति। न्याये षोडशपदार्थज्ञानादेव मुक्तिरुक्ताऽस्ति[20]। तत्त्वज्ञानेन न साक्षान्मुक्तिरपि तु परम्परया। तद्यथोक्तम् -
"दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरा-पायादपवर्गः।" अत्र भाष्यकार आह - "तमिमे मिथ्याज्ञानादयो दुःखान्ता धर्मा अवच्छेदेनैव प्रवर्त्तमानाः संसार इति। यदा तु तत्त्वज्ञानान्मिथ्याज्ञानमपैति तदा मिथ्याज्ञानापाये दोषा अपयन्ति, दोषापाये प्रवृत्तिरपैति प्रवृत्यपाये जन्मापैति, जन्मापाये दुःखमपैति, दुःखापाये च आत्यन्तिकोऽपवर्गो निःश्रेयसमिति"[21]। अनेन प्रकारेण प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानानन्तरं परम्परया निःश्रेयसं भवति , तच्च परमं लक्ष्यं भवतीति न्यायसिद्धान्तः।

ૡ૪ૡ૪ૡ૪

## सहायकग्रन्थसूची


- उदयनाचार्यः . न्यायकुसुमाञ्जलिः. सम्पा. श्रीमोहनः भट्टाचार्यः. कोलकाता : पश्चिमवङ्गराज्यपुस्तकपर्षत्, १९९५.
- भट्टाचार्यः, विश्वनाथन्यायपञ्चाननः . न्यायसिद्धान्तमुक्तावली . सम्पा. श्री हरिरामशुक्लः न्यायाचार्यः . वाराणसी : चौखम्भा प्रकाशन् , २०१८.
- भट्टाचार्य, विश्वनाथन्यायपञ्चाननः. न्यायसूत्रवृत्तिः . सम्पा. सेख साविर आलिः. कोलकाता : संस्कृतपुस्तकभाण्डारः, प्रथमसंस्करणम्, २०१५.
- भारद्वाजोद्योत्करः . न्यायवार्त्तिकम् . सम्पा. विन्ध्येश्वरीप्रसादद्विवेदि . वाराणसी : चौखम्बा संस्कृत भवन, पुनर्मुद्रण, २०६४.
- महर्षिगौतमः . न्यायसूत्रम्. सम्पा. फणिभूषणतर्कवागीशः . कोलकाता : पश्चिमवङ्गराज्यपुस्तकपर्षद्, पञ्चमसंस्करणम्, २०१४.


[17] न्या.भा. ४/१/२१
[18] भ.गी. ९/१८
[19] श्वे,उप. ६/११
[20] न्या.सू. १/१/१
[21] न्या.सू. १/१/२

# न्यायाभिमतानुमानप्रमाणस्वरूपविमर्शः

**सुमनकल्यान-सामन्तः**
**शोधच्छात्रः, न्यायविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**बी-४, कुतुबसांस्थानिकक्षेत्रम् ,नवदेहली – ११००१६**

**प्रबन्धसारः**

*भारतीयदर्शनसम्प्रदायेषु वैशेषिकदर्शनं पदार्थविचारशास्त्रत्वेन यद्यपि प्रसिद्धं विद्यते तथापि प्रमाणस्य प्राधान्यमङ्गीकृत्य न्यायशास्त्रस्य प्रवृत्तिरिति न्यायशास्त्रं प्रमाणशास्त्रमिति प्रसिद्धं विद्यते । न्यायशास्त्रस्य प्रमाणशास्त्रस्य कुतः प्राधान्यमिति जिज्ञासायामित्थं वक्तुं शक्यते यत्- "मानाधीना मेयसिद्धिः" अर्थात् प्रमाणमन्तरा प्रमेयस्य सिद्धिर्न भवतीत्यतः दार्शनिकैः प्रमाणतत्त्वमभ्युपगतम् । तत्र अनुमानप्रमाणस्य महती उपयोगिता वर्तते। तर्हि अत्र अनुमानप्रमाणस्वरूपविषये आलोचितम् । अतः उपर्युक्तविषये अस्मिन्नेव शोधप्रबन्धे यथामति विस्तृतेन उपस्थापितम्।*

**कुञ्चीशब्दाः** - व्यापारः, परामर्शः, व्याप्तिः, लिङ्गम्, करणम्, पक्षधर्मता, स्वार्थानुमानं चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

भारतीयदर्शनसम्प्रदायेषु वैशेषिकदर्शनं पदार्थविचार-शास्त्रत्वेन यद्यपि प्रसिद्धं विद्यते तथापि प्रमाणस्य प्राधान्यमङ्गीकृत्य न्यायशास्त्रस्य प्रवृत्तिरिति न्यायशास्त्रं प्रमाणशास्त्रमिति प्रसिद्धं विद्यते। न्यायशास्त्रस्य प्रमाणशास्त्रस्य कुतः प्राधान्यमिति जिज्ञासायामित्थं वक्तुं शक्यते यत्- "**मानाधीना मेयसिद्धिः**" अर्थात् प्रमाणमन्तरा प्रमेयस्य सिद्धिर्न भवतीत्यतः दार्शनिकैः प्रमाणतत्त्वमभ्युपगतम्। प्रमाकरणमिति प्रमाणलक्षणे दार्शनिकानां वैमत्याभावेऽपि प्रमाणसंख्याविषये महान् मतभेदः दरीदृश्यते। प्रत्यक्षप्रमाणस्य सर्ववादिसम्मतत्वात् चार्वाकैरपि प्रत्यक्षप्रमाणमभ्युपगतम्। चार्वाकमतमतिरिच्य प्रायः सर्वैः दार्शनिकैः अनुमानप्रमाणमपि उररीकृतम्। "**प्रत्यक्षपरिकलितम-प्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः**" इति अनुमानप्रमाणस्य महत्त्वमभिलक्ष्य प्रत्यक्षनिरूपणानन्तरं कार्यकारणभावसङ्गत्या तार्किकैरनुमानस्वरूपं निरूपितम्। उक्तं च मणिकारैः - "**प्रत्यक्षनिरूपणानन्तरं तदुपजीवकत्वात् बहुवादिसम्मतत्वाच्च अनुमानं निरूप्यते**"[1] इति। अनेन ज्ञायते यत् प्रत्यक्षनिरूपणानन्तरम् अनुमाननिरूपणे उपजीव्योपजीवकभाव-सङ्गतिः सूचिता भवति। उपजीव्यत्वं कारणत्वम्, उपजीवकत्वञ्च कार्यत्वमिति। तथा च प्रत्यक्षं कारणमनुमानञ्च कार्यं भवतीति कार्यकारणभावसङ्गत्या प्रत्यक्षानन्तरमनुमानस्य निरूपणम्। सूत्रकारैः महर्षिभिः गौतमैरपि प्रत्यक्षलक्षणनिर्वचनानन्तरं सूत्रितं यत् "**अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतोदृष्टञ्च**"[2] इति। अर्थात् प्रत्यक्षनिरूपणानन्तरं प्रत्यक्षपूर्वकं त्रिविधमनुमानं तैः निरूपितम्। तत्पूर्वकमिति कथनेन इदमेव बोध्यते यत् प्रत्यक्षस्यानुमानकारणत्वं फलितं भवति। प्रत्यक्षं चात्र साध्यसाधनयोर्व्याप्यव्यापकभाव-सम्बन्धविषयकं साधनविषयकं च बोध्यं भवति। यथा प्रथमं महानसे वह्निधूमयोः व्याप्तिसम्बन्धप्रत्यक्षं भवति ततः पश्चाच्च पर्वते धूमप्रत्यक्षं भवति। तदनन्तरं व्याप्तिस्मर्यमाणस्य पुरुषस्य पर्वतो वह्निव्याप्यधूमवानिति परामर्शः समुत्पद्यते। तादृशपरामर्शानन्तरं तस्य पुरुषस्य पर्वतो वह्निमान् इति अनुमितिर्जायते। उक्तं भाष्यकारेण- "**तत्पूर्वकमित्यनेन लिङ्गलिङ्गिनोः सम्बन्धदर्शनं लिङ्गदर्शनञ्चाभिसम्बध्यते। लिङ्गलिङ्गिनोः सम्बद्धयोर्दर्शनेन**

[1] तत्त्वचिन्तामणिः, अनुमानखण्ड

[2] न्यायसूत्रम् १/१/५

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

**लिङ्गिस्मृतिरभिसम्बध्यते। स्मृत्या लिङ्गदर्शनेन चाप्रत्यक्षोऽर्थोऽ-नुमीयते**"[3] इति।

तत्र अनुमितिकरणमेवानुमानमिति अनुमानसामान्यलक्षणं न्यायज्ञैः भणितम्। अनुमानशब्दस्य सामान्यतः द्विधा व्युत्पत्तिः परिलक्ष्यते। अनुमीयते इति अनुमानं यद्यपि अनुमितिपरकं भवति तथापि अनुमीयते अनेन इति अनुमानमिति करणव्युत्पत्तिपक्षोऽत्र समाश्रयणीयः। अनुमानपदार्थश्च अनुमीयते अनेन इति करणव्युत्पत्तिपक्षः तात्पर्यटीकायां वाचस्पतिमिश्रैः विपुलतया व्याख्यातः। सूत्रोक्ततत्पूर्वकमित्यस्य व्याख्यानावसरे न्यायमञ्जरीकारैः "**तत्पूर्वं कारणं यस्य तत् तत्पूर्वकमिति व्युत्पत्तौ निर्णयोपमानादौ अतिप्रसङ्ग इति ते द्वे प्रत्यक्षे पूर्वं यस्येति**"[4] व्युत्पत्तिरभ्युपगता।

तत्र प्रथमं चाविनाभावग्राहि प्रत्यक्षम्, द्वितीयञ्च लिङ्गदर्शनं ते द्वे प्रत्यक्षे अनुमानस्य कारणे स्तः, न तूपमानादेः कारणमिति। वस्तुतः लिङ्गविषयं ज्ञानं ज्ञानविषयीकृतं वा लिङ्गं प्रतिबन्धस्मरणसहितं प्रमाणम्। परोक्षः अर्थः लिङ्ग्यते गम्यतेऽनेनेति लिङ्गम्। लिङ्गमिदं पञ्चलक्षणम्। तानि च लक्षणानि पक्षधर्मत्वं सपक्षसत्त्वं विपक्षाद्व्यावृत्तिरबाधितविषयत्वमसत्प्रति-पक्षत्वञ्चेति। तथाहि जयन्तभट्टः -

**पञ्चलक्षणकाल्लिङ्गाद् गृहीतान्नियमे स्मृतेः।**
**परोक्षे लिङ्गिनि ज्ञानमनुमानं प्रचक्षते॥**[5]

तत्रेदमवधातव्यं यत् प्राचीनानामुदयनाचार्याणां नये अनुमितौ करणं ज्ञायमानलिङ्गमेवानुमानम्। ज्ञायमानलिङ्गस्य करणत्वमिति निगदन्ति आचार्याः। अर्थात् ज्ञायते यत् तत् ज्ञायमानं वर्तमानव्याप्तिज्ञानविषयं लिङ्गमेवानुमानम्। ज्ञायमानलिङ्गस्य अनुमित्यकरणत्वे युक्तिं प्रदर्शयन्ति नव्याः - यदि ज्ञायमानलिङ्गस्य अनुमितिकरणत्वं स्वीक्रियते तर्हि भविष्यत्कालीनेन धूमेन इयं यज्ञशाला वह्निमती भविष्यति भाविधूमादित्यत्र भूतकालीनेन च धूमेन इयं यज्ञशाला वह्निमती आसीद् अतीतधूमादित्यत्र च अनुमितिर्न भवेत्, यतः वर्तमानकाले ज्ञायमानधूमस्याभावात् इति सर्वमतसिद्धः। अतः तादृशकारणाभावस्य वर्तमानकालीनज्ञायमान-धूमाभावस्य सत्त्वेऽपि वह्न्यनुमित्यात्मककार्यस्य सत्त्वाद् भवति व्यतिरेकव्यभिचारः। व्यभिचारदोषभयेन "**व्यापारवदसाधारण-कारणं करणम्**" इति करणलक्षणमभ्युपेत्य नव्यैः व्याप्तिज्ञानस्य अनुमितिकरणत्वं स्वीकृतम्। उक्तं च विश्वनाथेन-

**व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत्।**
**अनुमायां ज्ञायमानं लिङ्गं तु करणं न हि।**
**अनागतादिलिङ्गेन न स्यादनुमितिस्तदा॥**[6] इति।

अत्रेदमपि बोध्यं - ये खलु फलाव्यवहितप्राक्क्षणावच्छिन्नं कारणं करणमिति वदन्ति तेषां नये लिङ्गपरामर्शोऽनुमानमिति। तथाहि अन्नंभट्टः -

"**स्वार्थानुमितिपरार्थानुमित्योलिङ्गपरामर्श एव कारणम्।**
**तस्माल्लिङ्गपरामर्शोऽनुमानम्**॥"[7] इति।

केशवमिश्रेणापि लिङ्गपरामर्श एव अनुमानमिति प्रतिपादितम्। "**येन ह्यनुमीयते तदनुमानम्। लिङ्गपरामर्शेन चानुमीयतेऽतो लिङ्गपरामर्शोऽनुमानम्**"[8] इति।

तत्त्वचिन्तामणिकारैः श्रीमद्भिः गङ्गेशोपाध्यायैस्तु अनुमानस्वरूपमित्थं निगदितं यत् "**तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिः, तत्करणमनुमानम्। तच्च लिङ्गपरामर्शो न तु परामृश्यमानं लिङ्गमिति।**"[9]

एवञ्चानुमितिजनकस्य व्याप्तिज्ञानस्य करणत्वात् प्रमाकरणस्य प्रमाणत्वात् अनुमितिकरणं व्याप्तिज्ञानमेवानुमानमिति नवीनैः स्वीक्रियते। लिङ्गपरामर्शोऽनुमानं व्याप्तिज्ञानं वा अनुमानं भवतु करणलक्षणवैचित्र्यात् एव अनुमानलक्षणस्य वैचित्र्यम्

[3] न्यायभाष्यम्, पृ. १५२
[4] न्यायमञ्जरी, अनुमानप्रकरणम्, पृ. ११३
[5] न्यायमञ्जरी, अनुमानप्रकरणम्, पृ. १०१
[6] कारिकावली, कारिकासंख्या ६६-६७
[7] तर्कसंग्रहः, अनुमानप्रकरणम्
[8] तर्कभाषा, अनुमानप्रकरणम्
[9] तत्त्वचिन्तामणिः, अनुमानप्रकरणम्

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

इत्यत्र नास्ति नैयायिकानां काचित् विचिकित्सा। तच्चानुमानं सूत्रकारनये पूर्ववत् शेषवत् सामान्यतोदृष्टभेदेन त्रिविधं भवति। उक्तञ्च सूत्रकारेण "अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतो दृष्टञ्च"[10] इति। अभिप्रायस्तु तत्पूर्वकमित्यनेन प्रत्यक्षस्यानुमानकारणत्वमुक्तं प्रत्यक्षं चात्र साध्यसाधनयोर्व्याप्यव्यापकभावसम्बन्धविषयकं साधनविषयकं च विज्ञेयम्। तथाहि प्रथमं महानसे वह्निधूमयोः सम्बन्धप्रत्यक्षं भवति तदनन्तरं पर्वते धूमप्रत्यक्षं भवति तदनन्तरं पर्वते वह्न्यनुमितिर्जायत इत्ययं क्रमः न्यायशास्त्रे अवलोक्यते। किञ्च निश्चितसाध्यवान् इति सपक्षे साध्यसाधनयोः सम्बन्धयोरेव प्रत्यक्षं भवतीति पक्षे साध्यसाधनयोरन्यतरस्य साधनस्य धूमादेर्दर्शनाद् "एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकम्" इति न्यायेन साध्यस्य वह्नेः स्मृतिर्जायते, साप्यनुमितिकारणत्वेन संग्रहीतुं शक्यते। सपक्षे साध्यसाधनयोर्व्याप्तिग्रहो भवति, तदनन्तरं यदि क्वचित् साधनप्रत्यक्षं भवति तदा तेन प्रत्यक्षेणोक्तरीत्या साध्यस्मृतिर्भवति तदनन्तरञ्च दृष्टेन साधनेनाऽप्रत्यक्षस्य साध्यस्य वह्न्यादेः पक्षेऽनुमितिर्भवतीति न्यायज्ञानां राद्धान्तः।

पूर्ववदनुमानं तावत् कारणदर्शनेन कार्यविषयकमनुमानम्। यथा वृष्ट्युन्मुखेन मेघेन भविष्यत्कालिका वृष्टिरनुमीयते। अत्र मेघोन्नतिः कारणं वृष्टिश्च तत्कार्यमिति। "पूर्ववदिति यत्र कारणेन कार्यमनुमीयते यथा- मेघोन्नत्या भविष्यति वृष्टिरिति"[11]।

शेषवदनुमानञ्च कार्यदर्शनेन कारणविषयकानुमानम्। यथा धूमेन वह्न्यनुमानम्। भूतपूर्वकारणापेक्षया कार्यमेव। एवञ्च नद्याः मलिनमुदकं दृष्ट्वा नदीपात्रस्य पूर्णत्वं च दृष्ट्वा प्रवाहस्य शीघ्रगामित्वञ्च दृष्ट्वा तत्कारणभूता वृष्टिरनुमीयते "**भूता वृष्टिः**" इति। अत्रोदकादीनां मालिन्यादिकं कार्यं वृष्टिश्च तत्कारणमिति कार्येण कारणानुमानं सिद्धं भवति। उक्तञ्च भाष्यकारेण "शेषवत् तत्- यत्र कार्येण कारणमनुमीयते, पूर्वोदकविपरीतमुदकं नद्याः पूर्णत्वं शीघ्रत्वञ्च दृष्ट्वा स्रोतसोऽनुमीयते भूता वृष्टिरिति"[12]।

सामान्यतो दृष्टञ्च अन्यत्र दृष्टस्य यदन्यत्र दर्शनं तद् गतिपूर्वकमेव भवति। यथा मथुरायां दृष्टस्य चैत्रस्य यत् काश्यां दर्शनं तद्गतिपूर्वकमेव भवति, गतिहीनस्य तथा दर्शनाभावादिति सामान्यतो दर्शनेनाप्रत्यक्षमनुमीयते। तथाहि भाष्यकारः - ''सामान्यतो दृष्टम्- व्रज्यापूर्वकमन्यत्र दृष्टस्यान्यत्र दर्शनमिति तथा चादित्यस्य, तस्मादस्त्यप्रत्यक्षाप्यादित्यस्य व्रज्येति''[13]।

न्यायसूत्रकारैः अनुमानस्य यत्त्रैविध्यं प्रतिपादितं तत्र भाष्यकारैः सामान्यतोदृष्टानुमानस्य यदुदाहरणं प्रदत्तं तत् न्यायमञ्जरीकारैः जयन्तभट्टैः नाङ्गीकृतम्। भाष्यकारोक्तानुमानस्योदाहरणं शेषवदनुमानस्यैव युज्यते इति तेषामाशयः। तेनान्यथा सामान्यतोदृष्टानुमानं सोदाहरणं निरुक्तम्। तथाहि "सामान्यतो दृष्टं तु यदकार्यकारणभूताल्लिङ्गात्तादृशस्यैव लिङ्गिनोऽनुमानं यथा कपित्थादौ रूपेण रसानुमानम्, यत्पुनर्भाष्यकारेण भास्करस्य देशान्तरप्राप्त्या गत्यनुमानमुदाहृतं तदयुक्तम्, देशान्तरप्राप्तेर्गतिकार्यत्वात्कार्येण कारणानुमानं शेषवदेवेदं स्यात्"[14] इति। अत एतेषाम् अनुमानत्रयाणाम् अन्यथाव्याख्यानं भाष्यकारैः इत्थं कृतम्- पूर्ववदिति पूर्वं प्रत्यक्षतया सहानुभूतयोः वह्निधूमयोः अन्यतरस्य धूमस्य दर्शनेन अप्रत्यक्षस्य वह्नेरनुमानम्। यथा धूमवत्त्वाद् वह्निमानिति। शेषवत् इदं परिशेषानुमानम्। प्रसक्तानां प्रतिषेधे अन्यत्र अप्रसंगात् शिष्यमाणे निश्चयः। यथा शब्दस्य अद्रव्यत्वे अकर्मत्वे गृहीते च शिष्यमाणः गुण एवेति गुणत्वनिश्चयः। सामान्यतो दृष्टञ्च सम्बन्धे हेतुहेतुमतोरप्रत्यक्षे केनचिदर्थेन हेतोः सामान्यात् यत्र साध्यं गम्यते तत्सामान्यतोदृष्टम्। यथा इच्छादिभिरात्मा। इच्छादयश्च गुणाः, गुणाश्च द्रव्ये वर्तन्ते, तस्मादेतेषामाश्रयः आत्मेति। इत्येवं प्रकारेण भाष्यकारैः श्रीमद्भिः वात्स्यायनैः अनुमानस्य त्रैविध्यं

[10] न्यायसूत्रम् १/१/५
[11] न्यायभाष्यम्, पृ. १६७
[12] न्यायभाष्यम्, पृ. १६७
[13] न्यायभाष्यम्, पृ. १६७
[14] न्यायमञ्जरी, पृ. ११९

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

विवेचितम्। न्यायवार्त्तिककारेण भारद्वाजोद्यतकरेण अन्वयव्यतिरेकी-अन्वयी-व्यतिरेकी इति अनुमानस्य त्रैविध्यं प्रतिपादितम्।

वैशेषिकसूत्रस्य भाष्यकारैः प्रशस्तपादाचार्यैस्तावत् स्वनिश्चितार्थात्मकस्वार्थानुमान-परार्थानुमानभेदेन अनुमानस्य द्वैविध्यमङ्गीचकार। उक्तं च "**तत्तु द्विविधम्- दृष्टं सामान्यतो दृष्टञ्च**"[15] इति। जयन्तभट्टैस्तु न्यायमञ्जर्याम् उत्पन्नप्रतीति-उत्पाद्यप्रतीतिभेदाद् अनुमानस्य द्वैविध्यमुपदर्शितम्। तथाहि- "सुशिक्षिततराः प्राहुः द्विविधमनुमानम्, किञ्चिदुत्पन्नप्रतीति किञ्चिदुत्पाद्यप्रतीति ईश्वराद्यनुमानं तु उत्पाद्यप्रतीति"[16] इति। अर्वाचीनैः नैयायिकैः स्वार्थपरार्थभेदेनानुमानस्य द्वैविध्यमुपपादितम्। "तच्चानुमानं द्विविधं स्वार्थं परार्थञ्चेति"[17]। स्वार्थानुमानं तावत् स्वप्रतिपत्तिहेतुः। तथाहि स्वयं भूयोदर्शनेन यत्र धूमस्तत्राग्निरिति व्याप्ति गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नि सन्दिहानः धूमं दृष्ट्वा व्याप्ति संस्मृत्य परामर्शमुपलभ्य पर्वतो वह्निमानिति ज्ञानमनुमितिरूपं प्राप्नोति। इदमेव स्वार्थानुमानमुच्यते। परप्रतिपत्तिहेतुः परार्थानुमानम्। अर्थात् केनचित् स्वयं धूमादग्निमनुमाय परं बोधयितुं पञ्चावयवमनुमानवाक्यं प्रयुक्तं तत् परार्थानुमानम्। तद्यथा- पर्वतो वह्निमान् इति प्रतिज्ञा, धूमवत्त्वादिति हेतुः, यो यो धूमवान् स वह्निमान् यथा महानसः इति उदाहरणम्, तथा चायमिति उपनयः, तस्मात्तथा इति निगमनम्। अनेन पञ्चावयववाक्येन प्रतिज्ञादिमता प्रतिपादितपक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्व-असत्प्रतिपक्षत्व-अबाधितत्वात्मक-पञ्चरूपेण उपपन्नलिङ्गात् परोऽपि वह्निं प्रतिपद्यते। तेनैतत् परार्थानुमानमिति नव्यैः निगद्यते। उक्तञ्च मणिकारेण "तच्चानुमानं परार्थं न्यायसाध्यमिति, न्यायतदवयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि"[18] इति।

वस्तुतः न्यायसूत्रकाराभिमतं पूर्ववत्-शेषवत्-सामान्यतोदृष्टभेदेन अनुमानं त्रिविधम्। वात्स्यायनेन अयं विभागः समादृतः। उद्योतकरैः इदं प्रथमतया अन्वयव्यतिरेकी, अन्वयी, व्यतिरेकी चेति लिङ्गविशेषानुरोधादनुमानस्य त्रैविध्यमुक्तम्। वाचस्पतिमिश्रैस्तु वीतावीतभेदेनानुमानस्य द्वैविध्यमभ्युपगतम्। तत्र वीतं पूर्ववत्-सामान्यतोदृष्टभेदेन द्विविधम्। अवीतं पुनः शेषवत् परिशेषापरपर्यायं वेति तैः स्वीकृतम्। स्वार्थ-परार्थभेदेन इदं प्रथमतया स्वभाष्ये प्रशस्तपादः अनुमानविभागमुपादर्शयत्। अयञ्च द्विविधभेदः नव्यनैयायिकैरपि अद्यावधि स्वीक्रियते विचार्यते च। उपर्युक्तमतेषु नव्यैरनुसृतः स्वार्थपरार्थविभागः सर्वथा न्यायशास्त्रे समादरणीयो भवतीति अनुमानस्य द्वैविध्यमेवाङ्गीकार्यमिति न्यायशास्त्रज्ञानामाशयः।

### सहायकग्रन्थसूची


- अन्नंभट्टः . *तर्कसंग्रहः* (दीपिकासमन्वितः) . (सं.) (अनु.) अध्यापकः युधिष्ठिरगोपः . कोलकाता : संस्कृत वुक डिपो, २०१८ .
- गङ्गेशोपाध्यायः,*तत्त्वचिन्तामणिः*. (सं.)नगीन जी शाह .दिल्ली : मोतीलाल बनारसीदास, २००५
- प्रशस्तपादाचार्यः . *प्रशस्तपादभाष्यम्* (न्यायकन्दलीटीकासहिता) . (व्या.) श्रीधराचार्यः. (सं.) (अनु.) श्यामापदन्यायतर्कतीर्थः दण्डिस्वामी दामोदराश्रमः च . कोलकाता : संस्कृत पुस्तक भाण्डार .
- भट्टाचार्यः, विश्वनाथतर्कपञ्चाननः . *भाषापरिच्छेदः* (न्यायसिद्धान्तमुक्तावलीसमन्विता) . (सं.) (अनु.) पञ्चानन भट्टाचार्य्य शास्त्री . कोलकाता : महावोधि वुक एजेन्सि, २०१६ .
- भट्टः, जयन्तः . *न्यायमञ्जरी* . (सं.) पण्डितराजः श्रीसूर्यनारायणशुक्लः . वाराणसी : चौखम्बा संस्कृत सीरीज आफिस, १९७१ .


[15] प्रशस्तपादभाष्यम्, बुद्धिप्रकरणम्
[16] न्यायमञ्जरी, अनुमानप्रकरणम्, पृ. ११३
[17] तर्कभाषा, पृ. ३४
[18] तत्त्वचिन्तामणिः, अवयवप्रकरणम्

ISSN : 2583-2271
Vol. - 3, No. 1: 2023


- महर्षिगौतमः . *न्यायदर्शनम्* (वात्स्यायनभाष्य-सहितः) . (सं.) श्रीयुक्तफणिभूषणतर्कवागीशः . कोलकाता : पश्चिमवङ्ग राज्य पुस्तकपर्षत्, २००० .
- मिश्रः, केशवः . *तर्कभाषा* . (सं.) (अनु.) अध्यापिका शर्वाणी गाङ्गली . कोलकाता : संस्कृत पुस्तक भाण्डार, २००५ .
- मिश्रः, केशवः . *तर्कभाषा* . (सं.) वदरीनाथशुक्लः . दिल्ली : मोतीलाल बनारसीदास, २०१७ .

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# न्यायमते हेत्वाभासविचारः

**विश्वभूषण-मिश्रः**
**शोधछात्रः, न्यायदर्शनविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**बी-४, कुतुबसांस्थानिकक्षेत्रम् ,नवदेहली – ११००१६**

---

**प्रबन्धसारः**

*भारतीयषडास्तिकदर्शनेषु न्यायवैशेषिकदर्शनस्य महत्त्वं सर्वत्र प्रसिद्धमस्ति। तत्र न्यायदर्शनं महर्षिणा गौतमेन समुपस्थापितम्। हेत्वभासः गौतमस्य न्यायसूत्रस्य प्रथमाध्याये षोडशद्रव्येषु त्रयोदशपदार्थत्वेन निर्दिश्यते। हेत्वभासस्तु अनुमानस्य वास्तविकं कारणं न, किन्तु कारणत्वेन भासते। अस्मिन् शोधप्रबन्धे विविधानां हेत्वाभासानां विस्तृतम् आलोचनं कृतं वर्तते। एतेषां हेत्वाभासानां ज्ञानं सम्यक् प्रकारेण भवति चेत् सद्धेतवः उत्तमतया बोद्धुं शक्यन्ते। तैश्च सद्धेतुभिः अनुमा नं यथार्थं भविष्यति।*

**कुञ्चीशब्दाः** - सव्यभिचारः, विरुद्धः, सत्प्रतिपक्षः, असिद्धः, बाधितः चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

हेतुवदाभासन्त इति हेत्वाभासाः, हेतोः अभासः हेत्वाभास इति हेत्वाभासशब्दस्य व्युत्पत्तिद्वयं वर्तते। हेतुलक्षणं हेतुत्वं तदभावादहेतवो हेतुपदवाच्यः हेतुसामान्यात् हेतुवदाभासमानाः हेत्वाभासाः हेतुलक्षणाभावादहेतवो हेतुसामान्यात् हेतुवदाभासमानाः हेत्वाभासाः भवन्ति। अत्र समाख्यानिरुक्तवशेन हेत्वाभासानां सामान्यलक्षणं प्रतिपादितम्। सव्यभिचारविरुद्धप्रकरण-समसाध्य-समकालातीता हेत्वाभासाः।[1] अनैकान्तिकसव्यभिचारः एकस्य साध्यस्य साध्याभावस्य वा अन्ते अधिकरणमात्रे यः तिष्ठति सः एकान्तः तदन्यः अनैकान्तः। अत्र अनैकान्तिकसव्यभिचारशब्दौ पर्यायौ भवतः। व्यभिचारेण सह वर्तते इति सव्यभिचारः। अस्य निदर्शनं शब्दः नित्यः अस्पर्शत्वात्, स्पर्शवान् कुम्भः अनित्यः दृष्टः। न च तथा स्पर्शवान् शब्दः। तस्मात् कारणात् अस्पर्शत्वान्नित्यः। दृष्टान्ते स्पर्शवत्त्वमनित्यत्वं च धर्मौ न साध्यसाधनभूतौ दृश्येते स्पर्शवांश्च अणुर्नित्यश्चात्मादौ च दृष्टान्ते उदाहरणसाधर्म्यात् साध्यसाधनहेतुः।[2] इति अस्पर्शत्वादिति हेतुः नित्यत्वं व्यभिचरति। अस्पर्शा बुद्धिः अनित्या। एवं च दृष्टान्तद्वयेऽपि व्यभिचारात् साध्यसाधनभावो नास्ति इति लक्षणाभावादहेतुः भवति। अत्र नित्यत्वमपि एकः अन्तः। अनित्यत्वमपि एको अन्तः, अतः एकस्मिन्नन्ते विद्यत इति एकान्तिकः विपर्ययादनैकान्तिको भवन्ति। स्पर्शवत्त्वानित्यत्वयोः मध्ये साध्यसाधनसम्बन्धः नास्ति, स्पर्शवत्वं नित्यत्वं न साधयति। न चानित्यत्वं स्पर्शवत्त्वं साधयति।

सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः इति विरुद्धस्य लक्षणमुक्तं सूत्रकारेण[3]। अत्र तद्विरोधी इति समस्तपदस्य तं विरुणद्धि विरोधं करोतीति अभ्युपेतसिद्धान्तं व्याहन्ति इत्यर्थो भवति। यथा सोऽयं विकारो व्यक्तेरपैति नित्यत्वप्रतिषेधात्। विनाशप्रतिषेधात् न नित्यविकारः उपपद्यते इत्येवं कारणं व्यक्तेः अपेतोऽपि विकारः अस्तीति अनेन स्वसिद्धान्तेन विरुध्यते। अत्र विरुद्धपदं कर्मप्रत्ययान्तम्। तथा च साध्याभावव्याप्तो हेतुः विरुद्धः इति तर्कसंग्रहकारमतम्। यथा शब्दः अनित्यः कृतकत्वादिति। विरुद्धहेत्वाभासस्वरूपविषये प्राचीननवीननैयायिकयोः मतभेदः दृश्यते। भाष्यकारमते यः हेतुः यं किञ्चित् अभ्युपगतं सिद्धान्तं व्याहन्ति सः विरुद्धः। अत एव नित्यत्वप्रतिषेधहेतुः नित्यत्वसिद्धान्तविरोधेन विरुद्धः भवति इति दृष्टान्ते

---

[1] न्या.सू.१.२.४

[2] न्या.सू.१.१.३४

[3] न्या.सू.१.२.६

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

सूचितम्। नवीनमते यत् साध्यसाधनायोपन्यस्तो हेतुः तद्विरुद्धमेवाऽय: साधयति सः विरुद्धः। प्रतिज्ञाहेत्वोर्वा विरोधो विरुद्धः इति नवीनमतस्य मूलमिव भातिः।

यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः।[4] विमर्शाधिष्ठानौ पक्षप्रतिपक्षावनवसितौ प्रकरणं तस्य चिन्ता विमर्शात्प्रभृति प्राक् निर्णयात् यत् समीक्षणं सा जिज्ञासा यत्कृता स निर्णयार्थं प्रयुक्त उभयपक्षसाम्यात् प्रकरणमनतिवर्तमानः प्रकरणसमः सः निर्णयायः न प्रकल्पते। यथा अनित्यः शब्दः नित्यधर्मानुपलब्धेः यथा स्थाल्यादिः। अत्र विमर्शः संशयः प्रक्रियते साध्यत्वेन अधिक्रियते वादिप्रतिवादिभ्यामिति प्रकरणं तस्य प्रकरणस्य या चिन्ता विमर्शात् प्रभृति प्राक् निर्णयात्समीक्षणम् आलोचनम् तादृशी जिज्ञासा सा जिज्ञासा तत्त्वानुपलब्ध्या कृता। नित्यधर्मानुपलब्धे: अनित्यधर्मानुपलब्धेर्वा। वादिना निर्णयाय अपदिश्यमानः प्रकरणसमहेत्वाभासः भवति। नित्यत्वपक्षे शब्दस्य अनित्यधर्मानुपलब्धेः अनित्यत्वपक्षे नित्यधर्मानुपलब्धेः। अस्य प्रवृत्तिनिमित्तं तु सत्प्रतिपक्षत्वम् अन्यथा अनैकान्तिकस्यापि प्रकरणसमत्वं स्यात्। अनिश्चायकत्वसाम्यात् सव्यभिचारस्य प्रकरणसमस्य च संशयकत्वाविशेषेऽपि विशेषः वर्तते। अत एव पार्थक्येन उक्तम्। समानः प्रतिपक्षयोः सत्त्वेन दृष्टः धर्मः पक्षधर्मत्वेन दृश्यमानः। तत् संशयकारणं हेतुत्वेन निश्चायकत्वेन उपादीयते प्रयोक्ष्यते न त्वयं निश्चायकः दृश्यमानव्यभिचारत्वादिति परः संशेते। तेन अयं संशयसम: व्यभिचार एव। प्रकरणसमे विशेषः वर्तते यत् विमर्शस्य पुरुषस्य विशेषापेक्षिता उभयपक्षयोः व्याप्यो यो विशेषः तयोः अनुपलब्धि: सा प्रकरणचिन्तां प्रवर्तयति इति तयोः भेदः वर्तते। साध्याविशिष्टः साध्यत्वात् साध्यसमः।[5] साध्ये अनिश्चितः पक्षेऽपि अनिश्चितः हेतुः साध्यसमः असिद्धः भवति। अनेन स्वरूपासिद्धः, एकदेशासिद्धः, आश्रयासिद्धः, अन्यथासिद्धः चेत्येतेषां संग्रहो भवति। तेषां साध्याविशिष्टत्वादसिद्धत्वेन ग्रहणं भवति। अत्र असिद्धः साध्यसमः इति वक्तव्ये साध्याविशिष्टग्रहणमन्यतरासिद्धस्यापि सिद्धेः, प्रागहेतुत्वज्ञापनार्थम्। अन्यथा अत्यन्तासिद्ध एव साध्यसमः न अन्यतरासिद्धः तस्य कदाचित्सिद्धेः इति भ्रान्तिः स्यात्। यथा द्रव्यं छाया गतिमत्त्वात्। द्रव्यत्वं छायायां साध्यं गतिमत्त्वं स्वरूपासिद्धिग्रस्तं भवति। देशान्तरदर्शनात् यदि कश्चिच्छायायाः गतिमत्त्वं साधयेत् तदा अयं हेतुः आश्रयासिद्धः भवति। छायायाः यत् देशान्तरे दर्शनं तद्गतिमत्त्वात् अन्यथापि भवति। पक्षनिश्चयात् आश्रयासिद्धिः, लिङ्गस्यैवानिश्चयात् स्वरूपासिद्धिः व्याप्तेः अनिश्चयाद्व्याप्यत्वासिद्धिः।

कालात्ययापदिष्टः कालातीतो भवति।[6] एकदेशयोरर्थस्य कालात्ययेन युक्तः अपदिश्यमानस्य सः कालात्ययापदिष्टः कालातीतो भवति। अस्य हेत्वाभासस्य विषये प्राचीननवीनयोः मतभेदः दृश्यते। यथा नित्यः शब्दः संयोगव्यङ्ग्यत्वात् रूपवत्। एवमुदाहरणसामर्थ्यस्य अभावादसाधनमयं हेतु: हेत्वाभासः भवति। नवीनमते यत्र प्रत्यक्षानुमानागमविरोध: अनुष्णोऽग्निः द्रव्यत्वात्, अश्रावणः शब्दः गुणत्वात्, शुचिः नरशिरकपालं प्राण्यङ्गत्वात् इत्यत्र सर्वप्रमाणतो विपरीतनिर्णयेन सन्देहविशिष्टं कालमतिपततीति सोऽयं कालात्ययेन अपदिश्यमान: कालातीतो भवति।

सर्वप्रमाणतो विपरीतनिर्णयेन सन्देहविशिष्टं कालमतिपततीति सोऽयं कालात्ययेन बौद्धमते तमतीत्य हेतुः पश्चात् अपदिश्यमानः कालातीतो भवति। यथा अनित्यः शब्दः कृतकत्वात् घटादिवत्। अयं हेतुः कालातीतः भवति। परन्तु गौतममते तु कालात्ययेन युक्तः यदर्थस्य एकदेशो अपदिश्यमानस्य सः कालात्ययापदिष्टः कालातीतः बाधनामको हेत्वाभासः भवति।

हेत्वाभासपदस्य व्युत्पत्तिभेदेन हेतुदोषपरत्वं दुष्टहेतुपरत्वञ्चवर्तते। तत्रानुमितिकारणीभूताभाव-प्रतियोगियथार्थज्ञानविषयत्वं तत्त्वमिति हेत्वाभासस्य प्रथमलक्षणम्। द्वितीयलक्षणं च यद्विषयकत्वेन लिङ्गज्ञानस्य अनुमितिप्रतिबन्धकत्वं तत्त्वमिति। तत्वचिन्तामणिकारेण गङ्गेशोपाध्यायेन हेतोः आभासः

[4] न्या.सू.१.२.७

[5] न्या.सू.१.२.८

[6] न्या.सू.१.२.९

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

इति व्युत्पत्त्या हेत्वाभासाः सव्यभिचारविरुद्धसत्प्रतिपक्षा-सिद्धबाधिताः पञ्चहेतुदोषाः भवन्तीत्युक्तम्। तत्संबन्धाश्च हेतुवदाभासन्ते इति व्युत्पत्त्या दुष्टहेतुपरत्वमपि साधितम्। तत् संबन्धश्चायं हेतुः व्यभिचारी इत्यादिप्रतीतिनियामको ग्राह्यः। अत्र अनुमितिपदेन पक्षः साध्यवान् साध्यव्याप्यहेतुमानिति समूहालम्बनानुमितेः ग्रहणम्। यद्विषयकत्वेन इत्यत्र तृतीयार्थो अवच्छेदकत्वम्। अवच्छेदकत्वञ्च अत्र अनतिरिक्तवृत्तित्वं नतु स्वरूपसंबन्धविशेषरूपम्। बाधत्वादिना घटाद्यवगाहिज्ञानस्यापि निरुक्तानुमितिप्रतिबन्धकत्वेन बाधः। विशिष्टस्य अनतिरिक्तत्वात् ह्रदाद्यात्मकभाववद् ह्रदादिविषयकत्वस्य केवल- ह्रदादिज्ञानसाधारणस्य निरुक्तानुमितिप्रतिबन्धकतातिरिक्ता-वृत्तित्वात्।

यद्विषयकत्वेनेत्यनेन यादृशरूपावच्छिन्ननिरूपितविषयत्वस्य उक्तत्वात् अनतिरिक्तवृत्तित्वञ्च स्वव्यापकतत्कत्वरूपं नतु तदभाववदवृत्तित्वम्। तेन अन्याभावत्वाद्यवच्छिन्न-प्रकारतानिरूपितस्य ह्रदाद्यवच्छिन्ननिरूपितस्य यत्किञ्चिद् विषयत्वस्य प्रकृतानुमितिप्रतिबन्धकताशून्यह्रदः इत्याकारकज्ञानसाधारण ह्रदत्वाद्यवच्छिन्ननिरूपितविष-यित्वावच्छिन्नव्यापकत्वस्य प्रकृतानुमितिप्रतिबन्धक-तायाः असत्वात्। यादृशरूपावच्छिन्न-निरूपितविषयता सामान्ये तादृशप्रतिबन्धकता अनतिरिक्तवृत्तित्व-निवेशे सामान्यपदार्थस्य व्यापकत्वस्य निवेशेन अतिगौरवम्।

न्यायपरम्परायां गङ्गेशोपाध्यायैः हेत्वाभासस्य लक्षणत्रयं प्रतिपादितम्। तत्र अनुमितिकारणीभूताभाव-प्रतियोगियथार्थज्ञानविषयत्वमिति प्रथमलक्षणम्। द्वितीयं यद्विषयकत्वेन लिङ्गज्ञानस्य अनुमितिविरोधित्वं तत्त्वम्। तृतीयलक्षणं ज्ञायमानं यदनुमितिप्रतिबन्धकं यत्तत्त्वम्। एतादृशलक्षणत्रयेषु अनुमितिपदेन अनुमितेः अनुमितिकारणीभूतपरामर्शस्य च ग्रहणं भवति। तत्र प्रथमलक्षणम् अनुमितिकारणीभूताभावप्रतियोगि-यथार्थज्ञान-विषयत्वम्। तात्पर्यमिदमनुमितौ कारणीभूतो यः अभावः तत्प्रतियोगि यद् यथार्थज्ञानं तद्विषयत्वमिति हेतुदोषः भवति। न्यायमते प्रतिबन्धकस्य अभावोऽपि कारणं भवति। यत्र हेतुदोषाणां ज्ञानं भवति तत्र अनुमितेः उत्पत्तिः न भवति। हेतुदोषाणां ज्ञानमनुमितिं प्रति, परामर्शं प्रति, व्याप्तिज्ञानं प्रति च प्रतिबन्धकं भवति। तेन एतादृशपरिस्थितौ हेतुदोषाणां ज्ञाने सति अनुमित्यनुत्पादो भवति। तेन समस्तदोषेषु अनुमितिकारणीभूताभाव-प्रतियोगियथार्थज्ञानविषयत्वस्य सत्वात् लक्षणसमन्वयः। अस्मिन् लक्षणे यथार्थपदाभावेऽपि हेतुदोषेषु लक्षणसमन्वयो भवति। तथापि सद्धेतौ अपि लक्षणसमन्वयसम्भवादतिव्याप्तिः भवति। यथा पर्वतो वह्निमान् धूमादित्यत्र वह्न्यभाववत् पर्वते अतिव्याप्तिः। तत्रापि पर्वतो वह्न्यभाववान् इति निश्चयसत्त्वे पर्वतो वह्निमानित्याकारानुमितिर्नोत्पद्यते। तात्पर्यमिदं यत् पर्वतो वह्निमान् इत्याकारकानुमितिं प्रति वह्न्यभाववान् पर्वतः इत्याकारकज्ञानस्य प्रतिबन्धकत्वात् भ्रमात्मकज्ञानस्यापि प्रमात्मकज्ञानं प्रतिबन्धकत्वम्। अत एव यथार्थपदं दत्तम्।[7]

यथार्थपदाघटितं द्वितीयलक्षणं कृतम्। यद्विषयकत्वेन लिङ्गज्ञानस्य अनुमितिप्रतिबन्धकत्वं तत्त्वम्, अस्मिन् लक्षणे लिङ्गपदमविवक्षितं वर्तते।[8] यथा ह्रदो वह्निमान् जलादित्यत्र वह्न्यभाववत् ह्रदरूपबाधे लक्षणसमन्वयः।

तृतीयलक्षणं वर्तते ज्ञायमानं सदनुमितिप्रतिबन्धकं यत् तत्त्वम्। अर्थात् यः ज्ञायमाने सति अनुमितिप्रतिबन्धकः भवति सः हेतुदोषः भवति। अस्मिन् लक्षणे इदं वैलक्षण्यं वर्तते यत् अत्र ज्ञानस्य प्रतिबन्धकत्वं नैव स्वीकृतं किन्तु ज्ञायमानविषयस्य प्रतिबन्धकत्वम्। यदि ज्ञानस्य प्रतिबन्धकत्वं स्वीक्रियते तदा अस्य लक्षणस्य समन्वयो नैव भवितुमर्हति। परन्तु यदि वयं ज्ञायमानदोषस्य प्रतिबन्धकत्वं स्वीक्रियते तदा अस्मिन् मते न कोऽपि दोषः। एतादृशरीत्या दोषाणां लक्षणकरणे सति दोषवत्त्वं दुष्टत्वमिति दुष्टहेतुलक्षणं भवति।[9] यथाश्रुतमिदं हेतुदोषाणां लक्षणं तद्वत्त्वञ्च दुष्टहेतूनाम्।

[7] तत्त्व. चि. अ. ग. पृ.१५८०
[8] तत्त.टि.दी.अ.गा.
[9] तत्त.चि.दी.हे.गा.

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

न्यायशास्त्रेषु हेत्वाभासस्य पञ्च भेदाः प्रदर्शिताः। सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीता: हेत्वाभासाः।[10] प्रशस्तपादभाष्ये हेत्वाभासानां चातुर्विध्यं स्वीकृतम्। असिद्धविरुद्धसंदिग्धानध्यवसितवचनानाम-पदेशत्वमुक्तम्। तत्र असिद्धः चतुर्विधः उभयासिद्धः, अन्यतरासिद्धः, तद्भावासिद्धः, अनुमेयासिद्धश्च। न्यायसूत्रकाराः न्यायभाष्यकाराश्च हेत्वाभासानां प्रभेदाः नैव उक्ताः। किन्तु प्रशस्तपादेन असिद्धस्य चातुर्विध्यं प्रदर्शितम्।

ते च असिद्धविरुद्धानैकान्तिकप्रकरणसमकाला-त्ययापदिष्ट-भेदात् पञ्चैव। तत्र लिङ्गत्वेनासिद्धो हेतुरसिद्धः। तत्रासिद्धस्त्रिविधः। आश्रयासिद्धः स्वरूपासिद्धः, व्याप्यत्वासिद्धश्चेति। आश्रयासिद्धो यथा - गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत्। अत्र गगनारविन्दमाश्रयः स च नास्त्येव। स्वरूपासिद्धो यथा अनित्यः शब्दः चाक्षुषत्वात् घटवत्। अत्र चाक्षुषत्वं हेतुः, स च शब्दे नास्त्येव तस्य श्रावणत्वात्। व्याप्यत्वासिद्धस्तु द्विविधः। एको व्याप्तिग्राहकप्रमाणाभावात्। अपरस्तूपाधिसद्भावात्। तत्र प्रथमो यथा शब्दः क्षणिकः सत्त्वात्। यत्सत् तत्क्षणिकं यथा जलघटपटलं तथा च शब्दादिरिति। न च सत्त्वक्षणिकत्वयोर्व्याप्तिग्राहकं प्रमाणमस्ति। सोपाधिकतया व्याप्यत्वासिद्धौ उच्यमानायां क्षणिकत्वमन्यप्रयुक्तमित्यभ्युपगतं स्यात्।

द्वितीयो यथा क्रत्वन्तर्वर्तिनी हिसा अधर्मसाधनं हिसात्वात् क्रतुबाह्यहिसावत्। अत्र ह्यधर्मसाधनत्वे हिसात्वं न प्रयोजकं किन्तु निषिद्धत्वमेव प्रयोजकम्, उपाधिरिति यावत्। तथाहि "साध्यव्यापकत्वे सति साधनाव्यापक" उपाधिरित्युपाधिलक्षणम्। तच्चास्ति निषिद्धत्वे। निषिद्धत्वं हि साध्यस्याधर्मसाधनत्वस्य व्यापकम्। यतो यत्र यत्राधर्मसाधनत्वं तत्र तत्रावश्यं निषिद्धत्वमपीति। एवं साधनं हिसात्वं, न व्याप्नोति निषिद्धत्वम्। न हि यत्र यत्र हिसात्वं तत्र तत्रावश्यं निषिद्धत्वं यज्ञाय पशुहिसायाः निषिद्धत्वाभावात्। तदेवं निषिद्धत्वस्योपाधेः सद्भावादन्यप्रयुक्तव्याप्त्युपजीवि-हिसात्वं व्याप्यत्वासिद्धमेव।

साध्यविपर्ययव्याप्तौ हेतुः विरुद्धः। यथा शब्दो नित्यः कृतकत्वादात्मवत्। अत्र कृतकत्वं हि साध्यनित्यत्वविपरीतानित्यत्वेन व्याप्तम्। यत्कृतकं तदनित्यमेव यन्नित्यमित्यतो विरुद्धं कृतकत्वमिति।

सव्यभिचारोऽनैकन्तिकः। स द्विविधः साधारणानैकान्तिकाऽसाधारणानैकान्तिकश्चेति। तत्र पक्षसपक्षविपक्षवृत्तिः साधारणः। यथा शब्दो नित्यः प्रमेयत्वात् व्योमवत्। अत्र हि प्रमेयत्वं हेतुस्तस्य नित्यानित्यवृत्तित्वम्। सपक्षाद् व्यावृत्तो यः पक्षः एव वर्त्तते सोऽसाधारणानैकान्तिकः। यथा भूर्नित्या गन्धवत्त्वात्। गन्धवत्वं हि सपक्षान्नित्याद् विपक्षाच्चानित्याद् व्यावृत्तं भूमात्रवृत्ति। प्रकरणसमस्तु यस्य हेतोः साध्यविपरीतसाधकं हेत्वन्तरं विद्यते। यथा शब्दोऽनित्यो नित्यधर्मरहितत्वात्। शब्दो नित्योऽनित्यधर्मरहितत्वाद् इति। अयमेव हि सत्प्रतिपक्ष इति उच्यते।

पक्षे प्रमाणान्तरावधृतसाध्याभावो हेतुर्बाधितविषयः। कालात्ययापदिष्ट इति। यथा- अग्निरनुष्णः कृतकत्वाज्जलवत्। अत्र हि कृतकत्वस्य हेतोः साध्यमनुष्णत्वं तदभावः प्रत्यक्षेणैवावधारितः स्पार्शनप्रत्यक्षेणैवोष्णत्वोपलम्भात्। उक्तानां पक्षधर्मत्वादिरूपाणां मध्ये येन केनापि रूपेण हीनाः अहेतवः भवन्ति। तेऽपि कतिपयहेतुरूपयोगाद्धेतुवद् आभासमानाः हेत्वाभासाः। ते च असिद्ध- विरुद्ध-अनैकान्तिक-प्रकरणसम-कालात्ययापदिष्टभेदात् पञ्चैव।

अत्रोदयनेन "व्याप्तं हेतोः पक्षधर्मतया प्रतीतिः सिद्धिस्तदभावोऽसिद्धिः" इत्यसिद्धिलक्षणमुक्तम्। तच्च यद्यपि विरुद्धादिष्वपि सम्भवतीति साङ्कर्यं प्रतीयते। तथापि यथा न साङ्कर्यं तथोच्यते। यो हि साधने पुरः परिस्फुरति समर्थश्च दृष्टज्ञप्तौ स एव दृष्टज्ञप्तिकारको दूषणमिति यावत् नान्य इति। तेनैव पुरावस्फूर्तिकेन दुष्टौ ज्ञापितायां कथापर्यवसाने जाते तदुपजीविनोऽन्यस्यानुपभोगात्। तथा च सति यत्र विरोधो साध्यविपर्ययव्याप्याख्यो दुष्टज्ञप्तिव्यभिचारादयस्तथाभूतास्तेऽनैकान्तिकादयः त्रयः। ये पुनर्व्याप्तिपक्षधर्मताविशिष्टहेतु-

[10] न्या.सू.१.२.४

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

स्वरूपज्ञप्त्यभावेन पूर्वोक्ता असिद्ध्यादयो दुष्टज्ञप्तिकारकदूषणानीति। तथाभूतः सोऽसिद्धः।

स च त्रिविधः। आश्रयसिद्धः, स्वरूपासिद्धः, व्याप्यत्वासिद्धश्च। तत्र यस्य हेतोराश्रयो नावगम्यते स आश्रयासिद्धः। यथा गगनारविन्दं सुरभि अरविन्दत्वात्, सरोजारविन्दवत्। अत्र हि गगनारविन्दमाश्रयः स च नास्त्येव। अयमप्याश्रयासिद्धः। तथाहि "घटोऽनित्यः कार्यत्वात् पटवत्" सिद्धसाधकस्तु स्यात्, सिद्धस्य घटानित्यत्वस्य साधनात्।

मैवम्। न हि स्वरूपेण कश्चिदाश्रयो भवत्यनुमानस्य किन्तु सन्दिग्धधर्मवत्त्वेन। तथा चोक्तं भाष्ये - नानुपलब्धे तु निर्णीतेऽर्थेऽपि तु सन्दिग्धेऽर्थे न्यायः प्रवर्तते।

न च घटे नित्यत्वसन्देहोऽस्ति। अनित्यत्वस्य निश्चितत्वात्। तेन यद्यपि स्वरूपेण घटो विद्यते तथाप्यनित्यसन्देहाभावान्नासावाश्रये इत्याश्रयासिद्धत्वाद् अहेतुः। स्वरूपासिद्धस्तु स उच्यते यो हेतुः आश्रये नावगम्यते। यथा "सामान्यमनित्यं कृतकत्वात्" इति। कृतकत्वं हि हेतुराश्रये सामान्ये नास्त्येव। भागासिद्धोऽपि स्वरूपासिद्ध एव। यथा "पृथिव्यादयश्चत्वारः परमाणवो नित्यः गन्धवत्वात्"[11] अत्र गन्धवत्वं हि पक्षीकृतेषु सर्वेषु नास्ति पृथिवीमात्रवृत्तित्वात्। अत एव भागौ स्वरूपासिद्धः।

तथा विशेषणासिद्धः, विशेष्यासिद्धः, असमर्थविशेषणासिद्धः, असमर्थविशेष्यासिद्धादयः स्वरूपासिद्धभेदाः। तत्र विशेषणासिद्धो यथा शब्दो नित्यो द्रव्यत्वे सत्यस्पर्शत्वात्। अत्र हि द्रव्यत्वविशिष्टमस्पर्शत्वं हेतुर्नास्पर्शत्वमात्रम्। शब्दे च द्रव्यत्वं विशेषणं नास्ति गुणत्वात्। अत्र विशेषणासिद्धः। न चासति विशेषणे द्रव्यत्वे तद्विशिष्टमस्पर्शत्वमस्ति। विशेषणाभावे विशिष्टस्याप्यभावात्। तथा दण्डमात्राभावे पुरुषाभावे दण्डविशिष्टस्य पुरुषस्याभावः। तेन सत्यप्यस्पर्शत्वे द्रव्यत्वविशिष्टस्य हेतोरभावात् स्वरूपासिद्धत्वम्। विशेष्यासिद्धो यथा "शब्दो नित्योऽस्पर्शत्वे सति द्रव्यत्वात्"[12] इति। अत्रापि विशिष्टो हेतुः। न च विशेष्याभावे विशिष्टं स्वरूपमस्ति विशिष्टश्च हेतुर्नास्त्येव।

असमर्थविशेषणासिद्धो यथा, "शब्दो नित्यो गुणत्वे सत्यकारणकत्वात्"। अत्र हि विशेषणस्य न किञ्चित् सामर्थ्यमस्तीति। विशेष्यस्याकारणकत्वस्यैव नित्यत्वसाधने सामर्थ्यात्। अतोऽसमर्थविशेषणता। स्वरूपासिद्धत्वं तु विशेषणाभावे विशिष्टस्याप्यभावात्। ननु विशेषणं गुणत्वं तत्र शब्देऽस्याप्यभावात्। सत्यमस्त्येव गुणत्वं, किन्तु तद्विशेषणम्। तदेव हि हेतोर्विशेषणं भवति यदन्यव्यवच्छेदेन प्रयोजनवत्। गुणत्वं तु निष्प्रयोजनमतोऽसमर्थमित्युक्तमेव।

असमर्थविशेष्यो यथा तत्रैव तद्वैपरित्येन प्रयोगः। तथाहि, "शब्दो नित्योऽकारणकत्वे सति गुणत्वात्" इति। अत्र तु विशेषणमात्रस्यैव नित्यत्वसाधने समर्थत्वाद् विशेष्यमसमर्थम्। स्वरूपासिद्धत्वं तु विशेष्याभावे विशिष्टाभावात्, विशिष्टस्य च हेतुत्वेनोपादानात्।

व्याप्यत्वासिद्धस्तु स एव यत्र हेतोर्व्याप्तिर्नावगम्यते। स द्विविधः। एकः साध्येनासहचरितः, अपरस्तु सोपाधिकसाध्यसम्बन्धी। तत्र प्रथमो यथा "यत् सत् तत् क्षणिकं यथा जलधरः, संश्च विवादास्पदीभूतः शब्दादिः" इति। अत्र हि शब्दादिः पक्षः, तस्य क्षणिकत्वं साध्यं, सत्त्वं हेतुः। न चास्य हेतोः क्षणिकत्वेन सह व्याप्तौ प्रमाणमस्ति।

उपाधिसहितो व्याप्यत्वासिद्धः। तद्यथा "स श्यामो, मैत्रीतनयत्वात् परिदृश्यमानमैत्रीतनयस्तोमवत्" इति। अत्र हि मैत्रीतनयत्वेन श्यामत्वं साध्यते। न च मैत्रीतनयत्वं श्यामत्वे प्रयोजकं किन्तु शाकाद्यन्नपरिणाम एवात्र प्रयोजकः। प्रयोजकश्चोपाधिरुच्यते। अतो मैत्रीतनयत्वेन श्यामत्वेन सम्बन्धे शाकाद्यन्नपरिणाम एवोपाधिः। अन्यदपि यथा अग्नेर्धूमसम्बन्धे आर्द्रेन्धनसंयोगः उपाधिः। अत एवोपाधिसम्बन्धाद् व्याप्तिः नास्तीति।

तथा अपरोऽपि व्याप्यत्वासिद्धः। यथा "क्रत्वन्तर्वर्तिनी हिसा अधर्मसाधिका हिसात्वात् क्रतुबाह्यहिसावत्" इति। न च हिसात्वधर्मे प्रयोजकं किन्तु निषिद्धत्वमुपाधिरिति पूर्ववदुपाधिसद्भावाद् व्याप्यत्वासिद्धोऽयं हिसात्वहेतुः। ननु "साध्यव्यापकत्वे

[11] त.भा

[12] त.भा

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

सति साधनाव्यापको यः स उपाधिः”[13] इत्युपाधिलक्षणम्। तच्च निषिद्धत्वे नास्ति तत् कथं निषिद्धत्वमुपाधिरिति।

मैवम्। निषिद्धत्वेऽप्युपाधिलक्षणस्य विद्यमानत्वात्। तथा हि साध्यस्य अधर्मजनकत्वस्य व्यापकं निषिद्धत्वम्। यत्र यत्राधर्मसाधनत्वं, तत्र तत्रावश्यं निषिद्धत्वमिति निषिद्धत्वस्य विद्यमानत्वात्। न च यत्र यत्र हिसात्वं तत्र तत्रावश्यं निषिद्धत्वं क्रत्वहिसायां व्यभिचारात्। अस्ति हि क्रत्वङ्गहिसायां हिसात्वं, न चात्र निषिद्धत्वमिति। तदेवं त्रिविधोऽसिद्धो दर्शितः।

साध्यविपर्ययव्याप्तौ हेतुर्विरुद्धः। यथा “शब्दो नित्यः कृतकत्वात्” इति। अत्र हि नित्यत्वं साध्यं, कृतकत्वं हेतुः। तद्विपर्ययेण चानित्यत्वेन कृतकत्वं व्याप्तं, यतो यद्यत्कृतकं तत्तत् स्वल्पनित्यमेव।

साध्यसंशयहेतुरनैकान्तिकः सव्यभिचारः। स द्विविधः। साधारणानैकान्तिको असाधारणानैकान्तिकश्चेति। तत्र प्रथमः, पक्षसपक्षविपक्षवृत्तिः। यथा “शब्दो नित्यः प्रमेयत्वात्” इति। अत्र प्रमेयत्वं हेतुः पक्षे शब्दे, सपक्षे नित्ये व्योमादौ, विपक्षे चानित्ये घटादौ विद्यते, सर्वस्यैव प्रमेयत्वात्। तस्मात् प्रमेयत्वं हेतुः साधारणानैकान्तिकः।

असाधारणानैकान्तिकः स एव यः सपक्षविपक्षाभ्यां व्यावृत्तः पक्षे एव पर्वते। यथा- “भूर्नित्या गन्धवत्त्वात्” इति। अत्र गन्धवत्त्वं हेतुः। स च सपक्षान्नित्याद् व्योमादेः। विपक्षाच्चानित्याज्जलादेर्व्यावृत्तौ गन्धवत्त्वस्य पृथिवीमात्रवृत्तित्वादिति।

यस्य प्रतिपक्षभूतं हेत्वन्तरं विद्यते स प्रकरणसमः। स एव सत्प्रतिपक्षः इति चोच्यते। तद्यथा “शब्दोऽनित्यो नित्यधर्मानुपलब्धेः”, “शब्दो नित्योऽनित्यधर्मानुपलब्धेः” इति। अत्र साध्यविपरीतसाधकं समानबलमनुमानान्तरं प्रतिपक्ष इत्युच्यते। यः पुनरतुल्यबलो न स प्रतिपक्षः।

तथापि विपरीतसाधकानुमानं त्रिविधं भवति। उपजीव्यम्, उपजीवकम्, अनुमेयं चेति। तत्राद्यं बाधकं बलवत्त्वात्। यथा “अनित्यपरमाणुर्मूर्तत्वाद् घटवत्” इत्यस्य परमाणुसाधकानुमानं नित्यत्वं साधयेदपि न प्रतिपक्षः। किन्तु बाधकमेवोपजीव्यत्वात्। तच्च धर्मिग्राहकत्वात्। न हि प्रमाणेनागृह्यमाणे धर्मिणि परमाणुवन्नित्यत्वानुमानमिदं सम्भवति, आश्रयासिद्धेः। अतः अनेनानुमानेन परमाणुग्राहकस्य प्रामाण्यमप्यनुज्ञातमन्यथा अस्योदयासम्भवात्। तस्मादुपजीव्यं बाधकमेव। उपजीवकं तु दुर्बलत्वाद्। यथेदमेवानित्यत्वानुमानम्। द्वितीयं तु सत्प्रतिपक्षं समबलत्वात्।

यस्य प्रत्यक्षादिप्रमाणेन पक्षे साध्याभावः परिच्छिन्नः स कालात्ययापदिष्टः। स एव बाधितविषय इत्युच्यते। यथा “अग्निरनुष्णः कृतकत्वाज्जलवत्”। अत्र कृतकत्वं हेतुः। तस्य च यत् साध्यमनुष्णत्वं तस्याभावः प्रत्येक्षेणैव परिच्छिन्नः त्वगिन्द्रियेणाग्नेरुष्णत्वपरिच्छेदात्।

तथा अपरेऽपि कालात्ययापदिष्टो यथा घटस्य क्षणिकत्वे साध्ये प्रयुक्तसत्त्वं हेतुः। तस्यापि च यत् साध्यं क्षणिकत्वं तस्याऽभावोऽक्षणिकत्वं प्रत्यभिज्ञानादिलक्षणेन प्रत्यक्षेण परिच्छिन्नम्। स एवाऽयं घटो यो मया पूर्वमुपलब्धः” इति प्रत्यभिज्ञया पूर्वानुभवजनितसंस्कारसहकृतेन्द्रियप्रभवया पूर्वापर-कालतया घटस्य स्थायित्वपरिच्छेदादिति। एते चासिद्धादयः पञ्च हेत्वाभासा यथा कथञ्चित् पक्षधर्मत्वाद्यन्यतमरूपहीनत्वादहेतवः स्वसाध्यं न साधयन्तीति।

## सहायकग्रन्थसूची


- किरणावली, उदयनाचार्यः, सम्पा. . विन्ध्येश्वरीप्रसादद्विवेदी, चौखम्बा संस्कृत सीरीज सं. ९, वाराणसी, १८९७
- तत्त्वसंग्रहः, शान्तरक्षितः, सं.. स्वामी द्वारिकादासशास्त्री, बौद्धभारती, वाराणसी, १९६८
- तर्कामृतम्-जगदीशभट्टाचार्यः, सं.. रामचन्द्रमिश्रः, चौखम्बा विद्याभवन, वाराणसी, १९७३


[13] त.भा

ISSN : 2583-2271
Vol. - 3, No. 1: 2023


- तर्ककौमुदी -लौगाक्षिभास्करः, सं..वी. एल. एस. पनसीकरः, निर्णयसागर प्रेस, बम्बई, १९२८
- तर्कभाषा-केशवमिश्रः, सं..बदरीनाथशुक्लः, मोतीलाल बनारसीदास, वाराणसी, १९६८
- तर्कसंग्रहः -अन्नंभट्टः, सं.. अथल्ये. बोडासः, बाम्बे संस्कृत सीरीज, सं. ५५, भण्डारकर ओरियण्टल रिसर्च इन्स्टीव्यूट, पूना, १९६८
- तर्कसंग्रहः 'दीपिका'-अन्नंभट्टः, सं.. अथल्ये. बोडासः, बाम्बे संस्कृत सीरीज, सं. ५५, भण्डारकर ओरियण्टल रिसर्च इन्स्टीव्यूट, पूना, १९६८
- न्यायकुसुमाञ्जलि- उदयनाचार्यः, सं..महाप्रभुलालगोस्वामी, मिथिला विद्यापीठ ग्रन्थमाला सं. २८, १९७२
- न्यायभाष्यम् -वात्स्यायनः, सं..नारायणमिश्रः, काशी संस्कृत ग्रन्थमाला, ४८, वाराणसी, १९७०
- न्यायवार्त्तिकम्-उद्योतकराचार्यः, सं. विन्ध्येश्वरीप्रसाद द्विवेदी, बिब्लोथिका इण्डिका, कलकत्ता, १८८७
- न्यायसिद्धान्तमुक्तावली-विश्वनाथः, सं. श्रीकृष्णवल्लभाचार्यः, काशी संस्कृत ग्रन्थमाला, सं. २१२, वाराणसी, १९७२
- प्रशस्तपादभाष्यम्-प्रशस्तपादः, सं. नारायणमिश्रः, काशी संस्कृत (पदार्थधर्मसंग्रहः) ग्रन्थमाला सं. १७३, वाराणसी, १९६६
- भारतीय दर्शन-बलदेव उपाध्याय, चौखम्भा सं. सं. दिल्ली, १९७७

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# न्यायवैशेषिकयोः द्रव्यचिन्तनकौशलम्

**शान्तनु-दासः**
**शोधछात्रः, न्यायदर्शनविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः,**
**बी-४, कुतुबसांस्थानिकक्षेत्रम् ,नवदेहली - ११००१६.**

---

**प्रबन्धसारः**

*भारतीयषडास्तिकदर्शनेषु न्यायवैशेषिकदर्शनस्य महत्त्वं सर्वत्र प्रसिद्धमस्ति। तत्र न्यायदर्शनं महर्षिणा गौतमेन समुपस्थापितम्। वैशेषिकदर्शनञ्च महर्षिणा कणादेन प्रणीतमस्ति। तत्र आभाणके "काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्" इत्यस्मिन् वाक्ये घटकीभूतं काणादपदं न्यायवैशेषिकदर्शनस्य बोधकं विद्यते। एवञ्च द्रव्यविषये विभिन्नदार्शनिकानां मतभेदः दृश्यते। किन्तु न्यायवैशेषिकाणां द्रव्यविषये विचारधारा महत्त्वपूर्णा अस्ति। यद्यपि केषुचित् स्थलेषु मतभेदः अनयोः दर्शनयोः दृश्यते तथापि तयोः दर्शनयोः न काऽपि विप्रतिपत्तिः। अत एव तद मया अत्र प्रतिपादितमस्ति।*

**कुञ्चीशब्दाः** - द्रव्यत्वम्, आन्वीक्षिकी, सामान्यम्, गुणत्वम्, आप्तत्वं, निःश्रेयसम् चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

विदितमेव इदं समेषां विदुषां यत् भारतीयेषु चतुर्दशविद्यास्थानानि पुरुषार्थसाधकानि महर्षिभिः शिष्टैश्च परिगणितानि इति। विद्यास्थानस्य लक्षणमुक्तं जयन्तभट्टेन स्वीयन्यायमञ्जरीग्रन्थे- पुरुषार्थसाधनज्ञानोपायत्वम् एवोच्यते। वेदनं विद्या तच्च न घटादिवेदनम्, अपि तु पुरुषार्थसाधनवेदनम्। विद्यायाः स्थानम् आश्रयः उपायेत्यर्थः इति। तानि च –

**पुराणं न्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।**
**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥**[1] इति।

तथा च एतानि चतुर्दश विद्यास्थानानि - चत्वारो वेदाः, षडङ्गानि, पुराणं, तर्कः, मीमांसा, धर्मशास्त्रञ्चेति। चत्वारो वेदाः ऋग्यजुः-साम-अथर्वभेदेन, षडङ्गानि शिक्षा, व्याकरणम्, छन्दः, ज्योतिषम्, निरुक्तम्, कल्पः चेति भेदेन। पुराण-तर्क-मीमांसा-न्यायविस्तररूपाणि शास्त्राणि उपाङ्गानि इत्युच्यते, एतैः उपाङ्गैः संभूय विद्यास्थानानि चतुर्दशेति प्रज्ञायन्ते। अत्र न्यायविस्तरपदेन तर्कशास्त्रं न्यायशास्त्रमेवोच्यते इति।

तत्र अङ्गीभूतस्य वेदस्य रक्षणायैव अङ्गोपाङ्गानि प्रवृत्तानि। अङ्गानि च वेदस्वरूपरक्षणाय प्रवृत्तानि, उपाङ्गानि च वेदार्थतात्पर्यवर्णनादिना वेदार्थनिरूपणेन वेदमुपकुर्वन्ति। यदाह जयन्तभट्टः अङ्गानि व्याकरणकल्पज्योतिश्शिक्षाछन्दोनिरुक्तानि वेदार्थोपयोगिपदादिव्युत्पादनद्वारा विद्यास्थानत्वं प्रतिपद्यन्ते। विचारमन्तरेण व्यवस्थितवेदवाक्यार्थानवधारणात् मीमांसा वेदवाक्यार्थविचारात्मिका वेदाकरस्य इतिकर्त्तव्यतारूपम् अनुभवन्ती विद्यास्थानतां प्रतिपद्यते। तथा च भट्टः –

**धर्मे प्रमीयमाणे तु वेदेन करणात्मना।**
**इतिकर्तव्यताभागं मीमांसा पूरयिष्यति।**[2]

अत एव सप्ताङ्गत्वेन न गण्यते मीमांसा, प्रत्यासन्नत्वेन वेदैकदेशभूतत्वात्।

न्यायविद्या तु प्रमाणादिकं व्युत्पादयन्ती प्रमाणविद्येति गीयते। "**ईक्षत्यधिकरणभाष्ये भगवत्पादाः पदवाक्यप्रमाणज्ञेनाचार्येण**" इति ग्रन्थेन वादरायणाचार्यः प्रमाणशब्दोदितन्यायविद्यावेदितृतया स्वीक्रियते। "**आदित्यो यूपः**" इति श्रुतिः आदित्यतां यूपस्य न बोधयति। अपि तु आन्वीक्षिकीपरिशोधिता प्रमाणादिप्रकाशिताम् आदित्यसदृशतां तेजस्वितां बोधयति इति इतरविद्याः स्वप्रतिपाद्यविषये आन्वीक्षिकीम् अपेक्षन्ते।

---

[1] या. स्मृ. ४/३

[2] स्मृति ग्रन्थ.

**प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्त्तिता।**[3]

अपि च, सर्वेषामपि विद्यास्थानानां मूलस्तम्भभूता आन्वीक्षिकी, वेदप्रामाण्यहेतुत्वात्। वेदे प्रमाणतया व्यवस्थापिते किल वेदवाक्यानामर्थविचाररूपमीमांसादि-विद्यास्थानस्य कृत्यमस्ति।

वेदप्रमाण्यनिर्णयः प्रयोजनं चेत् कुतः न्यायविस्तरः कृतः अनेन, मीमांसाया एव तत्सिद्धेः। तत्र हि अर्थविचारवत् प्रामाण्यविचारोऽपि कृत एव। पृथक्प्रस्थाना इमा विद्याः। सा च वाक्यार्थविद्या न प्रमाणविद्येति। न च मीमांसकाः सम्यक् वेदप्रामाण्यरक्षणक्षमां सरणिम् अवलोकयितुं कुशलाः, कुतर्ककण्टकनिकरनिरुद्धसञ्चार-मार्गाभासपरिभ्रान्ताः खलु ते इति वक्ष्यामः, इति च।

कि बहुना, न्यायशास्त्रस्य महत्त्वं शब्देनैव स्पष्टं ज्ञायते। शब्दस्य च इयं व्युत्पत्तिः नीयते प्राप्यते अर्थः अनेन इति न्यायः, "**मानाधीना मेयसिद्धिः**" इति न्यायेन लोके विद्यमानानां समेषां वस्तुनां प्रमाणैकगम्यत्वं सर्वसम्मतम्। किञ्च "**असाधारण्येन व्यपदेशा भवन्ति**" इति न्यायेन न्यायस्य परार्थानुमानः अपरपर्यायस्य सकलविद्यानुग्राहकतया सर्वकर्मानुष्ठानसाधनतया प्रधानत्वेन गौतममुनिप्रणीतशास्त्रस्य न्यायशास्त्रम् इति व्यपदेशः। तत्रापि सर्वेषु प्रमाणेषु अनुमानप्रमाणम् अतिमुख्यं भवति। यद्यपि प्रत्यक्षप्रमाणं सर्वापेक्षया प्रबलम् इत्यत्र कस्यापि विवादः नास्ति, अथापि प्रत्यक्षं प्रमाणं केवलं स्वस्यैव उपकरोति न परान्। अनुमानन्तु प्रमाणं स्वं यथा उपकरोति तथा परानपि अत्यन्तमुपकरोति। सर्वेऽपि जनाः तर्केण साधितमर्थं सादरं स्वीकरोतीति इदानीन्तनकालेऽपि निश्चिततया वक्तुं वयं प्रभवामः। यद्यपि तर्कः न प्रतिष्ठितः धीमद्भिः उत्प्रेक्षितानामपि तर्काणां ततः अभियुक्ततरैः अभाषीकरणं दृश्यते। तथापि प्रतिष्ठितः तर्क एव नास्तीति न हि वक्तुं शक्यते। तर्काणाम् अप्रतिष्ठितत्वमपि तर्केणैव प्रतिष्ठापनीयं भवति। तस्मात् हानोपादानादिसकललोकयात्रा-निर्वाहकम् अनुमानं सर्वोपजीव्यं भवति।

एवं न्यायविद्या श्रुतिप्रसिद्धा। छान्दोग्ये सप्तमेऽध्याये प्रथमखण्डे नारदसनत्कुमार-आख्यायिका श्रूयते, इदमहं ज्ञाने इति वदेति सनत्कुमारेण अनुयुक्तो नारदः तर्कशास्त्रमपि स्वाधीतमाह - '**ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशि दैवं निधि वाकोवाक्यम् एकायनम्** इत्यादिना। तत्र '**वाकोवाक्यं तर्कशास्त्रम्**' इति भगवत्पादभाष्यम्।

इमां विद्यां योऽधीयते ते नैयायिकाः। तेषां योगा इति व्यपदेशोऽपि दृश्यते स्याद्वादमञ्जर्या '**वैशेषिकनैयायिकयोः प्रायः समानतन्त्रत्वात् औलूक्यमते क्षिप्ते योगमतमपि क्षिप्तमवसेयम्**' इति। प्रतितन्त्रसिद्धान्तलक्षणसूत्रे न्यायभाष्ये, '**पुरुषकर्मादिनिमित्तः भूतसर्गः। कर्महेतवः दोषाः। प्रवृत्तिश्च स्वगुणविशिष्टाश्चेतनाः असदुत्पद्यते उत्पन्नं निरुध्यते इति** योगानाम्' इति ग्रन्थो दृश्यते। नहीदं मतं प्रसिद्धयोगिनां मतमिति वक्तुं शक्यते, तैः पुरुषस्य निर्गुणत्व-अभ्युपगमात् असत्कार्यवादाभ्युपगमाच्च। अतः इदं नैयायिकमतमेव, अतश्च ग्रन्थान्तर-संवादेन भाष्ये योगशब्देन नैयायिका विवक्षिताः। योगानामित्यस्य वैशेषिकाणामिति टिप्पणी समुपलभ्यते। परन्तु ग्रन्थान्तरेषु कण्ठतो योगशब्देन नैयायिकानाम् अभिधानात् तेऽत्र विवक्षिता इति युक्तमिति मतियुक्त्यपरपर्याययोग-प्रधानविद्यापरिशीलिनां योगा इति नामापि श्लिष्टमेव।

तस्मात् लोकयात्रानिर्वाहकतया सर्वोपजीव्यस्य, विप्रतिपन्नपुरुषप्रतिपादकतया श्रेष्ठस्य सपरिकरस्य न्यायस्य सर्वविद्यापेक्षितप्रमाणादेश्च व्युत्पादने, प्रवर्तनारूपकार्ये स्वप्रतिपाद्यनिर्णये च सर्वासां विद्यानां बहूपकारकरणेन वेदप्रामाण्यव्यवस्थापनेन, अपवर्गसाधनोपदेशपरत्वेन, श्रुतिस्मृति-सम्मतत्वेन च वाङ्मये उन्नतं पदम् अधिरूढं विलसति न्यायदर्शनमिति सिद्धम्।

'**काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्**' इति श्लाघितं तावदिदं दर्शनम्। यथा शब्दतत्त्वशोधनविषये व्याकरणान्तरतः पाणिनीयस्य प्रकर्षः, पदार्थतत्त्वशोधनविषये व्याकरणान्तरतः पाणिनीयस्य प्रकर्षः, तदा पदार्थतत्त्वशोधनविषये कणादसरणिरेव

[3] न्यायभाष्यम्

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

प्रकर्षः। सांख्यादयः तत्त्वगणनप्रवृत्ता अपि संकीर्णमेवं विभागं व्यदधुः। द्रव्यमात्रगणप्रवृत्ताश्च गुणकर्मसामान्यादिकम् अनुभवगोचरं प्रति न किञ्चिद् अवोचन्। प्रत्युत धर्मधर्मिविवेकं विना जातिव्यक्त्योरभेदः, गुणगुणिनोरभेदः इत्यादीनि व्युत्पित्सूनां व्यवहारपद्धतौ आन्ध्यमेवाऽऽपादयामासुः। अतः किञ्चिद्रूपेणाभेदः क्वचिद् इष्टव्येऽपि तत्र-तत्र भेदानुरोधिनो व्यवहारस्यैव भूयस्त्वात् तदनुगुणं तस्य सर्वस्य पृथग्विभजनं साधर्म्य-वैधर्म्यप्रदर्शनञ्च कर्त्तव्यं कणाद एव कृपया प्राचीकशदीति सा एव व्युत्पत्तिः संपादनीयेति भावः। अद्यत्वेऽपि अनुभविकमिदं यत् तर्कशास्त्रेऽधीतिनां धर्मधर्मिविवेकव्यवहारनिपुणिमा च पुष्कल इति। आह च कश्चित् कविशिरोमणिः –

**मोहं रुणद्धि विमलीकुरुते च बुद्धिं**
**सूते च संस्कृतपदव्यवहारशक्तिम्।**
**शास्त्रान्तराभ्यसनयोग्यतया युनक्ति**
**तर्कश्रमो न तनुते कमिहोपकारम्।**

'**काणादं पाणिनीयञ्च**' इति काणादस्य प्रथमग्रहणं गौरवातिशयादित्यप्यदर्शि। वेदानधिकारिणोऽपि वशीकृत्य वैदिकमते स्थापयितुकामेन वेदप्रामाण्यमात्रेण निर्णयेष्वौदासीन्यं बिभ्रता, '**तर्कतो निरूपणे क्रियमाणे यत्र न सहसा दूषणं पदं निदध्यात्, स मार्गः संग्राह्य**' इति न्यायेन अणुकारणवादः कणादेन प्रावर्ति। एवं प्रवृत्ताश्च आस्तिकाः यदि वेदविरोधमाकल्य्य तर्कान्तरसाचिव्येन किञ्चिदन्यथैव परमार्थं निर्णयेयुः तत् काममस्तु।

किं च वैशेषिकैः शब्दस्य अनुमाने एव अन्तर्भावः क्रियते, अत एव "**तद्वचनादाम्नायस्य प्रामाण्यम्**"[4] इति सूत्रे वेदस्य धर्मबोधकत्वात् प्रामाण्यं निर्धार्यते, धर्मस्य च लक्षणं पूर्वस्मिन् "**यतोऽभ्यदयनिःश्रेयससिद्धिः स धर्मः**"[5] इति सूत्रे अभ्युदयनिःश्रेयससाधकत्वम् उक्तम्। सर्वमिदम् अनुमानेनैव स्थिरीकर्तुं शक्यते, उक्तञ्च उदयनाचार्येण न्यायकुसुमाञ्जलौ---

**न्यायचर्चेयमीशस्य मननव्यपदेशभाक्**
**उपासनैव क्रियते श्रवणानन्तरागता॥**
**आगमेनानुमानेन ध्यानाभ्यासरसेन च**
**त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम्॥**[6]

इति प्राचीनश्लोकेऽपि अनुमानेन योगसाधनं स्पष्टीकृतम्। किं च मननम् अनुमानरूपम् अनुमाने च तर्कादीनां हेत्वाभासानां च निरूपणमिति न अविदितं किञ्चित् शास्त्रज्ञानाम्।

न्यायदर्शने यद्यपि शब्दः पृथकप्रमाणं भवति अथापि तस्य प्रामाण्यम् आप्तोक्तत्त्वेन हेतुना एव निरूप्यते। न्यायसूत्रेऽपि "**आप्तवाक्यं शब्दः**"[7] इत्येव शब्दस्वरूपमुक्तम्। किं बहुना सर्वस्यापि प्रमाणस्य प्रामाण्यम् अनुमानेनैव स्थिरीक्रियते। अस्मिन् विषये मीमांसकादिदार्शनिकैः साकं मतभेदः दृश्यते, किन्तु वैशेषिकाणां नैयायिकानाञ्च न विप्रतिपत्तिः।

न्यायदर्शने षोडशपदार्थानां निरूपणं दृश्यते, तच्च निःश्रेयससाधनम् इति कथयन् गौतमः कणादस्य परिपाटीमेव ग्राहयामास। तत्र दर्शने गौतमः लौकिकालौकिकपुरुषार्थसाधनव्यग्राणां सर्वपदार्थविज्ञानस्य वैशेषिकविहितस्य मुमुक्षूणां तत्र आत्मशरीरम् इत्यादिद्वादशविधप्रमेयमात्रज्ञानं पर्याप्तमिति परिशील्य विज्ञानानिःश्रेयसस्य, विज्ञानस्य च, "**श्रोतव्यो मन्तव्यो निदिध्यासितव्यः**"[8] इति त्रितयरूपत्वात् मध्यमणिभूतस्य मननस्यैव यथावत् निष्पत्तिरपेक्षिता इत्याकलय्य निर्णयकारणानि निर्णयप्रतिबन्धकानि च पार्थक्येन विभज्य षोडशपदार्थतत्त्वज्ञानं निःश्रेयससाधिगमकम् इत्यधिगमस्य तत्त्वज्ञानान्निःश्रेयसलाभे द्वारीभूतानि च विवृत्य वैशेषिकमुख्यप्रमेयमेव विशदयामास। शरीरात् आत्मनः पार्थक्यम्, ज्ञानस्य विलक्षण-आत्मसाधकत्वम्, इन्द्रियाणां भौतिकत्वम्, तेषां प्रतिनियतग्राहित्वनियामकत्वम्, मनसोऽणुत्वनित्यत्वादि, अवयवातिरिक्तः अवयवी, आकाशदेशम् अवयवत्व-अविनाशित्वपरममहत्वादि,

[4] वै.सू. १/१/३
[5] वैशेषिक० १/१/२
[6] न्या.कु
[7] त.भा. पृ. १४९
[8] वृ.उ

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

भूतेषु गुणनियमः, अणुकारणवादः, अणोस्त्रुटितोऽपि परत्वम् इत्यादीनङ्गीकरोति।

### सहायकग्रन्थसूची


- उपनिषदसंग्रहः-जगदीशशास्त्री, मोतिलालवनारसी-दास दिल्ली, १९८४
- किरणावली-उदयनाचार्यः, सम्पा. विन्ध्येश्वरीप्रसादद्विवेदी, चौखम्बा संस्कृत सीरीज सं. ९, वाराणसी, १८९७
- तत्त्वसंग्रहः-शान्तरक्षितः, सम्पा. स्वामी द्वारिकादासशास्त्री, बौद्धभारती, वाराणसी, १९६८
- तर्कभाषा-केशवमिश्रः, सम्पा. बदरीनाथशुक्लः, मोतीलाल बनारसीदास, वाराणसी, १९६८
- तर्कसंग्रहः अन्नंभट्टः, सम्पा. अथल्ये. बोडासः, बाम्बे संस्कृत सीरीज, सं. ५५, भण्डारकर ओरियण्टल रिसर्च इन्स्टीव्यूट, पूना, १९६८
- तर्कसंग्रहः 'दीपिका'-अन्नंभट्टः, सम्पा. अथल्ये. बोडासः, बाम्बे संस्कृत सीरीज, सं. ५५, भण्डारकर ओरियण्टल रिसर्च इन्स्टीव्यूट,पूना, १९६८
- प्रशस्तपादभाष्यम्-प्रशस्तपादः, सम्पा. नारायणमिश्रः, काशी संस्कृत
- (पदार्थधर्मसंग्रहः) ग्रन्थमाला सम्पा. १७३, वाराणसी, १९६६
- वै.सू. भाष्यम् -चन्द्रकान्ततर्कालंकारः, गुजराती प्रेस, बम्बई, १९१३
- भारतीय दर्शन-बलदेव उपाध्याय, चौखम्भा सं. सं. दिल्ली, १९७७
- न्यायसिद्धान्तमुक्तावली - विश्वनाथः, सम्पा. श्रीकृष्ण-वल्लभाचार्यः, काशी संस्कृत ग्रन्थमाला, सं. २१२, वाराणसी, १९७२
- याज्ञवल्क्य स्मृति - चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, १९८६

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# प्रत्यक्षं ज्योतिषं शास्त्रम्

**सत्यव्रत-वेहेरा**
**शोधच्छात्रः, संस्कृतविभागः, महाराजा श्रीरामचन्द्रभञ्जदोओ विश्वविद्यालयः**
**वारिपदा, मयूरभञ्ज, ओडिशा**

**प्रबन्धसारः**

*"अप्रत्यक्षाणि शास्त्राणि विवादास्तेषु केवलम् ।*
*प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ॥"[*]*
*"ज्योतिषां सूर्यादिग्रहाणां बोधकं शास्त्रं ज्योतिश्शास्त्रम् ॥"[#]*

*वेदस्य चक्षुरूपेण सुप्रतिष्ठितं वेदाङ्गभूतमतिप्राचीनमिदं ज्योतिर्विज्ञानं ज्योतिषशास्त्रं वा। अनेन ग्रह -नक्षत्र-धुमकेत्वादीनां ज्योतिःस्वरूपाणां सर्वेषां खगोलीयपिण्डानां पदार्थस्वरूपनिरूपणं, परिभ्रमणकालग्रहणं, विविधघटनानां निरीक्षणं, ग्रहनक्षत्राणां गतिस्थितिसञ्चारानुसारं शुभाशुभफलनिरूपणं च भवति।*

*'ज्योतिषामयनं चक्षुः' वेदस्य नयनरूपमिदं शास्त्रं वेदादेव समुत्पन्नं भवति। वेदः भारतीयदर्शनस्य प्रमुखं मोक्षशास्त्रम्। प्रवृत्तिनिवृत्तिलक्षणात्मकमात्मज्ञान-ब्रह्मज्ञानस्य च शास्त्रमिदम्। यस्य ज्ञानं प्रत्यक्षानुमानप्रमाणाभ्यां न भूयते। वेदं वेदत्वं प्रकाशकत्वं वा धर्ममूलम्। धर्मो यज्ञप्रधानः। यज्ञः कालानुरूपम्। ज्योतिषं कालविधायकशास्त्रम्। कालस्तु कलनात्मकं मानवजीवनस्य गतिस्थितिनिर्धारकम्।*

**कुञ्चीशब्दाः** - ज्योतिषम्, ग्रहः, प्रभावः, भचक्रम्, सिद्धान्तः चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

**प्रस्तावना-** व्यवहारिकदृष्ट्या सूर्योदय-सूर्यास्त-तिथि-मास- दिवसादीनां ज्ञानाय ज्योतिषशास्त्रं परमावश्यकम्। लघुपाराशरीग्रन्थे ज्योतिषशास्त्रकर्तारः अष्टादश महर्षयः समाम्नाताः यथा-

"सूर्यः पितामहो व्यासो वशिष्ठोऽत्रिः पराशरः
कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः।
लोमशः पौलिशश्चैव च्यवनो यवनो भृगुः
शौनकोऽष्टादश ह्येते ज्योतिश्शास्त्रप्रवर्तकाः ॥"[1]

पुराणानुसारं सूर्यः, पितामहः, व्यासः, वशिष्टः, अत्रिः, पराशरः, कश्यपः, नारदः, गर्गः, मरीचिः, मनुः, अङ्गिराः, लोमशः, पौलिशः, च्यवनः, यवनः, भृगुः, शौनकः इति एतेषां प्रमुखानां प्रातःस्मरणीयानां तत्त्वदर्शिणां महर्षिणां प्रज्ञाकल्पतरुमिव विशालं ज्योतिषशास्त्रम्। इदं ज्योतिषशास्त्रं सिद्धान्तसंहिताहोराभेदेन स्कन्धत्रयात्मकं विद्यते। उक्तं च -

"सिद्धान्तसंहिताहोरारूपस्कन्धत्रयात्मकम्।
वेदस्य निर्मलं चक्षुर्ज्योतिशास्त्रमकल्मषम् ॥"[2]

**सिद्धान्तः** – ज्योतिषशास्त्रस्य त्रिषु स्कन्धेषु सिद्धान्तपक्षस्य प्रमाणं निर्विवादेन सर्वजनस्वीकृतम्। उक्तं च भास्कराचार्येण-

"तृव्यादिप्रलयान्तकालकलना मानप्रभेदक्रमाच्-
चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथासोत्तराः।
भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते
सिद्धान्तः सोदाहृतोऽत्र गणितस्कन्धाप्रबन्धैः बुधैः ॥"[3]

एवमपि नवविधकालमानान्यपि उल्लिखितानि सन्ति। सूर्यसिद्धान्ते निगदितं यथा –

---

[*]मुहूर्त्तचिन्तामणिः – पृ- ५, (भूमिका भाग- मुहुर्त्तशास्त्रपर्यालचमन्)

[#] ज्योतिःसार-रत्नावली, पृ-५, पण्डित वाइकोलि महापात्र, डः.निर्मल सुन्दर मिश्र

[1]भारतीय ज्योतिष, पृ-६६, नेमिनेन्द्रशास्त्री।

[2]मुहूर्त्तचिन्तामणी, पृ-५ (भूमिकाभाग - मुहूर्त्तशास्त्रपर्यालोचनम्)।

[3] सूर्यसिद्धान्तः,पृ-१ कपिलेश्वरशास्त्रभूमिकाभाग।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

"ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं च गौरवम्।
सौरञ्च सावनं चान्द्रमार्क्षं मानानि वै नव ॥"[4]

वैदिककर्मसम्पादनं, संक्रान्तिकालनिरूपणं, कर्मकाण्डे मुहूर्तनिर्णयः, शुभाशुभकालविचारप्रसङ्गे च एषां व्यवहारः भवति। होरा- एषः भवति फलितविषयः। श्रीमत्कल्याणवर्माविरचितायां सारावल्यां होराशब्दस्य व्युत्पत्तिः यथा –

"आद्यन्तवर्णलोपाद्धोराशास्त्रं भवत्यहोरात्रात्।
तत्प्रतिवद्धश्चायं ग्रहभगणश्चिन्त्यते यस्मात्॥"[5]

"कर्मफललाभहेतुं चतुराः सवर्णयन्त्येते।
होरेति शास्त्रसंज्ञा लग्नस्य तथार्धराशेश्च॥"[6]

अर्थात् अहोरात्रशब्दस्य आद्यन्तवर्णलोपात् होराशब्दः निष्पन्नः। चतुराः यत् कर्मफलप्राप्तिसूचकशास्त्रमिति कथयन्ति। अयं होराशब्दः भाग्यविचारशब्दस्य पर्यायवाची भवति। होराशास्त्रस्य आवश्यकताविषये उक्तं च सारावल्यां यथा-

"अर्थार्जने सहायः पुरुषाणामापदर्णवे पोतः।
यात्रासमये मन्त्री जातकमपहाय नास्त्यपरः॥"[7]

अर्थात् इदं शास्त्रमर्थोपार्जने सहायकम्। विपत्तिसागरे नावेव कार्यं सम्पादयति यात्राकाले सचिव एव परामर्शदाता च भवति। विषयेऽस्मिन् किञ्चित्प्रामाणिकतथ्यमुपस्थाप्यते यत् रत्नादयः धातवः, वर्णाः, क्षितिः, अप्, तेजः, मरुत्, व्योमः, ग्रहाः, उपग्रहाः, धुमकेत्वादयः सर्वे खगोलीयपिण्डाः विविधाभिः आणविकशक्तिभिः परिपूर्णाः भवन्ति। सम्पूर्णे ब्रह्माण्डे शक्तयः किञ्चित्कार्यं सम्पादयन्ति। प्रत्येकं पिण्डस्य गुरुत्वाकर्षणशक्तिः विद्यते। एतदर्थम् इलेक्ट्रन् – न्युट्रन् – प्रोटन्रूपाः शक्तिसम्पन्नाः परमाणुकणिकाः रश्मयश्च महाकाशे सर्वदा क्षीप्रगत्या भ्रमन्ति। ते क्षीणशक्तिसम्पन्ना अपि उत्कटस्वास्थ्यसमस्यां जनयन्तीति वैज्ञानिकाः स्वीकुर्वन्ति। 'यत् पिण्डे तत् ब्रह्माण्डे' इति सिद्धान्तानुसारम् एवं स्वीक्रियते यत् ग्रहाः अन्ये पिण्डाश्च मानवशरीरे आचरणे प्रभावं पातयन्ति। परन्तु एतच्छुभमशुभं वा अज्ञातमिति। H.R.P. (HUMAN RESEARCH PROGRAMME) मतानुसारं महाकाशीयरश्मिविकिरणात् महाकाशचारिणां सुरक्षा अस्माकं कृते संघर्षपूर्णा अस्ति। नासा-पदार्थविज्ञानी जन् नर्वे (पि.एच्.डि)-अनुसारं सौरमण्डल-बहिस्थनक्षत्रविस्फोरणवशात् निर्गताः उज्ज्वलरश्मयः मानवशरीरस्य महद्धानि साधयन्ति। Scientific proof of astrology पुस्तकानुसारं तथा अन्यैः गणित-ज्योतिषप्राध्यापकैः प्रमाणीकृतं वर्तते यत् सूर्यचन्द्रादयः ग्रहाः पृथिव्याः चुम्बकीयक्षेत्रं प्रभावितं कुर्वन्ति। सूर्यस्य चुम्बकीयशक्तिः पृथिव्यां पतनेन पृथिवीस्थजीवानां मनः शरीरं प्रभावितं भवति। कान्सास्-विश्वविद्यालयस्य प्राध्यापकः रेलाण्ड-ह्विलरस्य तथा रुष्-वैज्ञानिकस्य आलेकजेण्डरचितेभिस्किमहोदयस्य मतानुसारं सौरवित्पातः मानवमस्तिष्के तीव्रप्रतिक्रियां जनयित्वा पृथिव्यां प्रत्यक्षरूपेण युद्धं संघर्षं मानवीयमृत्युं च संघटयति।

**ग्रहाणां प्रभावः**- फलितशास्त्रदृष्ट्या सूर्यचन्द्रादयः नवग्रहाः पृथिव्यां निवसतां प्राणिनामुपरि प्रत्यक्षं परोक्षं प्रभावं च पातयन्ति। यद्यपि वैज्ञानिकदृष्ट्या सूर्यः, नक्षत्रः, चन्द्रः, उपग्रहः, राहुकेतू छाये भवतः। परन्तु ज्योतिषशास्त्रानुसारं खगोलीयानां येषां तेजःपुञ्जानां प्रभावः पृथिव्यामुपरि पतति ते एव ग्रहाः। एतदर्थं सूर्योऽपि ग्रहः, चन्द्रोऽपि ग्रहः। सर्वेषु ग्रहेषु सूर्यचन्द्रयोः प्रभावः समधिकः कारणं चन्द्रः पृथिव्याः निकटतरः। सूर्यः प्रखरशक्तिसम्पन्नः। सूर्यस्य प्रभावेन जगदिदं परिचालितम्। पृथिव्याः सूर्यपरिक्रमणं वर्षम्। चन्द्रस्य पृथिवीपरिभ्रमणं मासः। पृथिवी-सूर्ययोः गतेः अन्तरम् ऋतुः। सूर्यचन्द्रयोः गतेरन्तरं तिथिः। तिथ्यनुसारं पृथिव्यां प्रभावाः इत्युक्ते पूर्णिमायाममावास्यायां च गुरु-प्रवाहः। अष्टमीतिथौ लघु। अन्यतिथौ आनुपातिकः प्रवाहः भवति। मानवशरीरे प्रायः सप्ततिप्रतिशतं जलीयांशाः विद्यन्ते। यदि सूर्यचन्द्रौ पृथिवीस्थसमुद्रात् जलमाकर्षयितुं समर्थौ तर्हि मानवशरीरान्तर्गतान् जलीयांशान् किम् आकर्षयितुं न शक्नुतः किमु? एतदर्थं पूर्णिमायाम्

---

[4] सूर्यसिद्धान्तः,पृ-३४५ – अ – १४ –प्रो. रामचन्द्रपाण्डेय।

[5] सारावली पृ – ३, अ – २, श्लोक – ५, कल्याणवर्मा।

[6] सारावली पृ – ३, अ – २, श्लोक – ५, कल्याणवर्मा।

[7] सारावली पृ – ३, अ – २, श्लोक – ५, कल्याणवर्मा।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

अमावास्यायाञ्च शरीरस्थजलीयांशानामभिवृद्धेः प्रभावः मानवशरीरे स्थूलरूपेणैव परिलक्ष्यते यथा कफवृद्धिः सन्धिस्थलकष्टं वातज्वरः इत्यस्याभिवृद्धिः। सूर्यस्यातिलोहितरश्मिः चर्मकर्कटरोगस्य कारकः भवति। पुनः सूर्यग्रहणकाले मुक्तनयनाभ्यां ग्रहणदर्शनमनुचितमिति वैज्ञानिकैः संसूच्यते। आधुनिकभेषजशास्त्रे कामलरोगनिवारणार्थं रश्मिचिकित्सा (RAY THERAPY) उपयुज्यते। Curious Mirkat Google site अनुसारं साश्चर्यं परिलक्ष्यते यत् अस्माकं मानसिकस्थितिः चन्द्रचक्रेण प्रभाविता भवति। बहुसंख्यकाः आरक्ष्यधिकारिणः, चिकित्सकाः, कारागारप्रहरिणः दृढयन्ति वदन्ति यत् दैनन्दिनजीवने तैः चन्द्रचक्रस्य प्रमाणीभूतः प्रभावः अनुभूतः।

पुराणानुसारं चन्द्रः मानवस्य व्यग्रताम् उग्रतां मनोदशाञ्च नियन्त्रयति। चन्द्रः अस्माकं प्रजननशक्तिं प्रभावयति। हिसात्मककार्यं यथा अपराधः, आत्महत्या, भयङ्करदुर्घटना, अभिग्रहणम्, रक्तहीनता, निद्रा प्रभृतयः चन्द्रेण प्रभाविताः भवन्ति। चन्द्रचक्रं मत्स्य-कीट-पक्षिणां जीवरसोपरि प्रभावं पातयति। स्वीक्रियते यत् आफ्रिकादेशस्य व्याघ्र-सिहादिहिंस्रजन्तूनां वधः चन्द्रकिरणेन प्रभावितः। चन्द्रस्य अष्टाविशतिदिवसात्मकगतिचक्रं स्त्रीणाम् ऋतुचक्रेण सम्बन्धितम्। नियुजिलाण्ड-देशस्य वरिष्ठारक्ष्यधिकारी 'व्रिग् टन्' इत्यस्य मतानुसारम् अनुसन्धानेन एवं प्रमाणितं यत् पूर्णचन्द्रकिरणेन सह अपराधस्य सम्बन्धो विद्यते। पूर्णचन्द्रसमये समधिकः अपराधो भवति इति ओहिओ कण्टुकी इत्यस्य मतम्। नियुजिलाण्डदेशस्य न्यायिकमन्त्री 'अनिटि भिनि' मतानुसारम् आक्रमणात्मकदुःखदघटनानां सम्बन्धः पूर्णचन्द्रेण साकं विद्यते इति। साश्चर्यं दृश्यते यत् केचन शल्यचिकित्सकाः पूर्णचन्द्रसमये शल्यचिकित्साम् अस्त्रचिकित्सां वा न कुर्वन्ति। कारणं रक्तोपरि चन्द्रस्य प्रभाववशादधिकः रक्तक्षयः भवति। अनुसन्धानतः एवं प्रतीयते यत् अपस्माररोगेण साकं चन्द्रचक्रस्य सम्बन्धो विद्यते। एवमेव लक्ष्यते ग्रीष्ममण्डलीयस्थानेषु चन्द्रकिरणेन मासं शीघ्रं नश्यति। इण्डिज् यत्र निग्रोजनाः प्रचण्डं रौद्रतापं सहन्ते परन्तु चन्द्ररश्मितः मुखमावृतं कुर्वन्ति। ते विश्वसन्ति चन्द्रकिरणात् मुखसौन्दर्यविकृतिरपि तु चक्षुनाशाः भविष्यन्ति। "Subjective truth of man's nature" (From the art and science of raja yoga ) अनुसारं सामान्यतः वैदिकजातकः शरीरस्थषट्चक्राणां स्थिते वास्तवप्रतिच्छविमालम्। चक्रमेव निर्धारयति मनुष्यस्य शारीरिकमानसिकात्मिकरूपेण कीदृशः। ये ग्रहाः जातके अवस्थिताः मानवीयप्रकृति सूचयन्ति।

षट्चक्रसम्बन्धे बृहज्जातकटीकायां रुद्रभट्टेनोल्लिखितं यत् सूर्येण मूलाधारचक्रस्य, चन्द्रेण स्वाधिष्ठानचक्रस्य, मङ्गलेन मणिपुरचक्रस्य, बुधेनानाहतचक्रस्य, बृहस्पतिना विशुद्धचक्रस्य, शुक्रेणाज्ञाचक्रस्य, शनिना सहस्रारचक्रस्य ज्ञानं भवति। स्वामी क्रियानन्दमतानुसारं यदि जातके कश्चन ग्रहः दुर्बलः तर्हि तेन ग्रहेण सम्बन्धितः चक्रोऽपि दुर्बलः। अतः तच्चक्रं शक्तियुक्तं करणीयम्। तदर्थं ध्यानेन, रत्नधारणेन चक्रस्य जागरणं क्रियते। पुनः सुश्रुतः कथयति षट्सु ऋतुषु वर्षा-शरत्-हेमन्ताः इति दक्षिणायनः तस्मिन् चन्द्रः बलयुक्तः। ततः लवणाम्लमधुररसस्य प्रादुर्भावः। तादृश एव शिशिर-वसन्त-ग्रीष्मा इति उत्तरायणः तस्मिन् सूर्यः बलयुक्तः। ततः तिक्तकषायकटुरसस्य प्रदुर्भावः। अतः ऋत्वनुसारम् आहार-विहार सम्पादनेनैव निरामयजीवनं सम्भवति। तद्वत् ज्योतिषशास्त्रानुसारं ज्योतिः इत्युक्ते (Science of cosmic rays) महाकाशीयज्योतिर्विज्ञानम्। यजुर्वेदे उल्लिखितं यत् **ओँ अग्निर्ज्योतिः ज्योतिरग्निः स्वाहा। सूर्यज्योतिः ज्योतिसूर्यः स्वाहा।** अर्थात् ज्योतिर्हि अग्निः, ज्योतिर्हि सूर्यः, ज्योतिर्हि ब्रह्मात्मरूपेण वा प्रतिष्ठितः। शरीरस्थचतुरशीतियोनिभ्रमणवशात् पुञ्जीभूतः प्रारब्धः चेतनाभूमौ स्थित्वा व्यक्तित्वं नियति च प्रभावयति। एतादृशराशीनां विभागानुसारं मेषसिहधनवः अग्नितत्त्वसम्पन्नाः। एते आयुर्वेदानुसारं पित्ततत्त्वसम्पन्नाः भवन्ति। वृष-कन्या-मकराः पृथ्वीतत्त्वसम्पन्नाः विद्यन्ते। एते आयुर्वेदानुसारं मिश्रिततत्त्वसम्पन्नाः भवन्ति। मिथुन-तुला-कुम्भाः वायुतत्त्वसम्पन्नाः, एते आयुर्वेदानुसारं वाततत्त्वसम्पन्ना भवन्ति। कर्कट-वृश्चिक-मीनाः जलतत्त्वसम्पन्नाः, एते आयुर्वेदानुसारं कफतत्त्वसम्पन्नाः

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

भवन्ति। एतादृश एव ग्रहेषु सूर्यः पितप्रकृतिः, चन्द्रः वातप्रकृतिः, मङ्गलः पितप्रकृतिः, बुधः कफवातप्रकृतिः, बृहस्पतिः कफप्रकृतिः शुक्रः कफवातप्रकृतिः, शनिः वातप्रकृतिः, राहुकेतू च वातप्रकृती भवतः। एवं पञ्चमहाभूतीयशरीरं भौमादिपञ्चग्रहा अपि क्रमानुसारम् अग्निः, भूमिः, आकाशं, जलं, वायुः इत्येषां प्रतीकात्मकाः भवन्ति। उक्तं च आचार्येण सुश्रुतेन यथा-

"विसर्गादानविक्षेपः सोमसूर्यानिला यथा।
धारयन्ति जगद्देहं कफपित्तानिलास्तथा॥"

यादृशः चन्द्रसूर्यौ वायुत्यागविक्षेपेन च जगद्धारयतः। तद्रीत्या वातपितकफादयः शरीरं धारयन्ति। पुनः शारीरिकसत्तानुसारं सूर्यः अस्थिः, चन्द्रः रक्तः, मङ्गलः मज्जा, बुधः त्वक् , बृहस्पतिः मेदः, शुक्रः वीर्यः, शनिः स्नायुतत्वसम्पन्नः भवति। भैषज्यरत्नावल्यां गोविन्ददासेन आच यथाक्ष्यते यथा -

"ग्रहेषु प्रतिकुलेषु नानुकूलं हि भेषजम्।
ते भेषजानां वीर्याणि हरन्ति बलवन्त्यपि॥
प्रतिकृत्य ग्रहानादौ पश्चात्कुर्याच्चिकित्सितम्।"[8]

यदा समुचितौषधप्रयोगेऽपि रोगाः न विनश्यन्ति तदा प्राग्ग्रहशान्तिविधानम् अनन्तरमौषधप्रयोगः करणीयः। डा. परेश चन्द्र पाल (एम्.वि.इ.एच.) महोदयस्य 'धन्वन्तरी' इति पुस्तके ग्रहजन्यस्वतन्त्रौषधप्रयोगविषयः वर्णितः। ज्योतिषाचार्यैः ग्रहानुसारं विचारणीया विषया निर्धारिताः। यथा-

**सूर्यः** – आविष्कारकः, पुरातत्त्ववेत्ता, प्रभुता, ऐश्वर्यं, प्रेम, उदारता, महत्त्वाकाङ्क्षा, आत्मविश्वासः, आत्मनियन्त्रणम्, हृदयः, रक्तप्रवाहः, नेत्रम्, कर्णः, इत्येतेषां प्रतिनिधित्वं करोति।

**चन्द्रः** – मत्स- जल- तरलपदार्थ – दासी – आन्तरिकेच्छा - उद्दामता – सम्वेदनायुक्त - पाचनशक्ति – अन्त्र – स्तन –गर्भाशय – योनिस्थान - नेत्र – गुप्ताङ्ग – इत्यादीनां सूचनां प्रददाति।

**मङ्गलः** – सैन्यः, वैद्यः, रसायनः, गृहनिर्माणं, यन्त्रकार्यं, मस्तकं, नासिका, कपोलः, संक्रामकरोगः, क्षतः, अस्त्रचिकित्सा, रक्तदोषादीनां प्रतिनिधित्वं करोति।

**बुधः** – शिक्षणसंस्थान – वैज्ञानिक – साहित्यिक – सम्पादक – लेखक – प्रकाशक – वाणिज्य – बोधशक्ति – स्मरणशक्ति – सूक्ष्मकलोत्पादिकाशक्ति – तर्कशक्ति – मस्तिष्क – स्नायु – जिह्वा – वाणी – हस्तादीनां विषयं सूचयति।

**बृहस्पतिः** – वाणिज्य - धर्म – मन्दिर- न्यायालय – न्यायाधीश – शिक्षासंस्थान - विश्वविद्यालय – उत्सव – उदारता – सौन्दर्यप्रेम – भक्ति – बुद्धि – ज्योतिष – तन्त्र – मन्त्र – विचारशक्ति – पाद – जङ्घ – पाचनक्रिया – रक्त – स्नायु – यकृत् – वृक्कक्रियाशीलता – मेद – इत्यादीनां प्रतिनिधित्वं विदधाति।

**शुक्रः** – आभूषण – नृत्य – गीत – वाद्य – कलात्मकवस्तु – सौन्दर्यज्ञान - स्वच्छता – कार्यक्षमता – ग्रीवा – आकृति – वर्ण –केश – लिगादीन् संसूचयति।

**शनिः** – कृषक- पत्रवाहक – मठाधीश – कृपण – साधु – श्मशान – अनुर्वरा भूमि –तात्त्विकज्ञान – नायकत्व – मननशीलता – कार्यपरायणता – आत्मसंयम – धैर्य – दृढता – चरित्रशुद्धि – सतर्कता - अस्थि – निम्नदन्त – बृहदन्त्र – मांसपेशी इत्यादीनां प्रकाशको भवति। तादृश एव कालपुरुषाणामङ्गानां परिकल्पना सारावल्यां मेषादिराशिक्रमेण एवं परिकल्पितं वर्तते यथा –

"शीर्षास्यबाहू हृदयजठरं
कटिवस्तिमेहानोरुयुग्मम्।
जानू जंघे चरणौ कालस्याङ्गानि राशयोऽजाद्या ॥"[9]

**उपसंहारः**- निष्कर्षतया एवं वक्तुं शक्यते यत् ग्रहाणां प्रभावः मानवजीवनयात्रायां निःसन्देहः। जन्मकालीकग्रहरश्मीनां कम्पनस्य तीव्रता

[8] भैषज्य रत्नावली – गोविन्द दास।

[9] सारावली पृ – ४, अ – ३, श्लोक – ५, कल्याणवर्मा

मानवशिशोः अन्तःकरणीयशक्तीनां संस्थापकत्वेन मानसिक- आध्यात्मिक – नैतिक – शारीरिकलक्षणं निर्धारयति। जन्मन आरभ्य मरणं यावत् ज्योतिषशास्त्र सिद्धान्तानुसारं बहूनि तथ्यानि विनिर्दिष्टानि विद्यन्ते। यत्र सूर्यचन्द्रमसोः प्रभावः प्रतिपदं विलसतीति। अस्माकं जीवनस्य आत्मकारकत्वात् सूर्यस्य प्रभुत्वमङ्गीकृतम्। तथैव मनसः कारकत्वात् चन्द्रमसः गुरुत्वं ज्योतिर्विद्भिः विनिश्चितम्। अस्माकं वैदिकज्योतिर्विज्ञाने महर्षिपराशर-जैमिनि-वराहमिहिरप्रभृतीनां सिद्धान्त एव 'भ' चक्रफलाफलयोः प्रमुखसाधनं मन्यते।

तस्मात् कलाकाष्ठादिरूपेण जीवनस्य घटनासकलं निर्वहताम्। ग्रहाणां प्रभावः प्रामाणिकः प्रत्यक्षायमाणः इति अवधार्यते। तस्मात् कपोलकल्पितशास्त्रान्तरेषु प्रत्यक्ष-प्रमाणभूतं फलप्रदं ज्योतिषशास्त्रं जीवनस्य भूतभविष्यवर्तमानज्ञानाय मूलाधाररूपेण राराजते।

## सहायकग्रन्थसूची


- बृहत्पाराशरहोराशास्त्रम्, महर्षिपराशरः,रंजन पब्लिकेशनन्स, १६ अंसारीरोड, नई दिल्ली- ११०००२
- सारावली, कल्याणवर्मा, मोतीलाल बनारसीदास, व्याः डॉ. मुरलीधर चतुर्वेदी
- भारतीय ज्योतिष, डॉ. नेमिचन्द्र शास्त्री, भारतीय ज्ञानपीठ, १८ इन्स्ट्युशनल एरिया, लोदी रोड, नयी दिल्ली- ११००३
- मुहूर्त्तचिन्तामणिः, श्री रामदैवज्ञः, व्या व्याः डॉं सुरेश चन्द्र मिश्र, रंजन पब्लिकेशन्स १६, अंसारी रोड़, दरियागंज, नयी दिल्ली- ११०००२
- सूर्यसिद्धान्तः, व्याः रामचन्द्र पाण्डेयः, चौखम्बा सुरभारती प्रकाशन, वारणासी
- ज्योतिःसार-रत्नावली, पण्डित वाइकोलि महापात्र, राधाकृष्ण पुस्तकालय, सत्यनारायण मन्दिर रोड, ब्रह्मपुर, गंजाम
- Curious Meerkat www.curiousmeerkat.co.uk, Google site

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# आयुर्वेददृष्ट्या जीवनस्य संक्षिप्तवर्णनम्

**सुशान्त-मण्डलः**
**शोधच्छात्रः, केन्द्रीयसंस्कृतविश्वविद्यालयः**
**दिल्ली**

---

**प्रबन्धसारः** -

*आयुर्वेदः सहस्रवर्षेभ्यः अस्मान् स्वस्थजीवनस्य मार्गं दर्शयति। प्राचीनभारते आयुर्वेदः रोगचिकित्सायाः, स्वस्थजीवनशैल्याः च उत्तममार्गेषु अन्यतमः इति मन्यते स्म। सुस्वास्थ्यस्य निर्वाहस्य महत्त्वात् वयम् आधुनिकजगति अपि आयुर्वेदस्य सिद्धान्तानाम् अवधारणानां च उपयोगं न त्यक्तवन्तः – एतत् आयुर्वेदस्य महत्त्वम् अस्ति। आयुर्वेदः पञ्चसहस्रवर्षीया चिकित्साव्यवस्था अस्ति, या अस्माकं आधुनिकजीवनशैल्याः सम्यक् दिशां दातुं स्वास्थ्याय लाभप्रदानाम् आचाराणां विकासे च सहायिका भवति। अस्मिन् दैनन्दिनजीवने प्रयुक्ताः उत्पादाः, औषधाः, पदार्थाः च ओषधीभ्यः अन्येभ्यः प्राकृतिकवस्तुभ्यः च निर्मीयन्ते। तेषाम् उपयोगेन जीवनं सुखदं, रोगमुक्तं च भवति। विगतपञ्चसप्ततिवर्षेभ्यः 'केरल आयुर्वेदः' आयुर्वेदाधारितानि उत्पादनानि प्रदातुं जनानां जीवनं सुलभं कर्तुम् अपि कार्यं कुर्वन् अस्ति। संस्थायाः एकः जालपुटः अपि अस्ति यत्र प्राकृतिकपदार्थेभ्यः निर्मिता उत्पादाः सुलभतया अन्वेष्टुं शक्यन्ते। विश्वस्वास्थ्यसंस्थया १९७६-तमे वर्षे आयुर्वेदस्य मान्यता अपि प्रदत्ता अस्ति। एषा चिकित्सापद्धतिः रोगेषु कार्यं करोति, त्वचां केशस्य च स्वस्थतां विदधाति। मानवानां शरीरस्य मनसः च औन्नत्यं सम्पादयति। आयुर्वेदस्य अर्थः केवलं जपः, योगः, घर्षणं वा तैलेन मर्दनं वा न, अपितु आयुर्वेदस्य महत्त्वम् अस्मात् बहु व्यापकम् अस्ति। आयुर्वेदे कस्यापि स्वास्थ्यसमस्यायाः मूलकारणं ज्ञात्वा तस्याः निराकरणाय कार्यं क्रियते। एतदेव कारणं यत् भारतं विहाय अद्य आयुर्वेदस्य सर्वत्र विश्वे अतीव उच्चं स्थानं दत्तम् अस्ति।*

**कुञ्चीशब्दाः**- दैनन्दिनजीवनम्, सामाजिकजीवनम्, धार्मिकजीवनम्, चरकसंहिता, आयुर्वेदः चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

**प्रस्तावना**

आयुः वेदयति अर्थात् बोधयति प्रापयति च इति आयुर्वेदः इत्येषा आयुर्वेदशब्दस्य व्युत्पत्तिः। तत्र विद ज्ञाने, विद सत्तायां, विद्लृ लाभे इति एतेभ्यः अपि धातुभ्यः वेदशब्दः निष्पद्यते, तथा च 'आयुषः वेदः' इति आयुर्वेदशब्दस्य विग्रहः भवति। तस्मात् 'आयुर्वेदः' इति कथनेन तादृशस्य शास्त्रस्य बोधः भवति, यत् शास्त्रम् आयुषः विषये बोधयति, यस्मिन् शास्त्रे आयुषः वर्णनम् अस्ति तथा च यस्य शास्त्रस्य ज्ञानेन तदनुगुणम् आचरणेन च आयुषः लाभः भवति इति। चरकसंहितायाम् आयुर्वेदस्य परिभाषा उक्ता वर्तते यत्-

हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्।
मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते॥ इति

अर्थात् यस्मिन् शास्त्रे हितस्य अहितस्य सुखदायकस्य दुःखदायकस्य च जीवनस्य विषये तथैव जीवनस्य कृते हितस्य अहितस्य च आचरणस्य विषये पुनश्च आयुषः प्रमाणस्य विषये वर्णनं लभ्यते, तदेव आयुर्वेदशास्त्रम् उच्यते।

आयुः इत्यस्य पर्यायः जीवनम् इत्यपि भवति। अतः 'आयुर्वेदशास्त्रम्' इत्यस्य 'जीवनसम्बद्धं शास्त्रम्' इति अर्थः ज्ञातव्यः।

आयुर्वेदशास्त्रे विभिन्नरूपेण एषः एव विषयः उपदिष्टः वर्तते यत् अस्माकं जीवनं कथं सुव्यवस्थितं सामाजिकं तथा च लोककल्याणकारि भवेत्। सर्वेषां कार्याणाम् आधारभूतम् अस्माकं स्वस्थ-शरीरम् एव इति अत्र कापि विप्रतिपत्तिः नास्ति, अतः आदौ अस्माभिः स्वस्य शरीरस्य रक्षा करणीया। आयुर्वेदस्य उत्पत्तौ अपि एतदेव कारणं महर्षिभिः प्रतिपादितं यत् जनाः स्वस्थाः भवेयुः।

चरकसंहितायां वर्णनं प्राप्यते यत् पुरा सर्वे अपि मानवाः स्वस्य धर्मादिकार्यं निर्विघ्नतया कुर्वन्ति स्म। परन्तु तस्मिन् समये विघ्नरूपाः रोगाः उत्पन्नाः अभवन्। ते रोगाः

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

मानावानां कार्येषु विघ्नम् उत्पादयन्ति स्म, अतः तेषां नाशनार्थम् एव महर्षिभिः आयुर्वेदशास्त्रम् आविष्कृतम्।

अधुना अपि दृश्यते यत् केनचित् कारणेन जाताः रोगाः मनुष्यस्य सम्पूर्णां जीवनशैलीं परिवर्तयन्ति इत्यतः कथं रोगाः न भवेयुः? कथम् अस्माकं जीवनं स्वस्थं तिष्ठेत्? इत्यस्मिन विषये आयुर्वेदशास्त्रे विस्तरेण उपदेशः कृतः अस्ति।

अस्माभिः प्रतिक्षणं क्रियमाणानि कृत्यानि अस्माकं जीवनं प्रभावयन्ति। अतः आयुर्वेदशास्त्रस्य सम्बन्धः अस्माकं जीवनस्य प्रतिक्षणेन प्रतिकार्येण च सह भवत्येव। आयुर्वेदशास्त्रे प्रत्यक्षरूपेण अप्रत्यक्षरूपेण वा जीवनस्य प्रत्येकं क्षणस्य विवेचनं कृतम् अस्ति। अस्माकं जीवनस्य विषये आयुर्वेदशास्त्रे कथं वर्णनं लभ्यते, अस्माकं जीवने आयुर्वेदस्य उपदेशाः कथम् उपयोगिनः सन्ति इति अत्र सङ्क्षेपेण प्रदीयते।

**आयुर्वेदशास्त्रदृष्ट्या दैनन्दिनजीवनम्**

अस्माकं स्वस्थजीवनस्य कृते प्रमुखरूपेण इदम् आवश्यकं यत् अस्माकं दिनचर्या सम्यक् भवेत्। आयुर्वेदशास्त्रे दिनचर्यायाः विषये विशेषरूपेण बलं प्रदत्तं वर्तते। प्रातः उत्थानात् आरभ्य रात्रिशयनपर्यन्तं किं कदा करणीयम्? शरीरस्य शुद्ध्यर्थं शौच-दन्तधावनादिकार्यं, पुष्ट्यर्थम् अभ्यङ्गादिकार्यं, कान्तिवर्धनार्थं स्नान-अनुलेपनादिकं, वस्त्रधारणं भोजनम् इत्यादिकं च कथं करणीयं, तेन प्रत्येकं कर्मणा कः लाभः इति आयुर्वेदशास्त्रे विस्तरेण वर्णितं वर्तते। आयुर्वेदस्य प्रमुखः सिद्धान्तः दोष-धातु-मलानाम् उपरि आधारितः अस्ति। एते दोष-धातु-मलाः शरीरस्य आधारभूताः भवन्ति। एते देश-काल-परिस्थित्यनुसारम् अस्माकं जीवनशैलीम् अनुसृत्य अल्पाः अधिकाः समाः वा भवन्ति। अस्माकं शरीरे दोष-धातु-मलानां वृद्धिक्षयप्रक्रिया निरन्तरं प्रचलति। दोषादीनां साम्यावस्थायाः रक्षणार्थं किं करणीयम् इति आयुर्वेदशास्त्रस्य प्रमुखः विषयः अस्ति। उदाहरणार्थं शीतकाले शीते प्रदेशे च अस्माभिः शैत्यम् अनुभूयते, कफः तु शीतलः भवति। अतः अनुकूलं संयोगं प्राप्य कफः वर्धते, अतः कफस्य शमनार्थं तस्मिन् शीतकाले शीतप्रदेशे च उष्णपदार्थानाम् उपयोग: करणीयः। अनेन प्रकारेण देश-काल-परिस्थित्यनुगुणम् आहारः व्यवहारः च करणीयः इति आयुर्वेदशास्त्रे उपदिष्टं वर्तते।

यद्यपि आयुर्वेदशास्त्रे दैनन्दिनजीवनस्य सम्पूर्णवर्णनं कृतं तथापि 'आहारः निद्रा ब्रह्मचर्यम्' इति एतेषां जीवनस्य त्रयाणाम् उपस्तम्भानां विषये विशेषवर्णनं कृतं वर्तते। तत्रापि आहारस्य निद्रायाः च आवश्यकता विशेषतया प्रतिपादिता अस्ति।

निद्रायः विषये तु उक्तं वर्तते यत् अस्माकं जीवनं निद्रायाः अधीनम् एव अस्ति। उचितनिद्रया यत्र सुखमयं स्वस्थजीवनं तिष्ठति, तत्रैव अनुचितनिद्रया दुः खकरं जीवनं भवति।

एवम् आयुर्वेदशास्त्रे अस्माकं दिनचर्या कथं भवेत्, उचितायाः दिनचर्यायाः किं फलम् तथैव अनुचित-दिनचर्यायाः कः दुष्परिणामः इति विशदितं वर्तते। अस्माकं स्वस्थजीवनस्य कृते दिनचर्यायाः पालनम् आवश्यकं भवति, तत्र उचितस्य आहारस्य सेवनम् उचितकाले निद्रा तथा च ब्रह्मचर्यस्य रक्षणम् इति एते महत्त्वपूर्णाः अंशाः सर्वदा स्मर्तव्याः भवन्ति।

**आयुर्वेदशास्त्रदृष्ट्या सामाजिकजीवनम्**

अस्माकं जीवने समाजस्य अपि प्रभावः निश्चयेन भवति। समाजस्य, समाजे अस्माकं व्यवहारस्य च आधारेण स्वस्थम् अस्वस्थं च जीवनं भवति। आयुर्वेदशास्त्रे केवलं शारीरिकस्य स्वास्थ्यस्य एव न, अपि तु सामाजिकस्य स्वास्थ्यस्य विषये अपि वर्णनं कृतम् अस्ति। समाजस्य अनुकूलतायाः प्रतिकूलतायाः च आधारेण कदाचित् अस्माकं मनसि कामः क्रोधः लोभः मोहः मदः इत्यादयः विकाराः जायन्ते, ते विकाराः अस्माकं शरीरस्य दोष-धातु-मलान् प्रभावयन्ति। अतः अस्माभिः सर्वदा उत्तमस्य समाजस्य निर्माणं करणीयम्, अस्माभिः उत्तमे समाजे एव भवितव्यं, तथैव समाजे काम-क्रोधादिभिः रहितम् उत्तमम् आचरणं करणीयम् इति आयुर्वेदशास्त्रे उपदिष्टं वर्तते। उदाहरणत्वेन उच्यते-

नित्यं हिताहारविहारसेवी समीक्ष्यकारी विषयेष्वसक्तः।
दाता समः सत्यपरः क्षमावानाप्तोपसेवी च भवत्यरोगः॥
(अ.हृ. सू.-४/३६)

अत्र आचार्यः वाग्भटः उपदिशति यत्- यः जनः हितकरस्य आहारस्य सेवनं करोति, किं कार्यं सम्यक् किञ्च

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

असम्यक् इति विचार्य कार्यं करोति, इन्द्रियविषयेषु आसक्तः न भवति, अपेक्षितजनानां कृते दानं करोति, सत्यं वदति, क्षमाशीलः भवति तथा च श्रेष्ठजनानाम् उपदेशस्य श्रवणं पालनं च करोति, सः रोगैः पीडितः न भवति इति।

आयुर्वेदशास्त्रे हिसादीनि दश पापकर्माणि परिगणितानि सन्ति, एतेषां पापकर्मणां त्यागः करणीयः। तद्यथा-

हिसास्तेयान्यथाकामं पैशुन्यं परुषानृते।
सम्भिन्नालापं व्यापादमभिद्यां दृग्विपर्ययम्।
पापं कर्मेति दशधा कायवाङ्मानसैस्त्यजेत्॥
(अ.हृ.सू.-२/२१-२२)

एतेषु हिसा चौर्यं परस्त्रीसङ्गः इति एतानि त्रीणि शरीरेण आचर्यन्ते अतः शारीरिकाणि पापकर्माणि, पैशुन्यं (परदोषकथनं) कठोरवचनम्, अनृतवचनम्, असम्बद्ध-प्रलापः इति एतानि चत्वारि वाचिक-पापकर्माणि, परघातचिन्तनम् असहिष्णुता शास्त्रेभ्यः विपरीतबुद्धिः इति एतानि त्रीणि मानसिकपापकर्माणि भवन्ति। एवम् एतानि दश पापकर्माणि त्यज्यानि भवन्ति।

समाजे विभिन्नजनानाम् अपेक्षाः भिन्नाः भवन्ति। अतः यः समाजे सर्वान् तोषयितुम् इच्छति, तेन जनानाम् अपेक्षानुगुणं कार्यं करणीयं, तेन सामाजिकः क्लेशः न भवति इति।

अस्माकं सामाजिकजीवने समाजः एव शिक्षकः भवति, अतः समाजे कि प्रचलति किमर्थं प्रचलति इति सर्वं विचार्य ततः एव बोधः प्राप्तव्यः, तदनुरूपम् आचरणं करणीयम् इति आयुर्वेदशास्त्रे देश-काल-परिस्थित्यनुसारं सामाजिकजीवनस्य कृते उपदेशः कृतः अस्ति।

एवम् आयुर्वेदशास्त्रे सामाजिकजीवनस्य अस्माकं जीवने सामाजिकप्रभावस्य च वर्णनं कृतं विद्यते। यदि अस्माकं समाजः उत्तमः भवति, समाजे अस्माकं व्यवहारः उत्तमः भवति, तर्हि अस्माकं शारीरिकं मानसिकं च स्वास्थ्यं सम्यक् भवति, सामाजिकक्लेशः न भवति।

**आयुर्वेदशास्त्रदृष्ट्या धार्मिकजीवनम्**

आयुर्वेदशास्त्रे धर्मशब्दस्य भावः मानवमात्रेण करणीयम् उत्तमम् आचरणम् इति स्वीकृतः अस्ति। धर्मशब्दस्य वास्तविकः अर्थः एष एव।

लोके सर्वे अपि जनाः सुखम् एव इच्छन्ति, सुखकरं जीवनम् आयुर्वेदशास्त्रे अपि उद्दिष्टं वर्तते। तस्मात् सुखस्य मूलं धर्मिकजीवनम् आयुर्वेदस्य उपदेशः भवति। आयुर्वेदशास्त्रे उपदिष्टं वर्तते यत् जनाः सर्वाणि स्वकार्याणि सुख-प्राप्तये एव कुर्वन्ति, परन्तु धर्मेण विना सुखं न भवितुम् अर्हति। अतः सर्वैः धर्मसम्मतम् आचरणं करणीयम् इति।

सर्वस्मिन् कार्ये मध्यममार्गस्य अनुसरणम् इति आयुर्वेदस्य महत्त्वपूर्णः विषयः अस्ति। यत् कार्यं क्रियते तदेव सर्वदा करणीयम्, अथवा यत् कर्तव्यम् इति उक्तं तदेव सर्वदा करणीयम् अथवा यत् न कर्तव्यम् इति उक्तं तत् सर्वदा अकरणीयम् एव इति न चिन्तनीयम्। कदाचित् आवश्यकतायां सत्याम् अकर्तव्यम् अपि कर्तव्यं भवति, कर्तव्यम् अपि अकर्तव्यं भवति। उदाहरणरूपेण उच्यते-सत्यं वक्तव्यम् इति धर्मशास्त्रेषु तथैव आयुर्वेदशास्त्रे उपदिष्टं वर्तते। परन्तु यदि सत्यवचनेन जीवहिसादयः पापाः भवेयुः तर्हि तस्मिन् समये सत्यवचनं पापाय असत्यवचनं पुण्याय भवति।

आयुर्वेदशास्त्रे प्रज्ञापराधस्य त्यागः सद्वृत्तस्य आचरणम् इति प्रमुखरूपेण उपदिष्टं वर्तते। आयुर्वेदशास्त्रस्य अनुसारं यदि अस्माकं जीवनं दुःखमयं भवति, तर्हि तत्र प्रमुखं कारणं प्रज्ञापराधः एव। कश्चन बुद्धिहीनः धैर्यहीनः स्मृतिहीनः वा जनः यत् अपराधकार्यं करोति, सः एव प्रज्ञापराधः इति उच्यते। प्रज्ञापराधः शारीरिकाणां मानसिकानां च सर्वेषां दोषाणां प्रकोपणं करोति। अतः सर्वथा प्रज्ञापराधस्य त्यागः करणीयः। सर्वेषाम् अपि दुःखानां कारणं प्रज्ञापराधकारणात् अस्माभिः कृतम् अशुभकर्म एव भवति। अतः सुख-दुःखयोः कारणम् अस्माभिः आचरितं शुभाशुभकर्म एव इति आयुर्वेदशास्त्रे वर्णितं विद्यते।

मानवैः प्रज्ञापराधात् कृतः अधर्मः तादृशः दोषः अस्ति, येन सम्पूर्णस्य नगरस्य देशस्य वा नाशः भवितुम् अर्हति इति एवं चरकसंहितायां वर्णनं लभ्यते। अतः प्रज्ञापराधस्य त्यागः तथा च सद्वृत्तस्य आचरणं करणीयम्।

**आयुर्वेदशास्त्रदृष्ट्या आध्यात्मिकजीवनम्** -

आत्मानम् अधिकृत्य भवम् आध्यात्मिकम्। अस्मिन् संसारे आत्मनः स्थितिः कीदृशी अस्ति? अहं कः? अस्मिन्

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

लोके मम कार्यं किम्? अहं किमर्थं जीवामि? मम देशः कीदृशः अस्ति? इदानीन्तनः मम कालः कीदृशः अस्ति? इत्यादिकम् आत्मविषयकं यत् चिन्तनं क्रियते, आत्मनः उन्नतये यत् कार्यं सावधानतया क्रियते, तदेव आध्यात्मिकजीवनम्। आयुर्वेदशास्त्रे आध्यात्मिकस्य जीवनस्य विषये वर्णनं लभ्यते। तत्र उपदिष्टं वर्तते यत् प्रतिदिनम् आत्मनः विषये चिन्तनं करणीयम् इति। यथा उच्यते अष्टाङ्गहृदये-

नक्तंदिनानि मे यान्ति कथम्भूतस्य सम्प्रति।
दुःखभाङ्न भवत्येवं नित्यं सन्निहितस्मृतिः॥
(अ.हृ.सू.-२/४७)

अर्थात् अधुना मम दिनरात्रिः कथं गच्छति, मया किं क्रियते, अहं किम् उत्तमकार्यम् अथवा अनुत्तमकार्यं कुर्वन्नस्मि इति चिन्तनीयम्। यदि अनुत्तमं कार्यं क्रियमाणम् अस्मि तर्हि तस्य त्यागः करणीयः इत्यादिकम् अपि प्रतिदिनं चिन्तनीयम्। यः एवं प्रतिदिनं विचार्य कर्म करोति सः दुःखी न भवति।

आयुर्वेदशास्त्रे न केवलम् अस्मिन् जन्मनि अपि तु अग्रिम-जन्मनि अपि स्वस्थं सुखकरं जीवनं भवेत् इति दृष्ट्या उपदेशः कृतः अस्ति। चरकसंहितायाः तिस्त्रैषणीयाध्याये वर्णनं कृतम् अस्ति यत्, यथा अस्मिन् जन्मनि स्वस्थस्य जीवनस्य धनस्य च आवश्यकता भवति अतः तस्मिन् विषये प्रयत्नः करणीयः, तथैव मरणानन्तरम् अग्रिमजन्मनि कथं जीवनं भवेत् इत्यस्मिन् विषये अपि चिन्ता करणीया इति।

## सहायकग्रन्थसूची


- चरकः, चरकसंहिता, चौखम्बा सुरभारती प्रकाशन, वाराणसी- २०११
- वाग्भटः, अष्टाङ्गहृदयम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी- २०१७
- आयुर्वेदीया जीवनपद्धतिः, संस्कृतसंवर्धनप्रतिष्ठान, दिल्ली -२०२०

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# महाकविभासरूपकेषु आश्रमवर्णनम्

**विनयकुमार-वरः**
**शोधच्छात्रः, साहित्यविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः**
**नई दिल्ली, भोपालपरिसरः, भोपालम्**

**प्रबन्धसारः** -

*तपोभूमिः भारतवर्षम्। देवा अपि तपश्चरणाय भारतभूमिमवतरन्ति। अतः भारतं देवभूमिः कथ्यते। 'महाजनो येन गतः स पन्थाः' इति सुवचनानुसारं मानवा अपि अत्र धर्मार्थकाममोक्षात्मकचतुर्वर्गप्राप्तये तपः आचरन्ति। तपसि भगवदाराधनं मुख्यम्। तत्रापि मनसः एकाग्रता आवश्यकी। तदनुकूलपरिवेशः आवश्यकः। तदर्थमाश्रमः एव उपयुक्तस्थानमिति समेषां विश्वासः। अतः भारतवर्षे प्रकृतिमातुः क्रोडे आश्रमाः निर्मीयन्ते स्म। इमे वनस्थल्यां विशेषतः दृश्यन्ते। एतत्प्रमाणयितुं शोधपत्ते प्रथितयशसः नाट्यकारस्य भासस्य नाटकचक्रं समाश्रितम्।*

**कुञ्चीशब्दाः** – आश्रमः, आश्रममहत्त्वम्, भासः, स्वप्नवासवदत्तम्, प्रतिमानाटकम् चेत्यादयः।

**उपक्रमः**

'भासो हासः कविकुलगुरुः कालिदासो विलासः'
(प्रसन्नराघवम्)

सदा शान्तिमिच्छति जीवः। अशान्तौ तस्य जीवनं दुर्विषहं भवति। अतः शान्तिकामनायै विविधान् मार्गान् अवलम्बते। कदाचित् उत्सवं पालयति, धर्मं कुरुते, दानं ददाति, देवपूजां यज्ञादिकं च सम्पादयति। विद्यमानेषु बहुष्वपि उपायेषु शान्त्यर्थं स्थाननिर्धारणमपि महत्त्वपूर्णम्। तदर्थं धीराः गृहं ग्रामं नगरादिकं च त्यक्त्वा मन्दिराश्रमं च आश्रयन्ते। आश्रमे शान्तिः आसाद्यते नूनमिति प्रत्ययः सामान्यतः समेषामस्ति। इत्थम् आश्रमस्य उपकारिता सिद्ध्यति। आश्रमस्य स्वरूपं किम्? तस्य कि महत्त्वम् इत्यादिविषयाः प्रथमं ज्ञातव्याः।

**आश्रमशब्दस्य व्युत्पत्तिः**

आङ् इति उपसर्गपूर्वकात् श्रमु तपसि (दिवा०, पर०, से० ) इत्यस्मात् धातोः आधारार्थे घञ्-प्रत्यते कृते (आश्रम + घञ्) आश्रमशब्दः निष्पद्यते। श्रमु इति धातुः तपश्चर्याकरणार्थे तथा इन्द्रियदमनार्थे भवति। अस्य व्युत्पत्तिस्तु बहुधा भवति। शब्दकल्पद्रुमे उक्तमस्ति - आश्रम्यन्ति स्वं स्वं तपश्चरन्ति इति आश्रमः[1]। शास्त्रोक्तधर्मविशेष आश्रम इति परिभाषापि दत्ता।

**आश्रमपरिभाषा**

वाचस्पत्येऽपि आश्रमस्य लक्षणमित्थं कृतमस्ति। तद्यथा भ्रमतां संसारवासिनां विश्रामस्थानत्वात् आश्रम इति कथ्यते। एतेन कर्म कुर्वन् यदा कष्टं लभते जनः तदा आश्रमस्थः सन् शान्तिमाप्नोतीत्यर्थः प्रतीयते। अपि च तत्रैव उद्धृतमस्ति-

विनाऽऽश्रमं न तिष्ठेत्तु दिनमेकमपि द्विजः।
आश्रमेण विना तिष्ठन् प्रायश्चित्तीयते द्विजः॥[2]

अत्र द्विजपदस्योपलक्षणपरता। तेन क्षत्रियादीनाम् अपि ग्रहणम्। अमरकोषे आश्रम्यन्ति अत्र, आश्रम्यते वा अनेन इति आश्रमः प्रोक्तः। तत्रापि उल्लिखितमस्ति "आश्रमन्तात् श्रमः अत्र स्वधर्मसाधनक्लेशात् "[3]। एतस्मात् ज्ञायते प्राणी यदा स्वकर्तव्यं कुर्वन् क्लेशमाप्नोति तदा आश्रमे तिष्ठन् श्रमलाघवं करोति।

**आश्रममहत्त्वम्** -

जीवनस्य सर्वाङ्गीणविकासः समेषां परमं लक्ष्यम्। तदर्थमसौ कर्म कुरुते। तच्च कर्म सन्मार्गयुतं भवेत्। तदपि वयःक्रमेण स्यात्। अतः मन्वादिभिः आश्रमव्यवस्था

[1] शब्दकल्पद्रुमः, पृ. १९५
[2] वाचस्पत्यम् , पृ. ८३९
[3] अमरकोषः, पृ. २५२

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

कृता। यः तेन मार्गेण गच्छति सः सुखी निरामयश्च भवतीति तन्मतम्। वयसः अनुगुणं यतः आश्रमाः प्रकल्पिताः, अतः तेन कर्ममार्गः सरलीकृतः। यस्यां दशायां यथा कर्म कर्तुं शक्नोति प्राणी तदनुसारं कर्ममार्गः निर्धारितः। यथा यौवने विवाहः न वार्धक्ये, तदा तु मुनिवृत्तिः। महाकविः कालिदासोऽपि रघुवंशे वसिष्ठमुखेन ब्रूते -

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
वार्द्धक्ये मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥[4] इति

एतदाधारेण जीवनं सुखमयं भवेदिति वक्तुं शक्यम्। अतः आर्षवचनं परिपालयन् मानवः तथा आचरेद्यदि तर्हि "सर्वे भवन्तु सुखिनः..." इतीदं सुवचनं सदा सर्वत्र दृश्येत। अतः आश्रमव्यवस्था अस्माकं संस्कृतौ विशिष्टाऽस्ति।

उपर्युक्तकथनात् संस्कृतसाहित्यं भारतीयसंस्कृतेः प्रख्यापने आत्मानं नियोजयतीति वक्तव्यं भवति। तत्र नाट्यसाहित्यमपि दर्शकानां मनोरञ्जनेन सह संस्कृतेः परिचयं कारयति। प्रसङ्गक्रमेणात्र नाट्यकारभासकृतिषु आश्रमवर्णनं कथमस्तीति अत्र परिशीलयामः। यद्यपि बहुविधविषयाः नाटकेऽस्मिन् कविना उपन्यस्ताः तथापि तेषु मुख्यः आश्रमप्रसङ्गः एवात्र उपस्थाप्यते।

विदन्ति एव विपश्चितः यत् महाकवेः कालिदासस्य पूर्ववर्त्ती कविः प्रथितयशाः नाट्यकारः भास एव। यतः स्वयं कालिदासः मालविकाग्निमित्रनाटके तथा निर्दिष्टवान्। तत्र प्रथमाङ्के पारिपार्श्विकः सूत्रधारं वदति – "प्रथितयशसां भाससौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य वर्त्तमानकवेः कालिदासस्य क्रियायां कथं बहुमानः?"[5] इत्थमत्र कथनेन कालिदासात् पूर्ववर्त्तिनः भास-सौमिल्ल-कविपुत्रादयः त्रयः प्रसिद्धाः आसन्निति ज्ञायते। परमद्यत्वे केवलं भासस्य ग्रन्थाः समुपलभ्यन्ते न अपरयोः सौमिल्लकविपुत्रयोः। अतः कालिदासस्य पूर्ववर्ती भासः आसीत्।

भासेन त्रयोदशनाटकानि रचितानि सन्तीति सर्वैः सुविदितमेव। विशेषतः १९१२-खीष्टाब्दे महामहोपाध्यायः पण्डितः गणपतिशास्त्री भासस्य कृतिः त्रयोदश इति प्रमाणपुरःसरमुक्तवान्। सर्वाणि तानि दृश्यकाव्यान्तर्गतानि। तेषां नामानि यथा-

१. प्रतिज्ञायौगन्धरायणम्, २. अविमारकम्, ३. स्वप्नवासवदत्तम्, ४. प्रतिमानाटकम्, ५. अभिषेकनाटकम्, ६. मध्यमव्यायोगः, ७. पञ्चरात्रम्, ८. दूतवाक्यम्, ९. दूतघटोत्कचम्, १०. कर्णभारः, ११. ऊरुभङ्गः, १२. बालचरितम्, १३. चारुदत्तम् चेति।

एतेषु रूपकेषु यत्र यत्र आश्रमवर्णना उपलब्धा तदत्र ग्रन्थनाम निर्दिश्य आलोच्यते।

**प्रतिज्ञायौगन्धरायणम्**

तृतीयाङ्के आश्रमस्य वर्णना उपलभ्यते। अस्मिन् वेशपरिवर्त्तनं कुर्वन्ति वत्सराजस्य उदयनस्य प्रधानामात्यः यौगन्धरायणः, तस्य अपरः मन्त्री रुमण्वान् राज्ञः मित्रं विदूषकः च। तत्र कारणम् उज्जयिन्याः राजा प्रद्योतः (महासेनः) राजानम् उदयनं युद्धे विजित्य कारावरुद्धं कृतवान्। तस्मात् मोचयितुम् एते त्रयः वेषपरिवर्त्तनं कृत्वा उज्जयिन्यामटन्ति, विदूषकः डिण्डिकवेषेण (भिक्षायाचकरूपेण) यौगन्धरायणः उन्मत्तकवेषेण, रुमण्वान् श्रमणकवेषेण च आसन्।

स्वामिनः उदयनस्यान्वेषणम् एते पृथक् पृथक् कुर्वन्तः सन्ति। मोदकप्रसङ्गे ते एकत्रीभूताः अभवन्। तत्र शिवमन्दिरमासीत्। पार्श्वे अग्निगृहमासीत्, यत्र विप्राः यज्ञमाचरन्ति स्म। मध्याह्नकाले मिथः कथनप्रसङ्गे उन्मत्तकः अग्निगृहाभिमुखं गच्छति। एतत् सूचयति विदूषकः[6]। एतस्मात् ज्ञायते - आश्रमे यज्ञः प्रवर्त्तते। सर्वदा देवालयोऽपि भवति। अत्र भासस्य विदूषकमुखेन इत्थं वर्णनमाश्रमरूपं प्रकाशयति।

**स्वप्नवासवदत्तम्**

उदयनवासवदत्तयोः परिणयप्रसङ्गमादाय नाटकमिदं रचितमस्ति। अत्र अन्या महिषी पद्मावती। यौगन्धरायणः वासवदत्ता मृता इति मिथ्या उद्घोष्य अवन्तिकावेषेण तां पद्मावत्याः सविधे स्थापयति। पश्चात् उदयनेन स्वप्नेन सा लब्धा, अन्ते च तयोर्मिलनं जातम्। अत्र कविना प्रथमाङ्के

[4] रघुवंशमहाकाव्ये १/८

[5] मालाविकाग्निमित्रम्, प्रथमाङ्कः, पृ. ०६

[6] प्रतिज्ञायौगन्धरायणम्, तृतीयोऽङ्कः, पृ. ८६

आश्रमस्य वास्तविकं चित्रमुपन्यस्तम्। दृश्यं तपोवनस्य, तत्र विद्यते तपस्विनी। पद्मावती नरपतेः दर्शकस्य भगिनी आयाति तत्र। सैनिकैः सह छद्मवेशेन यौगन्धरायणः आवन्तिकावेषधारिणीं वासवदत्ताम् आदाय तत्रायाति। तदा सैनिकाः उत्सारणां कुर्वन्ति उच्चैः स्वरेण। तत्र यौगन्धरायणः आक्षिपति व्यवहारमिमम्। उक्तं यत् -

धीरस्याश्रमसंश्रितस्य वसतस्तुष्टस्य वन्यैः फलै-
र्मानार्हस्य जनस्य वल्कलवतस्त्रासः समुत्पाद्यते।
उत्सिक्तो विनयादपेतपुरुषो भाग्यैश्चलैर्विस्मितः
कोऽयं भो निभृतं तपोवनमिदं ग्रामीकरोत्याज्ञया॥[7]

तन्मतेन शान्तमिदम् आश्रमपदम्। अत्र धीराः जनाः वसन्ति। वन्यैः फलैः जीवन्ति। एतेषां साधूनां त्रासः केन क्रियते इति तस्य प्रश्नः। एतस्मात् ज्ञायते तपोवनं शान्तं भवति न ग्रामवत् कोलाहलपूर्णम्। इदमाश्रमलक्षणम्। तत्रापि तस्य "यो धर्मादात्मानमुत्सारयति"[8] इति कथनात् धर्मज्ञानमत्रत्यैः दीयते, धर्मात्मानश्चात्र निवसन्तीत्यर्थः व्यज्यते। अयम् आश्रमधर्मः।

आश्रमे कीदृशाः जनाः निवसन्तीति प्रसङ्गमालोचयति नाट्यकारः काञ्चुकीयमुखेन। मगधराजपुत्री पद्मावती किमपि दातुमिच्छति तपस्विभ्यः। तद्विषयं घोषयति काञ्चुकीयः[9]। तस्य कथनात् ज्ञायते आश्रमे निवसताम् ऋषीणां घटः, वासः, गुरुदक्षिणा चैते आवश्यकाः भवन्ति। इदं वस्तु आश्रमजनानां प्रयोजनम्। अतः अयमाश्रम इति। असन्तुष्टा द्विजा नष्टा इति अभिप्रायं वर्णयति भासः तापसीमुखेन। प्रथमाङ्के यौगन्धरायणस्य याचनाप्रसङ्गे तापसी वदति - "सन्तुष्टतपस्विजनमिदमाश्रमपदम्। आगन्तुकेनानेन भवितव्यम्।"[10]

एतेन ज्ञायते आश्रमस्थानां सदा सन्तोषः दृश्यते। अल्पेन बहुना वा तेषां सन्तोषः समानः। अतः इदम् आश्रमलक्षणं यत् सर्वे यत्र तुष्टाः सः आश्रमः इति। द्विजाः मुनयो वा सन्तुष्टाश्चेत् वरं, तेषामसन्तुष्ट्या ते नष्टाः भवन्ति इति कथ्यते "असन्तुष्टाः द्विजाः नष्टाः" इति।

नाट्यकारः भासः आश्रमस्य लक्षणं साक्षादेकत्र उपस्थापयति प्रथमाङ्के। ब्रह्मचारी कश्चित् मध्याह्नसमये विश्रामं नेतुम् इच्छति। सः लावाणकतः आगच्छति यत्र दाहेन वासवदत्ता दग्धा इति मिथ्या प्रचारो जातोऽस्ति। अतः विश्रामं नेतुं सः कथयति "अभितस्तपोवनेन भवितव्यम्"[11]। तथाहि-

विस्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्यया
वृक्षाः पुष्पफलैः समृद्धविटपाः सर्वे दयारक्षिताः।
भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशो
निःसन्दिग्धमिदं तपोवनमयं धूमो हि बह्वाश्रयः॥[12]

अत्र आश्रमलक्षणं स्पष्टमुक्तमस्ति। देशागतप्रत्ययेन हरिणाः भयरहिताः विचरन्ति इति कथनेन अहिंसा आश्रमे पाल्यते इति ज्ञायते। अतः यत्र अहिंसा स आश्रमः। अपि च, तत्र वृक्षाः पुष्पफलैः नम्राः। एतेन ज्ञायते जनैः वृक्षः रक्षितः भवति, पुष्पफलानि नावचितानि भवन्ति। आश्रमः सः यत्र कपिलानि गोकुलधनानि स्युः। क्षेत्राणि शून्यानि दृश्यन्ते, नाम कृषिक्षेत्रं शून्यं भवति। धूमः वृक्षादिषु आश्रयते। एतल्लक्षणमुक्तं यदस्ति तदस्ति आश्रमपदं नाम। वस्तुतः इत्थं स्पष्टं लक्षणं नान्यत्र दृश्यते।

अथ ब्रह्मचारी तपोवनं गन्तुमनुमतिमिच्छति। तदा काञ्चुकीयः वदति - "सर्वजनसाधारणमाश्रमपदं नाम "[13]। एतस्मात् ज्ञायते यत्र सर्वेषां गतिः वासश्च भवति स आश्रमः इति।

**प्रतिमानाटकम्**

रामायणमुपजीव्य लिखिते सप्ताङ्कविशिष्टे प्रतिमानाटके पञ्चमाङ्कस्य एकस्मिन् प्रसङ्गे आश्रमकथा उट्टङ्किताऽस्ति। अरण्यवाससमये सीता तापसीं वदति- "आर्य! उपहारसुमनआकीर्णः सम्मार्जित आश्रमः"[14]। तस्याः कथनात् ज्ञायते आश्रमः पुण्यः भवति। पूजायां पुष्पाणि दीयन्ते, पुनश्च तेषां पुष्पाणां परस्मिन् काले

[7] स्वप्नवासवदत्तम्, प्रथमाङ्कः, श्लोकः ३, पृ. ०८
[8] तत्रैव, प्रथमाङ्कः, पृ. ०९
[9] तत्रैव, प्रथमाङ्कः, श्लोकः ८ , पृ. २३
[10] तत्रैव, प्रथमाङ्कः, पृ. २५
[11] तत्रैव, प्रथमाङ्कः, पृ. ३२
[12] तत्रैव, प्रथमाङ्कः, श्लोकः १२, पृ. ३३
[13] तत्रैव, प्रथमाङ्के, पृ. ३४
[14] प्रतिमानाटकम्, पञ्चमाङ्कः, पृ. १२५

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

स्वच्छताप्रसङ्गे समार्जनं क्रियते। सीता अपि तत्करोति स्म। अपि च, देवसमुदाचारः तया विहितः। बालवृक्षान् उदकदानेन दयां दर्शयति सीता। अतः सः आश्रमः यत्र स्वच्छता देवपूजा बालपादपसेवा चैते दृश्यन्ते। पुनः सप्तमाङ्के आश्रमवर्णना विलोक्यते। आरम्भे तापसनन्दिलकयोः कथनात् रामः रावणं मारितवान् सीतामादाय अयोध्यां प्रति गन्तुमारब्धावान् च। विभीषणसुग्रीवादयः वानराः नैके अपि गन्तुं प्रवृत्ताः। अतः तापसः नन्दिलकं वदति "तदद्यास्मिन्नाश्रमपदेऽस्मद्विभवेन यत् सङ्कल्पयितव्यम्, तत् सर्वं सज्जीक्रियतामिति"[15]। वस्तुतः अतिथिदेव इति उक्तिः सार्थिका भवति। विशिष्य आश्रमे तु एतत् परिपाल्यते एव। अतः यत्र अतिथिसेवा स आश्रम इति स्वीक्रियते।

**मध्यमव्यायोगः**

एकाङ्कविशिष्टं रूपकमिदम्। अत्र मध्यमपाण्डुपुत्रस्य भीमस्य केशवदासब्रह्मपुत्रस्य मध्यमस्य च कथाऽस्ति। रूपकारम्भे दृश्यते - एकः ब्राह्मणपरिवारः यत्र स्वयं ब्राह्मणः केशवदासः तस्य पत्नी ब्राह्मणीं पुत्रत्रयं च धृत्वा भीमहिडिम्बापुत्रात् घटोत्कचराक्षसात् बिभीय आयाति। अत्र ब्राह्मणीं प्रबोधयन् ब्राह्मणः उक्तवान्- "ब्राह्मणि! न भेतव्यं, न भेतव्यम्। मनस्विजननिवासयोग्यमिति श्रुत्वा विगत इव मे सन्त्रासः। शङ्के नात्रातिदूरेण पाण्डवाश्रमेण भवितव्यम्"[16]। एतस्मात् वक्तुं शक्यते यत् यत्र मनस्विजनाः मुनिजनाः वा निवसन्ति स आश्रमो भवति, यत्र हिसा न विद्यते अहिसा केवलम्। अतः नाव्यकारस्य आश्रमलक्षणमत्रावाप्तमित्थम्। तत्रैव ब्राह्मणस्य ज्येष्टपुत्रः वदति - "श्रुतं मया तस्मादाश्रमादागतेन केनचिद् ब्राह्मणेन कथितं - शतकुम्भं नाम यज्ञमनुभवितुः महर्षेर्धौम्यस्याश्रमं गता इति "[17]।

एतस्मादपि ज्ञायते आश्रमः यज्ञस्थानं भवति। सदा तत्र यज्ञं प्रवर्तते। इदमपि आश्रमस्य अन्यत् स्वरूपम्।

**पञ्चरात्रम्**

अङ्कत्रयविशिष्टं पञ्चरात्रम् महाभारतस्य उपजीव्यम्। तत्र प्रथमाङ्के प्रस्तावनायाः परं ब्राह्मणास्त्रयः प्रविशन्ति। आगत्य सर्वे समस्वरेण वदन्ति "अहो कुरुराजस्य यज्ञसमृद्धिः"[18]। ततः प्रथमो ब्राह्मणः यज्ञमहत्त्वं वर्णयति[19]। तस्य कथनात् ज्ञायते नृपे दीक्षां प्राप्ते जगदपि दीक्षां प्राप्नोति। अर्थात् प्रजाः समस्ताः दीक्षिताः भवन्ति। व्याघ्राः सिहाश्च क्रूरतां त्यजन्ति। हविर्धूमैः अपगतपुष्पसुगन्धाः वृक्षाः भवन्ति। ब्राह्मणोच्छिष्टमन्नं विक्षिप्तमस्ति। तेन काशकुसुममिव प्रतीयते। द्वितीयः ब्राह्मणोऽपि यज्ञेन देव-ब्राह्मण-पशु-मानवाः प्रसन्नाः भवन्ति। किञ्च जगत् शान्तिमाप्नोतीति कथयति[20]। एतयोः कथनात् यज्ञस्य महत्त्वं ज्ञायते। तदर्थम् आश्रमः यज्ञपीठमिति कथ्यते। दुर्योधनस्य यज्ञयोजनं यत्र तत् स्थानमाश्रमपदमिति वक्तुं शक्नुमः।

**दूतवाक्यम्**

एकाङ्कविशिष्टं रूपकं दूतवाक्यम्। अत्र महाभारतीया कथा। श्रीकृष्णः पाण्डवानां पक्षतः दूतरूपेण दुर्योधनमुपागतोऽस्ति। पाण्डवानां निवासाय याचते च वसुधां यदर्थमधिकारोऽस्ति तेषाम्। एतेन युद्धमपि न भविष्यति। सर्वे शान्तिमाप्स्यन्ति। श्रीकृष्णस्य वचनमित्थं श्रुत्वा दुर्योधनः वदति -

राज्यं नाम नृपात्मजैः सहृदयैर्जित्वा रिपून् भुज्यते
तल्लोके न तु याच्यते न तु पुनर्दीनाय वा दीयते।
काङ्क्षा चेन्नृपतित्वमाप्तुमचिरात् कुर्वन्तु ते साहसं
स्वैरं वा प्रविशन्तु शान्तमतिभिर्जुष्टं शमायाश्रमम्॥[21]

दुर्योधनस्य इत्थं कथनात् ज्ञायते शान्तिः तत्र मिलति यत्र आश्रमो भवति, यत्र च मुनयः निवसन्ति, यच्च वने भवति। एतत् सर्वमाश्रमलक्षणं भासेनात्र उट्टङ्कितम्।

**ऊरुभङ्गः**

अत्रास्ति एकोऽङ्कः। महाभारतमस्य उपजीव्यम्। दुर्योधनस्य ऊरुभङ्गोऽत्र मुख्यः विषयः। अत्रापि

[15] प्रतिमानाटकम्, सप्तमाङ्कः, पृ. १६९
[16] मध्यमव्ययोगः, प्रथमाङ्कः ,पृ. १६-१७
[17] मध्यमव्ययोगः, प्रथमाङ्कः ,पृ. १८
[18] पञ्चरात्रम्, प्रथमाङ्कः, पृ. ४
[19] पञ्चरात्रम् , प्रथमाङ्कः, श्लोकः १/३, पृ. ५
[20] पञ्चरात्रम्, प्रथमाङ्कः, श्लोकः १/४, पृ. ६
[21] दूतवाक्यम्, प्रथमाङ्कः, श्लोकः १/२४ , पृ. ३७

आश्रमप्रसङ्गः दृश्यते। ऊरुभङ्गस्य अन्तिमे दृश्ये भरतवाक्यात् पूर्वं धृतराष्ट्रोक्तितः तपोवनप्रसङ्गः आयाति। तद्यथा-

यान्म्येष सज्जनधनानि तपोवनानि
पुत्रप्रणाशविफलं हि धिगस्तु राज्यम्।[22]

पुत्रविनाशेन अत्यन्तं दुःखी राजा धृतराष्ट्रः वदति – तेन राज्येन किं यत्र पुत्राः मे मृताः, तेषां कृते राज्यमासीत् अहमपि आसम्। इदानीम् आश्रममुद्दिश्य वदति। आश्रमः तपोवनं भवति यत्र सज्जनाः (साधवः) तिष्ठन्ति। शान्तिश्च मिलति। अतः आश्रमं गत्वा वत्स्यामि। अस्मात् आश्रमलक्षणं प्रतिभातं भवति। आश्रमः सज्जनानां साधूनां निवासः। धनं धिगस्तु तेन न शान्तिः, अपि तु आश्रमे मुनिजनसान्निध्ये शान्तिः अवाप्यते।

**उपसंहारः**

इत्थमत्र भासस्य त्रयोदशनाटकेषु सप्त अत्र आश्रमवर्णनामधिकृत्य परिशीलिताः। तच्च – १. प्रतिज्ञायौगन्धरायणम्, २. स्वप्नवासवदत्तम्, ३. प्रतिमानाटकम्, ४. मध्यमव्यायोगः, ५. पञ्चरात्रम्, ६. दूतवाक्यम्, ७. ऊरुभङ्गः।

अस्य कवेः अन्यत्रापि कृतिषु आश्रममहत्त्ववर्णनं विद्यते। शोधपत्रगौरवभयादत्र न उपस्थापितम्। भासस्य आश्रमस्वरूपवर्णनं तन्महत्त्वप्रतिपादनं विशेषतः अहिसामार्गप्रदर्शनाय आश्रमस्य भूमिकावर्णनं चात्र स्पष्टं दृश्यते। एतेन कवेः आश्रमप्रीतिरपि परिलक्ष्यते। अन्ततो गत्वा भासः आश्रमवर्णनं यथायथं विधाय भारतवर्षस्य वैशिष्ट्यं विश्वसमुदाये व्यवर्धयदिति वक्तुं शक्यते।

## सहायकग्रन्थसूची


- अमरसिंहः, २००३, अमरकोषः, शास्त्री, प. शिवदत्त, वासुदेव (सम्पा.), नई दिल्ली, राष्ट्रीय संस्कृत संस्थान।
- भट्टाचार्यः, श्रीतारानाथतर्कवाचस्पतिः, २०१३, वाचस्पत्यम्, VOL-II, वाराणसी, चौखम्बा संस्कृत सीरीज आफिस।
- राधाकान्त देववाहादुरः, वि. सं २०२४, तृतीय संस्करणम्, शब्दकल्पद्रुमः, वाराणसी, चौखम्बा संस्कृत सीरीज आफिस।
- कालिदासः, १९८७, रघुवंशमहाकाव्यम्, द्वितीय संस्करणम्, दिल्ली, मोतिलाल बनारसीदास।
- कालिदासः, २०१५, मालविकाग्निमित्रम्, मिश्रः, पण्डित रामचन्द्रः, व्याख्याकारः, वाराणसी, चौखम्बा संस्कृत सीरीज आफिस।
- भासः, २००८, प्रतिज्ञायौगन्धरायणम्, गिरिः, पण्डित कपिलदेव, व्याख्याकारः, वाराणसी, चौखम्बा विद्याभवन।
- भासः, २०१९, स्वप्नवासवदत्तम्, रेग्मीः, आचार्य श्रीशेषराजशर्मा, व्याख्याकारः, वाराणसी, चौखम्बा सुरभारती प्रकाशन।
- भासः, १९९९, प्रतिमा-नाटकम्, मिश्रः, आचार्यः श्रीरामचन्द्र, व्याख्याकारः, वाराणसी, चौखम्बा संस्कृत सीरीज आफिस।
- भासः, १९८८, मध्यमव्यायोगः, मालवीयः, डॉ० सुधाकर, सम्पादको व्याख्याकारश्च, वाराणसी, कृष्णदास अकादेमी।
- भासः, १९७९, पञ्चरात्रम्, मिश्रः, डॉ० जगदीशचन्द्र, व्याख्याकारः, वाराणसी, चौखम्बा अमरभारती प्रकाशन।
- भासः, १९८७, दूतवाक्यम्, मालवीयः, डॉ० सुधाकर, सम्पादको व्याख्याकारश्च, वाराणसी, कृष्णदास अकादेमी।
- भासः, १९८६, ऊरुभङ्गम्, ओझा, डा० रामप्रभा, व्याख्याकारः, वाराणसी, कृष्णदास अकादेमी।


[22] ऊरुभङ्गः, प्रथमाङ्कः, श्लोकः १/६६ , पृ. ७१

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# पर्यावरणरक्षणाय संस्कृतमहाकवीनां भावना

**गौर-बेरा**

**शोधच्छात्रः, संस्कृतविभागः, प्रभातकुमारमहाविद्यालयः**

**कण्टाइ, पूर्वमेदिनीपुरम्, पश्चिमबङ्गः**

**प्रबन्धसारः**

*वेदादिषु शास्त्रेषु प्रकृतेः पर्यावरणस्य च अनेकधा चर्चा कृता वर्तते। मानव-हृदयेन सह पर्यावरणस्य आन्तः सम्बन्धः विद्यते। यतः पर्यावरणं विना मानवस्य जीवनधारणम् असम्पूर्णम्। कालस्य प्रवाहे पर्यावरणस्य परिवर्तनं भवति। पर्यावरण-रक्षणं मानवकल्याणस्य अन्यतमः धर्मः। शुद्ध-पर्यावरण-निर्माणेन मानवस्य जीवनधारणं सहजसाध्यं भवति। पर्यावरणस्य ध्वंससाधनं मानवस्य जीवननिर्वहने काठिन्यं जनयति। प्रकृत्या अपरूपं सौन्दर्यं दृष्ट्वा कवीनां मध्ये काव्यरूप-भावना प्रकटिता भवति। प्रकृतिः यथा स्वमहिम्ना वर्धते तथा कवयः अपि प्रकृत्या सह एकात्मानः भूत्वा तेषां काव्यं, नाटकं, महाकाव्यं च रचितवन्तः। अधुनातनसमये पर्यावरणं भवति आधुनिकविज्ञानस्य अनुशासनम्। इदं पर्यावरणं विंशतिशताब्द्यां विज्ञानरूपेण प्रतिष्ठितम्। वेदे प्राचीनसंस्कृतसाहित्ये च अस्य वर्णनं प्राप्यते। पर्यावरणस्य विषयः समयानुसारेण परिवर्तते। सम्प्रति पर्यावरणस्य समस्या न केवलं भारते, अपि तु भारतात् बहिरपि दृश्यते। यदि प्राकृतिकं पर्यावरणं दूषितं भवति तर्हि तेन मानसिकं शारीरिकं सामाजिकं वातावरणमपि प्रभावितं भवति। एतस्मात् हेतोः परिवेशं रक्षितुं संस्कृतसाहित्यस्य मुख्यकवीनां काव्यरूपभावना सर्वेषां जनानां समीपे उपस्थापनीया, येन जनाः परिवेशविषये सचेतनाः भवितुमर्हन्ति। अतः कवीनां काव्येषु याः परिवेशभावनाः विद्यन्ते ताः अस्माकं सर्वेषां ज्ञातव्याः। प्रकृत्या सह मानवहृदयस्य या अन्तरङ्गता अस्ति सा कालिदासादिकवीनां काव्ये अपि दृश्यते। अश्वघोषः बुद्धस्य आविर्भावकाले प्रकृत्याः अपरूपां शोभाम् उपस्थापितवान्। श्रीहर्षः तस्य काव्ये प्रकृत्याः नानादिशि शोभां वर्णयति। महाकविभट्टिविरचितं 'भट्टिकाव्यम्' महाकाव्यस्य भिन्नेषु सर्गेषु ऋतु-आश्रम-अरण्याणी-चन्द्रोदय-सूर्योदयादिवर्णनेन काव्ये अभिनवत्वं सृजति।*

**कुञ्चीशब्दाः** – पर्यावरणम्, कविः, संरक्षणम्, आश्रमः, महाकाव्यम् चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

**भूमिका –**

पर्यावरणं हि पञ्चतत्त्व-निर्मितप्राणिजातानां समष्टिः। पञ्चभिः तत्त्वैः जीवनम् आवृत्तमस्ति। वैदिक-युगे मानवाः प्रकृत्या सह जीवनधारणं कृतवन्तः। वर्तमाने मनुष्याः निजस्वार्थचरितार्थाय विविधेन कर्मणा विविधरासायनिकद्रव्योत्पादनेन च प्रकृतिविनाशं साधयन्ति। ते स्वोदरपूरणाय विज्ञानस्य अपप्रयोगेण प्राणिनां तथा वसुधातलस्यापि विनाशं साधयन्ति। एतेन वनानाम् अनवरतम् उच्छेदसाधनेन समग्रपर्यावरणमेव विनाशोन्मुखं भवति। मानवाः एतादृशं कर्म कुर्वन्ति चेत् सर्वप्रकृतिविनाशः अचिरादेव भविष्यति इति। अतः पर्यावरण-परिरक्षणाय, पर्यावरण-परिवर्धनाय इदानीं कि कर्तव्यम्? इति आशङ्कायाम् अस्माकं प्राचीनानां जीवनपद्धत्यवलम्बनेन अस्य समाधानं कर्तव्यम्। पर्यावरणरक्षणमाध्यमेन जीवाः सुखेन जीवनं धारयितुं समर्थाः।

मानव-हृदयेन सह पर्यावरणस्य आन्तः सम्बन्धः विद्यते। यतः पर्यावरणं विना मानवस्य जीवनधारणम् असम्पूर्णम्। कालस्य प्रवाहे पर्यावरणस्य परिवर्तनं भवति। एकस्मिन् ऋतौ मानवस्य हृदयं रूप-रस-गन्धादिभिः परिपूर्णं भवति। वसन्तकाले कवि-हृदये नूतना भावना आविर्भवति। अपि च ग्रीष्मस्य दावदाहेन कवीनां हृदयं यथा आन्दोलितं भवति तथैव वर्षाकाले मेघवर्षणेन कवीनां काव्ये विरहस्य पीडा विच्छुरिता भवति। उपयुक्तः परिवेश एव मानवकल्याणं साधयति। अतः परिवेशरक्षणाय यन्तः करणीयः। सुचेतनाः मानवाः प्रकृत्या सह एकत्रैव संवर्धिताः भवन्ति। पर्यावरण-रक्षणं मानवकल्यानस्य अन्यतमः धर्मः। शुद्ध-पर्यावरण-

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

निर्माणेन मानवस्य जीवनधारणं सहजसाध्यं भवति। पर्यावरणस्य ध्वंससाधनं मानवस्य जीवननिर्वहने काठिन्यं जनयति। प्रकृत्या अपरूपं सौन्दर्यं दृष्ट्वा कवीनां मध्ये काव्यरूप-भावना प्रकटिता भवति। प्रकृतिः यथा स्वमहिमा वर्धते तथा कवयः अपि प्रकृत्या सह एकात्मानः भूत्वा काव्यानि, नाटकानि, महाकाव्यानि च व्यरचयन्।

पर्यावरणं विशतिशताब्यां विज्ञानरूपेण प्रतिष्ठितम्। वेदे प्राचीनसंस्कृतसाहित्ये च अस्य वर्णनं प्राप्यते। पर्यावरणस्य विषयः समयानुसारेण परिवर्तते। सम्प्रति पर्यावरणस्य समस्या न केवलं भारते, अपि तु भारतात् बहिरपि दृश्यते। यदि प्राकृतिकं पर्यावरणं दूषितं भवति तर्हि तेन मानसिकं शारीरिकं सामाजिकं च वातावरणं प्रभावितं भवति। एतस्मात् हेतोः परिवेशं रक्षितुं संस्कृतसाहित्यस्य मुख्यकवीनां काव्यरूपभावना सर्वेषां जनानां समक्षम् उपस्थापनीया, येन जनाः परिवेशविषये सचेतनाः भवितुमर्हन्ति। अतः कवीनां काव्येषु याः परिवेशभावनाः विद्यन्ते ताः अस्माकं सर्वेषां ज्ञातव्याः।

**रघुवंशमहाकाव्ये प्रकृतिभावना** -

कविः समाजस्य निर्माता द्रष्टा च इति अङ्गीक्रियते। कवेः मुख्यकर्त्तव्यम् अस्ति समाजे सुख-शान्त्यानन्दमय-वातावरणस्य निर्माणे सहयोगः। अस्मिन् विषये उक्तम् –

अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥[1]

प्रकृत्या सह मानवहृदयस्य मध्ये या अन्तरङ्गता अस्ति सा कालिदासादिकवीनां काव्ये अपि दृश्यते। 'रघुवंशम्'-महाकाव्ये प्रकृत्या सह मानवानाम् एकात्मता दृश्यते। सीतायाः सकरुणरोदनेन तपोवनस्य वृक्षपशुविहगादयः सर्वेऽपि शोकेन मुह्यमाना अभवन्–

नृत्यं मयूराः कुसुमानि वृक्षा दर्भानुपात्तान् विजहुर्हरिण्यः।
तस्याः प्रपन्ने समदुःखभावमत्यन्तमामीद्रुदितं वनेऽपि ॥[2]

कालिदासस्य साहित्येषु प्रकृतिः मूर्तरूपेण विराजिता। प्रकृतिः मानवस्य सुख-दुःखयोः बान्धवः। 'रघुवंशम्' महाकाव्ये प्रथमसर्गे महाराजो दिलीपः सुदक्षिणया सह वशिष्ठाश्रमे गमनकाले गमनमार्गम् उभयतः प्रकृत्याः सौन्दर्यम् अवलोकितवान्। वायोः मृदु प्रवाहेन तपोवनवासिगणाः सुखशीतलताम् अनुभवन्ति। शालनिर्यासस्य गन्धेन आमोदितः पुष्परेणुशोभितः अनुकुलः वायुः राजदम्पत्योः सेवया नियोजितः –

सेव्यमानौ सुखस्पर्शैः शालनिर्यासगन्धिभिः।
पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ॥[3]

पुत्रकामनया राजदम्पती रथारोहणेन वशिष्ठाश्रमं प्रति अचलताम्। अस्मिन् समये महाकविः प्रकृत्याः अभ्यर्थनां वर्णयति। राजदम्पत्योः पथिपार्श्वस्थिताः मयूराः मधुरं रथरवं श्रुत्वा मेघगर्जनभ्रमेण आनन्दिताः सन्तः केकारवेण नृत्यरता अभवन्। मयूराणां केकाध्वनिः षड्जसंवादिनी भवति। अतः उच्यते – "शुभगन्धे च शब्दे च सानुकूल्ये च मारुते। प्रस्थिते सर्वकार्याणां सर्वसिद्धिर्ध्रुवं भवेत्।" इति।

राजदम्पत्योः रथारोहणेन वशिष्ठाश्रमं प्रति गमनकाले आश्रममृगमिथुनाः राजमार्गस्य सन्निकटस्थाः सन्तः राजपथं प्रति दत्तदृष्टयः आसन्। औत्सुक्यवशात् राजदम्पती अपि दलबद्धान् मृगमिथुनान् पश्यन्तौ पुलकितौ आस्ताम् –

"सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ॥"[4]

**मेघदूतगीतिकाव्ये प्रकृतिभावना** -

इदं खण्डकाव्यं प्राकृतिकसम्भारवर्णनायाम् आधारभूतम् इति मन्यते। महाकविकालिदासः 'मेघदूतम्' गीतिकाव्ये वर्षाकालस्य मेघस्य च अपरूपं प्राकृतिकं सौन्दर्यम् उपस्थापयति। धूम-ज्योतिः-सलिल-मरुतां सन्निपातः मेघः अस्य काव्यस्य उपनायकभावेन चित्रितः। यक्षः प्रियावियोगात् रामगिर्य्यां कतिपयमासान् अतिवाहितवान्। अस्मिन् समये आषाढमासस्य प्रारम्भे दिवसे कृष्णकायः मेघः यदा आकाशपथि उत्तरदिशां प्रति यात्रारम्भं करोति तदा समग्रे क्षेत्रे सर्वेषां प्राणिनां शरीरे मनसि वा भावान्तरं लक्ष्यते। पूर्वमेघे वर्षतोः अतिमनोहरवर्णनं सुमधुरगीतकारेण कविना विहितम्।

[1] अग्निपुराणम् – ३३९.१०
[2] रघुवंशम् -१४. ६९
[3] रघुवंशम् – १.३८
[4] रघुवंशम् – १.४१

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

अस्य गीतिकाव्यस्य प्रारम्भ एव वर्षर्तुवर्णनेन भवति। यथा–

तस्मिन्नद्रौ कतिचितदबला विप्रयुक्तः स कामी
नीत्व मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः।
आषाढस्य प्रथमदिवसे मेघमाशिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श॥[5]

मेघदूते महाकवीनां गीतं सन्तप्तानां त्वमसि शरणं तत्पयोद क्रियायाः – अनेन मेघः सूर्यातपैः दग्धप्राणानाम् उद्भिज्जन्तूनाम् उपकारार्थं दहनशान्तये नभसि विराजितः भवति। सः छायादानं करोति, जलदानं च करोति। मेघः कृषिफलस्य हेतुस्वरूपः भवति। पर्यावरणस्य समीचीनत्वे उचितकाले आषाढमासे मेघः आगच्छति। परन्तु अधुनातने काले पर्यावरणस्य असामञ्जस्यकारणात् विलम्बेन वर्षर्तुः आगच्छति।

**ऋतुसंहारे प्रकृतिभावना -**

'ऋतुसंहार' इति काव्ये ग्रीष्मादीनाम् ऋतूनां सजीवत्वेन चित्रणं दृश्यते। तत्र ग्रीष्मकालस्य वर्णनं तथा-

प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः
सुखावगाहः क्षतवारिसञ्चयः।
दिनान्तरम्योऽभ्युपशान्तमन्मथः
निदाघकालोऽयमुपागतः प्रिये॥[6]

**कुमारसम्भवमहाकाव्ये प्रकृतिभावना -**

अस्मिन् महाकाव्ये असंख्याः पर्यावरणभावनाः दृश्यन्ते। तेषु समुद्रसमेषु प्रसङ्गेषु कतिपयविन्दवः अत्र आलोच्यन्ते। पार्वती तपोवने स्वयमेव वृक्षकान् पुत्रवत् संवर्धितवती। स्वस्य तपोवनं पावनं कर्त्तुं सा विभिन्नेषु कुटीरेषु हवनकार्याय अग्निप्रज्वालनं कृतवती। स्वहस्तेन निवारादिशस्यप्रदानेन मृगान् पुत्रवत् पालितवती। तस्याः परिवेशोऽपि तां प्रति स्नेहशीलः अभूत्। तत्र वृक्षाः फलपुष्पैः समृद्धाः अभवन्। एतेन महाकविः परिवेशेन सह जीवनं कथं स्वर्गीयं भवति तस्योदाहरणं प्रददाति। कुमारसम्भवस्य नायिका पार्वती अपि वृक्षसेचनं स्वयं करोति –

अतन्द्रिता सा स्वयमेव वृक्षकान् घटस्तनप्रस्रवणैर्व्यवर्धयत्।

गुहोऽपि येषां प्रथमाप्तजन्मनां न पुत्रवात्सल्यमपाकरिष्यति॥[7]

**बुद्धचरितमहाकाव्ये परिवेशभावना -**

अश्वघोषः बुद्धस्य आविर्भावकाले प्रकृत्याः अपरूपां शोभाम् उपस्थापितवान्। महाकाव्यस्य तृतीयसर्गे दृश्यते – वनानि हरितकोमलतृणानि मनोहराणि वर्णितानि। तत्र वृक्षे वृक्षे पुंस्कोकिलाः सुस्वरेण कूजन्ति। कुत्रापि सरसि पद्मानि प्रस्फुटन्ति। एवं रूपेण पद्मसरोभिः शोभितानि काननानि सर्वेषां मानवानां मनः सौन्दर्येण आकर्षन्ति। अतः उच्यते –

ततः कदाचिन्मृदुशाद्वलानि पुंस्कोकिलोन्नादित-पादपानि।

शुश्राव पद्माकरमण्डितानि गीतैर्निबद्धानि स काननानि॥[8]

कविः अश्वघोषः राजपुत्रस्य सिद्धार्थकस्य रमणीयराजमार्गस्य वर्णनं कृतवान्। कुमारः सिद्धार्थको यदा नगरस्य पथि बहिरागतः तदा प्रकृत्याः अपरूपा शोभा दरीदृश्यते। यथा – मार्गे माला इव ध्वजाः सुसज्जिताः, तथैव प्रासादः अपि पुष्पैः सज्जितः। अपि च, राजमार्गः पद्मपुष्पैः शोभमानः। तथाहि उच्यते –

वातायनेभ्यस्तु विनिःसृतानि परम्परायायित-कुण्डलानि।

स्त्रीणां विरेजुर्मुखपङ्कजानि सक्तानि हर्म्येष्विव पङ्कजानि॥[9]

**नैषधचरितम् महाकाव्ये परिवेशभावना**

महाकविः श्रीहर्षः तस्य काव्ये प्रकृत्याः नानादिक्षु विद्यमानां शोभां वर्णयति। राजा नलः यदा कामदेवस्य बाणेन जर्जरितः अभवत्, तस्मिन् समये हेमन्त-ग्रीष्मर्तोः प्रभावः दृश्यते। अस्मिन् विषये श्रीहर्षेण उक्तम् –

अहो अहोभिर्महिमा हिमागमेऽप्यतिप्रपेदे प्रति तां स्मरार्दिताम्।

[5] मेघदूतम् ( पूर्वमेघः ) - २
[6] ऋतुसंहार- १
[7] कुमारसम्भवम् – ५.१४
[8] बुद्धचरितम् – ३.१
[9] बुद्धचरितम् – ३.१९

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

तपर्त्तुपूर्त्तावपि मेदसां भरा
विभावरीभिर्विभराम्बभूविरे ॥[10]

राज्ञो नलस्य तपोवने भ्रमितकाले प्रकृतेः अपरूपा शोभा वर्णिता। तस्मिन् समये तपोवने विचरतः अश्वस्य देहे स्थिताः केशराशयः देवमणेः किरणरश्मिरिव प्रदीप्यते। अस्मिन् समये प्रकृतिः विविधालङ्कारैः सुसज्जिता वर्तते। अतः उच्यते –

अथान्तरेणावटुगामिनाध्वना
निशीथिनीनाथमहःसहोदरैः।
निगालगाद्देमणेरिवोत्थितै-
र्विराजितं केसरकेशरस्मिभिः ॥[11]

राजा नलः यदा तपोवने उपस्थितः तदा तपोवने स्थिताः वृक्षाः राज्ञः अतिथिसत्कारं कृतवन्तः। वार्धक्ये मुनयः यथा वातरोगेण आक्रान्ता भवन्ति तथैव तपोवने नृपं नलं दृष्ट्वा वृक्षाः अपि कम्पिता भवन्ति। अपि च यथा आश्रमे आगतेभ्यः अतिथिभ्यः मुनयः फलमूलैः आतिथ्यसत्कारं कुर्वन्ति तथैव प्राचीनाः वृक्षाः अपि राजानम् अतिथिसत्कारैः सेवितवन्तः। अतः उच्यते –

फलानि पुष्पाणि च पल्लवे करे
वयोऽतिपातोद्गतवातवेपिते।
स्थितैः समादाय महर्षिवार्धका-
द्वने तदातिथ्यमशिक्षि शाखिभिः ॥[12]

उद्याने भ्रमणकाले नलः पलाशवृक्षम् अपश्यत्। सः पलाशवृक्षस्य पुष्पवृन्तं दृष्ट्वा दमयन्त्याः आन्तरवेदनाया उपलब्धिम् अकरोत्। राजा गमनकाले वातेन कम्पमानाम् एकां लताम् अपश्यत्। लतायाः मुकुलानि दृष्ट्वा नलस्य हृदयम् आनन्दितं जातम्। अतः उच्यते –

नवा लता गन्धवहेन चुम्बिता
करम्बिताङ्गी मकरन्दशीकरैः।
दृशा नृपेण स्मितशोभिकुड्मला
दरादराभ्यां दरकम्पिनी पपे ॥[13]

**भट्टिकाव्ये प्रकृतिभावना**

महाकविभट्टिविरचितस्य 'भट्टिकाव्यम्' इति महाकाव्यस्य विविधसर्गेषु ऋतु-आश्रम-अरण्याणी-चन्द्रोदय-सूर्योदयादि-वर्णनम् अवलोक्यते। भट्टिकाव्यस्य द्वितीयसर्गे भट्टिः शरत्कालस्य वर्णनमाध्यमेन प्रकृत्याः अपरूपशोभां प्रतिपादितवान्। वर्षागमे पार्वत्यभूमौ क्वश्चित् मेघः विद्यमानः तिष्ठति। शरदागमने प्रकृतिः अनुपमसौन्दर्यमयी भवति। शरदागमने आनन्दोन्मताः तपोवनवासिनः मृगाः लम्फप्रदानेन वनस्य शोभां वर्द्धयन्ति। शरत्प्रभावेन प्रकृतिः सर्वत्रैव निर्मला शुभ्रा च आसीत्। शरदागमने कोकिलानां श्रुतिमधुरैः निनादैः सर्वेषां हृदयम् आनन्देन उद्वेलितं भवति। वनस्पतेः अपरूपा शोभा, सरोवरस्य स्वच्छा जलराशिः , मेघमुक्ताः चन्द्रनक्षत्राणां किरणाः सर्वेषां मानवानां हृदयं आकर्षन्ति।

शरदागमे प्रकृतिः अपरूपसौन्दर्येण अस्मान् आनन्दयति। अस्मिन् समये जलाशयः स्वच्छैः कुमुदकमलैः शोभितो भवति। सरोवरे प्रस्फुटितानि पद्मानि तरङ्गाघातेन आन्दोलितानि भवन्ति। मधुपानार्थमागता भ्रमराः तेषामुपरि भ्रमणरताः भवन्ति। तेन पद्मानि सधूमदीप्ताग्निशोभाम् अनुकृतवन्ति इव। तथाहि उच्यते –

तरङ्गसङ्गाच्चपलैः पलाशैः
ज्वालाश्रियं सातिशयं दधन्ति।
सधूमदीप्ताग्निरुचीनि
रेजुस्ताम्रोत्पलान्याकुलषट्पदानि ॥[14]

शरत्समागमे प्रकृतिः पद्मैः पुष्पैश्च शोभमाना भवति। तत्र नदीतीरस्थिता कुसुमिता वनभूमिः प्रभाते रविकिरणेन जले प्रतिविम्बिता भवति। अपि च, शरत्समागमे वनभूमौ अपि स्थलपद्मानां विकासः भवति। कविकल्पनया प्राकृतिकदृश्यमिदं जलस्थलयोः सौन्दर्यं वर्धयति। शरत्काले रात्रौ वृक्षपत्रेषु शिशिरविन्दवः पतिताः भवन्ति। ते प्रभाते पत्रान्तेभ्यो भूमौ क्षरन्ति। पूर्वदिग्भागे सूर्ये उदिते सति विहगाः वृक्षशाखासु कूजन्ति। चन्द्रे अस्तं गते

[10] नैषधीयचरितम् – १.४१
[11] नैषधीयचरितम् – १.५८
[12] नैषधीयचरितम् – १.७७
[13] नैषधीयचरितम् – १.८५
[14] भट्टिकाव्यम् – २.२

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

कुमुदिनी जलाशयेषु निमीलति। एतानि प्राकृतिकदृश्यानि कविकल्पनया सुचारुरूपेण उपस्थापितानि -

निशातुषारैः नयनाम्बुकल्पैः
पत्रान्तपर्यागलदच्छबिन्दुः।
उपारुरोदेव नदत्पतङ्गः
कुमुद्वतीं तीरतरुर्दिनादौ॥[15]

**उपसंहारः**

वृक्षाः स्वयं कुसुमपत्रफलानां भारं वहन्ति, तथा सर्वम् अन्येभ्यः यच्छन्ति। वृक्षाः जनानां शरीरस्वास्थ्याय अपि सन्ति। सर्वे जनाः सुखं प्राप्तुम् इच्छन्ति। सुखस्य प्राप्तये पर्यावरणस्य महत्त्वपूर्णं योगदानम् अस्ति। अतः पर्यावरणस्य महत्त्वं सर्वैः स्वीकरणीयमेव। प्रत्येकं नागरिकैः वृक्षरोपणम् अवश्यं कर्तव्यम्। अधुना विद्यालयेषु अपि वृक्षरोपणं क्रियते। यदि वृक्षरोपणस्य कार्यं निरन्तरं भवेत्, तर्हि प्रदूषणसमस्यायाः समाधानं भवेत्। वस्तुतः कवेः प्रकृतिप्रेम अस्माभिरनुकरणीयम्। नदी-पुष्करिणी-मार्ग-धान्यक्षेत्र-वृक्ष-पशुपक्षिप्रभृतिभिः परिवेशः सुन्दरो भवति। यावत् देशस्य नागरिकः पर्यावरणस्य रक्षणे दृढनिश्चयः न भवति, तावत् अस्याः समस्यायाः समाधानं न भवति। स्थाने स्थाने विविधाः वृक्षाः रोपणीयाः। सर्वत्र पर्यावरणविषये संगोष्ठीनाम् आयोजनं भवेत्। अतः यदि सर्वे नागरिकाः पर्यावरणविषये कृतसंकल्पाः भवन्ति, तर्हि किमपि दुष्करं नास्ति।

**सहायकग्रन्थसूची**


- संस्कृत साहित्येर इतिहास – ड. देवकुमार दासः, संस्कृत पुस्तक भाण्डार, कलकाता
- संस्कृत साहित्येर इतिहास – धीरेन्द्रनाथ वन्दोपाध्याय, पश्चिमवङ्ग
- रघुवंशम् – उदयचन्द्र वन्दोपाध्याय, संस्कृत पुस्तक भाण्डार, कलकाता
- कुमारसम्भवम् – श्रीमद् गुरुनाथ विद्यानिधि, संस्कृत पुस्तक भाण्डार, कलकाता
- भट्टिकाव्यम् - श्रीमती रत्ना दत्त, संस्कृत पुस्तक भाण्डार, कलकाता
- वुद्धचरितम् – ड. जयश्री चट्टोपाध्याय, संस्कृत पुस्तक भाण्डार, कलकाता
- नैषधचरितम् – ड. नरनारायण दाशः, संस्कृतवुक डिपो, कलकाता
- मेघदूतम् – सत्यनारायण चक्रवर्ती, संस्कृत पुस्तक भाण्डार, कलकाता
- पर्यावरणकाव्यम् – अशोक कुमारशुक्ल – परिमल पावलिकेशान्, दिल्ली
- संस्कृतसाहित्ये पर्यावरणविज्ञानम् – पूर्णचन्द्र उपाध्यायः, वीणापाणि-संस्कृत-समितिः, मध्यप्रदेशः
- संस्कृत साहित्य का समालोचनात्मक इतिहास – डा. रामविलास चौधुरी , मोतीलाल बनारसीदास , वाराणसी
- रघुवंशम् – प्रो. हरिदामोदर वेलणकर , राष्ट्रिय-संस्कृत-संस्थानम् , नवदेहली


[15] भट्टिकाव्यम् – २.४

# प्राचीनसंस्कृतालङ्कारशास्त्रे शब्दप्राधान्यवादिनां मते काव्यशरीरविचारः

**सत्येन-शीटः**

**शोधच्छात्रः, संस्कृतविभागः, विद्यासागरविश्वविद्यालयः**

**पश्चिममेदिनीपुरम्, पश्चिमबङ्गः**

---

**प्रबन्धसारः**

*भारतीयालङ्कारशास्त्रे द्विविधम् अनुसन्धानं दृश्यते। यथा – (क) काव्यात्मविचारः (ख) काव्यशरीरविचारः। काव्यस्य आत्मचर्चाविषये आलङ्कारिकाः विविधमतं पोषयन्ति। किन्तु संस्कृतालङ्कारशास्त्रे काव्यशरीरविषये द्वे मते स्तः। यथा –*

*(क) शब्दार्थप्राधान्यवाद्यालङ्कारिकाणां मतम्।*

*(ख) शब्दप्राधान्यवाद्यालङ्कारिकाणां मतम्।*

*शब्दप्राधान्यवाद्यालङ्कारिकाणां तथा शब्दार्थप्राधान्यवाद्यालङ्कारिकाणां काव्यशरीरविषये काव्यलक्षणं किम् ? – एतत्प्रसङ्गे आलङ्कारिकाणां मध्ये मतविरोधः अस्ति। तर्हि इदानीं प्रश्नो भवति – केवलमात्रं शब्द एव काव्यम् उत शब्दार्थौ एव काव्यशब्दस्य अभिधेयार्थः? एतस्मिन् विषये विविधानाम् आलङ्कारिकाणां मतमत्र संगृहीतम्। तत्र काव्यस्य शरीरत्वेन शब्द एव किमर्थं प्रधानत्वेन स्वीक्रियते तदपि दर्शितम्। तथा च अयमेव विषयः किमर्थं स्वीकृतः इत्यपि आलोचितम्।*

**कुञ्चीशब्दाः** – आलङ्कारिकः, सहृदयः, शब्दः, अर्थः, काव्यम् चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

**भूमिका**

**“संसारविषवृक्षस्य द्वे एव मधुरे फले।**
**काव्यामृतरसास्वादः सङ्गमः सज्जनैः सह॥”**[1]

पृथिव्याः सर्वश्रेष्टप्राणी हि मनुष्यः। कारणं स उन्नतमस्तिष्कयुक्तः। केवलमात्रं मनुष्याः प्रकृतिरहस्योद्घाटनस्य मार्गोन्मोचनं करिष्यन्ति। तैः ज्ञातसारेण अज्ञातसारेण वा प्रकृतिपृष्टे अनेकाः आश्चर्यपूर्णदृष्टान्ताः रचिताः। तत्र सम्पूर्णरूपेण साहाय्यं करोति प्रकृतिः। यथा – प्रकृतिः वृक्षान् ददाति, तस्माद् मनुष्यः नित्यप्रयोजनीयवस्तु सृजति। प्रकृतिः ददाति स्वर्णं, तस्माद् मनुष्यः शरीरशोभावर्धनकारिणाम् अलङ्काराणां निर्माणं करोति। एते मनुष्याः केवलमात्रं प्रतिभाबलेन एतादृशीं सृष्टिं कुर्वन्ति, यया प्रतिभया मनुष्याः जीवनस्य चरमलक्ष्यं तथा आनन्दं प्राप्नुवन्ति। अतः आलङ्कारिकमम्मटाचार्येण उक्तं –

**“सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्।”**[2]

अपि च एषः आनन्दः जगज्जीवनं समृद्धं करोति। अतः तैत्तिरीयोपनिषदि वर्तते –

**“रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति।”**[3]

मानवः प्रतिभया कविः भवति। अतः कवेः कर्म काव्यम्। तैः सृष्टं काव्यं हि अन्तर्जगद्-बहिर्जगतोः मेलबन्धनकारी एकः आनन्दमयविषयः। एतत् केवलं कवयः कृतवन्तः। अतः अग्निपुराणे दृश्यते –

**“अपारे काव्यसंसारे कविरेकः प्रजापतिः।**
**यथास्मै रोचते विश्वं तथेदं परिवर्तते॥”**[4]

काव्यं कविसृष्टेः तादृशी रचना यत्र केवलम् अलौकिकानन्दस्य स्फुरणं व्यज्यते। अस्यानन्दस्य सुधारसं ये सहृदयपाठकाः पिबन्ति, ते काव्यं दैव्यवाण्या तुल्यमिति मन्वते। अतः विश्वकविना रवीन्द्रनाथठाकुरेण

---

[1] काव्यप्रकाशः, पत्राङ्कः - ३५

[2] काव्यप्रकाशः, पत्राङ्कः - ३२

[3] उपनिषद्, पत्राङ्कः – ३३९

[4] ध्वन्यालोकः, पत्राङ्कः – ५८७

उक्तं साहित्यं न व्यक्तिविशेषस्य, न वा रचयितुः, तत्तु दैववाणी ।[5] इति ।

**शब्दस्य माहात्म्यम्**

**“इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् ।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥”[6]**

यदि अस्यां पृथिव्यां शब्दस्योद्भवो न अभविष्यत् तदा बहवः विषया अज्ञाताः अस्थास्यन् । तेन च समग्रविश्वम् अन्धकारे निमज्जितं भवेत् । पृथिव्यां प्रथमे प्राणिकुलाः शब्दं ध्वनि वा न कृतवन्तः । विवर्तनमार्गे ते विशेषध्वनेः अधिकारिणः अभवन् । तदा तेषु एकस्याः गोष्ठ्याः निर्माणम् अभवत् । अनन्तरं यदा ते वार्तालापम् आरब्धवन्तः तदा एकः समाजः निर्मितः । अतः तैः स्वाभाविकतया इच्छापूरणं कृतम् । प्रसङ्गेऽस्मिन् वाक्यपदीयकारेण भर्तृहरिणा उक्तम् –

**“न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥”[7]**

अर्थात् शब्देनैव सर्वं ज्ञानं लभ्यते । तथापि अद्यापि प्रकृतेः अनेकाः अव्यक्तध्वनयः सन्ति । यथा – समुद्रस्य कलतानशब्दः, वर्षाणां झम्-झम् इति शब्दः, वायोः शन्-शन् इति शब्दः चेत्यादयः । व्यक्तध्वनिभिरेव भाषायाः सृष्टिर्भवति । तस्या भाषायाः बहवः प्रभेदाः वर्तमानकाले । अतः वैयाकरणाः हि शाब्दिकाः । अतः उच्यते–

**“यत् पदानि त्यजन्त्येव परिवृत्तिसहिष्णुताम् ।**
**तं शब्दशास्त्रनिष्णाताः शब्दपाकं प्रचक्षते ॥**
**आवापोद्धरणे तावत् यावद्दोलायते मनः ।**
**पादानां स्थापिते स्थैर्ये हन्त सिद्धा सरस्वती ॥”[8]**

यदि मानवाः इङ्गितेनापि मनोभावं ज्ञातुं शक्नुवन्ति तर्हि शब्दैः किं प्रयोजनमिति चेदुच्यस्य वर्णात्मकशब्दः हि प्राणिसमाजे मनुष्यस्य अभिजातस्य सुवर्णभूषणम् । वर्णात्मकशब्दो हि भाषायां परिणतः । अनया च भाषया लोकयात्रा सहजेन निर्वाहिता भवति । अस्मिन् प्रसङ्गे दण्डी तस्य काव्यादर्शे उक्तवान् -

**“इह शिष्टानुशिष्टानां शिष्टानामपि सर्व्वथा ।**
**वाचामेव प्रसादेन लोकयात्रा प्रवर्त्तते ॥ ”[9]**

**अर्थस्य माहात्म्यम्**

**“शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि ।**
**अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः ॥”[10]**

अर्थात् अन्येषु नैकेषु एकार्थकशब्देषु सत्स्वपि कवेः विवक्षितार्थः येन शब्देन प्रकाशितो भवति, स हि शब्दः । स्वसौन्दर्यसुन्दरः सहृदयाह्लादजनको हि शब्दः । शब्दश्रवणात् अनन्तरं यः अर्थो ज्ञायते, तस्य अर्थस्य प्राचीनभारतीयाचार्योः द्विधा विभागं कृतवन्तः । एकः हि मुख्यार्थः वाक्यार्थः स्वार्थः वा । अपरो हि गौणार्थः अमुख्यार्थो वा । शब्दस्य मुख्यार्थः सर्वजनैः विदितः । अर्थो हि शब्दाधीनः । अतः अर्थस्य ज्ञानार्थं शब्दस्य प्रयोजनं स्वीकरणीयमेव । शब्दस्य मुख्यार्थं ज्ञातुं लोकसमाजे नानोपायाः प्रचलिताः । प्राचीनाचार्यैः श्लोकेऽस्मिन् ते उपायाः उक्ताः–

**“शक्तिग्रहं व्याकरणोपमान-कोषाप्तवाक्याद् व्यवहारतश्च ।**
**वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥”[11]**

चित्ते भावसञ्चारं कृत्वा वस्तु भवति भावमयम् । अपि च अर्थसञ्चारं कृत्वा वस्तु भवति अर्थमयम् । भावो भवति Emotion, Feeling वा । अर्थो भवति Thought, Meaning, Character इत्यादयः । एषः अर्थो भवति कविकल्पितवस्तुनः रमणीयार्थः । एषः अर्थो यदा दार्शनिकस्य तदा तस्य उत्पत्तिर्भवति विचारात्मकविचिन्तायाः, वैज्ञानिकस्य सति उत्पत्तिर्भवति विश्लेषणात्मकपर्यवेक्षणात् । किन्तु कवेः अर्थस्य उपलब्धिर्भवति प्रत्यक्षदर्शनात् । अतः आलङ्कारिकानन्दवर्धनाचार्यः अस्य अर्थस्य प्रशंसां कुर्वन् उक्तवान् –

---

[5] সাহিত্য ব্যক্তিবিশেষের নহে, তাহা রচয়িতার নহে, তাহা দৈববাণী। काव्यप्रकाशः, पत्राङ्कः – ६

[6] काव्यादर्शः, पत्राङ्कः – ५४

[7] साहित्यमीमांसा, पत्राङ्कः – १३

[8] काव्यमीमांसा, पत्राङ्कः – २९

[9] काव्यादर्शः, पत्राङ्कः – ४

[10] वक्रोक्तिजीवितम्, पत्राङ्कः - २९

[11] काव्यमीमांसा, पत्राङ्कः – १००

**"सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम्।
अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्॥"**[12]

**काव्यम्**

**"द्वे वर्त्मनी गिरां देव्याः शास्त्रं च कविकर्म च।
तत्र प्रज्ञोद्भवं शास्त्रं प्रतिभोद्भवमन्तिमम्॥"**[13]

अर्थात्, वाग्देव्याः द्वौ मार्गौ वर्तेते। यथा – एकं शास्त्रम्, अपरं हि कविकर्म काव्यं वा। तयोर्मध्ये शास्त्रस्योद्भवो भवति प्रज्ञायाः। अपि च काव्यस्योद्भवो घटते प्रतिभायाः। मनुष्याः चिन्तया यादृशीम् उपलब्धि कुर्वन्ति, तां उपलब्धि भाषया यत्र लिपिबद्धं करोति तद् हि काव्यम्। अनेन काव्येन मनुष्यैः अद्यापि आचारशिक्षा, यशः, अमङ्गलनाशः, परमानन्दलाभः चेत्यादयो लभ्यन्ते। यः एकः अलौकिकव्यापारः। अतः मम्मटाचार्येण काव्यप्रकाशग्रन्थे उक्तम्–

**"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यःपरनिर्वृत्तये कान्तासम्मिततयोपदेशयुजे॥"**[14]

**काव्यस्य भेदाः**

भारतीयालङ्कारशास्त्रे द्विप्रकारम् अनुसन्धानं दृश्यते। यथा – (क) काव्यात्मविचारः (ख) काव्यशरीरविचारः।

**(क) काव्यात्मविचारः**

संस्कृतालङ्कारशास्त्रे केचन आलङ्कारिकाः काव्यस्य बहिरङ्गविचारं न कृत्वा अन्तरङ्गविचारं प्रति मनोयोगं दत्तवन्तः। काव्यस्यात्मविषये विभिन्नैः आलङ्कारिकैः विभिन्नानि मतानि प्रवर्तनानि। यथा - कोऽपि ध्वनिरेव काव्यस्य आत्मा इति स्वीकरोति, कोऽपि वा रीतिरात्मा काव्यस्य इति स्वीकरोति इति विविधा मतविरोधाः सन्ति।

प्राचीनसंस्कृतालङ्कारशास्त्रे बहवः आलङ्कारिकाः आविर्भूताः, तेषु अष्टमशतकस्य आलङ्कारिक-वामनाचार्यः प्रथमं काव्यस्य आत्मविषये चिन्तां कृत्वा तत्प्रतिपादनं कृतवान्। ततः पूर्वं प्रायः सर्वे आलङ्कारिकाः अस्मिन् विषये निरवाः आसन्। अतः वामनाचार्येण काव्यस्यात्मविषये उक्तम् –

**"रीतिरात्मा काव्यस्य। रीतिर्नामेयमात्मा काव्यस्य।"**[15]

नवमशतकस्य अपरैकविशिष्टालङ्कारिकः आनन्दवर्धनः काव्यस्य आत्मरूपेण ध्वनि स्वीकरोति। तेन काव्यस्य आत्मविषये उक्तम् –

**"काव्यस्यात्मा ध्वनिः।"**[16]

स्वस्य मतस्य प्रतिष्ठायै परवर्तिकारिकायामुक्तं –

**"काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।"**[17]

दशमशतकस्य कुन्तकाचार्येण तस्य 'वक्रोक्तिजीवितम्' – इति ग्रन्थे काव्यस्य आत्मा वक्रोक्तिः अथवा काव्यस्य मुख्योपजीव्यविषयो हि वक्रोक्तिः इति उक्तम्। अस्मिन् प्रसङ्गे तेन उक्तम् –

**"उभावेतावलङ्कार्यौ तयोः पुनरलङ्कृतिः।
वक्रोक्तिरेव वैदग्ध्य-भङ्गी-भणितिरुच्यते॥"**[18]

काश्मीरीयकविः क्षेमेन्द्रः मूलतःऔचित्यवादस्य प्रवक्ता। तस्य मते औचित्यमेव काव्यस्य आत्मा। अतः तेन उक्तम्–

**"औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्।"**[19]

रसः हि काव्यस्यान्तरङ्गवस्तु, यः स्वीकरोति स हि भरताचार्यः। तस्य मते रसं विहाय कोऽपि अर्थः न प्रवर्तितः। अतः तेन नाट्यशास्त्रग्रन्थे उक्तम् –

**"न हि रसादृते कश्चिद् अर्थः प्रवर्तते।
तत्र विभावानुभाव-व्यभिचारी-संयोगाद् रसनिष्पत्तिः॥"**[20]

अपि च भामहादयः प्रमुखाः आलङ्कारिकाः मन्वते यत्, अलङ्कारेणैव काव्यस्य सौन्दर्यवृद्धिः भवति। अतः तेषां नये अलङ्कारः एव काव्यस्य आत्मा। अतः भामहाचार्येण तस्य काव्यालङ्कारग्रन्थे उक्तम् –

**"रूपकादिरलङ्कारस्तस्यान्यैर्बहुधोदितः।**

[12] ध्वन्यालोकः, पत्राङ्कः – ५३
[13] काव्यमीमांसा, पत्राङ्कः – ४०
[14] काव्यप्रकाशः, पत्राङ्कः – ३१
[15] काव्यलङ्कारसूत्रवृत्तिः, पत्राङ्कः – १३४
[16] ध्वन्यालोकः, पत्राङ्कः – ४
[17] ध्वन्यालोकः, पत्राङ्कः – ५०
[18] वक्रोक्तिजीवितम्, पत्राङ्कः - ३७
[19] औचितियविचीरचर्चा, पत्राङ्कः – ६
[20] नाट्यशास्त्रम्, पत्राङ्कः – ६४

**न कान्तमपि निर्भूषणं विभाति वणितामुखम्।"**[21]

**(ख) काव्यशरीरविचारः**

**"शरीरमाद्यं खलु धर्मसाधनम्।"**[22]

शरीरमेव केवलमात्रं कार्यं करोति। तद्धि मनुष्यशरीरं काव्यशरीरं वा। शरीरं भवति काव्यस्य बहिरङ्गविषयः। यः काव्यस्य स्वरूपं तथा काव्यशरीरस्य विषयं प्रकाशयति। अतः सर्वे आलङ्कारिकाः काव्यस्य लक्षणविषये यत्नं कृतवन्तः। अस्मिन् प्रसङ्गे काव्यादर्शग्रन्थे आचार्यदण्डिना उक्तम् –

**"पूर्वशास्त्राणि संहृत्य प्रयोगानुपलभ्य च।**
**यथासामर्थ्यमस्माभिः क्रियते काव्यलक्षणम्॥"**[23]

संस्कृतालङ्कारशास्त्रे काव्यशरीरविषये द्वे मते स्तः। यथा –

(क) शब्दार्थोभयप्राधान्यवाद्यालङ्कारिकाणां मतम्।

(ख) शब्दप्राधान्यवाद्यालङ्कारिकानां मतम्।

**(क) शब्दार्थोभयप्राधान्यवाद्यालङ्कारिकानां मतम् –**

**'शब्दार्थशरीरं तावत् काव्यम्।'**

संस्कृतालङ्कारशास्त्रे ये शब्दार्थौ एव काव्यशरीरम् – इति स्वीकुर्वन्ति ते हि शब्दार्थप्राधान्यवाद्यालङ्कारिकाः। एतन्मतानुसारिभिः आलङ्कारिकैः कृतं काव्यस्वरूपं विचार्यते अधुना।

(१) **भामहाचार्यः** - काव्यशरीरविषये प्रथमं वदति भामहाचार्यः। तस्य मते काव्यस्य लक्षणं यथा -

**'शब्दार्थौ सहितौ काव्यम्।'**[24]

अर्थात् शब्दार्थयोः साहित्यं हि काव्यम्। अतः तस्य मते काव्यशरीरं भवति शब्दार्थौ।

(२) **वामनाचार्यः** - अष्टमशतकीयः वामनाचार्यः काव्यस्य लक्षणे काव्यशरीरविषये कथयति –

**'काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते।'**[25]

अर्थात् काव्यशब्देन गुणालङ्काराभ्यां संस्कृतौ शब्दार्थौ इति बोध्यते।

(३) **आनन्दवर्धनाचार्यः** -नवमशतकस्य आलङ्कारिकः आनन्दवर्धनाचार्यः ध्वन्यालोकग्रन्थस्य प्रणेता आसीत्। यः एकः शब्दार्थवाद्यालङ्कारिकः। तेन काव्यलक्षणे उक्तम् –

**'सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यलक्षणम्।'**[26]

अर्थात् सहृदयस्य हृदये आह्लादप्रदानकारिणौ शब्दार्थौ एव काव्यम्।

(४) **कुन्तकाचार्यः** -कुन्तकाचार्योऽपि काव्यस्य शरीरविषये शब्दार्थौ स्वीकरोति। तेन काव्यलक्षणप्रसङ्गे उक्तम् –

**"शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।**
**बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि॥"**[27]

अर्थात् विचित्रव्यापारसमन्वितौ, आह्लादजनकौ शब्दार्थौ एव काव्यम्।

(५) **मम्मटाचार्यः** - मम्मटाचार्यस्य मते काव्यलक्षणं यथा –

**"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।"** [28]

अर्थात् दोषहीनौ, गुणयुक्तौ क्वचिद् अलङ्काररहितौ शब्दार्थौ काव्यं भवति। अतस्तेन शब्दार्थौ इति काव्यशरीरत्वेन स्वीकृतौ।

अतः एते पञ्च आलङ्कारिकाः काव्यलक्षणे शब्दार्थौ एव काव्यम् – इति स्वीकुर्वन्ति। ते शब्दार्थयोः नित्यसम्बन्धं स्वीकुर्वन्ति। कारणं केवलमात्रं शब्दः अर्थः वा काव्यं न भवितुमर्हति। अतः महाकविना कालिदासेनापि शब्दार्थयोः वन्दनाय उक्तं –

**"वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥"**[29]

**(ख) शब्दप्राधान्यवाद्यालङ्कारिकानां मतम् –**

**'शब्द एव काव्यम्।'**

संस्कृतालङ्कारशास्त्रे ये शब्द एव काव्यम् – इति स्वीकुर्वन्ति ते शब्दप्राधान्यवाद्यालङ्कारिकाः।

---

[21] काव्यालङ्कारः, पत्राङ्कः – १३

[22] कुमारसम्भवम्, पत्राङ्कः – १३२

[23] काव्यादर्शः, पत्राङ्कः – ३

[24] काव्यालङ्कारः, पत्राङ्कः – १६

[25] काव्यलङ्कारसूत्रवृत्तिः, पत्राङ्कः – ६३

[26] ध्वन्यालोकः, पत्राङ्कः – ११

[27] वक्रोक्तिजीवितम्, पत्राङ्कः - १३

[28] काव्यप्रकाशः, पत्राङ्कः - ५४

[29] रघुवंशम्, पत्राङ्कः – ३३

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

उपर्युक्तालङ्कारिकाणां मध्ये ये शब्दप्राधान्यवादिनः सन्ति तेषां काव्यस्वरूपमाध्यमेन शब्द एव काव्यम् – इति विचारणीयम्। अतः तेषां मते शब्द एव काव्यस्य शरीरम्।

(१) **आचार्यदण्डी** - आचार्यदण्डी शब्दप्राधान्यवादी आलङ्कारिकः। तेन काव्यलक्षणे उक्तम् –

**"तैः शरीरञ्च काव्यानामलङ्काराश्च दर्शिताः।**
**शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली॥"**[30]

अर्थात् पूर्वाचार्याः यथाक्रमं काव्यशरीरविषये तथा अलङ्कारादिविषये विस्तृतमालोचितवन्तः। आचार्यदण्डिनः मते चमत्कृतिबहुललोकोत्तराह्लादजनक-मनोरमार्थैः विभूषिता पदसमष्टिः एव काव्यशरीरम्।

(२) **जयदेवाचार्यः** - दण्डिनः बहुपरं 'शब्द एव काव्यम्' – इति वदति द्वादशशतकस्य जयदेवाचार्यः। तेन चन्द्रालोकग्रन्थे काव्यस्वरूपप्रसङ्गे उक्तम्–

**"निर्दोषा लक्षणवती सरीतिर्गुणभूषणा।**
**सालङ्काररसानेकवृत्तिर्वाक्काव्यनामभाक्॥"**[31]

अर्थात्, या निर्दोषा लक्षणवती गुणभूषणा सालङ्काररसानेकवृत्तियुक्ता वाक्, या शब्दनिष्ठत्वयुक्ता तत् काव्यं भवितुमर्हति।

(३) **विश्वनाथकविराजः** - त्रयोदशशतके विश्वनाथकविराजः एकः शब्दप्राधान्यवाद्या-लङ्कारिकः, तेन काव्यलक्षणे उक्तम् –

**'वाक्यं रसात्मकं काव्यम्।'**[32] अर्थात्, रसयुक्तवाक्यमेव काव्यम्।

(४) **आलङ्कारिकः श्रीकेशवमिश्रः** -षोडषशतकस्य अपरः एकः शब्दप्राधान्यवाद्यालङ्कारिकः हि श्रीकेशवमिश्राचार्यः। तेन अलङ्कारशेखरग्रन्थे काव्यस्वरूपप्रसङ्गे उक्तम् –

**'काव्यं रसादिमद्वाक्यं श्रुतं सुखविशेषकृत्।'**[33]**४२**

अर्थात्, यस्य रसादियुक्तवाक्यस्य श्रवणात् सुखमुत्पद्यते, तद्धि काव्यम्। अस्मिन् काव्यलक्षणविषये विश्वनाथस्य योग्योत्तरसूरिः श्रीकेशवमिश्रः आसीत्।

(५) **जगन्नाथाचार्यः** - सप्तदशशतकस्य एकविंशिष्टः शब्दप्राधान्यवाद्यालङ्कारिकः जगन्नाथाचार्यः आसीत्। यः हि शब्दप्राधान्यवादिनां मध्ये प्रकृष्टः तथा मूर्धन्यः आलङ्कारिकः। तेन रसगङ्गाधरग्रन्थे काव्यस्य लक्षणविषये उक्तम् –

**'रमणीयार्थप्रतिपादकः शब्दः काव्यम्।'**[34]

अर्थात्, रमणीयार्थस्य प्रतिपादकः शब्दः हि काव्यम्। अत एव तस्य 'शब्द एव काव्यम्' – इति मतं प्रतिष्ठितम्।

**समीक्षा**

**"योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः।**
**वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ॥"**[35]

मया उपर्युक्ताः पञ्च शब्दार्थवाद्यालङ्कारिकाः तथा पञ्च शब्दप्राधान्यवाद्यालङ्कारिकाः आलोचिताः। तेषां मध्ये काव्यशरीरविषये काव्यलक्षणं किम् ? – एतत्प्रसङ्गे आलङ्कारिकाणां मध्ये मतविरोधाः सन्ति। तर्हि इदानीं प्रश्नो भवति – केवलमात्रं शब्द एव काव्यम्, उत शब्दार्थौ एव काव्यशब्देन अभिधीयेते?

प्रसङ्गेऽस्मिन् वयं शब्दप्राधान्यवादिनां मतमग्रे विचारयामः। कारणं केवलमात्रं ये आलङ्कारिकाः शब्द एव काव्यं मन्वते ते अर्थप्राधान्यं लक्ष्यीकृत्य ईदृशमुक्तवन्तः। यदा कस्यापि अर्थस्य चिन्तनं कुर्म्मः, तदा तस्य अर्थस्य वाचकशब्दस्य ज्ञानं भवति। अतः शब्दः एव ज्ञानमात्रप्रकाशकः। किन्तु यैः मन्यते अर्थज्ञानं केनापि रूपेण भवति। यथा – प्रत्यक्षेण, अनुमानेन, स्मरणेन, वाचकशब्दज्ञानेन वा। तैः ईदृशी कल्पना अयौक्तिकी।

इदानीं जयदेवेन रचितं गीतगोविन्दम् – इति महाकाव्यस्यालोचना भविष्यति। पदस्य सौकुमार्येण, छन्दसः लालित्येन, प्रकाशभङ्ग्या साधारणपाठकस्य हृदयं विमोहितं करोति। श्रोता तस्मिन् समये जयदेवस्य कवितायाः अर्थं विस्मरति। साधारणगीतगोविन्दस्य श्रोतारं पाठकं वा यदि कोऽपि प्रश्नं पृच्छति – महाशय ! जयदेवस्य अस्याः कवितायाः कोऽर्थः बोध्यते। तदा तस्माद् यदुत्तरमागच्छति तद्धि - ' **शब्दः श्रुतोऽर्थो न**

[30] काव्यादर्शः, पत्राङ्कः – १४
[31] चन्द्रालोकः, पत्राङ्कः – ८
[32] साहित्यदर्पणः, पत्राङ्कः – १७
[33] अलङ्कारशेखरः, पत्राङ्कः – ६
[34] रसगङ्गाधरः, पत्राङ्कः – ४६
[35] ध्वन्यालोकः, पत्राङ्कः – ३९

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

**ज्ञातः।**' अर्थात् अहं केवलं शब्दं शृणोमि अर्थं प्रति लक्ष्यं न करोमि।

पुनः यदा आदिकविवाल्मीकेः कण्ठात् क्रौञ्चवियोगजनितशोकेन अकस्मात् यः श्लोकः आगतवान्, तदा स स्वयं प्रश्नं करोति – अहो ! क्रौञ्चाः शोकेन शोकार्तुः अहं किमुच्चारणं कृतवान् - ' **किमिदं व्याहृतं मया।**' आदिकवेः ईदृशं कौतूहलं मनुष्यान् निकषा अस्मिन् युगान्तरेऽपि चलति। अतः वयं वदिष्यामः यत्, वाल्मीकिमुनिः यान् शब्दान् उच्चरितवान्, तस्य अर्थानुधावनमेव कौतूहलम्। अपि च सः अर्थः तिष्ठति शब्दे सम्पृक्तभावेन, न तु पृथग्भावेन।

प्राचीनकाले दण्डीभामहयोः द्वयोः आलङ्कारिकयोः मध्ये समयकालविषये मतविरोधो दृश्यते। तदनुसारं तयोः काव्यशरीरविषये द्वे मते दृश्येते। आचार्येण भामहेन उक्तम् – "**शब्दार्थौ सहितौ काव्यम्।**"
अर्थात् शब्दं अर्थञ्च मिलित्वा काव्यं भवति। अपरैकेण आलङ्कारिकेण दण्डिना उक्तम् –

"**शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली।**"

तस्मिन् समये दण्डिनः काव्यशरीरविषयमतं सुदृढं करोति अग्निपुराणम्। अस्य अग्निपुराणस्य काव्यलक्षणं यथा –

"**संक्षेपाद्वाक्यमिष्टार्थव्यवच्छिन्ना पदावली।**
**काव्यं स्फुरदलङ्कारं गुणवद्दोषवर्जितम्॥**"[36]

शब्दप्राधान्यवादिनां मते अर्थो हि काव्यस्य आत्मा, यः शरीररूपशब्दस्य मध्ये तिष्ठति। किन्तु द्वौ न भिन्नम्। जीवस्य शरीरं तदा मूल्यं भवति यदा तेषु आत्मा वर्तते। अपि च यदि शरीरम् आत्मा च भिन्नं भवति तर्हि एकः निर्जीवः अन्यः अस्तित्वहीनः भवेत्। अतः शब्दप्राधान्यवादिनां मते शब्दार्थयोर्मध्ये सम्बन्धो भवति यथा - '**तिलेषु तैलम्।**'

वयं प्रायशः पश्यामः यत्, शब्दप्राधान्यवादिनः शब्दार्थवादिनां मतस्य खण्डनं कुर्वन्ति, किन्तु शब्दार्थवादिनः शब्दप्राधान्यवादिनां मतस्य खण्डनं कर्तुं प्रायशः न दृश्यते। अतः वयं चेष्टां कुर्म्मः यत्, शब्दप्राधान्यवादिजगन्नाथस्य मते –

"**रमणीयार्थप्रतिपादकः शब्दः काव्यम्।**" – इति केन उपायेन प्रमाणं करोति।

पण्डितराजजगन्नाथादयः प्रमुखालङ्कारिकाः काव्यपदस्य अभिधेयार्थः हि शब्दः मन्यन्ते। अस्मिन् प्रसङ्गे प्राचीनशब्दार्थवादिनां मतं न स्वीकुर्वन्ति। तेन मन्यते –

"**काव्यम् उच्चैः पठ्यते, काव्यादर्थोऽवगम्यते, काव्यं श्रुतम् अर्थो न ज्ञातः।**"[37]

अर्थात्, काव्यम् उच्चैःस्वरेण पठ्यते, काव्याद् अर्थः ज्ञायते, काव्यं केवलमात्रं शृणोमि किन्तु अर्थबोधो न भवति इत्यादि-सार्वजनीनव्यवहारात् प्रतिपाद्यते यत्, काव्यपदस्य अर्थः शब्दविशेषः, शब्दार्थौ उभौ न। शब्दार्थौ उभयस्थले काव्यशब्दस्य शक्तिः वर्तते – इति मतं प्रत्याख्यातम्। अपि च शब्दः एव काव्यपदस्य अर्थः विवेच्यते। अतः तस्य लक्षणं करणीयम्, न तु स्वकल्पितकाव्यपदार्थस्य लक्षणम्। शब्दार्थौ उभौ काव्यशब्दस्य प्रतिपाद्यार्थौ, न पृथग्भावेन काव्यशब्दस्य प्रतिपाद्यार्थः? प्रथममतं न ग्रहणयोग्यम्। कारणं कदापि एकस्य द्वित्वं न सम्भवति। अतः ईदृशं वाक्यं न लोकवाक्यं भवति। यद्यपि इदं वाक्यं समीचीनं तथापि द्वितीयमतं न ग्रहणयोग्यम्। कारणं एकेन पद्येन द्विविधस्य काव्यस्यापत्तिः घटिष्यते। यथा- एकः शब्दमयः, अपरः हि अर्थमयः। अतः वेदपुराणादिलक्षणस्य तुल्यं काव्यलक्षणं शब्दाश्रितमेव युक्तियुक्तम्। अत एव, शब्दः हि शब्दः एव काव्यं वा। काव्यपदार्थस्य शब्दः एव मुख्यः, अर्थो हि अप्रधानः विशेषमात्रम्। अतः भट्टनायकेन उक्तम् –

"**शब्दप्राधान्यमाश्रित्य तत्र शास्त्रं पृथग्विदुः।**"

**उपसंहारः**

"**सङ्गीतमथ साहित्यं सरस्वत्याः स्तनद्वयम्।**
**एकमापातमधुरमन्यदालोचनामृतम्॥** "[38]

काव्यशरीरविषये कथं मयालोचितं कथं न आत्मविषये? अस्य कारणं हि काव्यस्यात्मविषये प्राचीनकालात् बहुतर्काः विद्यन्ते। यथा - कोऽपि उक्तवान् – काव्यस्य आत्मा किमपि नास्ति, काव्यस्य मूलविषयः हि

---

[36] अग्निपुराणम्, पत्राङ्कः – ७००

[37] रसगङ्गाधरः, पत्राङ्कः – ५०

[38] साहित्यदर्पणः, पत्राङ्कः – १

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

आलङ्कारिकरूपसज्जा। पुनः कोऽपि उक्तवान् – काव्यस्य आत्मा रीतिः। केनापि गुणः, केनापि रसः इत्यादयः काव्यस्य आत्मा – इति उक्तानि। अतः काव्यस्य आत्मविषये वैसादृश्यं वैमत्यं वा दृश्यते। अपि च यत्र काव्यस्य शरीरं हि द्वे तत्र आत्माधिकं स्थास्यन्ति। तत्रापि अतिदोषेण दुष्टं भवेत्। अतः मया चिन्तितम् एषः विषयः अप्रासङ्गिकः। अपि च एषः काव्यशरीरविषयः अतीवचर्चायाः विषयः। अतः **'शब्दः एव काव्यम्'** – एतस्य मतस्य प्रतिष्ठायै केवलं प्रयासं कृतवान्। अतः वयं महाकविकालिदासस्य सुरेण वदामः –

**"पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम्।**
**सन्तः परीक्ष्यान्यतरद् भजन्ते मूढ पर-प्रत्यय-नेय-बुद्धिः॥"**[39]

## सहायकग्रन्थसूची


- मम्मटाचार्यः। (२०१६)। काव्यप्रकाशः। खण्डूडी, सत्यनारायणशास्त्री (सम्पा.)। वाराणसी : चौखम्बा कृष्णदास अकादमी।
- मम्मटाभट्टः। (२०१७)। काव्यप्रकाशः। वसुन्यायतीर्थः, सुमिता (सम्पा.)। कोलकाता : सदेश।
- मम्मटाचार्यः। (१४२४ वङ्गाब्दः)। काव्यप्रकाशः। पालः, विपदभञ्जनः (सम्पा.)। कोलकाता : संस्कृत पुस्तक भाण्डार।
- मम्मटाचार्यः। (२०२१)। काव्यप्रकाशः। भट्टाचार्यः, श्यामापदः (सम्पा.)। कलकाता : संस्कृत वुक डिपो।
- मम्मटाचार्यः। (२०२१)। काव्यप्रकाशः। जाना, सुनिलकुमारः (सम्पा.)। कलकाता : संस्कृत वुक डिपो।
- (२०१४)। उपनिषद्। गोयेन्दका, हरिकृष्णदासः (सम्पा.)। गोरक्षपुर : गीताप्रेस।
- (२०१५)। उपनिषद् समग्र। अवधूत, कालिकानन्दः (सम्पा.)। कलकाता : गिरिजा।
- आनन्दवर्धनाचार्यः। (२०२१)। ध्वन्यालोकः। चक्रवर्ती, सत्यनारायणः (सम्पा.)। कोलकाता : संस्कृत पुस्तक भाण्डार।
- आनन्दवर्धनः। (२०२०)। ध्वन्यालोकः। द्विवेदी, शिवप्रसादः (सम्पा.)। वाराणसी : चौखम्बा सुरभारती प्रकाशन।
- वामनाचार्यः। (२०१६)। काव्यालङ्कारसूत्रवृत्तिः। वसु, सुमिता (सम्पा.)। कलिकाता : सुव्रत पुस्तकालय।
- भरतमुनिः। (२०१८)। नाट्यशास्त्रम्। मुखोपाध्यायः, अञ्जलिका (सम्पा.)। कलकाता : संस्कृत पुस्तक भाण्डार।
- भरतमुनिः। (२०१७)। नाट्यशास्त्रम्। रस्तोगी, सुधा (सम्पा.)। वाराणसी : चौखम्बा कृष्णदास अकादमी।
- राजशेखरः। (२०१०)। काव्यमीमांसा। वन्द्योपाध्यायः, उदयचन्द्रः (सम्पा.)। कलकाता : संस्कृत वुक डिपो।
- चाणक्यः। (२०१४)। चाणक्यनीति। वन्द्योपाध्यायः, तीर्थङ्करः (सम्पा.)। कलकाता : साहित्य तीर्थ।
- दण्डि। (२०१९)। काव्यादर्शः। पाठकः, यमुना (सम्पा.)। वाराणसी : चौखम्बा कृष्णदास अकादमी।
- दण्डि। (२०१४)। काव्यादर्शः। वसु, अनिलचन्द्रः (सम्पा.)। कलकाता : संस्कृत वुक डिपो।
- श्रीविष्णुपदभट्टाचार्यः। (१९६०)। साहित्यमीमांसा। कलकाता : विश्वभारती ग्रन्थालय।
- श्रीविष्णुपदभट्टाचार्यः। (२०२१)। काव्यमीमांसा। कलकाता : संस्कृत वुक डिपो।


[39] मालविकाग्निमित्रम्, पत्राङ्कः – ३

ISSN : 2583-2271
Vol. - 3, No. 1: 2023


- जीवेन्द्रसिहरायः। (१९८६)। काव्यतत्त्व। कलकाता : देज पावलिशिम्।
- २०. सुधीरकुमारदाशगुप्तः। (२०२०)। काव्यालोक। कलकाता : देज पावलिशिम्।
- कुन्तकाचार्यः। (२०२०)। वक्रोक्तिजीवितम्। पाण्ड्ये, परमेश्वरदीन (सम्पा.)। वाराणसी : चौखम्बा सुरभारती प्रकाशन।
- राजानककुन्तकः। (२०१६)। वक्रोक्तिजीवितम्। मुखोपाध्यायः, अञ्जलिका (सम्पा.)। कोलकाता : सदेश।
- क्षेमेन्द्रः। (२०२०)। औचित्यविचारचर्चा। त्रिपाठी, रमाशंकरः (सम्पा.)। वाराणसी : चौखम्बा कृष्णदास अकादमी।
- विश्वनाथकविराजः। (२०१३)। साहित्यदर्पणः। मुखोपाध्यायः, विमलाकान्तः (सम्पा.)। कलकाता : संस्कृत पुस्तक भाण्डार।
- विश्वनाथकविराजः। (१४१९ वङ्गाब्दः)। साहित्यदर्पणः। पालः, विपदभञ्जनः (सम्पा.)। कोलकाता : सदेश।
- विश्वनाथकविराजः। (२०१८)। साहित्यदर्पणः। शास्त्री, कृष्णमोहनः (सम्पा.)। वाराणसी : चौखम्बा संस्कृत संस्थान।
- जगन्नाथः। (२०१७)। रसगङ्गाधरः। झा, मदनमोहनः (सम्पा.)। वाराणसी : चौखम्बा विद्याभवन।
- जगन्नाथाचार्यः। (२०१७)। रसगङ्गाधरः। घोषः, विद्युतवरणः (सम्पा.)। कोलकाता : पश्चिमवङ्ग राज्य पुस्तक पर्षद्।
- Panditaraja Jagannatha. (२०१८). Rasagangadhara Chatterjee, Chimayi (Editor). Kolkata : The Asiatic Society
- महाकविकालिदासः। (१४२२ वङ्गाब्दः)। रघुवंशम्। भट्टाचार्यः, जनेशरञ्जनः (सम्पा.)। कलकाता : वि.एन.पावलिकेशान्।
- वेदव्यासः। (२०१६)। अग्निपुराणम्। गोरक्षपुर : गीताप्रेस।
- जयदेवाचार्यः। (२०१९)। चन्द्रालोकः। त्रिपाठी, कृष्णमनणिः (सम्पा.)। वाराणसी : चौखम्बा सुरभारती प्रकाशन।
- श्रीकेशवमिश्रः। (२०१८)। अलङ्कारशेखरः। झा, शशीनाथः (सम्पा.)। दिल्ली : नाग प्रकाशन।
- भामहाचार्यः। (२०२१)। काव्यालङ्कारः। शर्मा, रामानन्दः (सम्पा.)। वाराणसी : चौखम्बा संस्कृत सीरीज आफिस।
- महाकविकालिदासः। (२०१८)। कुमारसम्भवं महाकाव्यम्। मालवीयः, सुधाकरः (सम्पा.)। वाराणसी : चौखम्बा कृष्णदास अकादमी।
- महाकविकालिदासः। (१८४६)। मालविकाग्निमित्रम्। परवः, काशीनाथपाण्डुरङ्गः (सम्पा.)। वोम्वे : निर्णयसागरप्रेस।

# मनुसंहितायां मानववादः

**नवकुमार-पण्डा**
**सर्वदर्शनविभागः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयः**
**श्रीविहारः, पुरी**

**प्रबन्धसारः**

*मनुवंशोद्भवाः मानवाः भवन्तीति सर्वजनविदितम्। तथापि स एव मानवाख्यः भवति यस्तु मानवीयगुणानामधिकारी भवति। शास्त्रोक्तसिद्धान्तानुसारं दया-मैत्री-सद्भावना-परोपकारसेवादय उत्तमगुणा यस्मिन् समवेताः दृश्यन्ते स एव मानवपदवाच्यः भवति। यदि तस्मिन् ईर्ष्या-द्वेष-हिसादयः परिलक्ष्यन्ते तर्हि सः मानवशरीरधारी दानवः इत्युच्यते। मानवीयगुणानां विकासे, संरक्षणे, प्रसारणे, व्यवहारिकतायाः सम्पादने च यानि प्रत्यक्षभूमिकां निर्वहन्ति तानि मानवीयमूल्यपदसंज्ञकानि भवन्तीति ज्ञातव्यम्। मानवं मानवत्वेन प्रतिष्ठापयितुं या शिक्षा अपेक्षिता सैव मूल्यभित्तिकशिक्षापदेनाभिधीयते। परन्तु सारांशरूपेण वक्तुं शक्यते यत् मानवीयगुणानां विकसनम् अयुक्तप्रवृत्तीनां नियन्त्रणम् अभीष्टदिशि प्रेरणं वा मानवीयाधिगमः अवबोधः आचरणं प्रचारश्चेति मानवीयमूल्यबोधः भवति।****

*आलस्यं मानवतां हन्ति, श्रमात् बिभेति जनः, यदा परिश्रमं विना धनादिकं प्राप्तुमिच्छति तदा तस्मिन् दानवगुणाः समायान्ति तदा स मानवतां विस्मरति। अन्यायेनोपार्जिता लक्ष्मीः पापलक्ष्मी उच्यते सा मानवान् नीतिभ्रष्टान् करोति। तर्हि मानवानां मध्ये विश्वबन्धुतास्थापनार्थम् अपि च मानवजीवनस्य सफलताप्राप्त्यर्थं बहवः नीतिश्लोका विरचिताः। तेषां श्लोकानाम् उपादेयता अद्यापि परिलक्ष्यते -*

*अयं निजः परो वेति गणना लघुचेतसाम्।*
*उदारचरितानां तु वसुधैव कुटुम्बकम्।*[#]

*अर्थात् लघुचिन्तकाः जनाः निजत्व-परत्व-भावनया जगत् पश्यन्ति, परन्तु उदारचिन्तकाः जनाः समग्रं विश्वम् एकं कुटुम्बवत् पश्यन्ति। तेषां मनसि स्वार्थचिन्तनं न वर्त्तते, सर्वदा परार्थाय जीवनम् उत्सर्गीकुर्वन्ति। यथा परोपकारः स्वर्गाय पापाय परपीडनम्।*[*#] *इदं ध्येयवाक्यं जीवनस्य मन्त्ररूपेण ते मन्यन्ते। हिसा तु सर्वथा पापाय कल्पते। अहिसा तु केवलं धर्माय एव।*

**कुञ्चीशब्दाः** - मानववादः, मनुस्मृतिः, याज्ञवल्कस्मृतिः, सदाचारः, सत्यम्, नैतिकता, सन्मार्गः चेत्यादयः

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

**उपोद्घातः-**

धृञ् धारणपोषणयोः इत्यस्मात् धातोः निष्पन्नः धर्मशब्दः मानववाददर्शनस्य प्रतिरूपं वर्त्तते। धर्मशास्त्रीयग्रन्थेषु मानवजीवनस्य व्यवहारिकपक्षस्य प्राधान्यं द्रष्टुं शक्यते। शास्त्रेऽस्मिन् यत्र कुत्रापि परोक्षरूपेण प्रत्यक्षरूपेण वा मानवीयमूल्यानि चर्चितानि दृश्यन्ते। मनुना यानि दशविधधर्मलक्षणानि प्रतिपादितानि तानि सर्वाण्येव मानवीयमूल्यावबोधस्य अंशविशेषरूपाणि भवन्ति। आचारः परमो धर्मः, कर्त्तव्यपालनं धर्मः, सेवा एव धर्म उच्यते इत्यादयः याः धर्मस्य एकाङ्गपरिभाषाः परिभाषिताः ताः सर्वाः उत्तममानवीयमूल्यविशेषाः एव।[1]

भारतीयशास्त्रवैभवमन्थनेन ज्ञायते यत् सम्पूर्णा संस्कृतिः मानवीयगुणाश्रयिणी वर्त्तते। तेषु शास्त्रविभवेषु मनुसंहिता धर्मशास्त्रं च विशिष्टस्थानं भजते। धर्मशास्त्रोक्ततत्त्वानां परिशीलनेन ज्ञायते यत्

---

* मा. व. द. पु – २६१
# हि. उप - १ / ६९
*# ईशा. - ६
[1] मनुस्मृ. - १/१०८

व्यवस्थितसमाजनिर्माणे उत्तमव्यक्तित्वनिर्माणे वा शास्त्रमिदं सर्वदा प्रयतते। परन्तु आलोचनाप्रसङ्गानुसारं मनुसंहितायां धर्मशास्त्रदृष्ट्या मानवीयमूल्यानि विश्लिष्टानि भवेयुः। अतः सर्वादौ ज्ञातव्यं यत् मानवीयमूल्यबोधस्य विभिन्नाङ्गानि कानि भवन्तीति। मानववादस्य मूल्यबोधस्य अङ्गानि तावत् -

१. सदाचारस्य पालनम्, २. नैतिकतायाः अभिवृद्धिः ३. सत्यस्य परिपालनं सन्मार्गानुश्रयणं च, ४. सामाजिकभावनायाः समावेशः, ५. कर्त्तव्यपालने तत्परशीलता, ६. सेवा-परोपकारदीनां कर्मणां कृते समर्पणभावना, ७. आध्यात्मिकचेतनायाः जागरणम् ८. लौकिकालौकिकज्ञानप्राप्तिः, ९. चारित्रिकविकासः, १०. नैष्ठिकतायाः समावेशः, ११. हिसा-द्वेष-क्रोध-परपीडनादीनाम् अवहेलनम्, १२. आत्मसंयमनिमित्तं कौशलसम्प्राप्तिः चेत्यादीनि मानवीयमूल्यवबोधस्याङ्गानि मानवे यदि परिदृष्टानि स्युः तर्हि सः मानवीयमूल्यानामधिकारी भवतीति ज्ञातव्यम्। अधुना विभिन्नमानवीयमूल्यानां विकसने मनुसंहिताया निर्देशः आलोच्यते -

**(क) सदाचारस्य परिपालनम्** - धर्मशास्त्रं तु आचार-विचार-प्रायश्चित्तभेदेन प्रकरणत्रयपर्यवसितं वर्त्तते। आचारस्तु सकारात्मकः सांस्कृतिकहितसाधकः, मानवीयगुणानां विकाससाधकश्च वर्त्तते, उच्यते हि सदाचारस्य लक्षणम्-

यस्मिन् देशे य आचारः पारम्पर्यक्रमागतः।
वर्णानां सान्तरालानां स सदाचार उच्यते ।[2]

स एव आचारः परम्पराङ्गविशेषः भवितुमर्हति यस्तु समाजं, संस्कृतिं, मानवतां वा अग्रे सारयितुं क्षमः भवति। यदि एतादृशः उत्तमाचारः वंशानुक्रमिकानुसारम् एतावत् पर्यन्तं अस्माकं पुरतः दृश्यते तर्हि स एव सदाचार उच्यते। एवं वर्णचतुष्टये आश्रमचतुष्टये च सदाचारविषये मनुस्मृतौ याज्ञवल्कस्मृतौ च प्राप्यते।

**(ख) सत्यस्य परिपालनं सन्मार्गश्रयणं वा** - सत्यमित्युक्ते न केवलं सत्यसम्भाषणमपितु सन्मार्गश्रयणमपि अवगम्यते। भारतसर्वकारस्य ध्येयवाक्यं **सत्यमेव जयते नानृतमि**ति उपनिषद् वाक्यं योगदर्शने त्रिकालबाधरहितं सत्यं महात्मगान्धिनः सत्याग्रहः अपि च महात्मबुद्धस्य अष्टाङ्गमार्गेषु सत्यम् इत्यादिकं सत्यस्य महत्त्वमुद्घोषयति। एतत्सर्वं कल्पनामकस्य वेदाङ्गस्य अंशविशेषः इति ज्ञातव्यम्। सत्यसम्भाषणेन सत्यपरिपालनेन वा समाजः सुव्यवस्थितः भवति, एवं मानववादमूल्यं च प्रतिष्ठापितं भवति।

**(ग) सामाजिकभावनायाः समावेशः** - समाजस्य चतुरङ्गत्वेन चतुर्वर्णाः परिकल्पिताः, कश्चन स्वकर्म सम्पादयति इत्युक्ते समाजहिताय आत्मानं समर्पयति इति ज्ञातव्यम्। सामाजिकदायित्वस्य निर्वहणं, समाजस्य विरुद्धाचरणेन दण्डविधानादिकं धर्मशास्त्रादौ प्राप्तुं शक्यते।

**(घ) नैतिकतायाः अभिवृद्धिः**- नयेन कर्तव्यसम्पादनं नीतिः इत्युच्यते, नैतिकतायाः विकासः मानववादस्य महत्त्वं सम्पादयति। नैतिकतायाः पालनार्थम् अभिप्रेरणम् अनैतिकतायाः आचरणेन च प्रायश्चितविधानम् उक्तमस्ति, नैतिकतायाः अभिवृद्धिः भवति चेत् समाजे मानववादः भवितुमर्हति।

**(ङ) उत्तमव्यक्तित्वनिर्माणम्** - व्यक्तित्वमित्युक्ते कस्यचन आन्तरिकाभिवृत्तिः, शारीरिकक्षमता दक्षतादयश्चान्तर्भवन्ति। परन्तु योगदर्शने उत्तमव्यक्तित्वनिर्माणे आभ्यन्तरीणशौचस्य महत्त्वम् आधिक्येन दर्शितम्। पुनश्च सांख्ये सत्त्वं, रजः, तमश्चेति गुणत्रयेषु सत्त्वगुणस्य महानीयता अधिका वर्त्तते। रजस्तमसि अभिभूय सत्त्वस्य उद्रेकेण उत्तमव्यक्तित्त्वं परिस्फुटति। अतः उत्तमव्यक्तित्त्वनिर्माणात्मकं मानववादं मनुसंहितायां प्रामुख्येन अवाप्यते।

**(च) आदर्श चरित्रनिर्माणम्** - मनुना उक्तम्-

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ।[3]

मनुप्रोक्तधर्मशास्त्रेण शासितस्य भारतवर्षस्य संस्कृतौ चरित्रस्य महत्त्वपूर्णस्थानं निर्धारितं वर्त्तते। एतस्य पराकाष्ठया प्रभाविताः एतस्मादेव चारित्र्यशिक्षां लभन्ते। धर्मशास्त्रेषु अनुलोमप्रतिलोमादिविवाहपरम्पराः,

[2] याज्ञवल्कः- ६

[3] मनुस्मृ. - २१

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

पतिपत्न्यादिधर्माः, परदारविवर्जनं, व्यभिचारदोष-राहित्यं च वर्त्तते।

**उपसंहारः** - अनन्तरं सम्पूर्णा भारतीया संस्कृतिः धर्मशास्त्रेणैव पल्लविता पुष्पिता च वर्त्तते। एतस्याः संस्कृतेः मूलं वर्त्तते मानवीयमूल्यबोधः। साम्प्रतिकसमाजे परिदृष्टानां सर्वेषां समस्याविशेषाणां मूलकारणं भवति मानवीयमूल्यानां ह्रासः। अतः मनुसंहितायां तत्त्वानामाधारेण मानववादस्य पुनः स्थापनं भवितुमर्हति।

## सहायकग्रन्थसूची


- मानवदर्शनम् - भारतीयविचार मञ्च, दिल्ली, २०१४
- हितोपदेश : - मनोजपब्लिकेसन्, दिल्ली, २०२१
- ईशावास्योपनिषद् :- श्री सुन्दरानन्दविद्याविनोदः, ढाका, १९८९
- मनुस्मृति :- चौखम्वासंस्कृतसीरिज्, वारणासी, २०२०
- याज्ञवल्कस्मृति :- परिमलपब्लिकेसन्, दिल्ली, २०१८

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# संस्कृतोपलब्धौ बुद्धेः प्रभावः

**चन्दन-पालः**
**शोधच्छात्रः, राष्ट्रियसंस्कृतविश्वविद्यालयः**
**तिरुपतिः, अन्ध्रप्रदेशः**

---

**प्रबन्धसारः**

*मानवानां प्राणिसमूहस्य च अन्तर्निहितशक्तीनां बहिःप्रकाशस्य माध्यमं भवति भाषा। प्राचीनभाषा भवति संस्कृतम्। संस्कृतं भवति सर्वासु भाषासु प्राचीना सर्वोत्तमा च। संस्कृतभाषाविषयकं शिक्षाग्रहणं भवति संस्कृतशिक्षणम्। प्राचीनकाले संस्कृतशिक्षा प्रकृतेः सुरम्यवातावरणे गुरुकुलेषु आश्रमेषु च प्रदीयते स्म। अन्तेवासिनः गुरुगृहे निवासं कुर्वन्ति स्म। तदानीन्तकाले शिक्षायाः मूलविषयः आसीत् श्रुतेरभ्यासः। अद्यतनसमये समाजे संस्कृतस्य गुणवत्ताह्रासस्य मुख्यकारणं भवति दोषपूर्णशिक्षणपद्धतिः। येन संस्कृत-भाषायाः मौलिकतायाः, सरलतायाः, सरसतायाः, सहजतायाः तथा समुचितबोधगम्यतयाः ह्रासो भवति। प्राचीनकाले छात्राः गुरुगृहे गुरुवचनं श्रुत्वा एव विषयम् अवगच्छन्ति स्म। अध्यापकस्य मूललक्ष्यं भवति छात्राणाम् अन्तर्निहितशक्तीनां बहिःप्रकाशनम्। छात्राणाम् अधीतविषयः अधिगतः भवति चेत् बुद्धेः विकासो भवितुम् अर्हति। परन्तु प्राचीनकाले मुद्रणयन्त्राणाम् अभावकारणात् वेदानां संरक्षणनिमित्तं कण्ठस्थी-करणे बलमासीत्। गुरुवचनं शृण्वन्तः छात्राः विषयम् अवगच्छन्ति, विषयावगतौ सत्यां बुद्धिविकाशः शनैः शनैः भवति। बुद्धिः उपलब्धिनिर्भरा। उपलब्धि विना बुद्धिविकासः न भवति। इदानींतनकाले आचार्याः छात्रेभ्यः उन्नतशिक्षाप्रदानार्थं विभिन्नकौशलानाम्, उपकरणानां, यन्त्राणां, तन्त्राणां, विधीनां च साहाय्यं स्वीकुर्वन्ति। छात्राः यावत् पर्यन्तं विषयोपलब्धि न कुर्वन्ति तावत् पर्यन्तं गुरुः तान् न त्यजति। अध्यापकाः छात्रान् पाठयन्ति, छात्राः विषयं श्रुत्वा अवगच्छन्ति। अनया पद्धत्या गुरुशिष्ययोः मध्ये मित्रवत् सम्बन्धः उत्पद्यते।*

**कुञ्चीशब्दाः** – बुद्धिः, संस्कृतम्, उपलब्धिः, योग्यता, शिक्षा चेत्यादयः।

= = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = = =

**भूमिका-**

**संस्कृतं नाम किम्?** सम्यक् कृतं संस्कृतम्। संस्कृतम् इति पदं सम्पूर्वक-डुकृञ्धातोः कर्मणि क्तप्रत्यये कृते सति **सम्परिभ्यां करोतौ भूषणे** इति सुडागमे निष्पद्यते। या भाषा संस्कृता परिमार्जिता परिशुद्धा परिपूर्णा अलङ्कारविभूषिता च भवति सा संस्कृतभाषा इत्युच्यते। संस्कृतभाषायां पाणिनेः मतानुसारं ६३ वर्णाः सन्ति। ते च स्वराः २२, व्यञ्जनानि ३३, अयोगवाहाः ८, स्वराणां ह्रस्वदीर्घप्लुतोदात्तानुदात्तस्वरितानुनासिका-ननुनासिकभेदेन नैके भेदाः जायन्ते। अस्यां भाषायामपेक्षिता ध्वनयः सन्ति। तेन भाषा भावाभिव्यक्तौ सर्वथा समर्था विद्यते। अत्र त्रीणि वचनानि, त्रीणि लिङ्गानि, त्रयः पुरुषाः सन्ति। किञ्च, संस्कृतभाषायाः व्याकरणनियमाः बहवः सन्ति। संस्कृतभाषाविषयकं शिक्षाग्रहणं भवति संस्कृतशिक्षणम्। अद्यतनसमये समाजे संस्कृतस्य गुणवत्ताह्रासस्य मुख्यकारणं भवति दोषपूर्णा शिक्षणपद्धतिः। येन संस्कृतभाषायाः मौलिकता-सरलता-सरसता-सहजता-समुचितबोधगम्यतादीनां ह्रासो भवति। प्राचीनकाले संस्कृतशिक्षा प्रकृतेः सुरम्यवातावरणे गुरुकुलेषु आश्रमेषु च दीयते स्म। अन्तेवासिनः गुरुगृहे निवासं कुर्वन्ति स्म। तदानीन्तनकाले शिक्षायाः मूलविषयः आसीत् श्रुतेरभ्यासः। मुद्रणयन्त्रणाम् अभावकारणात् वेदानां संरक्षणनिमित्तं कण्ठस्थीकरणे बलमासीत्। गुरुः समुपस्थितान् छात्रान् वृक्षाणाम् अधोभागे उपवेश्य मौखिकविधिना पाठयति स्म। तदारभ्य संस्कृतपठनपाठने अद्य पर्यन्तं शिक्षणपद्धतीनामुपरि भौगोलिक-प्राकृतिक-सामाजिक–वैज्ञानिकपरिस्थितीनां प्रभावः आपतितः। प्रभावानुगुणं संस्कृतशिक्षणपद्धतिष्वपि परिवर्तनं परिलक्ष्यते।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

**बुद्धेः सामान्यपरिचयः**

प्राचीनकालतः बुद्धिः व्यक्तीनां कार्ये तत्परतायाः, निपुणतायाः, समस्यासमाधानस्य क्षमतायाः निर्णायिका इति मनोवैज्ञानिकाः चिन्तयन्ति। सर्वे बुद्धिमन्तो न भवन्ति। मानसिकयोग्यता तेषाम् अक्षमतायाः प्रमुखकारणम्। बुद्धिः मनुष्याणाम् आन्तरिकी क्षमता भवति। इयं क्षमता बहिस्तात् द्रष्टुं न शक्यते। आचरणमाध्यमेन ज्ञातुं शक्यते अस्माभिः। बुद्धिशब्दस्य प्रयोगः स्मरणार्थं, शीघ्रं किमपि शिक्षणार्थं, तार्किकचिन्तनार्थं, विषयावगमनार्थञ्च भवति। बुद्धिः प्रत्यक्षरूपेण द्रष्टुं न शक्यते। परन्तु मनुष्याणाम् आचारव्यवहारादीनाम् ईक्षणेन बुद्धेः तारतम्यम् अवगन्तुं शक्यते। मनोवैज्ञानिकशास्त्रानुसारेण बुद्धिः वंशक्रमानुसारं निर्धारिता भवति। मनोवैज्ञानिकेषु बुद्धिशब्दस्य उपयोगः सामान्यार्थात् विशेषार्थेषु भवति। बुद्धिक्षमतायाः विकाशः कथं भवति एतस्य निर्धारणं वातावरणद्वारा कर्तुं शक्यते। विविधेषु जीवेषु मानवः बुद्धिकारणादेव श्रेष्ठः भवति। बुद्धिरेव मानवान् पशुभ्यः पृथक्करोति। मानवस्य एतस्याः योग्यतायाः परिज्ञानस्य प्रयासः प्राचीनकालादेव प्रचलितः आसीत्। विश्ववाङ्मयदर्शनेषु पुरातने भारतीयवाङ्मयेऽपि बहूनां विदुषां मतं तत्र उल्लिखितमस्ति। बुद्धौ स्मृतिसंस्कारौ विद्येते। बुद्धिरन्तःकरणरूपेणापि मन्यते। बुद्धिः शास्त्रेषु त्रिधा विभज्यते- सात्त्विकी, राजसिकी, तामसिकी चेति। आदिशङ्कराचार्यपादास्तु ज्ञानं बुद्धिवृत्तिः इति मन्वते। शास्त्रेषु बुद्धिः विवेकरूपेणापि कथिता वर्तते। आधुनिकयुगे बुद्धिर्ज्ञानरूपा मन्यते। उदाहरणरूपेण वदामः चेत् कश्चन बालकः स्वकीयं पाठ्यविषयं शीघ्रम् अवगच्छति चेत् सः बुद्धिमान् बालकः इति उच्यते। एवञ्च कोऽपि छात्रः प्रश्नस्य शीघ्रम् उत्तरं समाधानं वा यच्छति चेत् सः मेधावी बालकः इति वक्तुं शक्यते। मनोविज्ञानशास्त्रे विदुषा राइलमहोदयेन उक्तं यत् बुद्ध्या कस्यचित् गुणस्य बोधो न भवति प्रत्युत एतस्याः साहाय्येन सूचना प्राप्यते। बुद्धिः नाम का इत्यस्मिन् विषये मनोवैज्ञानिकानां मतभेदः अस्ति। मतभेदस्य.कारणात् बहुवारं मनोवैज्ञानिकाः संगोष्ठीमाध्यमेन आलोचनामपि कृतवन्तः। १९१० तमे वर्षे अंग्रेजमनोवैज्ञानिकाः तथा १९२१ तमे सम्वत्सरे आमेरिकादेशस्य मनोवैज्ञानिकाः बुद्धिः इत्यस्मिन् विषये संगोष्ठी आयोजिता। १९२३ तमे सम्वत्सरे मनोवैज्ञानिकानां मेलनार्थं विश्वसंगोष्ठी आयोजना आसीत्। रासमहोदयेन(Ross) उक्तं बुद्धौ स्मृति-कल्पना-भाषा-अवधान-गामक-योग्यता-संवेदनाः सम्मिलिताः सन्ति न वेति निश्चयेन वक्तुं न शक्यते।

**बुद्धिशब्दस्यार्थः**

बुद्धिशब्दस्य कृते आङ्गलभाषायां Intelligence इति उच्यते। Intelligence इति शब्दः Intelligentia or Intellegentia इति ल्याटिनशब्दात् आगतः। एतदाधारेण वक्तुं शक्यते यत् अवगमनाय क्षमता एव बुद्धिशब्दवाच्या। Intelligere इति ल्याटिनशब्दस्य अर्थः अवगमनम्।

बुद्धिविषये विविधानि मतानि दृश्यन्ते। तत्र काश्चन परिभाषा अधः प्रदर्श्यन्ते।

**बुद्धेः परिभाषाः**

बुद्धिः इत्यस्मिन् विषये आङ्गलभाषायां कथ्यते **Intelligence is an abstract thinking।**

**क. Buckingham महोदयानुसारम्**

"अधिगमक्षमतैव मानसिकयोग्यता"।

**ख. हविगहाँस-महोदयानुसारम्**

अधिगमक्षमता तथा पूर्वानुभवैर्लाभान्विततायाः क्षमतैव बुद्धिः।

**उपलब्धेः सामान्यपरिचयः**

व्यक्तिः स्वजीवने स्वानुभवेन प्रतिक्षणं प्रतिदिनं शिक्षते। छात्राः ज्ञानार्जनं कुर्वन्ति विभिन्नप्रकारककौशलानाम् आधारेण ज्ञानं वर्धयन्ति। तन्मध्ये अन्यतमा भवति उपलब्धिः। मानवैः कौशलस्याधारेण कियत् ज्ञानं अर्जितं तस्य योग्यतापरीक्षणम् उपलब्धिपरीक्षया क्रियते। विद्यालये विभिन्नकक्षासु भिन्नप्रकारकच्छात्राः शिक्षाप्राप्तये प्रविशन्ति। तत्र समानमानसिकयोग्यतायाः अभावात् समानकालावधौ विभिन्नविषयेषु कौशलेषु च समानप्रगतिं प्राप्तुमसमर्था भवन्ति छात्राः। उपलब्धेः मापनम् अथवा मूल्याङ्कनं कर्तुमेव उपलब्धिपरीक्षा क्रियते। उपलब्धिर्नाम छात्राणां समर्जितस्य ज्ञानस्य परिमाणं भवति। एवंरूपेण

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

वक्तुं शक्यते यत् उपलब्धिपरीक्षा तादृशी परीक्षा अस्ति यस्य सहायेन विद्यालयीयच्छात्त्राणां पठनाय विषयस्य तथा कौशलानां सहायेन कियत् साफल्यं प्राप्तं तत् उपलब्धिपरीक्षया विचारयितुं शक्यते।

शिक्षणेन अनुदेशेन वा छात्त्राः यत् किञ्चित् गृह्णन्ति रक्षन्ति च। इदं ग्रहणं रक्षणं च छात्त्राणाम् अधिगमक्षमतां निर्दिशतः। सामान्यतया कक्ष्यायाः वातावरणं विविधरूपेण सङ्घटितं यत् नानाक्रियाणां समन्वयकं भवति। अत्र शिक्षकक्रियाः छात्त्रक्रियाः पारस्परिकक्रियाश्च अन्तर्भवन्ति। यत्र च सम्प्रेषणं ग्रहणं चिन्तनम् अधिगमः मूल्याङ्कनमिति बहूनि तत्त्वानि प्रामुख्यानि भवन्ति। अस्यां प्रक्रियायाम् विवेकेन परस्परं तत्त्वानां पार्थक्यं विज्ञाय तदनुसारेण विविधक्रियाः निर्वर्तयन्ति अध्यापकाः। इमाः क्रियाः छात्त्राणां अधिगतकोशलमाश्रित्य भवन्ति। कक्षावातावरणञ्च अधिगन्तृकौशलस्य सम्प्रेरकं तदनुकुलं समस्यासमाधानात्मकं, मनोविज्ञानसङ्घटनात्मकञ्च भवति। अत एव विद्यालयेषु कक्षावातावरणे तदितरपरिस्थितौ च नानाविधोपलब्धयः छात्त्राणां स्वानुभवस्य आधारेण दृष्टिपथं यान्ति। कक्षावातावरणस्य अनन्यत्वात् परिवारापेक्षयाऽपि तेषाम् उपलब्धीनाम् आधिक्यं गुणवत्ता च दृश्यते। इयमुपलब्धिः अनुभवजन्यैव भवति। यद्यपि अनुभवः उपलब्धिः ज्ञानमिति एतत्सर्वं समानमेव तथाऽपि प्रवाहन्यायेन प्रथमतरङ्गः इव अनुभवः उत्तरोत्तरतरङ्गाः इव उपलब्धयः भवन्ति। सोऽयं सूक्ष्मः कश्चन भेदः मनोविज्ञानिभिः अङ्गीक्रियते। उपलब्धिनामकम् इदं तत्त्वं कक्ष्यावातावरणे सन्दृश्यमानं भेदम् आश्रित्य छात्त्रेषु अपि भेदं जनयति। परिवर्तनमिदं कक्षाशिक्षणे आधारितं चेत् शिक्षणेनाभिप्रेरितं परिवर्तनं भवति। शिक्षाद्वारा ज्ञानविकासः जायते। शिक्षया छात्त्रस्य व्यवहारस्य परिवर्तनं भवति। उत्तमवातावरणम् उत्तमोपलब्धि सामान्यञ्च सामान्योपलब्धिम् अधमञ्च अधमोपलब्धि जनयति। उपलब्धिरिति तत्त्वं बहून् विषयान् अन्तर्भाव्य वर्तते। उपलब्धिपरीक्षा प्रामुख्येन छात्त्राणाम् अधिगमस्वरूपमापनाय क्रियते। Garrison-महोदयः कथयति - The achievement test measures the present ability of the child on the external of his knowledge in a specific content area.

एतेन स्पष्टं भवति यत् क्रियाः, वैदुष्यम् चेति उभयमपि उपलब्धिपदवाच्यमिति। Achievement इति आङ्गलशब्दः उपलब्धिपर्यायः कोशेषु बहुधा विवृतो दृश्यते। तत्र उपलब्धिशब्दः द्विधा विभज्यते। प्रथमा तावत् सामान्योपलब्धिः या च जीवितस्य व्यक्तिविशेषस्य कस्मिश्चित् वातावरणे अर्ज्यमाना भवति। द्वितीया तु औपचारिके अनौपचारिके वा शिक्षासम्बन्धिवातावरणे समर्ज्यमाना भवति। इयमेवोपलब्धिः शैक्षिकोपलब्धिरिति कीर्त्यते। प्रकृतमध्ययनं तां शैक्षिकोपलब्धिमाश्रित्य प्रवर्तते। इयं हि शैक्षिकपलब्धिः Carter महोदयेन शिक्षाकोशे इत्थं परिभाषिता दृश्यते The Knowledge attained on skills developed in the school subjects usually designed by test Scores on by marks assigned by teacher on both.अर्थात् विद्यालये पाठ्यमानेषु विषयेषु यावान् अंशः ज्ञानभागः कौशलभागो वा अधिगन्त्रा समर्जितः तावान् अंशः उपलब्धिनाम्ना अभिधीयते। शैक्षिकोपलब्धिर्नाम वैदुष्यस्य कश्चन निर्दिष्टः स्तरः। अयञ्च स्तरः शिक्षकनिर्मितपरीक्षाभिः प्रमापितपरीक्षाभिः उभयविधपरीक्षाभिर्वा निश्चीयते। वस्तुतः विद्यालयेषु उपलब्धिरिति शब्दस्य कः अभिप्रायः इति चेत् शिक्षणोद्देश्यानां सम्प्राप्तिस्तरः एव उपलब्धिशब्देन सन्दर्शितः भवति। कक्षाविशेषस्य निर्दिष्टपाठ्यांशस्य कानिचन शैक्षिकोद्देश्यानि सम्भाव्यन्ते। तेषाम् उद्देश्यानाम् अधिगतिरेव शिक्षणाधिगमप्रक्रियायाः लक्ष्यं भवति। एवञ्च उपलब्धिर्नाम तानि शैक्षिकोद्देश्यानि कियत् पर्यन्तं छात्त्रैरधिगतानि इति सूचनादण्डः भवति। इमानि उद्देश्यानि एव पाठ्यचर्यायाः लक्ष्यभूतानि भवन्ति यानि च छात्त्रेषु अपेक्षितं परिवर्तनं सम्भावयन्ति। तथा च कस्यचित् ज्ञानांशस्य कौशलांशस्य वा निष्पादनसामर्थ्यस्य सम्प्राप्तिरेव उपलब्धिः भवति। इदम् अवधेयं भवति योग्यता उपलब्धिश्च समाने न भवतः इति। यतःयोग्यता तु

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

उपलब्धेः उपादनकारणं भवति न तु कार्यम्। अर्थात् उपलब्धिर्नाम "व्यक्तिविशेषेण" अर्ज्यमाना भवति योग्यता नाम मानसिकी शारीरिकी वा आन्तरिकी क्षमता भवति। यद्यपि उपलब्धिः योग्यतामाश्रित्य वर्तते तथापि योग्यता एव उपलब्धेः एकमात्रनिमित्तकारणं न भवति अपि तु कारणेषु आन्यतम्यं भजते। इदं स्पष्टं भवति यत् शिक्षकाः समीचीनतया पाठयन्ति चेत् छात्राः उपलब्धेः समीचीनतां प्राप्नुवन्ति। अत्र शिक्षकस्य एव प्रमुखम् अवदानं वर्तते। तदर्थम् उच्यते "**आचार्यः पूर्वरूपम् अन्तेवास्युत्तररूपम्, आचार्यवान् पुरुषो वेदः गुरुर्गुरुतमो धाम**" इत्याद्याः वैदिकवाचः स्मृतयश्च श्रूयन्ते। शिक्षकमन्तरा न क्वचित् जायते शिष्यः विदितवेद्यः। आसन् च केचन स्वयमागतविज्ञानाः तत्राऽपि परं मानसो गुरुर्हि निदानमिति मतं उक्तमस्ति। अत एव संस्कृतवाङ्मये आचार्यः प्रधानः कीर्तितो दृश्यते। एवमपि श्रूयते सत्सु बहुषु आचार्येषु शिष्याः आचार्यान् एव अभ्यागच्छन्तीति। श्रूयते कथानकं किञ्चित् - वैदिको विश्वामित्रः वशिष्ठाश्रमं प्रति बहुलं शिष्यगमनम् अधिचिन्त्य विस्मयमकार्षीदिति किमत्र निदानम् आश्रमान्तरम् अपहाय वशिष्टमेव अभ्यगच्छत् शिष्यः इत्यत्र विचार्यमाणे अस्ति एव किञ्चित् तत्त्वं शिक्षणक्षमतानामकम् इति स्पष्टम् अवगम्यते। छात्राणां गुरूणां प्राधान्यं कियत् अस्ति तत् अनेन श्लोकेन ज्ञातुं शक्यते -

**आचार्यात्पादमाधत्ते पादं शिष्यः स्वमेधया।**
**पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च ॥**

(सुभाषितम्)

शिष्यः आचार्यात् पादभागं ज्ञानं प्राप्नोति। स्वीयया बुद्धिशक्त्या अपरं पादभागं सम्पादयति। सहाध्यायिभ्यः अन्यत् पादभागम् आसादयति। कालक्रमेण अवशिष्टं पादपरिमितं ज्ञानं प्राप्स्यति। अतः छात्राणां गुरुपदमाश्रित्य ज्ञानस्याहरणं करणीयम्। छात्राणाम् उपलब्धि जनयति गुरुः। गुरुं विना अन्धकारमिदं जगत्।

संस्कृतवाङ्मये इमे शब्दाः परस्परं पर्यायेण प्रयुज्यते। यद्यपि शास्त्रकाराः क्वचिज्ज्ञानस्य द्वैविध्यमङ्गीकुर्वन्ति तथापि प्रायेण दर्शनेष्वेकविधमेव ज्ञानमङ्गीक्रियते। किन्तु वेदान्तादिदर्शनेषु व्यवहारिक-पारमार्थिकसत्तामाश्रित्य ज्ञानस्य द्वैविध्यमुरीक्रियते। इदं ज्ञानं दार्शनिकैः समेषां व्यवहाराणां हेतुरूपमङ्गीकृतम्।

**उपलब्धिशब्दस्यार्थः**

शिक्षणद्वारा ज्ञानविकासः जायते। तदाधिगम एव उपलब्धिः। उपोपसर्गात् "डुलभष् प्राप्तौ" इति धातोः क्तिन् प्रत्यये उपलब्धिः पदं निष्पद्यते। अधिगमप्रक्रियायां यो परिणामः जायते, या सफलता प्राप्यते तदुपलब्धिनाम्नाऽभिधीयते। उपलब्धिर्नाम छात्राणां समर्जितस्य ज्ञानस्य परिणाम भवति। उपलभ्यते इति उपलब्धिः इति व्युत्पत्या एव अयमंशः स्पष्टो भवति। अधिगतज्ञानस्य परिणामविशेषः एव उपलब्धिशब्देन व्यवह्रियते।

**परिभाषा**

**1. Carter महोदयानुसारम्**

The Knowledge attained on skills developed in the school subjects usually designed by test Scores on by marks assigned by teacher on both.

**2. प्रेसी, राबिन्सन्, हारकश्च**

उपलब्धिपरीक्षाः मुख्यतया छात्राणामधिगमस्वरूपस्य तत्सीम्नः च मापनार्थम् संरचिताः इति।

**3. Garrison and Others**

The Achievement test MEASURES the Present Ability of the child or the External of his Knowledge in a Specific content.

**4. Thorndike and Hagen**

When we use an achievement test, we are interested is determining what a person has learned to after he has been expired to a specific kind of instruction

अन्ततोगत्वा बुद्धिविषये तथा उपलब्धिविषये एवं चिन्तनं आगतम् - एकः अपरेण विना जीवितुं न शक्नोति। जीवनकाले उन्नतिप्राप्तये द्वयोः अवश्यकतास्ति। तैलं विना यथा यानं न अग्रे चलति तद्वत् उपलब्धि विना बुद्धिविकासः न सम्भवति। शिक्षणेऽपि उपलब्धि विना बुद्धिविकासः न भवति। अध्यापकाः छात्राणां

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

शिक्षावर्धनार्थं विविधोपलब्धिपरीक्षा-बुद्धिपरीक्षा-साहाय्येन पाठ्यक्रमं निर्मितवन्तः। छात्राणां ज्ञानवर्धनाय उपलब्धिपरीक्षायाः बुद्धिपरीक्षायाश्च महती आवश्यकतास्ति इत्यलम् अतिविस्तरेण।

## सहायकग्रन्थसूची


- पि. नागमुनिरेड्डि (२०११)। शिक्षामनोविज्ञानम्। हरेकृष्णसथपथी (सम्पा)। राष्ट्रियसंस्कृतविद्यापीठम्।
- प्रो.लोकमान्यमिश्रः (२०११)। आधुनिकशिक्षामनो-विज्ञानम्। गुण्डपल्लीश्रीरामकृष्णः (सम्पा)। राष्ट्रिय संस्कृत संस्थानम् जगदीश संस्कृत पुस्तकालयः।
- डाँ. बि. पद्ममित्रश्रीनिवासः (२०१२)। शिक्षा मनो-विज्ञानिकधाराः। आचार्यः पेरि सुब्बरायन् (सम्पा)॥ राष्ट्रिय संस्कृत संस्थानम् जगदीश संस्कृत पुस्तकालयः।

**परिशीलितशोधग्रन्थाः**

- डां सुरेश कुमारः (२००९)। शिक्षाशास्त्रे व्यक्तित्वस्याध्ययनम्। महर्षिकुमार भास्करः वर्मा संस्कृतमहाविद्यालयः।
- **PATHAKMURI MADHAVA RAO (२०१४)।** अन्धप्रदेशस्थावासीयानावासीय-विद्यालयच्छात्राणां बुद्धि-व्यक्तित्वसंस्कृतोपलब्धीनां तौलनिकाध्ययनम्। राष्ट्रियसंस्कृतविद्यापीठम्।
- प्रह्लाद आर्.. जोशी (२०११)। बुद्धिविकासे उपासना-प्रविधेः प्रभावस्याध्ययनम्। राष्ट्रियसंस्कृत-विद्यापीठम्।
- **उमाकान्तवारिकः (२०१५)**। ग्रामीणनगरीय-माध्यमिकसंस्कृतच्छात्राणां संस्कृताभिरुचि-सर्जनात्मकशक्ति-उपलब्ध्यभिप्रेरणा-पाठनाभ्यासानां तौलनिकमध्ययनम्। राष्ट्रियसंस्कृतविद्यापीठम्।
- **औम प्रकाशः** (२०११)। राजस्थानस्य जयपुरसम्भागस्य माध्यमिकस्तरे अधीयानानां संस्कृतच्छात्राणां कतिपयमनोवैज्ञानिकसामाजिक-कारकाणां सन्दर्भे उपलब्ध्यभिप्रेरणा-शैक्षिकोपलब्ध्योः तौलनिकमध्ययनम्। राष्ट्रियसंस्कृतविद्यापीठम्.
- Wikipedia

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# लेखकानां कृते निर्देशावलिः

- मनीषाख्यायां संस्कृतशोधपत्रिकायां संस्कृतसम्बन्धिविविधतत्त्वानामेव प्रकाशनं भवति।
- अस्यां पत्रिकायां संस्कृतभाषायां देवनागरीलिप्यां च लिखिताः शोधप्रबन्धा एव गृहीता भवन्ति।
- प्रेषितेषु शोधलेखेषु विद्वद्भिः परीक्षिताः शोधलेखा एव स्वीकृता भवन्ति। लेखानां चयने संशोधने परिवर्धने च सम्पादकमण्डली एव प्रमाणम्।
- मनीषाख्यायां शोधपत्रिकायां प्रकाशनार्थं प्रेषिताः शेधलेखाः शुद्धाः, मौलिकाः, प्रामाणिकाः, अन्यत्र कुत्रचित् पूर्वम् अप्रकाशिताश्च स्युः। एतदर्थं लेखकाः प्रमाणपत्रमेकं प्रयच्छेयुः।
- शोधप्रबन्धः २०००-२५००संख्यकैः शब्दैः लिखितः स्यात्।
- मनीषाख्यशोधपत्रिकायाः कृते शोधलेखस्य मूलप्रतिः प्रेषणीया। हस्तलिखितलेखाः छायाप्रतयश्च नैव स्वीक्रियन्ते। केवलं शुद्धटङ्किता लेखा एव गृह्यन्ते। A4-परिमिते पत्रे Unicode-आधारितदेवनागरीलिप्या (Sanskrit 2003, Lohit Hindi, Kalimati) अधोनिर्दिष्ट-अक्षरमानेन टङ्किताः स्युः। पार्श्वसीमा प्रतिदिशं १-इञ्च देया।
- प्रबन्धस्य अन्तिमे लेखकस्य नाम, वृत्तिः, सङ्केतः, दूरभाषक्रमाङ्कः, ई-मेलसङ्केतश्च अवश्यं लेखनीयम्।
- **शोधलेखे अवश्यं देयाः अंशाः**
  - ➢ शोधशीर्षकम् (यथासम्भवं लघु, विषयवस्तुबोधनसमर्थं च भवेत्) [अक्षरमानम् -१६]
  - ➢ लेखकनाम [अक्षरमानम् -१४]
  - ➢ प्रबन्धसारः [अक्षरमानम् -१०, italics]
  - ➢ कुञ्चीशब्दाः (पञ्च) [अक्षरमानम् -११]
  - ➢ विषयः (भूमिकादिरूपेण सज्जितः स्यात्) [अक्षरमानम् -११]
    - ❖ बिन्दुः (Points) - [अक्षरमानम् -१२, Bold]
  - ➢ सहायकग्रन्थसूची [अक्षरमानम् -११]
- **पादटिप्पणीनियमाः**
  - ➢ वेद-उपनिषद्-रामायण-भगवद्गीता-महाभारत-पुराण-अष्टाध्यायीसूत्र-ग्रन्थादिभ्यः मन्त्राणां श्लोकानां सूत्राणां वा उद्धरणे तेषां पार्श्वे एव [वाल्मिकीयरामायणम् ५४/३०-३१] इत्येवंरूपेण कर्तव्यम्।
  - ➢ पङ्क्तीनामुद्धरणविषये ग्रन्थः टीकारूपश्चेत् पादटिप्पण्यां मूलग्रन्थेन साकं टीकाया नाम अपि उल्लेख्यम्। यथा–

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

१कठोपनिषद् १-२-४ मन्त्रस्य शाङ्करभाष्यम्

- मूलग्रन्थेभ्यो यदि पङ्क्तयः स्वीक्रियन्ते तदा तद्ग्रन्थस्य नाम, अध्यायनाम, श्लोकसंख्यादिकं च प्रदेयम्।
- आधुनिकग्रन्थेभ्यो पङ्क्तीनामुद्धरणविषये तु ग्रन्थकारस्य नाम पृष्ठसंख्या च प्रदेया।
- पादटिप्पण्युक्तग्रन्थानां विस्तृतं विवरणं ग्रन्थसूचीमध्ये प्रदेयम्।

- **ग्रन्थसूचीनियमाश्च**
  - ग्रन्थकारः। (प्रकाशनवर्षम्)। ग्रन्थस्य नाम। सम्पादकः। प्रकाशनस्थानम् : प्रकाशकः। यथा–

भर्तृहरिः। (२००७)। वाक्यपदीयम् (ब्रह्मकाण्डम्)। खण्डूडी, सत्यनारायणः (सम्पा.)। वाराणसी : चौखम्बा संस्कृत संस्थान।

- लेखानां प्रेषयाण ई-पत्रसङ्केतः – manisha@sabangcollege.ac.in
- लेखसम्बन्धिजिज्ञासा पूर्वोक्त-ईपत्रसङ्केतमाध्यमेनैव प्रेषणीया।
- यथासमयं लेखः प्रेषणीयः।

शोधपत्रिकाविषये अधिकज्ञानार्थं https://sabangcollege.ac.in/e-journals/manisha-a-research-journal-of-sanskrit/ इति अन्तर्जालपत्रं पश्यतु।

ISSN : 2583-2271
Vol. - 3, No. 1: 2023

# उद्घोषणा

| | | |
|---|---|---|
| १. पत्रिकानाम | - | मनीषा |
| २. प्रकाशनावधिः | - | वार्षिकी |
| ३. भाषा | - | संस्कृतम् |
| ४. लिपिः | - | देवनागरी |
| ५. प्रकाशनस्थानम् | - | सबं-सजनीकान्तमहाविद्यालयः |
| ६. प्रकाशकस्य नाम | | स्नातकोत्तरसंस्कृतविभागः |
| ७. जातीयता | - | भारतीयः |
| ८. सङ्केतः | - | सबं-सजनीकान्तमहाविद्यालयः |
| ९. पत्रिकाधिकारिणो नाम सङ्केतश्च | - | प्रो. (ड.) तपनकुमारदत्तः, अध्यक्षः<br>सबं सजनीकान्तमहाविद्यालयः,<br>लुटुनिया, पश्चिममेदिनीपुरम्, ७२११६६,<br>पश्चिमबङ्गः |

अहं प्रो. (ड.) तपनकुमारदत्तः उपरि प्रदत्तं तथ्यजातं यथार्थमिति उद्घोषयामि।

प्रो. (डॉ.) तपनकुमारदत्तः
अध्यक्षः
सबं-सजनीकान्तमहाविद्यालयः